# 9 Shrimaddevibhagavatamahapurane Navamah Skandhah

# ૯ શ્રીમદ્દેવીભાગવતમહાપુરાણે નવમઃ સ્કન્ધઃ

## Document Information

Text title : Devi Bhagavata Mahapurana Skandha 09

File name : devIbhAgavatam09.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# 9 Shrimaddevibhagavatamahapurane Navamah Skandhah

# ૯ શ્રીમદ્દેવીભાગવતમહાપુરાણે નવમઃ સ્કન્ધઃ

## ૯.૧ પ્રથમોઽધ્યાયઃ । પ્રકૃતિચરિત્રવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ગણેશજનની દુર્ગા રાધા લક્ષ્મીઃ સરસ્વતી ।
સાવિત્રી ચ સૃષ્ટિવિધૌ પ્રકૃતિઃ પઞ્ચધા સ્મૃતા ॥ ૧॥

નારદ ઉવાચ ।
આવિર્બભૂવ સા કેન કા વા સા જ્ઞાનિનાંવર ।
કિં વા તલ્લક્ષણં સાધો બભૂવ પઞ્ચધા કથમ્ ॥ ૨॥

સર્વાસાં ચરિતં પૂજાવિધાનં ગુણ ઈપ્સિતઃ ।
અવતારઃ કુત્ર કસ્યાસ્તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
પ્રકૃતેર્લક્ષણં વત્સ કો વા વક્તું ક્ષમો ભવેત્ ।
કિઞ્ચિત્તથાપિ વક્ષ્યામિ યચ્છ્રુતં ધર્મવક્ત્રતઃ ॥ ૪॥

પ્રકૃષ્ટવાચકઃ પ્રશ્ન કૃતિશ્ચ સૃષ્ટિવાચકઃ ।
સૃષ્ટૌ પ્રકૃષ્ટા યા દેવી પ્રકૃતિઃ સા પ્રકીર્તિતા ॥ ૫॥

ગુણે સત્ત્વે પ્રકૃષ્ટે ચ પ્રશબ્દો વર્તતે શ્રુતઃ ।
મધ્યમે રજસિ કૃશ્ચ તિશબ્દસ્તમસિ સ્મૃતઃ ॥ ૬॥

ત્રિગુણાત્મસ્વરૂપા યા સા ચ શક્તિસમન્વિતા ।
પ્રધાના સૃષ્ટિકરણે પ્રકૃતિસ્તેન કથ્યતે ॥ ૭॥

પ્રથમે વર્તતે પ્રશ્ન કૃતિશ્ચ સૃષ્ટિવાચકઃ ।
સૃષ્ટેરાદૌ ચ યા દેવી પ્રકૃતિઃ સા પ્રકીર્તિતા ॥ ૮॥

યોગેનાત્મા સૃષ્ટિવિધૌ દ્વિધારૂપો બભૂવ સઃ ।
પુમાંશ્ચ દક્ષિણાર્ધાઙ્ગો વામાર્ધા પ્રકૃતિઃ સ્મૃતા ॥ ૯॥

સા ચ બ્રહ્મસ્વરૂપા ચ નિત્યા સા ચ સનાતની ।
યથાઽઽત્મા ચ તથા શક્તિર્યથાગ્નૌ દાહિકા સ્થિતા ॥ ૧૦॥

અત એવ હિ યોગીન્દ્રૈઃ સ્ત્રીપુમ્ભેદો ન મન્યતે ।
સર્વં બ્રહ્મમયં બ્રહ્મઞ્છશ્વત્સદપિ નારદ ॥ ૧૧॥

સ્વેચ્છામયસ્યેચ્છયા ચ શ્રીકૃષ્ણસ્ય સિસૃક્ષયા ।
સાઽઽવિર્બભૂવ સહસા મૂલપ્રકૃતિરીશ્વરી ॥ ૧૨॥

તદાજ્ઞયા પઞ્ચવિધા સૃષ્ટિકર્મવિભેદિકા ।
અથ ભક્તાનુરોધાદ્વા ભક્તાનુગ્રહવિગ્રહા ॥ ૧૩॥

ગણેશમાતા દુર્ગા યા શિવરૂપા શિવપ્રિયા ।
નારાયણી વિષ્ણુમાયા પૂર્ણબ્રહ્મસ્વરૂપિણી ॥ ૧૪॥

બ્રહ્માદિદેવૈર્મુનિભિર્મનુભિઃ પૂજિતા સ્તુતા ।
સર્વાધિષ્ઠાતૃદેવી સા શર્વરૂપા સનાતની ॥ ૧૫॥

ધર્મસત્યપુણ્યકીર્તિર્યશોમઙ્ગલદાયિની ।
સુખમોક્ષહર્ષદાત્રી શોકાર્તિદુઃખનાશિની ॥ ૧૬॥

શરણાગતદીનાર્તપરિત્રાણપરાયણા ।
તેજઃસ્વરૂપા પરમા તદધિષ્ઠાતૃદેવતા ॥ ૧૭॥

સર્વશક્તિસ્વરૂપા ચ શક્તિરીશસ્ય સન્તતમ્ ।
સિદ્ધેશ્વરી સિદ્ધિરૂપા સિદ્ધિદા સિદ્ધિરીશ્વરી ॥ ૧૮॥

બુદ્ધિર્નિદ્રા ક્ષુત્પિપાસા છાયા તન્દ્રા દયા સ્મૃતિઃ ।
જાતિઃ ક્ષાન્તિશ્ચ ભ્રાન્તિશ્ચ શાન્તિઃ કાન્તિશ્ચ ચેતના ॥ ૧૯॥

તુષ્ટિઃ પુષ્ટિસ્તથા લક્ષ્મીર્ધૃતિર્માયા તથૈવ ચ ।
સર્વશક્તિસ્વરૂપા સા કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૨૦॥

ઉક્તઃ શ્રુતૌ શ્રુતગુણશ્ચાતિસ્વલ્પો યથાગમમ્ ।
ગુણોઽસ્ત્યનન્તોઽનન્તાયા અપરાં ચ નિશામય ॥ ૨૧॥

શુદ્ધસત્ત્વસ્વરૂપા યા પદ્મા સા પરમાત્મનઃ ।
સર્વસમ્પત્સ્વરૂપા સા તદધિષ્ઠાતૃદેવતા ॥ ૨૨॥

કાન્તાતિદાન્તા શાન્તા ચ સુશીલા સર્વમઙ્ગલા ।
લોભમોહકામરોષમદાહઙ્કારવર્જિતા ॥ ૨૩॥

ભક્તાનુરક્તા પત્યુશ્ચ સર્વાભ્યશ્ચ પતિવ્રતા ।
પ્રાણતુલ્યા ભગવતઃ પ્રેમપાત્રં પ્રિયંવદા ॥ ૨૪॥

સર્વસસ્યાત્મિકા દેવી જીવનોપાયરૂપિણી ।
મહાલક્ષ્મીશ્ચ વૈકુણ્ઠે પતિસેવારતા સતી ॥ ૨૫॥

સ્વર્ગે ચ સ્વર્ગલક્ષ્મીશ્ચ રાજલક્ષ્મીશ્ચ રાજસુ ।
ગૃહેષુ ગૃહલક્ષ્મીશ્ચ મર્ત્યાનાં ગૃહિણાં તથા ॥ ૨૬॥

સર્વપ્રાણિષુ દ્રવ્યેષુ શોભારૂપા મનોહરા ।
કીર્તિરૂપા પુણ્યવતાં પ્રભારૂપા નૃપેષુ ચ ॥ ૨૭॥

વાણિજ્યરૂપા વણિજાં પાપિનાં કલહાઙ્કુરા ।
દયારૂપા ચ કથિતા વેદોક્તા સર્વસમ્મતા ॥ ૨૮॥

સર્વપૂજ્યા સર્વવન્દ્યા ચાન્યાં મત્તો નિશામય ।
વાગ્બુદ્ધિવિદ્યાજ્ઞાનાધિષ્ઠાત્રી ચ પરમાત્મનઃ ॥ ૨૯॥

સર્વવિદ્યાસ્વરૂપા યા સા ચ દેવી સરસ્વતી ।
સા બુદ્ધિઃ કવિતા મેધા પ્રતિભા સ્મૃતિદા નૃણામ્ ॥ ૩૦॥

નાનાપ્રકારસિદ્ધાન્તભેદાર્થકલના મતા ।
વ્યાખ્યાબોધસ્વરૂપા ચ સર્વસન્દેહભઞ્જિની ॥ ૩૧॥

વિચારકારિણી ગ્રન્થકારિણી શક્તિરૂપિણી ।
સ્વરસઙ્ગીતસન્ધાનતાલકારણરૂપિણી ॥ ૩૨॥

વિષયજ્ઞાનવાગ્રૂપા પ્રતિવિશ્વોપજીવિની ।
વ્યાખ્યાવાદકરી શાન્તા વીણાપુસ્તકધારિણી ॥ ૩૩॥

શુદ્ધસત્ત્વસ્વરૂપા ચ સુશીલા શ્રીહરિપ્રિયા ।
હિમચન્દનકુન્દેન્દુકુમુદામ્ભોજસન્નિભા ॥ ૩૪॥

યજન્તી પરમાત્માનં શ્રીકૃષ્ણં રત્નમાલયા ।
તપઃસ્વરૂપા તપસાં ફલદાત્રી તપસ્વિનામ્ ॥ ૩૫॥

સિદ્ધિવિદ્યાસ્વરૂપા ચ સર્વસિદ્ધિપ્રદા સદા ।
યયા વિના તુ વિપ્રૌઘો મૂકો મૃતસમઃ સદા ॥ ૩૬॥

દેવી તૃતીયા ગદિતા શ્રુત્યુક્તા જગદમ્બિકા ।

યથાગમં યથાકિઞ્ચિદપરાં ત્વં નિબોધ મે ॥ ૩૭॥

માતા ચતુર્ણાં વર્ણાનાં વેદાઙ્ગાનાં ચ છન્દસામ્ ।
સન્ધ્યાવન્દનમન્ત્રાણાં તન્ત્રાણાં ચ વિચક્ષણા ॥ ૩૮॥

દ્વિજાતિજાતિરૂપા ચ જપરૂપા તપસ્વિની ।
બ્રહ્મણ્યતેજોરૂપા ચ સર્વસંસ્કારરૂપિણી ॥ ૩૯॥

પવિત્રરૂપા સાવિત્રી ગાયત્રી બ્રહ્મણઃ પ્રિયા ।
તીર્થાનિ યસ્યાઃ સંસ્પર્શં વાઞ્છન્તિ હ્યાત્મશુદ્ધયે ॥ ૪૦॥

શુદ્ધસ્ફટિકસઙ્કાશા શુદ્ધસત્ત્વસ્વરૂપિણી ।
પરમાનન્દરૂપા ચ પરમા ચ સનાતની ॥ ૪૧॥

પરબ્રહ્મસ્વરૂપા ચ નિર્વાણપદદાયિની ।
બ્રહ્મતેજોમયી શક્તિસ્તદધિષ્ઠાતૃદેવતા ॥ ૪૨॥

યત્પાદરજસા પૂતં જગત્સર્વં ચ નારદ ।
દેવી ચતુર્થી કથિતા પઞ્ચમીં વર્ણયામિ તે ॥ ૪૩॥

પઞ્ચપ્રાણાધિદેવી યા પઞ્ચપ્રાણસ્વરૂપિણી ।
પ્રાણાધિકપ્રિયતમા સર્વાભ્યઃ સુન્દરી પરા ॥ ૪૪॥

સર્વયુક્તા ચ સૌભાગ્યમાનિની ગૌરવાન્વિતા ।
વામાઙ્ગાર્ધસ્વરૂપા ચ ગુણેન તેજસા સમા ॥ ૪૫॥

પરાવરા સારભૂતા પરમાદ્યા સનાતની ।
પરમાનન્દરૂપા ચ ધન્યા માન્યા ચ પૂજિતા ॥ ૪૬॥

રાસક્રીડાધિદેવી શ્રીકૃષ્ણસ્ય પરમાત્મનઃ ।
રાસમણ્ડલસમ્ભૂતા રાસમણ્ડલમણ્ડિતા ॥ ૪૭॥

રાસેશ્વરી સુરસિકા રાસાવાસનિવાસિની ।
ગોલોકવાસિની દેવી ગોપીવેષવિધાયિકા ॥ ૪૮॥

પરમાહ્લાદરૂપા ચ સન્તોષહર્ષરૂપિણી ।
નિર્ગુણા ચ નિરાકારા નિર્લિપ્તાઽઽત્મસ્વરૂપિણી ॥ ૪૯॥

નિરીહા નિરહઙ્કારા ભક્તાનુગ્રહવિગ્રહા ।
વેદાનુસારિધ્યાનેન વિજ્ઞાતા મા વિચક્ષણૈઃ ॥ ૫૦॥

દૃષ્ટિદૃષ્ટા ન સા ચેશૈઃ સુરેન્દ્રૈર્મુનિપુઙ્ગવૈઃ ।
વહ્નિશુદ્ધાંશુકધરા નાનાલઙ્કારભૂષિતા ॥ ૫૧॥

કોટિચન્દ્રપ્રભા પુષ્ટસર્વશ્રીયુક્તવિગ્રહા ।
શ્રીકૃષ્ણભક્તિદાસ્યૈકકરા ચ સર્વસમ્પદામ્ ॥ ૫૨॥

અવતારે ચ વારાહે વૃષભાનુસુતા ચ યા ।
યત્પાદપદ્મસંસ્પર્શાત્પવિત્રા ચ વસુન્ધરા ॥ ૫૩॥

બ્રહ્માદિભિરદૃષ્ટા યા સર્વૈર્દૃષ્ટા ચ ભારતે ।
સ્ત્રીરત્નસારસમ્ભૂતા કૃષ્ણવક્ષઃસ્થલે સ્થિતા ॥ ૫૪॥

યથામ્બરે નવઘને લોલા સૌદામની મુને ।
ષષ્ટિવર્ષસહસ્રાણિ પ્રતપ્તં બ્રહ્મણા પુરા ॥ ૫૫॥

યત્પાદપદ્મનખરદૃષ્ટયે ચાત્મશુદ્ધયે ।
ન ચ દૃષ્ટં ચ સ્વપ્નેઽપિ પ્રત્યક્ષસ્યાપિ કા કથા ॥ ૫૬॥

તેનૈવ તપસા દૃષ્ટા ભુવિ વૃન્દાવને વને ।
કથિતા પઞ્ચમી દેવી સા રાધા ચ પ્રકીર્તિતા ॥ ૫૭॥

અંશરૂપાઃ કલારૂપાઃ કલાંશાંશાંશસમ્ભવાઃ ।
પ્રકૃતેઃ પ્રતિવિશ્વેષુ દેવ્યશ્ચ સર્વયોષિતઃ ॥ ૫૮॥

પરિપૂર્ણતમાઃ પઞ્ચ વિદ્યાદેવ્યઃ પ્રકીર્તિતાઃ ।
યા યાઃ પ્રધાનાંશરૂપા વર્ણયામિ નિશામય ॥ ૫૯॥

પ્રધાનાંશસ્વરૂપા સા ગઙ્ગા ભુવનપાવની ।
વિષ્ણુવિગ્રહસમ્ભૂતા દ્રવરૂપા સનાતની ॥ ૬૦॥

પાપિપાપેધ્મદાહાય જ્વલદગ્નિસ્વરૂપિણી ।
સુખસ્પર્શા સ્નાનપાનૈર્નિર્વાણપદદાયિની ॥ ૬૧॥

ગોલોકસ્થાનપ્રસ્થાનસુખસોપાનરૂપિણી ।
પવિત્રરૂપા તીર્થાનાં સરિતાં ચ પરાવરા ॥ ૬૨॥

શમ્ભુમૌલિજટામેરુમુક્તાપઙ્ક્તિસ્વરૂપિણી ।
તપઃસમ્પાદિની સદ્યો ભારતેષુ તપસ્વિનામ્ ॥ ૬૩॥

ચન્દ્રપદ્મક્ષીરનિભા શુદ્ધસત્ત્વસ્વરૂપિણી ।
નિર્મલા નિરહઙ્કારા સાધ્વી નારાયણપ્રિયા ॥ ૬૪॥

પ્રધાનાંશસ્વરૂપા ચ તુલસી વિષ્ણુકામિની ।
વિષ્ણુભૂષણરૂપા ચ વિષ્ણુપાદસ્થિતા સતી ॥ ૬૫॥

તપઃસઙ્કલ્પપૂજાદિસઙ્ઘસમ્પાદિની મુને ।
સારભૂતા ચ પુષ્પાણાં પવિત્રા પુણ્યદા સદા ॥ ૬૬॥

દર્શનસ્પર્શનાભ્યાં ચ સદ્યો નિર્વાણદાયિની ।
કલૌ કલુષશુષ્કેધ્મદહનાયાગ્નિરૂપિણી ॥ ૬૭॥

યત્પાદપદ્મસંસ્પર્શાત્સદ્યઃ પૂતા વસુન્ધરા ।
યત્સ્પર્શદર્શને ચૈવેચ્છન્તિ તીર્થાનિ શુદ્ધયે ॥ ૬૮॥

યયા વિના ચ વિશ્વેષુ સર્વકર્મ ચ નિષ્ફલમ્ ।
મોક્ષદા યા મુમુક્ષૂણાં કામિની સર્વકામદા ॥ ૬૯॥

કલ્પવૃક્ષસ્વરૂપા યા ભારતે વૃક્ષરૂપિણી ।
ભારતીનાં પ્રીણનાય જાતા યા પરદેવતા ॥ ૭૦॥

પ્રધાનાંશસ્વરૂપા યા મનસા કશ્યપાત્મજા ।
શઙ્કરપ્રિયશિષ્યા ચ મહાજ્ઞાનવિશારદા ॥ ૭૧॥

નાગેશ્વરસ્યાનન્તસ્ય ભગિની નાગપૂજિતા ।
નાગેશ્વરી નાગમાતા સુન્દરી નાગવાહિની ॥ ૭૨॥

નાગેન્દ્રગણસંયુક્તા નાગભૂષણભૂષિતા ।
નાગેન્દ્રવન્દિતા સિદ્ધા યોગિની નગશાયિની ॥ ૭૩॥

વિષ્ણુરૂપા વિષ્ણુભક્તા વિષ્ણુપૂજાપરાયણા ।
તપઃસ્વરૂપા તપસાં ફલદાત્રી તપસ્વિની ॥ ૭૪॥

દિવ્યં ત્રિલક્ષવર્ષં ચ તપસ્તપ્ત્વા ચ યા હરેઃ ।
તપસ્વિનીષુ પૂજ્યા ચ તપસ્વિષુ ચ ભારતે ॥ ૭૫॥

સર્વમન્ત્રાધિદેવી ચ જ્વલન્તી બ્રહ્મતેજસા ।
બ્રહ્મસ્વરૂપા પરમા બ્રહ્મભાવનતત્પરા ॥ ૭૬॥

જરત્કારુમુનેઃ પત્ની કૃષ્ણાંશસ્ય પતિવ્રતા ।
આસ્તીકસ્ય મુનેર્માતા પ્રવરસ્ય તપસ્વિનામ્ ॥ ૭૭॥

પ્રધાનાંશસ્વરૂપા યા દેવસેના ચ નારદ ।

માતૃકાસુ પૂજ્યતમા સા ષષ્ઠી ચ પ્રકીર્તિતા ॥ ૭૮॥

પુત્રપૌત્રાદિદાત્રી ચ ધાત્રી ત્રિજગતાં સતી ।
ષષ્ઠાંશરૂપા પ્રકૃતેસ્તેન ષષ્ઠી પ્રકીર્તિતા ॥ ૭૯॥

સ્થાને શિશૂનાં પરમા વૃદ્ધરૂપા ચ યોગિની ।
પૂજા દ્વાદશમાસેષુ યસ્યા વિશ્વેષુ સન્તતમ્ ॥ ૮૦॥

પૂજા ચ સૂતિકાગારે પુરા ષષ્ઠદિને શિશોઃ ।
એકવિંશતિમે ચૈવ પૂજા કલ્યાણહેતુકી ॥ ૮૧॥

મુનિભિર્નમિતા ચૈષા નિત્યકામાપ્યતઃ પરા ।
માતૃકા ચ દયારૂપા શશ્વદ્રક્ષણકારિણી ॥ ૮૨॥

જલે સ્થલે ચાન્તરિક્ષે શિશૂનાં સદ્મગોચરે ।
પ્રધાનાંશસ્વરૂપા ચ દેવીમઙ્ગલચણ્ડિકા ॥ ૮૩॥

પ્રકૃતેર્મુખસમ્ભૂતા સર્વમઙ્ગલદા સદા ।
સૃષ્ટૌ મઙ્ગલરૂપા ચ સંહારે કોપરૂપિણી ॥ ૮૪॥

તેન મઙ્ગલચણ્ડી સા પણ્ડિતૈઃ પરિકીર્તિતા ।
પ્રતિમઙ્ગલવારેષુ પ્રતિવિશ્વેષુ પૂજિતા ॥ ૮૫॥

પુત્રપૌત્રધનૈશ્વર્યયશોમઙ્ગલદાયિની ।
પરિતુષ્ટા સર્વવાઞ્છાપ્રદાત્રી સર્વયોષિતામ્ ॥ ૮૬॥

રુષ્ટા ક્ષણેન સંહર્તું શક્તા વિશ્વં મહેશ્વરી ।
પ્રધાનાંશસ્વરૂપા સા કાલી કમલલોચના ॥ ૮૭॥

દુર્ગાલલાટસમ્ભૂતા રણે શુમ્ભનિશુમ્ભયોઃ ।
દુર્ગાર્ધાંશસ્વરૂપા સા ગુણેન તેજસા સમા ॥ ૮૮॥

કોટિસૂર્યસમાજુષ્ટપુષ્ટજાજ્વલવિગ્રહા ।
પ્રધાના સર્વશક્તીનાં બલા બલવતી પરા ॥ ૮૯॥

સર્વસિદ્ધિપ્રદા દેવી પરમા યોગરૂપિણી ।
કૃષ્ણભક્તા કૃષ્ણતુલ્યા તેજસા વિક્રમૈર્ગુણૈઃ ॥ ૯૦॥

કૃષ્ણભાવનયા શશ્વત્કૃષ્ણવર્ણા સનાતની ।
સંહર્તું સર્વબ્રહ્માણ્ડં શક્તા નિઃશ્વાસમાત્રતઃ ॥ ૯૧॥

રણં દૈત્યૈઃ સમં તસ્યાઃ ક્રીડયા લોકશિક્ષયા ।
ધર્માર્થકામમોક્ષાંશ્ચ દાતું શક્તા ચ પૂજિતા ॥ ૯૨॥

બ્રહ્માદિભિઃ સ્તૂયમાના મુનિભિર્મનુભિર્નરૈઃ ।
પ્રધાનાંશસ્વરૂપા સા પ્રકૃતેશ્ચ વસુન્ધરા ॥ ૯૩॥

આધારરૂપા સર્વેષાં સર્વસસ્યા પ્રકીર્તિતા ।
રત્નાકરા રત્નગર્ભા સર્વરત્નાકરાશ્રયા ॥ ૯૪॥

પ્રજાભિશ્ચ પ્રજેશૈશ્ચ પૂજિતા વન્દિતા સદા ।
સર્વોપજીવ્યરૂપા ચ સર્વસમ્પદ્વિધાયિની ॥ ૯૫॥

યયા વિના જગત્સર્વં નિરાધારં ચરાચરમ્ ।
પ્રકૃતેશ્ચ કલા યા યાસ્તા નિબોધ મુનીશ્વર ॥ ૯૬॥

યસ્ય યસ્ય ચ યા પત્ની તત્સર્વં વર્ણયામિ તે ।
સ્વાહાદેવી વહ્નિપત્ની પ્રતિવિશ્વેષુ પૂજિતા ॥ ૯૭॥

યયા વિના હવિર્દાનં ન ગ્રહીતું સુરાઃ ક્ષમાઃ ।
દક્ષિણા યજ્ઞપત્ની ચ દીક્ષા સર્વત્ર પૂજિતા ॥ ૯૮॥

યયા વિના હિ વિશ્વેષુ સર્વકર્મ હિ નિષ્ફલમ્ ।
સ્વધા પિતૃણાં પત્ની ચ મુનિભિર્મનુભિર્નરૈઃ ॥ ૯૯॥

પૂજિતા પિતૃદાનં હિ નિષ્ફલં ચ યયા વિના ।
સ્વસ્તિદેવી વાયુપત્ની પ્રતિવિશ્વેષુ પૂજિતા ॥ ૧૦૦॥

આદાનં ચ પ્રદાનં ચ નિષ્ફલં ચ યયા વિના ।
પુષ્ટિર્ગણપતેઃ પત્ની પૂજિતા જગતીતલે ॥ ૧૦૧॥

યયા વિના પરિક્ષીણાઃ પુમાંસો યોષિતોઽપિ ચ ।
અનન્તપત્ની તુષ્ટિશ્ચ પૂજિતા વન્દિતા ભવેત્ ॥ ૧૦૨॥

યયા વિના ન સન્તુષ્ટાઃ સર્વલોકાશ્ચ સર્વતઃ ।
ઈશાનપત્ની સમ્પત્તિઃ પૂજિતા ચ સુરૈર્નરૈઃ ॥ ૧૦૩॥

સર્વે લોકા દરિદ્રાશ્ચ વિશ્વેષુ ચ યયા વિના ।
ધૃતિઃ કપિલપત્ની ચ સર્વૈઃ સર્વત્ર પૂજિતા ॥ ૧૦૪॥

સર્વે લોકા અધૈર્યાશ્ચ જગત્સુ ચ યયા વિના ।
સત્યપત્ની સતી મુક્તૈઃ પૂજિતા ચ જગત્પ્રિયા ॥ ૧૦૫॥

યયા વિના ભવેલ્લોકો બન્ધુતારહિતઃ સદા ।
મોહપત્ની દયા સાધ્વી પૂજિતા ચ જગત્પ્રિયા ॥ ૧૦૬॥

સર્વે લોકાશ્ચ સર્વત્ર નિષ્ફલાશ્ચ યયા વિના ।
પુણ્યપત્ની પ્રતિષ્ઠા સા પૂજિતા પુણ્યદા સદા ॥ ૧૦૭॥

યયા વિના જગત્સર્વં જીવન્મૃતસમં મુને ।
સુકર્મપત્ની સંસિદ્ધા કીર્તિર્ધન્યૈશ્ચ પૂજિતા ॥ ૧૦૮॥

યયા વિના જગત્સર્વં યશોહીનં મૃતં યથા ।
ક્રિયા તૂદ્યોગપત્ની ચ પૂજિતા સર્વસમ્મતા ॥ ૧૦૯॥

યયા વિના જગત્સર્વં વિધિહીનં ચ નારદ ।
અધર્મપત્ની મિથ્યા સા સર્વધૂર્તૈશ્ચ પૂજિતા ॥ ૧૧૦॥

યયા વિના જગત્સર્વમુચ્છિન્નં વિધિનિર્મિતમ્ ।
સત્યે અદર્શના યા ચ ત્રેતાયાં સૂક્ષ્મરૂપિણી ॥ ૧૧૧॥

અર્ધાવયવરૂપા ચ દ્વાપરે ચૈવ સંવૃતા ।
કલૌ મહાપ્રગલ્ભા ચ સર્વત્ર વ્યાપિકા બલાત્ ॥ ૧૧૨॥

કપટેન સમં ભ્રાત્રા ભ્રમતે ચ ગૃહે ગૃહે ।
શાન્તિર્લજ્જા ચ ભાર્યે દ્વે સુશીલસ્ય ચ પૂજિતે ॥ ૧૧૩॥

યાભ્યાં વિના જગત્સર્વમુન્મત્તમિવ નારદ ।
જ્ઞાનસ્ય તિસ્રો ભાર્યાશ્ચ બુદ્ધિર્મેધાધૃતિસ્તથા ॥ ૧૧૪॥

યાભિર્વિના જગત્સર્વં મૂઢં મત્તસમં સદા ।
મૂર્તિશ્ચ ધર્મપત્ની સા કાન્તિરૂપા મનોહરા ॥ ૧૧૫॥

પરમાત્મા ચ વિશ્વૌઘો નિરાધારો યયા વિના ।
સર્વત્ર શોભારૂપા ચ લક્ષ્મીર્મૂર્તિમતી સતી ॥ ૧૧૬॥

શ્રીરૂપા મૂર્તિરૂપા ચ માન્યા ધન્યાતિપૂજિતા ।
કાલાગ્ની રુદ્રપત્ની ચ નિદ્રા સા સિદ્ધયોગિની ॥ ૧૧૭॥

સર્વે લોકાઃ સમાચ્છન્ના યયા યોગેન રાત્રિષુ ।
કાલસ્ય તિસ્રો ભાર્યાશ્ચ સન્ધ્યા રાત્રિર્દિનાનિ ચ ॥ ૧૧૮॥

યાભિર્વિના વિધાતા ચ સઙ્ખ્યાં કર્તું ન શક્યતે ।

ક્ષુત્પિપાસે લોભભાર્યે ધન્યે માન્યે ચ પૂજિતે ॥ ૧૧૯॥

યાભ્યાં વ્યાપ્તં જગત્સર્વં નિત્યં ચિન્તાતુરં ભવેત્ ।
પ્રભા ચ દાહિકા ચૈવ દ્વે ભાર્યે તેજસસ્તથા ॥ ૧૨૦॥

યાભ્યાં વિના જગત્સ્રષ્ટા વિધાતું ચ ન હીશ્વરઃ ।
કાલકન્યે મૃત્યુજરે પ્રજ્વારસ્ય પ્રિયાપ્રિયે ॥ ૧૨૧॥

યાભ્યાં જગત્સમુચ્છિન્નં વિધાત્રા નિર્મિતં વિધૌ ।
નિદ્રાકન્યા ચ તન્દ્રા સા પ્રીતિરન્યા સુખપ્રિયે ॥ ૧૨૨॥

યાભ્યાં વ્યાપ્તં જગત્સર્વં વિધિપુત્ર વિધેર્વિધૌ ।
વૈરાગ્યસ્ય ચ દ્વે ભાર્યે શ્રદ્ધા ભક્તિશ્ચ પૂજિતે ॥ ૧૨૩॥

યાભ્યાં શશ્વજ્જગત્સર્વં યજ્જીવન્મુક્તિમન્મુને ।
અદિતિર્દેવમાતા ચ સુરભી ચ ગવાં પ્રસૂઃ ॥ ૧૨૪॥

દિતિશ્ચ દૈત્યજનની કદ્રૂશ્ચ વિનતા દનુઃ ।
ઉપયુક્તાઃ સૃષ્ટિવિધાવેતાસ્તુ કીર્તિતાઃ કલાઃ ॥ ૧૨૫॥

કલા અન્યાઃ સન્તિ બહ્વ્યસ્તાસુ કાશ્ચિન્નિબોધ મે ।
રોહિણી ચન્દ્રપત્ની ચ સંજ્ઞા સૂર્યસ્ય કામિની ॥ ૧૨૬॥

શતરૂપા મનોર્ભાર્યા શચીન્દ્રસ્ય ચ ગેહિની ।
તારા બૃહસ્પતેર્ભાર્યા વસિષ્ઠસ્યાપ્યરુન્ધતી ॥ ૧૨૭॥

અહલ્યા ગૌતમસ્ત્રી સાપ્યનસૂયાત્રિકામિની ।
દેવહૂતિઃ કર્દમસ્ય પ્રસૂતિર્દક્ષકામિની ॥ ૧૨૮॥

પિતૃણાં માનસી કન્યા મેનકા સામ્બિકાપ્રસૂઃ ।
લોપામુદ્રા તથા કુન્તી કુબેરકામિની તથા ॥ ૧૨૯॥

વરુણાની પ્રસિદ્ધા ચ બલેર્વિન્ધ્યાવલિસ્તથા ।
કાન્તા ચ દમયન્તી ચ યશોદા દેવકી તથા ॥ ૧૩૦॥

ગાન્ધારી દ્રૌપદી શૈવ્યા સા ચ સત્યવતી પ્રિયા ।
વૃષભાનુપ્રિયા સાધ્વી રાધામાતા કુલોદ્વહા ॥ ૧૩૧॥

મન્દોદરી ચ કૌસલ્યા સુભદ્રા કૌરવી તથા ।
રેવતી સત્યભામા ચ કાલિન્દી લક્ષ્મણા તથા ॥ ૧૩૨॥

જામ્બવતી નાગ્નજિતિર્મિત્રવિન્દા તથાપરા ।
લક્ષ્મણા રુક્મિણી સીતા સ્વયં લક્ષ્મીઃ પ્રકીર્તિતા ॥ ૧૩૩॥

કાલી યોજનગન્ધા ચ વ્યાસમાતા મહાસતી ।
બાણપુત્રી તથોષા ચ ચિત્રલેખા ચ તત્સખી ॥ ૧૩૪॥

પ્રભાવતી ભાનુમતી તથા માયાવતી સતી ।
રેણુકા ચ ભૃગોર્માતા રામમાતા ચ રોહિણી ॥ ૧૩૫॥

એકનન્દા ચ દુર્ગા સા શ્રીકૃષ્ણભગિની સતી ।
બહ્વ્યઃ સત્યઃ કલાશ્ચૈવ પ્રકૃતેરેવ ભારતે ॥ ૧૩૬॥

યા યાશ્ચ ગ્રામદેવ્યઃ સ્યુસ્તાઃ સર્વાઃ પ્રકૃતેઃ કલાઃ ।
કલાંશાંશસમુદ્ભૂતાઃ પ્રતિવિશ્વેષુ યોષિતઃ ॥ ૧૩૭॥

યોષિતામવમાનેન પ્રકૃતેશ્ચ પરાભવઃ ।
બ્રાહ્મણી પૂજિતા યેન પતિપુત્રવતી સતી ॥ ૧૩૮॥

પ્રકૃતિઃ પૂજિતા તેન વસ્ત્રાલઙ્કારચન્દનૈઃ ।
કુમારી ચાષ્ટવર્ષીયા વસ્ત્રાલઙ્કારચન્દનૈઃ ॥ ૧૩૯॥

પૂજિતા યેન વિપ્રસ્ય પ્રકૃતિસ્તેન પૂજિતા ।
સર્વાઃ પ્રકૃતિસમ્ભૂતા ઉત્તમાધમમધ્યમાઃ ॥ ૧૪૦॥

સત્ત્વાંશાશ્ચોત્તમા જ્ઞેયાઃ સુશીલાશ્ચ પતિવ્રતાઃ ।
મધ્યમા રજસશ્ચાંશાસ્તાશ્ચ ભોગ્યાઃ પ્રકીર્તિતાઃ ॥ ૧૪૧॥

સુખસમ્ભોગવશ્યાશ્ચ સ્વકાર્યે તત્પરાઃ સદા ।
અધમાસ્તમસશ્ચાંશા અજ્ઞાતકુલસમ્ભવાઃ ॥ ૧૪૨॥

દુર્મુખાઃ કુલહા ધૂર્તાઃ સ્વતન્ત્રાઃ કલહપ્રિયાઃ ।
પૃથિવ્યાં કુલટા યાશ્ચ સ્વર્ગે ચાપ્સરસાં ગણાઃ ॥ ૧૪૩॥

પ્રકૃતેસ્તમસશ્ચાંશાઃ પુંશ્ચલ્યઃ પરિકીર્તિતાઃ ।
એવં નિગદિતં સર્વં પ્રકૃતે રૂપવર્ણનમ્ ॥ ૧૪૪॥

તાઃ સર્વાઃ પૂજિતાઃ પૃથ્વ્યાં પુણ્યક્ષેત્રે ચ ભારતે ।
પૂજિતા સુરથેનાદૌ દુર્ગા દુર્ગાર્તિનાશિની ॥ ૧૪૫॥

તતઃ શ્રીરામચન્દ્રેણ રાવણસ્ય વધાર્થિના ।
તત્પશ્ચાજ્જગતાં માતા ત્રિષુ લોકેષુ પૂજિતા ॥ ૧૪૬॥

જાતાઽઽદૌ દક્ષકન્યા યા નિહત્ય દૈત્યદાનવાન્ ।
તતો દેહં પરિત્યજ્ય યજ્ઞે ભર્તુશ્ચ નિન્દયા ॥ ૧૪૭॥

જજ્ઞે હિમવતઃ પત્ન્યાં લેભે પશુપતિં પતિમ્ ।
ગણેશશ્ચ સ્વયં કૃષ્ણઃ સ્કન્દો વિષ્ણુકલોદ્ભવઃ ॥ ૧૪૮॥

બભૂવતુસ્તૌ તનયૌ પશ્ચાત્તસ્યાશ્ચ નારદ ।
લક્ષ્મીર્મઙ્ગલભૂપેન પ્રથમં પરિપૂજિતા ॥ ૧૪૯॥

ત્રિષુ લોકેષુ તત્પશ્ચાદ્દેવતામુનિમાનવૈઃ ।
સાવિત્રી ચાશ્વપતિના પ્રથમં પરિપૂજિતા ॥ ૧૫૦॥

તત્પશ્ચાત્ત્રિષુ લોકેષુ દેવતામુનિપુઙ્ગવૈઃ ।
આદૌ સરસ્વતી દેવી બ્રહ્મણા પરિપૂજિતા ॥ ૧૫૧॥

તત્પશ્ચાત્ત્રિષુ લોકેષુ દેવતામુનિપુઙ્ગવૈઃ ।
પ્રથમં પૂજિતા રાધા ગોલોકે રાસમણ્ડલે ॥ ૧૫૨॥

પૌર્ણમાસ્યાં કાર્તિકસ્ય કૃષ્ણેન પરમાત્મના ।
ગોપિકાભિશ્ચ ગોપૈશ્ચ બાલિકાભિશ્ચ બાલકૈઃ ॥ ૧૫૩॥

ગવાં ગણૈઃ સુરભ્યા ચ તત્પશ્ચાદાજ્ઞયા હરેઃ ।
તદા બ્રહ્માદિભિર્દેવૈર્મુનિભિઃ પરયા મુદા ॥ ૧૫૪॥

પુષ્પધૂપાદિભિર્ભક્ત્યા પૂજિતા વન્દિતા સદા ।
પૃથિવ્યાં પ્રથમં દેવી સુયજ્ઞેનૈવ પૂજિતા ॥ ૧૫૫॥

શઙ્કરેણોપદિષ્ટેન પુણ્યક્ષેત્રે ચ ભારતે ।
ત્રિષુ લોકેષુ તત્પશ્ચાદાજ્ઞયા પરમાત્મનઃ ॥ ૧૫૬॥

પુષ્પધૂપાદિભિર્ભક્ત્યા પૂજિતા મુનિભિઃ સદા ।
કલા યા યાઃ સમુદ્ભૂતા પૂજિતાસ્તાશ્ચ ભારતે ॥ ૧૫૭॥

પૂજિતા ગ્રામદેવ્યશ્ચ ગ્રામે ચ નગરે મુને ।
એવં તે કથિતં સર્વં પ્રકૃતેશ્ચરિતં શુભમ્ ॥ ૧૫૮॥

યથાગમં લક્ષણં ચ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે

પ્રકૃતિચરિત્રવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૯.૧॥

## ૯.૨ દ્વિતીયોઽધ્યાયઃ । પઞ્ચપ્રકૃતિતદ્ભર્તૃગણોત્પત્તિવર્ણનમ્ ।

નારદ ઉવાચ ।
સમાસેન શ્રુતં સર્વં દેવીનાં ચરિતં પ્રભો ।
વિબોધનાય બોધસ્ય વ્યાસેન વક્તુમર્હસિ ॥ ૧॥

સૃષ્ટેરાદ્યા સૃષ્ટિવિધૌ કથમાવિર્બભૂવ હ ।
કથં વા પઞ્ચધા ભૂતા વદ વેદવિદાંવર ॥ ૨॥

ભૂતા યયાંશકલયા તયા ત્રિગુણયા ભવે ।
વ્યાસેન તાસાં ચરિતં શ્રોતુમિચ્છામિ સામ્પ્રતમ્ ॥ ૩॥

તાસાં જન્માનુકથનં પૂજાધ્યાનવિધિં બુધ ।
સ્તોત્રં કવચમૈશ્વર્યં શૌર્યં વર્ણય મઙ્ગલમ્ ॥ ૪॥

શ્રીનારાયણ ઉવાચ ।
નિત્ય આત્મા નભો નિત્યં કાલો નિત્યો દિશો યથા ।
વિશ્વાનાં ગોલકં નિત્યં નિત્યો ગોલોક એવ ચ ॥ ૫॥

તદેકદેશો વૈકુણ્ઠો નમ્રભાગાનુસારકઃ ।
તથૈવ પ્રકૃતિર્નિત્યા બ્રહ્મલીલા સનાતની ॥ ૬॥

યથાગ્નૌ દાહિકા ચન્દ્રે પદ્મે શોભા પ્રભા રવૌ ।
શશ્વદ્યુક્તા ન ભિન્ના સા તથા પ્રકૃતિરાત્મનિ ॥ ૭॥

વિના સ્વર્ણં સ્વર્ણકારઃ કુણ્ડલં કર્તુમક્ષમઃ ।
વિના મૃદા ઘટં કર્તું કુલાલો હિ નહીશ્વરઃ ॥ ૮॥

ન હિ ક્ષમસ્તથાત્મા ચ સૃષ્ટિં સ્રષ્ટું તયા વિના ।
સર્વશક્તિસ્વરૂપા સા યયા ચ શક્તિમાન્સદા ॥ ૯॥

ઐશ્વર્યવચનઃ શશ્ચ ક્તિઃ પરાક્રમ એવ ચ ।
તત્સ્વરૂપા તયોર્દાત્રી સા શક્તિઃ પરિકીર્તિતા ॥ ૧૦॥

જ્ઞાનં સમૃદ્ધિઃ સમ્પત્તિર્યશશ્ચૈવ બલં ભગઃ ।
તેન શક્તિર્ભગવતી ભગરૂપા ચ સા સદા ॥ ૧૧॥

તયા યુક્તઃ સદાત્મા ચ ભગવાંસ્તેન કથ્યતે ।

સ ચ સ્વેચ્છામયો દેવઃ સાકારશ્ચ નિરાકૃતિઃ ॥ ૧૨॥

તેજોરૂપં નિરાકારં ધ્યાયન્તે યોગિનઃ સદા ।
વદન્તિ ચ પરં બ્રહ્મ પરમાનન્દમીશ્વરમ્ ॥ ૧૩॥

અદૃશ્યં સર્વદ્રષ્ટારં સર્વજ્ઞં સર્વકારણમ્ ।
સર્વદં સર્વરૂપં તં વૈષ્ણવાસ્તન્ન મન્વતે ॥ ૧૪॥

વદન્તિ ચૈવ તે કસ્ય તેજસ્તેજસ્વિના વિના ।
તેજોમણ્ડલમધ્યસ્થં બ્રહ્મ તેજસ્વિનં પરમ્ ॥ ૧૫॥

સ્વેચ્છામયં સર્વરૂપં સર્વકારણકારણમ્ ।
અતીવ સુન્દરં રૂપં બિભ્રતં સુમનોહરમ્ ॥ ૧૬॥

કિશોરવયસં શાન્તં સર્વકાન્તં પરાત્પરમ્ ।
નવીનનીરદાભાસધામૈકં શ્યામવિગ્રહમ્ ॥ ૧૭॥

શરન્મધ્યાહ્નપદ્મૌઘશોભામોચનલોચનમ્ ।
મુક્તાચ્છવિવિનિન્દ્યૈકદન્તપઙ્ક્તિમનોરમમ્ ॥ ૧૮॥

મયૂરપિચ્છચૂડં ચ માલતીમાલ્યમણ્ડિતમ્ ।
સુનસં સસ્મિતં કાન્તં ભક્તાનુગ્રહકારણમ્ ॥ ૧૯॥

જ્વલદગ્નિવિશુદ્ધૈકપીતાંશુકસુશોભિતમ્ ।
દ્વિભુજં મુરલીહસ્તં રત્નભૂષણભૂષિતમ્ ॥ ૨૦॥

સર્વાધારં ચ સર્વેશં સર્વશક્તિયુતં વિભુમ્ ।
સર્વૈશ્વર્યપ્રદં સર્વસ્વતન્ત્રં સર્વમઙ્ગલમ્ ॥ ૨૧॥

પરિપૂર્ણતમં સિદ્ધં સિદ્ધેશં સિદ્ધિકારકમ્ ।
ધ્યાયન્તે વૈષ્ણવાઃ શશ્વદ્દેવદેવં સનાતનમ્ ॥ ૨૨॥

જન્મમૃત્યુજરાવ્યાધિશોકભીતિહરં પરમ્ ।
બ્રહ્મણો વયસા યસ્ય નિમેષ ઉપચર્યતે ॥ ૨૩॥

સ ચાત્મા સ પરં બ્રહ્મ કૃષ્ણ ઇત્યભિધીયતે ।
કૃષિસ્તદ્ભક્તિવચનો નશ્ચ તદ્દાસ્યવાચકઃ ॥ ૨૪॥

ભક્તિદાસ્યપ્રદાતા યઃ સ ચ કૃષ્ણઃ પ્રકીર્તિતઃ ।
કૃષિશ્ચ સર્વવચનો નકારો બીજમેવ ચ ॥ ૨૫॥

સ કૃષ્ણઃ સર્વસ્રષ્ટાઽઽદૌ સિસૃક્ષન્નેક એવ ચ ।
સૃષ્ટ્યુન્મુખસ્તદંશેન કાલેન પ્રેરિતઃ પ્રભુઃ ॥ ૨૬॥

સ્વેચ્છામયઃ સ્વેચ્છયા ચ દ્વિધારૂપો બભૂવ હ ।
સ્ત્રીરૂપો વામભાગાંશો દક્ષિણાંશઃ પુમાન્સ્મૃતઃ ॥ ૨૭॥

તાં દદર્શ મહાકામી કામાધારાં સનાતનઃ ।
અતીવ કમનીયા ચ ચારુપઙ્કજસન્નિભામ્ ॥ ૨૮॥

ચન્દ્રબિમ્બવિનિન્દ્યૈકનિતમ્બયુગલાં પરામ્ ।
સુચારુકદલીસ્તમ્ભનિન્દિતશ્રોણિસુન્દરીમ્ ॥ ૨૯॥

શ્રીયુક્તશ્રીફલાકારસ્તનયુગ્મમનોરમામ્ ।
પુષ્પજુષ્ટાં સુવલિતાં મધ્યક્ષીણાં મનોહરામ્ ॥ ૩૦॥

અતીવ સુન્દરીં શાન્તાં સસ્મિતાં વક્રલોચનામ્ ।
વહ્નિશુદ્ધાંશુકાધારાં રત્નભૂષણભૂષિતામ્ ॥ ૩૧॥

શશ્વચ્ચક્ષુશ્ચકોરાભ્યાં પિબન્તીં સતતં મુદા ।
કૃષ્ણસ્ય મુખચન્દ્રં ચ ચન્દ્રકોટિવિનિન્દિતમ્ ॥ ૩૨॥

કસ્તૂરીબિન્દુના સાર્ધમધશ્ચન્દનબિન્દુના ।
સમં સિન્દૂરબિન્દું ચ ભાલમધ્યે ચ બિભ્રતીમ્ ॥ ૩૩॥

વક્રિમં કબરીભારં માલતીમાલ્યભૂષિતમ્ ।
રત્નેન્દ્રસારહારં ચ દધતીં કાન્તકામુકીમ્ ॥ ૩૪॥

કોટિચન્દ્રપ્રભામૃષ્ટપુષ્ટશોભાસમન્વિતામ્ ।
ગમનેન રાજહંસગજગર્વવિનાશિનીમ્ ॥ ૩૫॥

દૃષ્ટ્વા તાં તુ તયા સાર્ધં રાસેશો રાસમણ્ડલે ।
રાસોલ્લાસે સુરસિકો રાસક્રીડાઞ્ચકાર હ ॥ ૩૬॥

નાનાપ્રકારશૃઙ્ગારં શૃઙ્ગારો મૂર્તિમાનિવ ।
ચકાર સુખસમ્ભોગં યાવદ્વૈ બ્રહ્મણો દિનમ્ ॥ ૩૭॥

તતઃ સ ચ પરિશ્રાન્તસ્તસ્યા યોનૌ જગત્પિતા ।
ચકાર વીર્યાધાનં ચ નિત્યાનન્દે શુભક્ષણે ॥ ૩૮॥

ગાત્રતો યોષિતસ્તસ્યાઃ સુરતાન્તે ચ સુવ્રત ।
નિઃસસાર શ્રમજલં શ્રાન્તાયાસ્તેજસા હરેઃ ॥ ૩૯॥

મહાક્રમણક્લિષ્ટાયા નિઃશ્વાસશ્ચ બભૂવ હ ।
તદા વવ્રે શ્રમજલં તત્સર્વં વિશ્વગોલકમ્ ॥ ૪૦॥

સ ચ નિઃશ્વાસવાયુશ્ચ સર્વાધારો બભૂવ હ ।
નિઃશ્વાસવાયુઃ સર્વેષાં જીવિનાં ચ ભવેષુ ચ ॥ ૪૧॥

બભૂવ મૂર્તિમદ્વાયોર્વામાઙ્ગાત્પ્રાણવલ્લભા ।
તત્પત્ની સા ચ તત્પુત્રાઃ પ્રાણાઃ પઞ્ચ ચ જીવિનામ્ ॥ ૪૨॥

પ્રાણોઽપાનઃ સમાનશ્ચોદાનવ્યાનૌ ચ વાયવઃ ।
બભૂવુરેવ તત્પુત્રા અધઃ પ્રાણાશ્ચ પઞ્ચ ચ ॥ ૪૩॥

ઘર્મતોયાધિદેવશ્ચ બભૂવ વરુણો મહાન્ ।
તદ્વામાઙ્ગાચ્ચ તત્પત્ની વરુણાની બભૂવ સા ॥ ૪૪॥

અથ સા કૃષ્ણચિચ્છક્તિઃ કૃષ્ણગર્ભં દધાર હ ।
શતમન્વન્તરં યાવજ્જ્વલન્તી બ્રહ્મતેજસા ॥ ૪૫॥

કૃષ્ણપ્રાણાધિદેવી સા કૃષ્ણપ્રાણાધિકપ્રિયા ।
કૃષ્ણસ્ય સઙ્ગિની શશ્વત્કૃષ્ણવક્ષઃસ્થલસ્થિતા ॥ ૪૬॥

શતમન્વન્તરાન્તે ચ કાલેઽતીતે તુ સુન્દરી ।
સુષાવ ડિમ્ભં સ્વર્ણાભં વિશ્વાધારાલયં પરમ્ ॥ ૪૭॥

દૃષ્ટ્વા ડિમ્ભં ચ સા દેવી હૃદયેન વ્યદૂયત ।
ઉત્સસર્જ ચ કોપેન બ્રહ્માણ્ડગોલકે જલે ॥ ૪૮॥

દૃષ્ટ્વા કૃષ્ણશ્ચ તત્ત્યાગં હાહાકારં ચકાર હ ।
શશાપ દેવીં દેવેશસ્તત્ક્ષણં ચ યથોચિતમ્ ॥ ૪૯॥

યતોઽપત્યં ત્વયા ત્યક્તં કોપશીલે ચ નિષ્ઠુરે ।
ભવ ત્વમનપત્યાપિ ચાદ્યપ્રભૃતિ નિશ્ચિતમ્ ॥ ૫૦॥

યા યાસ્ત્વદંશરૂપાશ્ચ ભવિષ્યન્તિ સુરસ્ત્રિયઃ ।
અનપત્યાશ્ચ તાઃ સર્વાસ્ત્વત્સમા નિત્યયૌવનાઃ ॥ ૫૧॥

એતસ્મિન્નન્તરે દેવી જિહ્વાગ્રાત્સહસા તતઃ ।
આવિર્બભૂવ કન્યૈકા શુક્લવર્ણા મનોહરા ॥ ૫૨॥

શ્વેતવસ્ત્રપરીધાના વીણાપુસ્તકધારિણી ।

રત્નભૂષણભૂષાઢ્યા સર્વશાસ્ત્રાધિદેવતા ॥ ૫૩॥

અથ કાલાન્તરે સા ચ દ્વિધારૂપો બભૂવ હ ।
વામાર્ધાઙ્ગાચ્ચ કમલા દક્ષિણાર્ધાચ્ચ રાધિકા ॥ ૫૪॥

એતસ્મિન્નન્તરે કૃષ્ણો દ્વિધારૂપો બભૂવ સઃ ।
દક્ષિણાર્ધશ્ચ દ્વિભુજો વામાર્ધશ્ચ ચતુર્ભુજઃ ॥ ૫૫॥

ઉવાચ વાણીં કૃષ્ણસ્તાં ત્વમસ્ય કામિની ભવ ।
અત્રૈવ માનિની રાધા તવ ભદ્રં ભવિષ્યતિ ॥ ૫૬॥

એવં લક્ષ્મીં ચ પ્રદદૌ તુષ્ટો નારાયણાય ચ ।
સ જગામ ચ વૈકુણ્ઠં તાભ્યાં સાર્ધં જગત્પતિઃ ॥ ૫૭॥

અનપત્યે ચ તે દ્વે ચ જાતે રાધાંશસમ્ભવે ।
ભૂતા નારાયણાઙ્ગાચ્ચ પાર્ષદાશ્ચ ચતુર્ભુજાઃ ॥ ૫૮॥

તેજસા વયસા રૂપગુણાભ્યાં ચ સમા હરેઃ ।
બભૂવુઃ કમલાઙ્ગાચ્ચ દાસીકોટ્યશ્ચ તત્સમાઃ ॥ ૫૯॥

અથ ગોલોકનાથસ્ય લોમ્નાં વિવરતો મુને ।
ભૂતાશ્ચાસઙ્ખ્યગોપાશ્ચ વયસા તેજસા સમાઃ ॥ ૬૦॥

રૂપેણ ચ ગુણેનૈવ બલેન વિક્રમેણ ચ ।
પ્રાણતુલ્યપ્રિયાઃ સર્વે બભૂવુઃ પાર્ષદા વિભોઃ ॥ ૬૧॥

રાધાઙ્ગલોમકૂપેભ્યો બભૂવુર્ગોપકન્યકાઃ ।
રાધાતુલ્યાશ્ચ તાઃ સર્વા રાધાદાસ્યઃ પ્રિયંવદાઃ ॥ ૬૨॥

રત્નભૂષણભૂષાઢ્યાઃ શશ્વત્સુસ્થિરયૌવનાઃ ।
અનપત્યાશ્ચ તાઃ સર્વાઃ પુંસઃ શાપેન સન્તતમ્ ॥ ૬૩॥

એતસ્મિન્નન્તરે વિપ્ર સહસા કૃષ્ણદેવતા ।
આવિર્બભૂવ દુર્ગા સા વિષ્ણુમાયા સનાતની ॥ ૬૪॥

દેવી નારાયણીશાના સર્વશક્તિસ્વરૂપિણી ।
બુદ્ધ્યધિષ્ઠાત્રી દેવી સા કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૬૫॥

દેવીનાં બીજરૂપા ચ મૂલપ્રકૃતિરીશ્વરી ।
પરિપૂર્ણતમા તેજઃસ્વરૂપા ત્રિગુણાત્મિકા ॥ ૬૬॥

તપ્તકાઞ્ચનવર્ણાભા કોટિસૂર્યસમપ્રભા ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યા સહસ્રભુજસંયુતા ॥ ૬૭॥

નાનાશસ્ત્રાસ્ત્રનિકરં બિભ્રતી સા ત્રિલોચના ।
વહ્નિશુદ્ધાંશુકાધાના રત્નભૂષણભૂષિતા ॥ ૬૮॥

યસ્યાશ્ચાંશાંશકલયા બભૂવુઃ સર્વયોષિતઃ ।
સર્વે વિશ્વસ્થિતા લોકા મોહિતાઃ સ્યુશ્ચ માયયા ॥ ૬૯॥

સર્વૈશ્વર્યપ્રદાત્રી ચ કામિનાં ગૃહવાસિનામ્ ।
કૃષ્ણભક્તિપ્રદા યા ચ વૈષ્ણવાનાં ચ વૈષ્ણવી ॥ ૭૦॥

મુમુક્ષૂણાં મોક્ષદાત્રી સુખિનાં સુખદાયિની ।
સ્વર્ગેષુ સ્વર્ગલક્ષ્મીશ્ચ ગૃહલક્ષ્મીર્ગૃહેષુ ચ ॥ ૭૧॥

તપસ્વિષુ તપસ્યા ચ શ્રીરૂપા તુ નૃપેષુ ચ ।
યા વહ્નૌ દાહિકારૂપા પ્રભારૂપા ચ ભાસ્કરે ॥ ૭૨॥

શોભારૂપા ચ ચન્દ્રે ચ સા પદ્મેષુ ચ શોભના ।
સર્વશક્તિસ્વરૂપા યા શ્રીકૃષ્ણે પરમાત્મનિ ॥ ૭૩॥

યયા ચ શક્તિમાનાત્મા યયા ચ શક્તિમજ્જગત્ ।
યયા વિના જગત્સર્વં જીવન્મૃતમિવ સ્થિતમ્ ॥ ૭૪॥

યા ચ સંસારવૃક્ષસ્ય બીજરૂપા સનાતની ।
સ્થિતિરૂપા વૃદ્ધિરૂપા ફલરૂપા ચ નારદ ॥ ૭૫॥

ક્ષુત્પિપાસાદયારૂપા નિદ્રા તન્દ્રા ક્ષમા મતિઃ ।
શાન્તિલજ્જાતુષ્ટિપુષ્ટિભ્રાન્તિકાન્ત્યાદિરૂપિણી ॥ ૭૬॥

સા ચ સંસ્તૂય સર્વેશં તત્પુરઃ સમુવાસ હ ।
રત્નસિંહાસનં તસ્યૈ પ્રદદૌ રાધિકેશ્વરઃ ॥ ૭૭॥

એતસ્મિન્નન્તરે તત્ર સસ્ત્રીકશ્ચ ચતુર્મુખઃ ।
પદ્મનાભેર્નાભિપદ્માન્નિઃસસાર મહામુને ॥ ૭૮॥

કમણ્ડલુધરઃ શ્રીમાંસ્તપસ્વી જ્ઞાનિનાં વરઃ ।
ચતુર્મુખૈસ્તં તુષ્ટાવ પ્રજ્વલન્બ્રહ્મતેજસા ॥ ૭૯॥

સા તદા સુન્દરી સૃષ્ટા શતચન્દ્રસમપ્રભા ।
વહ્નિશુદ્ધાંશુકાધાના રત્નભૂષણભૂષણા ॥ ૮૦॥

રત્નસિંહાસને રમ્યે સંસ્તૂય સર્વકારણમ્ ।
ઉવાસ સ્વામિના સાર્ધં કૃષ્ણસ્ય પુરતો મુદા ॥ ૮૧॥

એતસ્મિન્નન્તરે કૃષ્ણો દ્વિધારૂપો બભૂવ સઃ ।
વામાર્ધાઙ્ગો મહાદેવો દક્ષિણે ગોપિકાપતિઃ ॥ ૮૨॥

શુદ્ધસ્ફટિકસઙ્કાશઃ શતકોટિરવિપ્રભઃ ।
ત્રિશૂલપટ્ટિશધરો વ્યાઘ્રચર્મામ્બરો હરઃ ॥ ૮૩॥

તપ્તકાઞ્ચનવર્ણાભો જટાભારધરઃ પરઃ ।
ભસ્મભૂષિતગાત્રશ્ચ સસ્મિતશ્ચન્દ્રશેખરઃ ॥ ૮૪॥

દિગમ્બરો નીલકણ્ઠઃ સર્પભૂષણભૂષિતઃ ।
બિભ્રદ્દક્ષિણહસ્તેન રત્નમાલાં સુસંસ્કૃતામ્ ॥ ૮૫॥

પ્રજપન્પઞ્ચવક્ત્રેણ બ્રહ્મજ્યોતિઃ સનાતનમ્ ।
સત્યસ્વરૂપં શ્રીકૃષ્ણં પરમાત્માનમીશ્વરમ્ ॥ ૮૬॥

કારણં કારણાનાં ચ સર્વમઙ્ગલમઙ્ગલમ્ ।
જન્મમૃત્યુજરાવ્યાધિશોકભીતિહરં પરમ્ ॥ ૮૭॥

સંસ્તૂય મૃત્યોર્મૃત્યું તં યતો મૃત્યુઞ્જયાભિધઃ ।
રત્નસિંહાસને રમ્યે સમુવાસ હરેઃ પુરઃ ॥ ૮૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
પઞ્ચપ્રકૃતિતદ્ભર્તૃગણોત્પત્તિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૯.૨॥

## ૯.૩ તૃતીયોઽધ્યાયઃ । બ્રહ્મવિષ્ણુમહેશ્વરાદિદેવતોત્પત્તિવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
અથ ડિમ્ભો જલે તિષ્ઠન્યાવદ્વૈ બ્રહ્મણો વયઃ ।
તતઃ સ કાલે સહસા દ્વિધાભૂતો બભૂવ હ ॥ ૧॥

તન્મધ્યે શિશુરેકશ્ચ શતકોટિરવિપ્રભઃ ।
ક્ષણં રોરૂયમાણશ્ચ સ્તનાન્ધઃ પીડિતઃ ક્ષુધા ॥ ૨॥

પિત્રા માત્રા પરિત્યક્તો જલમધ્યે નિરાશ્રયઃ ।

બ્રહ્માણ્ડાસઙ્ખ્યનાથો યો દદર્શોર્ધ્વમનાથવત્ ॥ ૩॥

સ્થૂલાસ્થૂલતમઃ સોઽપિ નામ્ના દેવો મહાવિરાટ્ ।
પરમાણુર્યથા સૂક્ષ્માત્પરઃ સ્થૂલાત્તથાપ્યસૌ ॥ ૪॥

તેજસા ષોડશાંશોઽયં કૃષ્ણસ્ય પરમાત્મનઃ ।
આધારઃ સર્વવિશ્વાનાં મહાવિષ્ણુશ્ચ પ્રાકૃતઃ ॥ ૫॥

પ્રત્યેકં લોમકૂપેષુ વિશ્વાનિ નિખિલાનિ ચ ।
અસ્યાપિ તેષાં સઙ્ખ્યાં ચ કૃષ્ણો વક્તું ન હિ ક્ષમઃ ॥ ૬॥

સઙ્ખ્યા ચેદ્રજસામસ્તિ વિશ્વાનાં ન કદાચન ।
બ્રહ્મવિષ્ણુશિવાદીનાં તથા સઙ્ખ્યા ન વિદ્યતે ॥ ૭॥

પ્રતિવિશ્વેષુ સન્ત્યેવં બ્રહ્મવિષ્ણુશિવાદયઃ ।
પાતાલાદ્ બ્રહ્મલોકાન્તં બ્રહ્માણ્ડં પરિકીર્તિતમ્ ॥ ૮॥

તત ઊર્ધ્વં ચ વૈકુણ્ઠો બ્રહ્માણ્ડાદ્ બહિરેવ સઃ ।
તત ઊર્ધ્વં ચ ગોલોકઃ પઞ્ચાશત્કોટિયોજનઃ ॥ ૯॥

નિત્યઃ સત્યસ્વરૂપશ્ચ યથા કૃષ્ણસ્તથાપ્યયમ્ ।
સપ્તદ્વીપમિતા પૃથ્વી સપ્તસાગરસંયુતા ॥ ૧૦॥

ઊનપઞ્ચાશદુપદ્વીપાસઙ્ખ્યશૈલવનાન્વિતા ।
ઊર્ધ્વં સપ્ત સ્વર્ગલોકા બ્રહ્મલોકસમન્વિતાઃ ॥ ૧૧॥

પાતાલાનિ ચ સપ્તાધશ્ચૈવં બ્રહ્માણ્ડમેવ ચ ।
ઊર્ધ્વં ધરાયા ભૂર્લોકો ભુવર્લોકસ્તતઃ પરમ્ ॥ ૧૨॥

તતઃ પરશ્ચ સ્વર્લોકો જનલોકસ્તથા પરઃ ।
તતઃ પરસ્તપોલોકઃ સત્યલોકસ્તતઃ પરઃ ॥ ૧૩॥

તતઃ પરં બ્રહ્મલોકસ્તપ્તકાઞ્ચનસન્નિભઃ ।
એવં સર્વં કૃત્રિમં ચ બાહ્યાભ્યન્તરમેવ ચ ॥ ૧૪॥

તદ્વિનાશે વિનાશશ્ચ સર્વેષામેવ નારદ ।
જલબુદ્બુદવત્સર્વં વિશ્વસઙ્ઘમનિત્યકમ્ ॥ ૧૫॥

નિત્યૌ ગોલોકવૈકુણ્ઠૌ પ્રોક્તૌ શશ્વદકૃત્રિમૌ ।
પ્રત્યેકં લોમકૂપેષુ બ્રહ્માણ્ડં પરિનિશ્ચિતમ્ ॥ ૧૬॥

એષાં સઙ્ખ્યાં ન જાનાતિ કૃષ્ણોઽન્યસ્યાપિ કા કથા ।
પ્રત્યેકં પ્રતિબ્રહ્માણ્ડં બ્રહ્મવિષ્ણુશિવાદયઃ ॥ ૧૭॥

તિસ્રઃ કોટ્યઃ સુરાણાં ચ સઙ્ખ્યા સર્વત્ર પુત્રક ।
દિગીશાશ્ચૈવ દિક્પાલા નક્ષત્રાણિ ગ્રહાદયઃ ॥ ૧૮॥

ભુવિ વર્ણાશ્ચ ચત્વારોઽપ્યધો નાગાશ્ચરાચરાઃ ।
અથ કાલેઽત્ર સ વિરાડૂર્ધ્વં દૃષ્ટ્વા પુનઃ પુનઃ ॥ ૧૯॥

ડિમ્ભાન્તરે ચ શૂન્યં ચ ન દ્વિતીયં ચ કિઞ્ચન ।
ચિન્તામવાપ ક્ષુદ્યુક્તો રુરોદ ચ પુનઃ પુનઃ ॥ ૨૦॥

જ્ઞાનં પ્રાપ્ય તદા દધ્યૌ કૃષ્ણં પરમપૂરુષમ્ ।
તતો દદર્શ તત્રૈવ બ્રહ્મજ્યોતિઃ સનાતનમ્ ॥ ૨૧॥

નવીનજલદશ્યામં દ્વિભુજં પીતવાસસમ્ ।
સસ્મિતં મુરલીહસ્તં ભક્તાનુગ્રહકાતરમ્ ॥ ૨૨॥

જહાસ બાલકસ્તુષ્ટો દૃષ્ટ્વા જનકમીશ્વરમ્ ।
વરં તદા દદૌ તસ્મૈ વરેશઃ સમયોચિતમ્ ॥ ૨૩॥

મત્સમો જ્ઞાનયુક્તશ્ચ ક્ષુત્પિપાસાદિવર્જિતઃ ।
બ્રહ્માણ્ડાસઙ્ખ્યનિલયો ભવ વત્સ લયાવધિ ॥ ૨૪॥

નિષ્કામો નિર્ભયશ્ચૈવ સર્વેષાં વરદો ભવ ।
જરામૃત્યુરોગશોકપીડાદિવર્જિતો ભવ ॥ ૨૫॥

ઇત્યુક્ત્વા તસ્ય કર્ણે સ મહામન્ત્રં ષડક્ષરમ્ ।
ત્રિઃકૃત્વશ્ચ પ્રજજાપ વેદાઙ્ગપ્રવરં પરમ્ ॥ ૨૬॥

પ્રણવાદિચતુર્થ્યન્તં કૃષ્ણ ઇત્યક્ષરદ્વયમ્ ।
વહ્નિજાયાન્તમિષ્ટં ચ સર્વવિઘ્નહરં પરમ્ ॥ ૨૭॥

મન્ત્રં દત્ત્વા તદાહારં કલ્પયામાસ વૈ વિભુઃ ।
શ્રૂયતાં તદ્ બ્રહ્મપુત્ર નિબોધ કથયામિ તે ॥ ૨૮॥

પ્રતિવિશ્વં યન્નૈવેદ્યં દદાતિ વૈષ્ણવો જનઃ ।
તત્ષોડશાંશો વિષયિણો વિષ્ણોઃ પઞ્ચદશાસ્ય વૈ ॥ ૨૯॥

નિર્ગુણસ્યાત્મનશ્ચૈવ પરિપૂર્ણતમસ્ય ચ ।
નૈવેદ્યે ચૈવ કૃષ્ણસ્ય ન હિ કિઞ્ચિત્પ્રયોજનમ્ ॥ ૩૦॥

યદ્યદ્દદાતિ નૈવેદ્યં તસ્મૈ દેવાય યો જનઃ ।
સ ચ ખાદતિ તત્સર્વં લક્ષ્મીનાથો વિરાટ્ તથા ॥ ૩૧॥

તં ચ મન્ત્રવરં દત્ત્વા તમુવાચ પુનર્વિભુઃ ।
વરમન્યં કિમિષ્ટં તે તન્મે બ્રૂહિ દદામિ ચ ॥ ૩૨॥

કૃષ્ણસ્ય વચનં શ્રુત્વા તમુવાચ વિરાડ્ વિભુઃ ।
કૃષ્ણં તં બાલકસ્તાવદ્વચનં સમયોચિતમ્ ॥ ૩૩॥

બાલક ઉવાચ ।
વરો મે ત્વત્પદામ્ભોજે ભક્તિર્ભવતુ નિશ્ચલા ।
સતતં યાવદાયુર્મે ક્ષણં વા સુચિરં ચ વા ॥ ૩૪॥

ત્વદ્ભક્તિયુક્તલોકેઽસ્મિઞ્જીવન્મુક્તશ્ચ સન્તતમ્ ।
ત્વદ્ભક્તિહીનો મૂર્ખશ્ચ જીવન્નપિ મૃતો હિ સઃ ॥ ૩૫॥

કિં તજ્જપેન તપસા યજ્ઞેન પૂજનેન ચ ।
વ્રતેન ચોપવાસેન પુણ્યેન તીર્થસેવયા ॥ ૩૬॥

કૃષ્ણભક્તિવિહીનસ્ય મૂર્ખસ્ય જીવનં વૃથા ।
યેનાત્મના જીવિતશ્ચ તમેવ ન હિ મન્યતે ॥ ૩૭॥

યાવદાત્મા શરીરેઽસ્તિ તાવત્સ શક્તિસંયુતઃ ।
પશ્ચાદ્યાન્તિ ગતે તસ્મિન્સ્વતન્ત્રાઃ સર્વશક્તયઃ ॥ ૩૮॥

સ ચ ત્વં ચ મહાભાગ સર્વાત્મા પ્રકૃતેઃ પરઃ ।
સ્વેચ્છામયશ્ચ સર્વાદ્યો બ્રહ્મજ્યોતિઃ સનાતનઃ ॥ ૩૯॥

ઇત્યુક્ત્વા બાલકસ્તત્ર વિરરામ ચ નારદ ।
ઉવાચ કૃષ્ણઃ પ્રત્યુક્તિં મધુરાં શ્રુતિસુન્દરીમ્ ॥ ૪૦॥

શ્રીકૃષ્ણ ઉવાચ ।
સુચિરં સુસ્થિરં તિષ્ઠ યથાહં ત્વં તથા ભવ ।
બ્રહ્મણોઽસઙ્ખ્યપાતે ચ પાતસ્તે ન ભવિષ્યતિ ॥ ૪૧॥

અંશેન પ્રતિબ્રહ્માણ્ડે ત્વં ચ ક્ષુદ્રવિરાડ્ ભવ ।
ત્વન્નાભિપદ્માદ્ બ્રહ્મા ચ વિશ્વસ્રષ્ટા ભવિષ્યતિ ॥ ૪૨॥

લલાટે બ્રહ્મણશ્ચૈવ રુદ્રાશ્ચૈકાદશૈવ તે ।

શિવાંશેન ભવિષ્યન્તિ સૃષ્ટિસંહરણાય વૈ ॥ ૪૩॥

કાલાગ્નિરુદ્રસ્તેષ્વેકો વિશ્વસંહારકારકઃ ।
પાતા વિષ્ણુશ્ચ વિષયી રુદ્રાંશેન ભવિષ્યતિ ॥ ૪૪॥

મદ્ભક્તિયુક્તઃ સતતં ભવિષ્યસિ વરેણ મે ।
ધ્યાનેન કમનીયં માં નિત્યં દ્રક્ષ્યસિ નિશ્ચિતમ્ ॥ ૪૫॥

માતરં કમનીયાં ચ મમ વક્ષઃસ્થલસ્થિતામ્ ।
યામિ લોકં તિષ્ઠ વત્સેત્યુક્ત્વા સોઽન્તરધીયત ॥ ૪૬॥

ગત્વા સ્વલોકં બ્રહ્માણં શઙ્કરં સમુવાચ હ ।
સ્રષ્ટારં સ્રષ્ટુમીશં ચ સંહર્તું ચૈવ તત્ક્ષણમ્ ॥ ૪૭॥

શ્રીભગવાનુવાચ ।
સૃષ્ટિં સ્રષ્ટું ગચ્છ વત્સ નાભિપદ્મોદ્ભવો ભવ ।
મહાવિરાડ્ લોમકૂપે ક્ષુદ્રસ્ય ચ વિધે શ ृણુ ॥ ૪૮॥

ગચ્છ વત્સ મહાદેવ બ્રહ્મભાલોદ્ભવો ભવ ।
અંશેન ચ મહાભાગ સ્વયં ચ સુચિરં તપ ॥ ૪૯॥

ઇત્યુક્ત્વા જગતાં નાથો વિરરામ વિધેઃ સુત ।
જગામ બ્રહ્મા તં નત્વા શિવશ્ચ શિવદાયકઃ ॥ ૫૦॥

મહાવિરાડ્ લોમકૂપે બ્રહ્માણ્ડગોલકે જલે ।
બભૂવ ચ વિરાટ્ ક્ષુદ્રો વિરાડંશેન સામ્પ્રતમ્ ॥ ૫૧॥

શ્યામો યુવા પીતવાસાઃ શયાનો જલતલ્પકે ।
ઈષદ્ધાસ્યઃ પ્રસન્નાસ્યો વિશ્વવ્યાપી જનાર્દનઃ ॥ ૫૨॥

તન્નાભિકમલે બ્રહ્મા બભૂવ કમલોદ્ભવઃ ।
સમ્ભૂય પદ્મદણ્ડે ચ બભ્રામ યુગલક્ષકમ્ ॥ ૫૩॥

નાન્તં જગામ દણ્ડસ્ય પદ્મનાલસ્ય પદ્મજઃ ।
નાભિજસ્ય ચ પદ્મસ્ય ચિન્તામાપ પિતા તવ ॥ ૫૪॥

સ્વસ્થાનં પુનરાગમ્ય દધ્યૌ કૃષ્ણપદામ્બુજમ્ ।
તતો દદર્શ ક્ષુદ્રં તં ધ્યાનેન દિવ્યચક્ષુષા ॥ ૫૫॥

શયાનં જલતલ્પે ચ બ્રહ્માણ્ડગોલકાપ્લુતે ।
યલ્લોમકૂપે બ્રહ્માણ્ડં તં ચ તત્પરમીશ્વરમ્ ॥ ૫૬॥

શ્રીકૃષ્ણં ચાપિ ગોલોકં ગોપગોપીસમન્વિતમ્ ।
તં સંસ્તૂય વરં પ્રાપ તતઃ સૃષ્ટિં ચકાર સઃ ॥ ૫૭॥

બભૂવુર્બ્રહ્મણઃ પુત્રા માનસાઃ સનકાદયઃ ।
તતો રુદ્રકલાશ્ચાપિ શિવસ્યૈકાદશ સ્મૃતાઃ ॥ ૫૮॥

બભૂવ પાતા વિષ્ણુશ્ચ ક્ષુદ્રસ્ય વામપાર્શ્વતઃ ।
ચતુર્ભુજશ્ચ ભગવાન્ શ્વેતદ્વીપે સ ચાવસત્ ॥ ૫૯॥

ક્ષુદ્રસ્ય નાભિપદ્મે ચ બ્રહ્મા વિશ્વં સસર્જ હ ।
સ્વર્ગં મર્ત્યં ચ પાતાલં ત્રિલોકીં સચરાચરામ્ ॥ ૬૦॥

એવં સર્વં લોમકૂપે વિશ્વં પ્રત્યેકમેવ ચ ।
પ્રતિવિશ્વે ક્ષુદ્રવિરાડ્ બ્રહ્મવિષ્ણુશિવાદયઃ ॥ ૬૧॥

ઇત્યેવં કથિતં બ્રહ્મન્ કૃષ્ણસઙ્કીર્તનં શુભમ્ ।
સુખદં મોક્ષદં બ્રહ્મન્કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે બ્રહ્મવિષ્ણુમહેશ્વરાદિ-
દેવતોત્પત્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૯.૩॥

## ૯.૪ ચતુર્થોઽધ્યાયઃ । સરસ્વતીસ્તોત્રપૂજાકવચાદિવર્ણનમ્ ।

નારદ ઉવાચ ।
શ્રુતં સર્વં મયા પૂર્વં ત્વત્પ્રસાદાત્સુધોપમમ્ ।
અધુના પ્રકૃતીનાં ચ વ્યસ્તં વર્ણય પૂજનમ્ ॥ ૧॥

કસ્યાઃ પૂજા કૃતા કેન કથં મર્ત્યે પ્રચારિતા ।
કેન વા પૂજિતા કા વા કેન કા વા સ્તુતા પ્રભો ॥ ૨॥

તાસાં સ્તોત્રં ચ ધ્યાનં ચ પ્રભાવં ચરિતં શુભમ્ ।
કાભિઃ કેભ્યો વરો દત્તસ્તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
ગણેશજનની દુર્ગા રાધા લક્ષ્મીઃ સરસ્વતી ।
સાવિત્રી ચ સૃષ્ટિવિધૌ પ્રકૃતિઃ પઞ્ચધા સ્મૃતા ॥ ૪॥

આસાં પૂજા પ્રસિદ્ધા ચ પ્રભાવઃ પરમાદ્ભુતઃ ।
સુધોપમં ચ ચરિતં સર્વમઙ્ગલકારણમ્ ॥ ૫॥

પ્રકૃત્યંશાઃ કલા યાશ્ચ તાસાં ચ ચરિતં શુભમ્ ।
સર્વં વક્ષ્યામિ તે બ્રહ્મન્ સાવધાનો નિશામય ॥ ૬॥

કાલી વસુન્ધરા ગઙ્ગા ષષ્ઠી મઙ્ગલચણ્ડિકા ।
તુલસી મનસા નિદ્રા સ્વધા સ્વાહા ચ દક્ષિણા ॥ ૭॥

સઙ્ક્ષિપ્તમાસાં ચરિતં પુણ્યદં શ્રુતિસુન્દરમ્ ।
જીવકર્મવિપાકં ચ તચ્ચ વક્ષ્યામિ સુન્દરમ્ ॥ ૮॥

દુર્ગાયાશ્ચૈવ રાધાયા વિસ્તીર્ણં ચરિતં મહત્ ।
તદ્વત્પશ્ચાત્પ્રવક્ષ્યામિ સઙ્ક્ષેપક્રમતઃ શ‍ૃણુ ॥ ૯॥

આદૌ સરસ્વતીપૂજા શ્રીકૃષ્ણેન વિનિર્મિતા ।
યત્પ્રસાદાન્મુનિશ્રેષ્ઠ મૂર્ખો ભવતિ પણ્ડિતઃ ॥ ૧૦॥

આવિર્ભૂતા યથા દેવી વક્ત્રતઃ કૃષ્ણયોષિતઃ ।
ઇયેષ કૃષ્ણં કામેન કામુકી કામરૂપિણી ॥ ૧૧॥

સ ચ વિજ્ઞાય તદ્ભાવં સર્વજ્ઞઃ સર્વમાતરમ્ ।
તામુવાચ હિતં સત્યં પરિણામે સુખાવહમ્ ॥ ૧૨॥

શ્રીકૃષ્ણ ઉવાચ ।
ભજ નારાયણં સાધ્વિ મદંશં ચ ચતુર્ભુજમ્ ।
યુવાનં સુન્દરં સર્વગુણયુક્તં ચ મત્સમમ્ ॥ ૧૩॥

કામજ્ઞં કામિનીનાં ચ તાસાં ચ કામપૂરકમ્ ।
કોટિકન્દર્પલાવણ્યં લીલાલઙ્કૃતમીશ્વરમ્ ॥ ૧૪॥

કાન્તે કાન્તં ચ માં કૃત્વા યદિ સ્થાતુમિહેચ્છસિ ।
ત્વત્તો બલવતી રાધા ન ભદ્રં તે ભવિષ્યતિ ॥ ૧૫॥

યો યસ્માદ્ બલવાન્વાપિ તતોઽન્યં રક્ષિતું ક્ષમઃ ।
કથં પરાન્સાધયતિ યદિ સ્વયમનીશ્વરઃ ॥ ૧૬॥

સર્વેશઃ સર્વશાસ્તાહં રાધાં બાધિતુમક્ષમઃ ।
તેજસા મત્સમા સા ચ રૂપેણ ચ ગુણેન ચ ॥ ૧૭॥

પ્રાણાધિષ્ઠાતૃદેવી સા પ્રાણાંસ્ત્યક્તું ચ કઃ ક્ષમઃ ।

પ્રાણતોઽપિ પ્રિયઃ પુત્રઃ કેષાં વાસ્તિ ચ કશ્ચન ॥ ૧૮॥

ત્વં ભદ્રે ગચ્છ વૈકુણ્ઠં તવ ભદ્રં ભવિષ્યતિ ।
પતિં તમીશ્વરં કૃત્વા મોદસ્વ સુચિરં સુખમ્ ॥ ૧૯॥

લોભમોહકામક્રોધમાનહિંસાવિવર્જિતા ।
તેજસા ત્વત્સમા લક્ષ્મી રૂપેણ ચ ગુણેન ચ ॥ ૨૦॥

તયા સાર્ધં તવ પ્રીત્યા શશ્વત્કાલઃ પ્રયાસ્યતિ ।
ગૌરવં ચ હરિસ્તુલ્યં કરિષ્યતિ દ્વયોરપિ ॥ ૨૧॥

પ્રતિવિશ્વેષુ તાં પૂજાં મહતીં ગૌરવાન્વિતામ્ ।
માઘસ્ય શુક્લપઞ્ચમ્યાં વિદ્યારમ્ભે ચ સુન્દરિ ॥ ૨૨॥

માનવા મનવો દેવા મુનીન્દ્રાશ્ચ મુમુક્ષવઃ ।
વસવો યોગિનઃ સિધ્દ્ધા નાગા ગન્ધર્વરાક્ષસાઃ ॥ ૨૩॥

મદ્વરેણ કરિષ્યન્તિ કલ્પે કલ્પે લયાવધિ ।
ભક્તિયુક્તાશ્ચ દત્ત્વા વૈ ચોપચારાણિ ષોડશ ॥ ૨૪॥

કણ્વશાખોક્તવિધિના ધ્યાનેન સ્તવનેન ચ ।
જિતેન્દ્રિયાઃ સંયતાશ્ચ ઘટે ચ પુસ્તકેઽપિ ચ ॥ ૨૫॥

કૃત્વા સુવર્ણગુટિકાં ગન્ધચન્દનચર્ચિતામ્ ।
કવચં તે ગ્રહીષ્યન્તિ કણ્ઠે વા દક્ષિણે ભુજે ॥ ૨૬॥

પઠિષ્યન્તિ ચ વિદ્વાંસઃ પૂજાકાલે ચ પૂજિતે ।
ઇત્યુક્ત્વા પૂજયામાસ તાં દેવીં સર્વપૂજિતામ્ ॥ ૨૭॥

તતસ્તત્પૂજનં ચકુર્બ્રહ્મવિષ્ણુશિવાદયઃ ।
અનન્તશ્ચાપિ ધર્મશ્ચ મુનીન્દ્રાઃ સનકાદયઃ ॥ ૨૮॥

સર્વે દેવાશ્ચ મુનયો નૃપાશ્ચ માનવાદયઃ ।
બભૂવ પૂજિતા નિત્યં સર્વલોકૈઃ સરસ્વતી ॥ ૨૯॥

નારદ ઉવાચ ।
પૂજાવિધાનં કવચં ધ્યાનં ચાપિ નિરન્તરમ્ ।
પૂજોપયુક્તં નૈવેદ્યં પુષ્પં ચ ચન્દનાદિકમ્ ॥ ૩૦॥

વદ વેદવિદાં શ્રેષ્ઠ શ્રોતું કૌતૂહલં મમ ।
વર્તતે હૃદયે શશ્વત્કિમિદં શ્રુતિસુન્દરમ્ ॥ ૩૧॥

શ્રીનારાયણ ઉવાચ ।
શ‍ૃણુ નારદ વક્ષ્યામિ કણ્વશાખોક્તપદ્ધતિમ્ ।
જગન્માતુઃ સરસ્વત્યાઃ પૂજાવિધિસમન્વિતામ્ ॥ ૩૨॥

માઘસ્ય શુક્લપઞ્ચમ્યાં વિદ્યારમ્ભદિનેઽપિ ચ ।
પૂર્વેઽહ્નિ સમયં કૃત્વા તત્રાહ્નિ સંયતઃ શુચિઃ ॥ ૩૩॥

સ્નાત્વા નિત્યક્રિયાઃ કૃત્વા ઘટં સંસ્થાપ્ય ભક્તિતઃ ।
સ્વશાખોક્તવિધાનેન તાન્ત્રિકેણાથવા પુનઃ ॥ ૩૪॥

ગણેશં પૂર્વમભ્યર્ચ્ય તતોઽભીષ્ટાં પ્રપૂજયેત્ ।
ધ્યાનેન વક્ષ્યમાણેન ધ્યાત્વા બાહ્યઘટે ધ્રુવમ્ ॥ ૩૫॥

ધ્યાત્વા પુનઃ ષોડષોપચારેણ પૂજયેદ્ વ્રતી ।
પૂજોપયુક્તં નૈવેદ્યં યચ્ચ વેદનિરૂપિતમ્ ॥ ૩૬॥

વક્ષ્યામિ સૌમ્ય તત્કિઞ્ચિદ્યથાધીતં યથાગમમ્ ।
નવનીતં દધિ ક્ષીરં લાજાંશ્ચ તિલલડ્ડુકમ્ ॥ ૩૭॥

ઇક્ષુમિક્ષુરસં શુક્લવર્ણં પઞ્ચગુડં મધુ ।
સ્વસ્તિકં શર્કરાં શુક્લધાન્યસ્યાક્ષતમક્ષતમ્ ॥ ૩૮॥

અચ્છિન્નશુક્લધાન્યસ્ય પૃથુકં શુક્લમોદકમ્ ।
ઘૃતસૈન્ધવસંયુક્તં હવિષ્યાન્નં યથોદિતમ્ ॥ ૩૯॥

યવગોધૂમચૂર્ણાનાં પિષ્ટકં ઘૃતસંયુતમ્ ।
પિષ્ટકં સ્વસ્તિકસ્યાપિ પક્વરમ્ભાફલસ્ય ચ ॥ ૪૦॥

પરમાન્નં ચ સઘૃતં મિષ્ટાન્નં ચ સુધોપમમ્ ।
નારિકેલં તદુદકં કસેરું મૂલમાર્દ્રકમ્ ॥ ૪૧॥

પક્વરમ્ભાફલં ચારુ શ્રીફલં બદરીફલમ્ ।
કાલદેશોદ્ભવં ચારુ ફલં શુક્લં ચ સંસ્કતમ્ ॥ ૪૨॥

સુગન્ધં શુક્લપુષ્પં ચ સુગન્ધં શુક્લચન્દનમ્ ।
નવીનં શુક્લવસ્ત્રં ચ શઙ્ખં ચ સુન્દરં મુને ॥ ૪૩॥

માલ્યં ચ શુક્લપુષ્પાણાં શુક્લહારં ચ ભૂષણમ્ ।
યાદૃશં ચ શ્રુતૌ ધ્યાનં પ્રશસ્યં શ્રુતિસુન્દરમ્ ॥ ૪૪॥

તન્નિબોધ મહાભાગ ભ્રમભઞ્જનકારણમ્ ।
સરસ્વતીં શુક્લવર્ણાં સસ્મિતાં સુમનોહરામ્ ॥ ૪૫॥

કોટિચન્દ્રપ્રભામુષ્ટપુષ્ટશ્રીયુક્તવિગ્રહામ્ ।
વહ્નિશુદ્ધાંશુકાધાનાં વીણાપુસ્તકધારિણીમ્ ॥ ૪૬॥

રત્નસારેન્દ્રનિર્માણનવભૂષણભૂષિતામ્ ।
સુપૂજિતાં સુરગણૈર્બ્રહ્મવિષ્ણુશિવાદિભિઃ ॥ ૪૭॥

વન્દે ભક્ત્યા વન્દિતાં ચ મુનીન્દ્રમનુમાનવૈઃ ।
એવં ધ્યાત્વા ચ મૂલેન સર્વં દત્ત્વા વિચક્ષણઃ ॥ ૪૮॥

સંસ્તૂય કવચં ધૃત્વા પ્રણમેદ્દણ્ડવદ્ભુવિ ।
યેષાં ચેયમિષ્ટદેવી તેષાં નિત્યક્રિયા મુને ॥ ૪૯॥

વિદ્યારમ્ભે ચ વર્ષાન્તે સર્વેષાં પઞ્ચમીદિને ।
સર્વોપયુક્તં મૂલં ચ વૈદિકાષ્ટાક્ષરઃ પરઃ ॥ ૫૦॥

યેષાં યેનોપદેશો વા તેષાં સ મૂલ એવ ચ ।
સરસ્વતી ચતુર્થ્યન્તં વહ્નિજાયાન્તમેવ ચ ॥ ૫૧॥

લક્ષ્મીમાયાદિકં ચૈવ મન્ત્રોઽયં કલ્પપાદપઃ ।
પુરા નારાયણશ્ચેમં વાલ્મીકાય કૃપાનિધિઃ ॥ ૫૨॥

પ્રદદૌ જાહ્નવીતીરે પુણ્યક્ષેત્રે ચ ભારતે ।
ભૃગુર્દદૌ ચ શુક્રાય પુષ્કરે સૂર્યપર્વણિ ॥ ૫૩॥

ચન્દ્રપર્વણિ મારીચો દદૌ વાક્પતયે મુદા ।
ભૃગોશ્ચૈવ દદૌ તુષ્ટો બ્રહ્મા બદરિકાશ્રમે ॥ ૫૪॥

આસ્તિકસ્ય જરત્કારુર્દદૌ ક્ષીરોદસન્નિધૌ ।
વિભાણ્ડકો દદૌ મેરૌ ઋષ્યશૃઙ્ગાય ધીમતે ॥ ૫૫॥

શિવઃ કણાદમુનયે ગૌતમાય દદૌ મુદા ।
સૂર્યશ્ચ યાજ્ઞવલ્ક્યાય તથા કાત્યાયનાય ચ ॥ ૫૬॥

શેષઃ પાણિનયે ચૈવ ભારદ્વાજાય ધીમતે ।
દદૌ શાકટાયનાય સુતલે બલિસંસદિ ॥ ૫૭॥

ચતુર્લક્ષજપેનૈવ મન્ત્રઃ સિદ્ધો ભવેન્નૃણામ્ ।
યદિ સ્યાન્મન્ત્રસિદ્ધો હિ બૃહસ્પતિસમો ભવેત્ ॥ ૫૮॥

કવચં શ‍ૃણુ વિપ્રેન્દ્ર યદ્દત્તં બ્રહ્મણા પુરા ।
વિશ્વસ્રષ્ટા વિશ્વજયં ભૃગવે ગન્ધમાદને ॥ ૫૯॥

ભૃગુરુવાચ ।
બ્રહ્મન્બ્રહ્મવિદાં શ્રેષ્ઠ બ્રહ્મજ્ઞાનવિશારદ ।
સર્વજ્ઞ સર્વજનક સર્વેશ સર્વપૂજિત ॥ ૬૦॥

સરસ્વત્યાશ્ચ કવચં બ્રૂહિ વિશ્વજયં પ્રભો ।
અયાતયામં મન્ત્રાણાં સમૂહસંયુતં પરમ્ ॥ ૬૧॥

બ્રહ્મોવાચ ।
શ‍ૃણુ વત્સ પ્રવક્ષ્યામિ કવચં સર્વકામદમ્ ।
શ્રુતિસારં શ્રુતિસુખં શ્રુત્યુક્તં શ્રુતિપૂજિતમ્ ॥ ૬૨॥

ઉક્તં કૃષ્ણેન ગોલોકે મહ્યં વૃન્દાવને વને ।
રાસેશ્વરેણ વિભુના રાસે વૈ રાસમણ્ડલે ॥ ૬૩॥

અતીવ ગોપનીયં ચ કલ્પવૃક્ષસમં પરમ્ ।
અશ્રુતાદ્ભુતમન્ત્રાણાં સમૂહૈશ્ચ સમન્વિતમ્ ॥ ૬૪॥

યદ્ધૃત્વા ભગવાઞ્છુક્રઃ સર્વદૈત્યેષુ પૂજિતઃ ।
યદ્ધૃત્વા પઠનાદ્ બ્રહ્મન્ બુદ્ધિમાંશ્ચ બૃહસ્પતિઃ ॥ ૬૫॥

પઠનાદ્ધારણાદ્વાગ્મી કવીન્દ્રો વાલ્મિકો મુનિઃ ।
સ્વાયમ્ભુવો મનુશ્ચૈવ યદ્ધૃત્વા સર્વપૂજિતઃ ॥ ૬૬॥

કણાદો ગૌતમઃ કણ્વઃ પાણિનિઃ શાકટાયનઃ ।
ગ્રન્થં ચકાર યદ્ધૃત્વા દક્ષઃ કાત્યાયનઃ સ્વયમ્ ॥ ૬૭॥

ધૃત્વા વેદવિભાગં ચ પુરાણાન્યખિલાનિ ચ ।
ચકાર લીલામાત્રેણ કૃષ્ણદ્વૈપાયનઃ સ્વયમ્ ॥ ૬૮॥

શાતાતપશ્ચ સંવર્તો વસિષ્ઠશ્ચ પરાશરઃ ।
યદ્ધૃત્વા પઠનાદ્ ગ્રન્થં યાજ્ઞવલ્ક્યશ્ચકાર સઃ ॥ ૬૯॥

ઋષ્યશ‍ૃઙ્ગો ભરદ્વાજશ્ચાસ્તિકો દેવલસ્તથા ।
જૈગીષવ્યો યયાતિશ્ચ ધૃત્વા સર્વત્ર પૂજિતાઃ ॥ ૭૦॥

કવચસ્યાસ્ય વિપ્રેન્દ્ર ઋષિરેવ પ્રજાપતિઃ ।

સ્વયં છન્દશ્ચ બૃહતી દેવતા શારદામ્બિકા ॥ ૭૧॥

સર્વતત્ત્વપરિજ્ઞાનસર્વાર્થસાધનેષુ ચ ।
કવિતાસુ ચ સર્વાસુ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૭૨॥

શ્રીં હ્રીં સરસ્વત્યૈ સ્વાહા શિરો મે પાતુ સર્વતઃ ।
શ્રીં વાગ્દેવતાયૈ સ્વાહા ભાલં મે સર્વદાવતુ ॥ ૭૩॥

ૐ હ્રીં સરસ્વત્યૈ સ્વાહેતિ શ્રોત્રે પાતુ નિરન્તરમ્ ।
ૐ શ્રીં હ્રીં ભગવત્યૈ સરસ્વત્યૈ સ્વાહા નેત્રયુગ્મં સદાવતુ ॥ ૭૪॥

ઐં હ્રીં વાગ્વાદિન્યૈ સ્વાહા નાસાં મે સર્વદાવતુ ।
હ્રીં વિદ્યાધિષ્ઠાતૃદેવ્યૈ સ્વાહા ચોષ્ઠં સદાવતુ ॥ ૭૫॥

ૐ શ્રીં હ્રીં બ્રાહ્મ્યૈ સ્વાહેતિ દન્તપઙ્ક્તિં સદાવતુ ।
ઐમિત્યેકાક્ષરો મન્ત્રો મમ કણ્ઠં સદાવતુ ॥ ૭૬॥

ૐ શ્રીં હ્રીં પાતુ મે ગ્રીવાં સ્કન્ધૌ મે શ્રીં સદાવતુ ।
ૐ હ્રીં વિદ્યાધિષ્ઠાતૃદેવ્યૈ સ્વાહા વક્ષઃ સદાવતુ ॥ ૭૭॥

ૐ હ્રીં વિદ્યાધિસ્વરૂપાયૈ સ્વાહા મે પાતુ નાભિકામ્ ।
ૐ હ્રીં ક્લીં વાણ્યૈ સ્વાહેતિ મમ હસ્તૌ સદાવતુ ॥ ૭૮॥

ૐ સર્વવર્ણાત્મિકાયૈ સ્વાહા પાદયુગ્મં સદાવતુ ।
ૐ વાગધિષ્ઠાતૃદેવ્યૈ સ્વાહા સર્વં સદાવતુ ॥ ૭૯॥

ૐ સર્વકણ્ઠવાસિન્યૈ સ્વાહા પ્રાચ્યાં સદાવતુ ।
ૐ સર્વજિહ્વાગ્રવાસિન્યૈ સ્વાહાગ્નિદિશિ રક્ષતુ ॥ ૮૦॥

ૐ ઐં હ્રીં ક્લીં સરસ્વત્યૈ બુધજનન્યૈ સ્વાહા ।
સતતં મન્ત્રરાજોઽયં દક્ષિણે માં સદાવતુ ॥ ૮૧॥

ઐં હ્રીં શ્રીં ત્ર્યક્ષરો મન્ત્રો નૈરૃત્યાં સર્વદાવતુ ।
ૐ ઐં જિહ્વાગ્રવાસિન્યૈ સ્વાહા માં વારુણેઽવતુ ॥ ૮૨॥

ૐ સર્વામ્બિકાયૈ સ્વાહા વાયવ્યે માં સદાવતુ ।
ૐ ઐં શ્રીં ક્લીં ગદ્યવાસિન્યૈ સ્વાહા મામુત્તરેઽવતુ ॥ ૮૩॥

ૐ ઐં સર્વશાસ્ત્રવાસિન્યૈ સ્વાહૈશાન્યાં સદાવતુ ।
ૐ હ્રીં સર્વપૂજિતાયૈ સ્વાહા ચોર્ધ્વં સદાવતુ ॥ ૮૪॥

ૐ હ્રીં પુસ્તકવાસિન્યૈ સ્વાહાધો માં સદાવતુ ।
ૐ ગ્રન્થબીજસ્વરૂપાયૈ સ્વાહા માં સર્વતોઽવતુ ॥ ૮૫॥

ઇતિ તે કથિતં વિપ્ર બ્રહ્મમન્ત્રૌઘવિગ્રહમ્ ।
ઇદં વિશ્વજયં નામ કવચં બ્રહ્મરૂપકમ્ ॥ ૮૬॥

પુરા શ્રુતં ધર્મવક્ત્રાત્પર્વતે ગન્ધમાદને ।
તવ સ્નેહાન્મયાખ્યાતં પ્રવક્તવ્યં ન કસ્યચિત્ ॥ ૮૭॥

ગુરુમભ્યર્ચ્ય વિધિવદ્વસ્ત્રાલઙ્કારચન્દનૈઃ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ કવચં ધારયેત્સુધીઃ ॥ ૮૮॥

પઞ્ચલક્ષજપેનૈવ સિદ્ધં તુ કવચં ભવેત્ ।
યદિ સ્યાત્સિદ્ધકવચો બૃહસ્પતિસમો ભવેત્ ॥ ૮૯॥

મહાવાગ્મી કવીન્દ્રશ્ચ ત્રૈલોક્યવિજયી ભવેત્ ।
શક્નોતિ સર્વં જેતું ચ કવચસ્ય પ્રસાદતઃ ॥ ૯૦॥

ઇદં ચ કણ્વશાખોક્તં કવચં કથિતં મુને ।
સ્તોત્રં પૂજાવિધાનં ચ ધ્યાનં ચ વન્દનં શ‍ૃણુ ॥ ૯૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે સરસ્વતીસ્તોત્ર-
પૂજાકવચાદિવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૯.૪॥

## ૯.૫ પઞ્ચમોઽધ્યાયઃ । યાજ્ઞવલ્ક્યકૃતં સરસ્વતીસ્તોત્રવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
વાગ્દેવતાયાઃ સ્તવનં શ્રૂયતાં સર્વકામદમ્ ।
મહામુનિર્યાજ્ઞવલ્ક્યો યેન તુષ્ટાવ તાં પુરા ॥ ૧॥

ગુરુશાપાજ્જ સ મુનિર્હતવિદ્યો બભૂવ હ ।
તદા જગામ દુઃખાર્તો રવિસ્થાનં સુપુણ્યદમ્ ॥ ૨॥

સમ્પ્રાપ્ય તપસા સૂર્યં લોલાર્કે દૃષ્ટિગોચરે ।
તુષ્ટાવ સૂર્યં શોકેન રુરોદ ચ મુહુર્મુહુઃ ॥ ૩॥

સૂર્યસ્તં પાઠયામાસ વેદં વેદાઙ્ગમીશ્વરઃ ।
ઉવાચ સ્તૌહિ વાગ્દેવીં ભક્ત્યા ચ સ્મૃતિહેતવે ॥ ૪॥

તમિત્યુક્ત્વા દીનનાથોઽપ્યન્તર્ધાનં ચકાર સઃ ।
મુનિઃ સ્નાત્વા ચ તુષ્ટાવ ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૫॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
કૃપાં કુરુ જગન્માતર્મામેવં હતતેજસમ્ ।
ગુરુશાપાત્સ્મૃતિભ્રષ્ટં વિદ્યાહીનં ચ દુઃખિતમ્ ॥ ૬॥

જ્ઞાનં દેહિ સ્મૃતિં વિદ્યાં શક્તિં શિષ્યપ્રબોધિનીમ્ ।
ગ્રન્થકર્તૃત્વશક્તિં ચ સુશિષ્યં સુપ્રતિષ્ઠિતમ્ ॥ ૭॥

પ્રતિભાં સત્સભાયાં ચ વિચારક્ષમતાં શુભામ્ ।
લુપ્તં સર્વં દૈવયોગાન્નવીભૂતં પુનઃ કુરુ ॥ ૮॥

યથાઙ્કુરં ભસ્મનિ ચ કરોતિ દેવતા પુનઃ ।
બ્રહ્મસ્વરૂપા પરમા જ્યોતીરૂપા સનાતની ॥ ૯॥

સર્વવિદ્યાધિદેવી યા તસ્યૈ વાણ્યૈ નમો નમઃ ।
વિસર્ગબિન્દુમાત્રાસુ યદધિષ્ઠાનમેવ ચ ॥ ૧૦॥

તદધિષ્ઠાત્રી યા દેવી તસ્યૈ નિત્યૈ નમો નમઃ ।
વ્યાખ્યાસ્વરૂપા સા દેવી વ્યાખ્યાધિષ્ઠાતૃરૂપિણી ॥ ૧૧॥

યયા વિના પ્રસઙ્ખ્યાવાન્ સઙ્ખ્યાં કર્તું ન શક્યતે ।
કાલસઙ્ખ્યાસ્વરૂપા યા તસ્યૈ દેવ્યૈ નમો નમઃ ॥ ૧૨॥

ભ્રમસિદ્ધાન્તરૂપા યા તસ્યૈ દેવ્યૈ નમો નમઃ ।
સ્મૃતિશક્તિજ્ઞાનશક્તિબુદ્ધિશક્તિસ્વરૂપિણી ॥ ૧૩॥

પ્રતિભાકલ્પનાશક્તિર્યા ચ તસ્યૈ નમો નમઃ ।
સનત્કુમારો બ્રહ્માણં જ્ઞાનં પપ્રચ્છ યત્ર વૈ ॥ ૧૪॥

બભૂવ મૂકવત્સોઽપિ સિદ્ધાન્તં કર્તુમક્ષમઃ ।
તદાઽઽજગામ ભગવાનાત્મા શ્રીકૃષ્ણ ઈશ્વરઃ ॥ ૧૫॥

ઉવાચ સ તાં સ્તૌહિ વાણીમિષ્ટાં પ્રજાપતે ।
સ ચ તુષ્ટાવ તાં બ્રહ્મા ચાજ્ઞયા પરમાત્મનઃ ॥ ૧૬॥

ચકાર તત્પ્રસાદેન તદા સિદ્ધાન્તમુત્તમમ્ ।
યદાપ્યનન્તં પપ્રચ્છ જ્ઞાનમેકં વસુન્ધરા ॥ ૧૭॥

બભૂવ મૂકવત્સોઽપિ સિદ્ધાન્તં કર્તુમક્ષમઃ ।

તદા તાં સ ચ તુષ્ટાવ સન્ત્રસ્તઃ કશ્યપાજ્ઞયા ॥ ૧૮॥

તતશ્ચકાર સિદ્ધાન્તં નિર્મલં ભ્રમભઞ્જનમ્ ।
વ્યાસઃ પુરાણસૂત્રં ચ પપ્રચ્છ વાલ્મિકિં યદા ॥ ૧૯॥

મૌનીભૂતશ્ચ સસ્માર તામેવ જગદમ્બિકામ્ ।
તદા ચકાર સિદ્ધાન્તં તદ્વરેણ મુનીશ્વરઃ ॥ ૨૦॥

સમ્પ્રાપ્ય નિર્મલં જ્ઞાનં ભ્રમાન્ધધ્વંસદીપકમ્ ।
પુરાણસૂત્રં શ્રુત્વા ચ વ્યાસઃ કૃષ્ણકલોદ્ભવઃ ॥ ૨૧॥

તાં શિવાં વેદ દધ્યૌ ચ શતવર્ષં ચ પુષ્કરે ।
તદા ત્વત્તો વરં પ્રાપ્ય સત્કવીન્દ્રો બભૂવ હ ॥ ૨૨॥

તદા વેદવિભાગં ચ પુરાણં ચ ચકાર સઃ ।
યદા મહેન્દ્રઃ પપ્રચ્છ તત્ત્વજ્ઞાનં સદાશિવમ્ ॥ ૨૩॥

ક્ષણં તામેવ સઞ્ચિન્ત્ય તસ્મૈ જ્ઞાનં દદૌ વિભુઃ ।
પપ્રચ્છ શબ્દશાસ્ત્રં ચ મહેન્દ્રશ્ચ બૃહસ્પતિમ્ ॥ ૨૪॥

દિવ્યં વર્ષસહસ્રં ચ સ ત્વાં દધ્યૌ ચ પુષ્કરે ।
તદા ત્વત્તો વરં પ્રાપ્ય દિવ્યવર્ષસહસ્રકમ્ ॥ ૨૫॥

ઉવાચ શબ્દશાસ્ત્રં ચ તદર્થં ચ સુરેશ્વરમ્ ।
અધ્યાપિતાશ્ચ યે શિષ્યા યૈરધીતં મુનીશ્વરૈઃ ॥ ૨૬॥

તે ચ તાં પરિસઞ્ચિન્ત્ય પ્રવર્તન્તે સુરેશ્વરીમ્ ।
ત્વં સંસ્તુતા પૂજિતા ચ મુનીન્દ્રૈર્મનુમાનવૈઃ ॥ ૨૭॥

દૈત્યેન્દ્રૈશ્ચ સુરૈશ્ચાપિ બ્રહ્મવિષ્ણુશિવાદિભિઃ ।
જડીભૂતઃ સહસ્રાસ્યઃ પઞ્ચવક્ત્રશ્ચતુર્મુખઃ ॥ ૨૮॥

યાં સ્તોતું કિમહં સ્તૌમિ તામેકાસ્યેન માનવઃ ।
ઇત્યુક્ત્વા યાજ્ઞવલ્ક્યશ્ચ ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૨૯॥

પ્રણનામ નિરાહારો રુરોદ ચ મુહુર્મુહુઃ ।
જ્યોતીરૂપા મહામાયા તેન દૃષ્ટાપ્યુવાચ તમ્ ॥ ૩૦॥

સુકવીન્દ્રો ભવેત્યુક્ત્વા વૈકુણ્ઠં ચ જગામ હ ।
યાજ્ઞવલ્ક્યકૃતં વાણીસ્તોત્રમેતત્તુ યઃ પઠેત્ ॥ ૩૧॥

સ કવીન્દ્રો મહાવાગ્મી બૃહસ્પતિસમો ભવેત્ ।
મહામૂર્ખશ્ચ દુર્બુદ્ધિર્વર્ષમેકં યદા પઠેત્ ॥ ૩૨॥

સ પણ્ડિતશ્ચ મેધાવી સુકવીન્દ્રો ભવે ધ્રુવમ્ ॥ ૩૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે યાજ્ઞવલ્ક્યકૃતં
સરસ્વતીસ્તોત્રવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૯.૫॥

## ૯.૬ ષષ્ઠોઽધ્યાયઃ । લક્ષ્મીગઙ્ગાસરસ્વતીનાં ભૂલોકેઽવતરણવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
સરસ્વતી તુ વૈકુણ્ઠે સ્વયં નારાયણાન્તિકે ।
ગઙ્ગાશાપેન કલહાત્કલયા ભારતે સરિત્ ॥ ૧॥

પુણ્યદા પુણ્યરૂપા ચ પુણ્યતીર્થસ્વરૂપિણી ।
પુણ્યવદ્ભિર્નિષેવ્યા ચ સ્થિતિઃ પુણ્યવતાં મુને ॥ ૨॥

તપસ્વિનાં તપોરૂપા તપસઃ ફલરૂપિણી ।
કૃતપાપેધ્મદાહાય જ્વલદગ્નિસ્વરૂપિણી ॥ ૩॥

જ્ઞાનાત્સરસ્વતીતોયે મૃતા યે માનવા ભુવિ ।
તેષાં સ્થિતિશ્ચ વૈકુણ્ઠે સુચિરં હરિસંસદિ ॥ ૪॥

ભારતે કૃતપાપશ્ચ સ્નાત્વા તત્ર ચ લીલયા ।
મુચ્યતે સર્વપાપેભ્યો વિષ્ણુલોકે વસેચ્ચિરમ્ ॥ ૫॥

ચાતુર્માસ્યાં પૌર્ણમાસ્યામક્ષયાયાં દિનક્ષયે ।
વ્યતીપાતે ચ ગ્રહણેઽન્યસ્મિન્પુણ્યદિનેઽપિ ચ ॥ ૬॥

અનુષઙ્ગેણ યઃ સ્નાતો હેતુના શ્રદ્ધયાપિ વા ।
સારૂપ્યં લભતે નૂનં વૈકુણ્ઠે સ હરેરપિ ॥ ૭॥

સરસ્વતીમનું તત્ર માસમેકં ચ યો જપેત્ ।
મહામૂર્ખઃ કવીન્દ્રશ્ચ સ ભવેન્નાત્ર સંશયઃ ॥ ૮॥

નિત્યં સરસ્વતીતોયે યઃ સ્નાયાન્મુણ્ડયન્નરઃ ।
ન ગર્ભવાસં કુરુતે પુનરેવ સ માનવઃ ॥ ૯॥

ઇત્યેવં કથિતં કિઞ્ચિદ્ભારતીગુણકીર્તનમ્ ।

સુખદં કામદં સારં ભૂયઃ કિં શ્રોતુમિચ્છસિ ॥ ૧૦॥

સૂત ઉવાચ ।
નારાયણવચઃ શ્રુત્વા નારદો મુનિસત્તમઃ ।
પુનઃ પપ્રચ્છ સન્દેહમિમં શૌનક સત્વરમ્ ॥ ૧૧॥

નારદ ઉવાચ ।
કથં સરસ્વતી દેવી ગઙ્ગાશાપેન ભારતે ।
કલયા કલહેનૈવ બભૂવ પુણ્યદા સરિત્ ॥ ૧૨॥

શ્રવણે શ્રુતિસારાણાં વર્ધતે કૌતુકં મમ ।
કથામૃતેન મે તૃપ્તિઃ કેન શ્રેયસિ તૃપ્યતે ॥ ૧૩॥

કથં શશાપ સા ગઙ્ગા પૂજિતાં તાં સરસ્વતીમ્ ।
સા તુ સત્ત્વસ્વરૂપા યા પુણ્યદા શુભદા સદા ॥ ૧૪॥

તેજસ્વિનોર્દ્વયોર્વાદકારણં શ્રુતિસુન્દરમ્ ।
સુદુર્લભં પુરાણેષુ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૧૫॥

શ્રીનારાયણ ઉવાચ ।
શૃણુ નારદ વક્ષ્યામિ કથામેતાં પુરાતનીમ્ ।
યસ્યાઃ શ્રવણમાત્રેણ સર્વપાપાત્પ્રમુચ્યતે ॥ ૧૬॥

લક્ષ્મીઃ સરસ્વતી ગઙ્ગા તિસ્રો ભાર્યા હરેરપિ ।
પ્રેમ્ણા સમાસ્તાસ્તિષ્ઠન્તિ સતતં હરિસન્નિધૌ ॥ ૧૭॥

ચકાર સૈકદા ગઙ્ગા વિષ્ણોર્મુખનિરીક્ષણમ્ ।
સસ્મિતા ચ સકામા ચ સકટાક્ષં પુનઃ પુનઃ ॥ ૧૮॥

વિભુર્જહાસ તદ્વક્ત્રં નિરીક્ષ્ય ચ ક્ષણં તદા ।
ક્ષમાં ચકાર તદ્ દૃષ્ટ્વા લક્ષ્મીર્નૈવ સરસ્વતી ॥ ૧૯॥

બોધયામાસ પદ્મા તાં સત્ત્વરૂપા ચ સસ્મિતા ।
ક્રોધાવિષ્ટા ચ સા વાણી ન ચ શાન્તા બભૂવ હ ॥ ૨૦॥

ઉવાચ વાણી ભર્તારં રક્તાસ્યા રક્તલોચના ।
કુપિતા કામવેગેન શશ્વત્પ્રસ્ફુરિતાધરા ॥ ૨૧॥

સરસ્વત્યુવાચ ।
સર્વત્ર સમતાબુદ્ધિઃ સદ્ભર્તુઃ કામિનીં પ્રતિ ।

ધર્મિષ્ઠસ્ય વરિષ્ઠસ્ય વિપરીતા ખલસ્ય ચ ॥ ૨૨॥

જ્ઞાતં સૌભાગ્યમધિકં ગઙ્ગાયાં તે ગદાધર ।
કમલાયાં ચ તત્તુલ્યં ન ચ કિઞ્ચિન્મયિ પ્રભો ॥ ૨૩॥

ગઙ્ગાયાઃ પદ્મયા સાર્ધં પ્રીતિશ્ચાસ્તિ સુસમ્મતા ।
ક્ષમાં ચકાર તેનેદં વિપરીતં હરિપ્રિયા ॥ ૨૪॥

કિં જીવનેન મેઽત્રૈવ દુર્ભગાયાશ્ચ સામ્પ્રતમ્ ।
નિષ્ફલં જીવનં તસ્યા યા પત્યુઃ પ્રેમવઞ્ચિતા ॥ ૨૫॥

ત્વાં સર્વે સત્ત્વરૂપં ચ યે વદન્તિ મનીષિણઃ ।
તે ચ મૂર્ખા ન વેદજ્ઞા ન જાનન્તિ મતિં તવ ॥ ૨૬॥

સરસ્વતીવચઃ શ્રુત્વા દૃષ્ટ્વા તાં કોપસંયુતામ્ ।
મનસા ચ સમાલોચ્ય સ જગામ બહિઃ સભામ્ ॥ ૨૭॥

ગતે નારાયણે ગઙ્ગામુવાચ નિર્ભયં રુષા ।
વાગધિષ્ઠાતૃદેવી સા વાક્યં શ્રવણદુષ્કરમ્ ॥ ૨૮॥

હે નિર્લજ્જે હે સકામે સ્વામિગર્વં કરોષિ કિમ્ ।
અધિકં સ્વામિસૌભાગ્યં વિજ્ઞાપયિતુમિચ્છસિ ॥ ૨૯॥

માનચૂર્ણં કરિષ્યામિ તવાદ્ય હરિસન્નિધૌ ।
કિં કરિષ્યતિ તે કાન્તો મમૈવં કાન્તવલ્લભે ॥ ૩૦॥

ઇત્યેવમુક્ત્વા ગઙ્ગાયાઃ કેશં ગ્રહીતુમુદ્યતા ।
વારયામાસ તાં પદ્મા મધ્યદેશં સમાશ્રિતા ॥ ૩૧॥

શશાપ વાણી તાં પદ્માં મહાબલવતી સતી ।
વૃક્ષરૂપા સરિદ્રૂપા ભવિષ્યસિ ન સંશયઃ ॥ ૩૨॥

વિપરીતં તતો દૃષ્ટ્વા કિઞ્ચિન્નો વક્તુમર્હસિ ।
સન્તિષ્ઠતિ સભામધ્યે યથા વૃક્ષો યથા સરિત્ ॥ ૩૩॥

શાપં શ્રુત્વા તુ સા દેવી ન શશાપ ચુકોપ હ ।
તત્રૈવ દુઃખિતા તસ્થૌ વાણીં ધૃત્વા કરેણ ચ ॥ ૩૪॥

અસન્તુષ્ટાં તુ તાં દૃષ્ટ્વા કોપપ્રસ્ફુરિતાધરામ્ ।
ઉવાચ ગઙ્ગા તાં દેવીં પદ્માં ચારક્તલોચનામ્ ॥ ૩૫॥

ગઙ્ગોવાચ ।
ત્વમુત્સૃજ મહોગ્રાં ચ પદ્મે કિં મે કરિષ્યતિ ।
દુઃશીલા મુખરા નષ્ટા નિત્યં વાચાલરૂપિણી ॥ ૩૬॥

વાગધિષ્ઠાત્રી દેવીયં સતતં કલહપ્રિયા ।
યાવતી યોગ્યતા ચાસ્યા યાવતી શક્તિરેવ ચ ॥ ૩૭॥

તથા કરોતુ વાદં ચ મયા સાર્ધં ચ દુર્મુખી ।
સ્વબલં યન્મમ બલં વિજ્ઞાપયિતુમિચ્છતિ ॥ ૩૮॥

જાનન્તુ સર્વે હ્યુભયોઃ પ્રભાવં વિક્રમં સતિ ।
ઇત્યેવમુક્ત્વા સા દેવી વાણ્યૈ શાપં દદાવિતિ ॥ ૩૯॥

સરિક્ત્યરૂપા ભવતુ સા યા ત્વાં ચ શશાપ હ ।
અધોમર્ત્યં સા પ્રયાતુ સન્તિ યત્રૈવ પાપિનઃ ॥ ૪૦॥

કલૌ તેષાં ચ પાપાનિ ગ્રહીષ્યતિ ન સંશયઃ ।
ઇત્યેવં વચનં શ્રુત્વા તાં શશાપ સરસ્વતી ॥ ૪૧॥

ત્વમેવ યાસ્યસિ મહીં પાપિપાપં લભિષ્યસિ ।
એતસ્મિન્નન્તરે તત્ર ભગવાનાજગામ હ ॥ ૪૨॥

ચતુર્ભુજશ્ચતુર્ભિશ્ચ પાર્ષદૈશ્ચ ચતુર્ભુજૈઃ ।
સરસ્વતીં કરે ધૃત્વા વાસયામાસ વક્ષસિ ॥ ૪૩॥

બોધયામાસ સર્વજ્ઞઃ સર્વજ્ઞાનં પુરાતનમ્ ।
શ્રુત્વા રહસ્યં તાસાં ચ શાપસ્ય કલહસ્ય ચ ॥ ૪૪॥

ઉવાચ દુઃખિતાસ્તાશ્ચ વાચં સામયિકીં વિભુઃ ।
શ્રીભગવાનુવાચ ।
લક્ષ્મિ ત્વં કલયા ગચ્છ ધર્મધ્વજગૃહં શુભે ॥ ૪૫॥

અયોનિસમ્ભવા ભૂમૌ તસ્ય કન્યા ભવિષ્યસિ ।
તત્રૈવ દૈવદોષેણ વૃક્ષત્વં ચ લભિષ્યસિ ॥ ૪૬॥

મદંશસ્યાસુરસ્યૈવ શઙ્ખચૂડસ્ય કામિની ।
ભૂત્વા પશ્ચાચ્ચ મત્પત્ની ભવિષ્યસિ ન સંશયઃ ॥ ૪૭॥

ત્રૈલોક્યપાવની નામ્ના તુલસીતિ ચ ભારતે ।
કલયા ચ સરિદ્ભાવં શીઘ્રં ગચ્છ વરાનને ॥ ૪૮॥

ભારતં ભારતીશાપાન્નામ્ના પદ્માવતી ભવ ।
ગઙ્ગે યાસ્યસિ પશ્ચાત્ત્વમંશેન વિશ્વપાવની ॥ ૪૯॥

ભારતં ભારતીશાપાત્પાપદાહાય પાપિનામ્ ।
ભગીરથસ્ય તપસા તેન નીતા સુકલ્પિતે ॥ ૫૦॥

નામ્ના ભાગીરથી પૂતા ભવિષ્યસિ મહીતલે ।
મદંશસ્ય સમુદ્રસ્ય જાયા જાયેર્મમાજ્ઞયા ॥ ૫૧॥

મત્કલાંશસ્ય ભૂપસ્ય શન્તનોશ્ચ સુરેશ્વરિ ।
ગઙ્ગાશાપેન કલયા ભારતં ગચ્છ ભારતિ ॥ ૫૨॥

કલહસ્ય ફલં ભુઙ્ક્ષ્વ સપત્નીભ્યાં સહાચ્યુતે ।
સ્વયં ચ બ્રહ્મસદને બ્રહ્મણઃ કામિની ભવ ॥ ૫૩॥

ગઙ્ગા યાતુ શિવસ્થાનમત્ર પદ્મૈવ તિષ્ઠતુ ।
શાન્તા ચ ક્રોધરહિતા મદ્ભક્તા સત્ત્વરૂપિણી ॥ ૫૪॥

મહાસાધ્વી મહાભાગા સુશીલા ધર્મચારિણી ।
યદંશકલયા સર્વા ધર્મિષ્ઠાશ્ચ પતિવ્રતાઃ ॥ ૫૫॥

શાન્તરૂપાઃ સુશીલાશ્ચ પ્રતિવિશ્વેષુ પૂજિતાઃ ।
તિસ્રો ભાર્યાસ્ત્રિશીલાશ્ચ ત્રયો ભૃત્યાશ્ચ બાન્ધવાઃ ॥ ૫૬॥

ધ્રુવં વેદવિરુદ્ધાશ્ચ ન હ્યેતે મઙ્ગલપ્રદાઃ ।
સ્ત્રીપુંવચ્ચ ગૃહે યેષાં ગૃહિણાં સ્ત્રીવશઃ પુમાન્ ॥ ૫૭॥

નિષ્ફલં ચ જન્મ તેષામશુભં ચ પદે પદે ।
મુખે દુષ્ટા યોનિદુષ્ટા યસ્ય સ્ત્રી કલહપ્રિયા ॥ ૫૮॥

અરણ્યં તેન ગન્તવ્યં મહારણ્યં ગૃહાદ્વરમ્ ।
જલાનાં ચ સ્થલાનાં ચ ફલાનાં પ્રાપ્તિરેવ ચ ॥ ૫૯॥

સતતં સુલભા તત્ર ન તેષાં ગૃહ એવ ચ ।
વરમગ્નૌ સ્થિતિર્હિંસ્રજન્તૂનાં સન્નિધૌ સુખમ્ ॥ ૬૦॥

તતોઽપિ દુઃખં પુંસાં ચ દુષ્ટસ્ત્રીસન્નિધૌ ધ્રુવમ્ ।
વ્યાધિજ્વાલા વિષજ્વાલા વરં પુંસાં વરાનને ॥ ૬૧॥

દુષ્ટસ્ત્રીણાં મુખજ્વાલા મરણાદતિરિચ્યતે ।
પુંસાં ચ સ્ત્રીજિતાં ચૈવ ભસ્માન્તં શૌચમધ્રુવમ્ ॥ ૬૨॥

યદહ્નિ કુરુતે કર્મ ન તસ્ય ફલભાગ્ભવેત્ ।
નિન્દિતોઽત્ર પરત્રૈવ સર્વત્ર નરકં વ્રજેત્ ॥ ૬૩॥

યશઃકીર્તિવિહીનો યો જીવન્નપિ મૃતો હિ સઃ ।
બહ્વીનાં ચ સપત્નીનાં નૈકત્ર શ્રેયસે સ્થિતિઃ ॥ ૬૪॥

એકભાર્યઃ સુખી નૈવ બહુભાર્યઃ કદાચન ।
ગચ્છ ગઙ્ગે શિવસ્થાનં બ્રહ્મસ્થાનં સરસ્વતિ ॥ ૬૫॥

અત્ર તિષ્ઠતુ મદ્ગેહે સુશીલા કમલાલયા ।
સુસાધ્વી યસ્ય પત્ની ચ સુશીલા ચ પતિવ્રતા ॥ ૬૬॥

ઇહ સ્વર્ગે સુખં તસ્ય ધર્મો મોક્ષઃ પરત્ર ચ ।
પતિવ્રતા યસ્ય પત્ની સ ચ મુક્તઃ શુચિઃ સુખી ।
જીવન્મૃતોઽશુચિર્દુઃખી દુઃશીલાપતિરેવ ચ ॥ ૬૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે લક્ષ્મીગઙ્ગાસરસ્વતીનાં
ભૂલોકેઽવતરણવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૯.૬॥

## ૯.૭ સપ્તમોઽધ્યાયઃ । ગઙ્ગાદીનાં શાપોદ્ધારવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ઇત્યુક્ત્વા જગતાં નાથો વિરરામ ચ નારદ ।
અતીવ રુરુદુર્દેવ્યઃ સમાલિઙ્ગ્ય પરસ્પરમ્ ॥ ૧॥

તાશ્ચ સર્વાઃ સમાલોક્ય ક્રમેણોચુસ્તદેશ્વરમ્ ।
કમ્પિતાઃ સાશ્રુનેત્રાશ્ચ શોકેન ચ ભયેન ચ ॥ ૨॥

સરસ્વત્યુવાચ ।
વિશાપં દેહિ હે નાથ દુષ્ટમાજન્મશોચનમ્ ।
સત્સ્વામિના પરિત્યક્તાઃ કુતો જીવન્તિ તાઃ સ્ત્રિયઃ ॥ ૩॥

દેહત્યાગં કરિષ્યામિ યોગેન ભારતે ધ્રુવમ્ ।
અત્યુન્નતો હિ નિયતં પાતુમર્હતિ નિશ્ચિતમ્ ॥ ૪॥

ગઙ્ગોવાચ ।

અહં કેનાપરાધેન ત્વયા ત્યક્તા જગત્પતે ।
દેહત્યાગં કરિષ્યામિ નિર્દોષાયા વધં લભ ॥ ૫॥

નિર્દોષકામિનીત્યાગં કરોતિ યો નરો ભુવિ ।
સ યાતિ નરકં ઘોરં કિન્તુ સર્વેશ્વરોઽપિ વા ॥ ૬॥

પદ્મોવાચ ।
નાથ સત્ત્વસ્વરૂપસ્ત્વં કોપઃ કથમહો તવ ।
પ્રસાદં કુરુ ભાર્યે દ્વે સદીશસ્ય ક્ષમા વરા ॥ ૭॥

ભારતે ભારતીશાપાદ્યાસ્યામિ કલયા હ્યહમ્ ।
કિયત્કાલં સ્થિતિસ્તત્ર કદા દ્રક્ષ્યામિ તે પદમ્ ॥ ૮॥

દાસ્યન્તિ પાપિનઃ પાપં સદ્યઃ સ્નાનાવગાહનાત્ ।
કેન તેન વિમુક્તાહમાગમિષ્યામિ તે પદમ્ ॥ ૯॥

કલયા તુલસીરૂપં ધર્મધ્વજસુતા સતી ।
ભુક્ત્વા કદા લભિષ્યામિ ત્વત્પાદામ્બુજમચ્યુત ॥ ૧૦॥

વૃક્ષરૂપા ભવિષ્યામિ ત્વદધિષ્ઠાતૃદેવતા ।
સમુદ્ધરિષ્યસિ કદા તન્મે બ્રૂહિ કૃપાનિધે ॥ ૧૧॥

ગઙ્ગા સરસ્વતીશાપાદ્યદિ યાસ્યતિ ભારતે ।
શાપેન મુક્તા પાપાચ્ચ કદા ત્વાં ચ લભિષ્યતિ ॥ ૧૨॥

ગઙ્ગાશાપેન વા વાણી યદિ યાસ્યતિ ભારતમ્ ।
કદા શાપાદ્વિનિર્મુચ્ય લભિષ્યતિ પદં તવ ॥ ૧૩॥

તાં વાણીં બ્રહ્મસદનં ગઙ્ગાં વા શિવમન્દિરમ્ ।
ગન્તું વદસિ હે નાથ તત્ક્ષમસ્વ ચ તે વચઃ ॥ ૧૪॥

ઇત્યુક્ત્વા કમલા કાન્તપાદં ધૃત્વા નનામ સા ।
સ્વકેશૈર્વેષ્ટનં કૃત્વા રુરોદ ચ પુનઃ પુનઃ ॥ ૧૫॥

(ઉવાચ પદ્મનાભસ્તાં પદ્માં કૃત્વા સ્વવક્ષસિ ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યો ભક્તાનુગ્રહકાતરઃ ॥)॥

શ્રીભગવાનુવાચ ।
ત્વદ્વાક્યમાચરિષ્યામિ સ્વવાક્યં ચ સુરેશ્વરિ ।
સમતાં ચ કરિષ્યામિ શ‍ૃણુ ત્વં કમલેક્ષણે ॥ ૧૬॥

ભારતી યાતુ કલયા સરિદ્રૂપા ચ ભારતે ।
અર્ધા સા બ્રહ્મસદનં સ્વયં તિષ્ઠતુ મદ્ગૃહે ॥ ૧૭॥

ભગીરથેન સા નીતા ગઙ્ગા યાસ્યતિ ભારતે ।
પૂતં કર્તું ત્રિભુવનં સ્વયં તિષ્ઠતુ મદ્ગૃહે ॥ ૧૮॥

તત્રૈવ ચન્દ્રમૌલેશ્ચ મૌલિં પ્રાપ્સ્યતિ દુર્લભમ્ ।
તતઃ સ્વભાવતઃ પૂતાપ્યતિપૂતા ભવિષ્યતિ ॥ ૧૯॥

કલાંશાંશેન ગચ્છ ત્વં ભારતે વામલોચને ।
પદ્માવતી સરિદ્રૂપા તુલસીવૃક્ષરૂપિણી ॥ ૨૦॥

કલેઃ પઞ્ચસહસ્રે ચ ગતે વર્ષે તુ મોક્ષણમ્ ।
યુષ્માકં સરિતાં ચૈવ મદ્ગેહે ચાગમિષ્યથ ॥ ૨૧॥

સમ્પદા હેતુભૂતા ચ વિપત્તિઃ સર્વદેહિનામ્ ।
વિના વિપત્તેર્મહિમા કેષાં પદ્મભવે ભવેત્ ॥ ૨૨॥

મન્મન્ત્રોપાસકાનાં ચ સતાં સ્નાનાવગાહનાત્ ।
યુષ્માકં મોક્ષણં પાપાદ્દર્શનાત્સ્પર્શનાત્તથા ॥ ૨૩॥

પૃથિવ્યાં યાનિ તીર્થાનિ સન્ત્યસઙ્ખ્યાનિ સુન્દરિ ।
ભવિષ્યન્તિ ચ પૂતાનિ મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૨૪॥

મન્મન્ત્રોપાસકા ભક્તા વિભ્રમન્તિ ચ ભારતે ।
પૂતં કર્તું તારિતું ચ સુપવિત્રાં વસુન્ધરામ્ ॥ ૨૫॥

મદ્ભક્તા યત્ર તિષ્ઠન્તિ પાદં પ્રક્ષાલયન્તિ ચ ।
તત્સ્થાનં ચ મહાતીર્થં સુપવિત્રં ભવેદ્ધ્રુવમ્ ॥ ૨૬॥

સ્ત્રીઘ્નો ગોઘ્નઃ કૃતઘ્નશ્ચ બ્રહ્મઘ્નો ગુરુતલ્પગઃ ।
જીવન્મુક્તો ભવેત્પૂતો મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૨૭॥

એકાદશીવિહીનશ્ચ સન્ધ્યાહીનોઽથ નાસ્તિકઃ ।
નરઘાતી ભવેત્પૂતો મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૨૮॥

અસિજીવી મસીજીવી ધાવકો ગ્રામયાચકઃ ।
વૃષવાહો ભવેત્પૂતો મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૨૯॥

વિશ્વાસઘાતી મિત્રઘ્નો મિથ્યાસાક્ષ્યસ્ય દાયકઃ ।
સ્થાપ્યાહારી ભવેત્પૂતો મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૩૦॥

અત્યુગ્રવાન્દૂષકશ્ચ જારકઃ પુંશ્ચલીપતિઃ ।
પૂતશ્ચ વૃષલીપુત્રો મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૩૧॥

શૂદ્રાણાં સૂપકારશ્ચ દેવલો ગ્રામયાજકઃ ।
અદીક્ષિતો ભવેત્પૂતો મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૩૨॥

પિતરં માતરં ભાર્યાં ભ્રાતરં તનયં સુતામ્ ।
ગુરોઃ કુલં ચ ભગિનીં ચક્ષુર્હીનં ચ બાન્ધવમ્ ॥ ૩૩॥

શ્વશ્રૂં ચ શ્વશુરં ચૈવ યો ન પુષ્ણાતિ સુન્દરિ ।
સ મહાપાતકી પૂતો મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૩૪॥

અશ્વત્થનાશકશ્ચૈવ મદ્ભક્તનિન્દકસ્તથા ।
શૂદ્રાન્નભોજી વિપ્રશ્ચ પૂતો મદ્ભક્તદર્શનાત્ ॥ ૩૫॥

દેવદ્રવ્યાપહારી ચ વિપ્રદ્રવ્યાપહારકઃ ।
લાક્ષાલોહરસાનાં ચ વિક્રેતા દુહિતુસ્તથા ॥ ૩૬॥

મહાપાતકિનશ્ચૈવ શૂદ્રાણાં શવદાહકઃ ।
ભવેયુરેતે પૂતાશ્ચ મદ્ભક્તસ્પર્શદર્શનાત્ ॥ ૩૭॥

મહાલક્ષ્મીરુવાચ ।
ભક્તાનાં લક્ષણં બ્રૂહિ ભક્તાનુગ્રહકાતર ।
યેષાં તુ દર્શનસ્પર્શાત્સદ્યઃ પૂતા નરાધમાઃ ॥ ૩૮॥

હરિભક્તિવિહીનાશ્ચ મહાહઙ્કારસંયુતઃ ।
સ્વપ્રશંસારતા ધૂર્તાઃ શઠાશ્ચ સાધુનિન્દકાઃ ॥ ૩૯॥

પુનન્તિ સર્વતીર્થાનિ યેષાં સ્નાનાવગાહનાત્ ।
યેષાં ચ પાદરજસા પૂતા પાદોદકાન્મહી ॥ ૪૦॥

યેષાં સન્દર્શનં સ્પર્શં યે વા વાઞ્છન્તિ ભારતે ।
સર્વેષાં પરમો લાભો વૈષ્ણવાનાં સમાગમઃ ॥ ૪૧॥

ન હ્યમ્મયાનિ તીર્થાનિ ન દેવા મૃચ્છિલામયાઃ ।
તે પુનન્ત્યપિ કાલેન વિષ્ણુભક્તાઃ ક્ષણાદહો ॥ ૪૨॥

સૂત ઉવાવ
મહાલક્ષ્મીવચઃ શ્રુત્વા લક્ષ્મીકાન્તશ્ચ સસ્મિતઃ ।

નિગૂઢતત્ત્વં કથિતુમપિ શ્રેષ્ઠોપચક્રમે ॥ ૪૩॥

શ્રીભગવાનુવાચ ।
ભક્તાનાં લક્ષણં લક્ષ્મિ ગૂઢં શ્રુતિપુરાણયોઃ ।
પુણ્યસ્વરૂપં પાપઘ્નં સુખદં ભુક્તિમુક્તિદમ્ ॥ ૪૪॥

સારભૂતં ગોપનીયં ન વક્તવ્યં ખલેષુ ચ ।
ત્વાં પવિત્રાં પ્રાણતુલ્યાં કથયામિ નિશામય ॥ ૪૫॥

ગુરુવક્ત્રાદ્વિષ્ણુમન્ત્રો યસ્ય કર્ણે પતિષ્યતિ ।
વદન્તિ વેદાસ્તં ચાપિ પવિત્રં ચ નરોત્તમમ્ ॥ ૪૬॥

પુરુષાણાં શતં પૂર્વં તથા તજ્જન્મમાત્રતઃ ।
સ્વર્ગસ્થં નરકસ્થં વા મુક્તિમાપ્નોતિ તત્ક્ષણાત્ ॥ ૪૭॥

યૈઃ કૈશ્ચિદ્યત્ર વા જન્મ લબ્ધં યેષુ ચ જન્તુષુ ।
જીવન્મુક્તાસ્તુ તે પૂતા યાન્તિ કાલે હરેઃ પદમ્ ॥ ૪૮॥

મદ્ભક્તિયુક્તો મર્ત્યશ્ચ સ મુક્તો મદ્ગુણાન્વિતઃ ।
મદ્ગુણાધીનવૃત્તિર્યઃ કથાવિષ્ટશ્ચ સન્તતમ્ ॥ ૪૯॥

મદ્ગુણશ્રુતિમાત્રેણ સાનન્દઃ પુલકાન્વિતઃ ।
સગદ્ગદઃ સાશ્રુનેત્રઃ સ્વાત્મવિસ્મૃત એવ ચ ॥ ૫૦॥

ન વાઞ્છતિ સુખં મુક્તિં સાલોક્યાદિચતુષ્ટયમ્ ।
બ્રહ્મત્વમમરત્વં વા તદ્વાઞ્છા મમ સેવને ॥ ૫૧॥

ઇન્દ્રત્વં ચ મનુત્વં ચ બ્રહ્મત્વં ચ સુદુર્લભમ્ ।
સ્વર્ગરાજ્યાદિભોગં ચ સ્વપ્નેઽપિ ચ ન વાઞ્છતિ ॥ ૫૨॥

ભ્રમન્તિ ભારતે ભક્તાસ્તાદૃગ્જન્મ સુદુર્લભમ્ ।
મદ્ગુણશ્રવણાઃ શ્રાવ્યગાનૈર્નિત્યં મુદાન્વિતાઃ ॥ ૫૩॥

તે યાન્તિ ચ મહીં પૂત્વા નરં તીર્થં મમાલયમ્ ।
ઇત્યેવં કથિતં સર્વં પદ્મે કુરુ યથોચિતમ્ ।
તદાજ્ઞયા તાસ્તચ્ચક્રુર્હરિસ્તસ્થૌ સુખાસને ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે ગઙ્ગાદીનાં
શાપોદ્ધારવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૯.૭॥

## ૯.૮ અષ્ટમોઽધ્યાયઃ । નારાયણનારદસંવાદે કલિમાહાત્મ્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
સરસ્વતી પુણ્યક્ષેત્રમાજગામ ચ ભારતે ।
ગઙ્ગાશાપેન કલયા સ્વયં તસ્થૌ હરેઃ પદે ॥ ૧॥

ભારતી ભારતં ગત્વા બ્રાહ્મી ચ બ્રહ્મણઃ પ્રિયા ।
વાણ્યધિષ્ઠાતૃદેવી સા તેન વાણી પ્રકીર્તિતા ॥ ૨॥

સરો વાપ્યાં ચ સ્રોતસ્તુ સર્વત્રૈવ હિ દૃશ્યતે ।
હરિઃ સરસ્વાંસ્તસ્યેયં તેન નામ્ના સરસ્વતી ॥ ૩॥

સરસ્વતી નદી સા ચ તીર્થરૂપાતિપાવની ।
પાપિનાં પાપદાહાય જ્વલદગ્નિસ્વરૂપિણી ॥ ૪॥

પશ્ચાદ્ભાગીરથી નીતા મહીં ભગીરથેન ચ ।
સા વૈ જગામ કલયા વાણીશાપેન નારદ ॥ ૫॥

તત્રૈવ સમયે તાં ચ દધાર શિરસા શિવઃ ।
વેગં સોઢુમયં શક્તો ભુવઃ પ્રાર્થનયા વિભુઃ ॥ ૬॥

પદ્મા જગામ કલયા સા ચ પદ્માવતી નદી ।
ભારતં ભારતીશાપાત્સ્વયં તસ્થૌ હરેઃ પદે ॥ ૭॥

તતોઽન્યયા સા કલયા લેભે જન્મ ચ ભારતે ।
ધર્મધ્વજસુતા લક્ષ્મીર્વિખ્યાતા તુલસીતિ ચ ॥ ૮॥

પુરા સરસ્વતીશાપાત્પશ્ચાચ્ચ હરિશાપતઃ ।
બભૂવ વૃક્ષરૂપા સા કલયા વિશ્વપાવની ॥ ૯॥

કલેઃ પઞ્ચસહસ્રં ચ વર્ષં સ્થિત્વા તુ ભારતે ।
જગ્મુસ્તાશ્ચ સરિદ્રૂપં વિહાય શ્રીહરેઃ પદમ્ ॥ ૧૦॥

યાનિ સર્વાણિ તીર્થાનિ કાશીં વૃન્દાવનં વિના ।
યાસ્યન્તિ સાર્ધં તાભિશ્ચ વૈકુણ્ઠમાજ્ઞયા હરેઃ ॥ ૧૧॥

શાલગ્રામઃ શક્તિશિવૌ જગન્નાથશ્ચ ભારતમ્ ।
કલેર્દશસહસ્રાન્તે ત્યક્ત્વા યાન્તિ નિજં પદમ્ ॥ ૧૨॥

સાધવશ્ચ પુરાણાનિ શઙ્ખાનિ શ્રાદ્ધતર્પણે ।

વેદોક્તાનિ ચ કર્માણિ યયુસ્તૈઃ સાર્ધમેવ ચ ॥ ૧૩॥

દેવપૂજા દેવનામ તત્કીર્તિગુણકીર્તનમ્ ।
વેદાઙ્ગાનિ ચ શાસ્ત્રાણિ યયુસ્તૈઃ સાર્ધમેવ ચ ॥ ૧૪॥

સન્તશ્ચ સત્યધર્મશ્ચ વેદાશ્ચ ગ્રામદેવતાઃ ।
વ્રતં તપશ્ચાનશનં યયુસ્તૈઃ સાર્ધમેવ ચ ॥ ૧૫॥

વામાચારરતાઃ સર્વે મિથ્યાકપટસંયુતાઃ ।
તુલસીરહિતા પૂજા ભવિષ્યતિ તતઃ પરમ્ ॥ ૧૬॥

શઠાઃ ક્રૂરા દામ્ભિકાશ્ચ મહાહઙ્કારસંયુતાઃ ।
ચોરાશ્ચ હિંસકાઃ સર્વે ભવિષ્યન્તિ તતઃ પરમ્ ॥ ૧૭॥

પુંસો ભેદઃ સ્ત્રીવિભેદો વિવાહો વાપિ નિર્ભયઃ ।
સ્વસ્વામિભેદો વસ્તૂનાં ભવિષ્યતિ તતઃ પરમ્ ॥ ૧૮॥

સર્વે સ્ત્રીવશગાઃ પુંસઃ પુશ્ચલ્યશ્ચ ગૃહે ગૃહે ।
તર્જનૈર્ભર્ત્સનૈઃ શશ્વત્સ્વામિનં તાડયન્તિ ચ ॥ ૧૯॥

ગૃહેશ્વરી ચ ગૃહિણી ગૃહી ભૃત્યાધિકોઽધમઃ ।
ચેટીદાસસમૌ વધ્વાઃ શ્વશ્રૂશ્ચ શ્વશુરસ્તથા ॥ ૨૦॥

કર્તારો બલિનો ગેહે યોનિસમ્બન્ધિબાન્ધવાઃ ।
વિદ્યાસમ્બન્ધિભિઃ સાર્ધં સમ્ભાષાપિ ન વિદ્યતે ॥ ૨૧॥

યથાપરિચિતા લોકાસ્તથા પુંસશ્ચ બાન્ધવાઃ ।
સર્વકર્માક્ષમાઃ પુંસો યોષિતામાજ્ઞયા વિના ॥ ૨૨॥

બ્રહ્મક્ષત્રવિશઃ શૂદ્રા જાત્યાચારવિવર્જિતાઃ ।
સન્ધ્યા ચ યજ્ઞસૂત્રં ચ ભવેલ્લુપ્તં ન સંશયઃ ॥ ૨૩॥

મ્લેચ્છાચારા ભવિષ્યન્તિ વર્ણાશ્ચત્વાર એવ ચ ।
મ્લેચ્છશાસ્ત્રં પઠિષ્યન્તિ સ્વશાસ્ત્રાણિ વિહાય ચ ॥ ૨૪॥

બ્રહ્મક્ષત્રવિશાં વંશાઃ શૂદ્રાણાં સેવકાઃ કલૌ ।
સૂપકારા ધાવકાશ્ચ વૃષવાહાશ્ચ સર્વશઃ ॥ ૨૫॥

સત્યહીના જનાઃ સર્વે સસ્યહીના ચ મેદિની ।
ફલહીનાશ્ચ તરવોઽપત્યહીનાશ્ચ યોષિતઃ ॥ ૨૬॥

ક્ષીરહીનાસ્તથા ગાવઃ ક્ષીરં સર્પિર્વિવર્જિતમ્ ।
દમ્પતી પ્રીતિહીનૌ ચ ગૃહિણઃ સત્યવર્જિતાઃ ॥ ૨૭॥

પ્રતાપહીના ભૂપાશ્ચ પ્રજાશ્ચ કરપીડિતાઃ ।
જલહીના મહાનદ્યો દીર્ઘિકાકન્દરાદયઃ ॥ ૨૮॥

ધર્મહીના પુણ્યહીના વર્ણાશ્ચત્વાર એવ ચ ।
લક્ષેષુ પુણ્યવાન્કોઽપિ ન તિષ્ઠતિ તતઃ પરમ્ ॥ ૨૯॥

કુત્સિતા વિકૃતાકારા નરા નાર્યશ્ચ બાલકાઃ ।
કુવાર્તા કુત્સિતઃ શબ્દો ભવિષ્યતિ તતઃ પરમ્ ॥ ૩૦॥

કેચિદ્ગ્રામાશ્ચ નગરા નરશૂન્યા ભયાનકાઃ ।
કેચિત્સ્વલ્પકુટીરેણ નરેણ ચ સમન્વિતાઃ ॥ ૩૧॥

અરણ્યાનિ ભવિષ્યન્તિ ગ્રામેષુ નગરેષુ ચ ।
અરણ્યવાસિનઃ સર્વે જનાશ્ચ કરપીડિતાઃ ॥ ૩૨॥

સસ્યાનિ ચ ભવિષ્યન્તિ તડાગેષુ નદીષુ ચ ।
પ્રકૃષ્ટવંશજા હીના ભવિષ્યન્તિ કલૌ યુગે ॥ ૩૩॥

અલીકવાદિનો ધૂર્તાઃ શઠાશ્ચાસત્યવાદિનઃ ।
પ્રકૃષ્ટાનિ ચ ક્ષેત્રાણિ સસ્યહીનાનિ નારદ ॥ ૩૪॥

હીનાઃ પ્રકૃષ્ટા ધનિનો દેવભક્તાશ્ચ નાસ્તિકાઃ ।
હિંસકાશ્ચ દયાહીના પૌરાશ્ચ નરઘાતિનઃ ॥ ૩૫॥

વામના વ્યાધિયુક્તાશ્ચ નરા નાર્યશ્ચ સર્વતઃ ।
સ્વલ્પાયુષો ગદાયુક્તા યૌવનૈ રહિતાઃ કલૌ ॥ ૩૬॥

પલિતાઃ ષોડશે વર્ષે મહાવૃદ્ધાશ્ચ વિંશતૌ ।
અષ્ટવર્ષા ચ યુવતી રજોયુક્તા ચ ગર્ભિણી ॥ ૩૭॥

વત્સરાન્તપ્રસૂતા સ્ત્રી ષોડશે ચ જરાન્વિતા ।
પતિપુત્રવતી કાચિત્સર્વા વન્ધ્યાઃ કલૌ યુગે ॥ ૩૮॥

કન્યાવિક્રયિણઃ સર્વે વર્ણાશ્ચત્વાર એવ ચ ।
માતૃજાયાવધૂનાં ચ જારોપેતાન્નભક્ષકાઃ ॥ ૩૯॥

કન્યાનાં ભગિનીનાં વા જારોપાત્તાનજીવિનઃ ।
હરેર્નામ્નાં વિક્રયિણો ભવિષ્યન્તિ કલૌ યુગે ॥ ૪૦॥

સ્વયમુત્સૃજ્ય દાનં ચ કીર્તિવર્ધનહેતવે ।
તતઃ પશ્ચાત્સ્વદાનં ચ સ્વયમુલ્લઙ્ઘયિષ્યતિ ॥ ૪૧॥

દેવવૃત્તિં બ્રહ્મવત્તિં વૃત્તિં ગુરુકુલસ્ય ચ ।
સ્વદત્તાં પરદત્તાં વા સર્વમુલ્લઙ્ઘયિષ્યતિ ॥ ૪૨॥

કન્યકાગામિનઃ કેચિત્કેચિચ્ચ શ્વશ્રુગામિનઃ ।
કેચિદ્વધૂગામિનશ્ચ કેચિદ્વૈ સર્વગામિનઃ ॥ ૪૩॥

ભગિનીગામિનઃ કેચિત્સપત્નીમાતૃગામિનઃ ।
ભ્રાતૃજાયાગામિનશ્ચ ભવિષ્યન્તિ કલૌ યુગે ॥ ૪૪॥

અગમ્યાગમનં ચૈવ કરિષ્યન્તિ ગૃહે ગૃહે ।
માતૃયોનિં પરિત્યજ્ય વિહરિષ્યન્તિ સર્વતઃ ॥ ૪૫॥

પત્નીનાં નિર્ણયો નાસ્તિ ભર્તૃણાં ચ કલૌ યુગે ।
પ્રજાનાં ચૈવ ગ્રામાણાં વસ્તુનાં ચ વિશેષતઃ ॥ ૪૬॥

અલીકવાદિનઃ સર્વે સર્વે ચૌરાશ્ચ લમ્પટાઃ ।
પરસ્પરં હિંસકાશ્ચ સર્વે ચ નરઘાતિનઃ ॥ ૪૭॥

બ્રહ્મક્ષત્રવિશાં વંશા ભવિષ્યન્તિ ચ પાપિનઃ ।
લાક્ષા લોહરસાનાં ચ વ્યાપારં લવણસ્ય ચ ॥ ૪૮॥

વૃષવાહા વિપ્રવંશાઃ શૂદ્રાણાં શવદાહિનઃ ।
શૂદ્રાન્નભોજિનઃ સર્વે સર્વે ચ વૃષલીરતાઃ ॥ ૪૯॥

પઞ્ચયજ્ઞવિહીનાશ્ચ કુહૂરાત્રૌ ચ ભોજિનઃ ।
યજ્ઞસૂત્રવિહીનાશ્ચ સન્ધ્યાશૌચવિહીનકાઃ ॥ ૫૦॥

પુંશ્ચલી વાર્ધુષાજીવા કુટ્ટની ચ રજસ્વલા ।
વિપ્રાણાં રન્ધનાગારે ભવિષ્યતિ ચ પાચિકા ॥ ૫૧॥

અન્નાનાં નિયમો નાસ્તિ યોનીનાં ચ વિશેષતઃ ।
આશ્રમાણાં જનાનાં ચ સર્વે મ્લેચ્છાઃ કલૌ યુગે ॥ ૫૨॥

એવં કલૌ સમ્પ્રવૃત્તે સર્વં મ્લેચ્છમયં ભવેત્ ।
હસ્તપ્રમાણે વૃક્ષે ચ અઙ્ગુષ્ઠે ચૈવ માનવે ॥ ૫૩॥

વિપ્રસ્ય વિષ્ણુયશસઃ પુત્રઃ કલ્કિર્ભવિષ્યતિ ।

નારાયણકલાંશશ્ચ ભગવાન્ બલિનાં વરઃ ॥ ૫૪॥

દીર્ઘેણ કરવાલેન દીર્ઘઘોટકવાહનઃ ।
મ્લેચ્છશૂન્યાં ચ પૃથિવીં ત્રિરાત્રેણ કરિષ્યતિ ॥ ૫૫॥

નિર્મ્લેચ્છાં વસુધાં કૃત્વા ચાન્તર્ધાનં કરિષ્યતિ ।
અરાજકા ચ વસુધા દસ્યુગ્રસ્તા ભવિષ્યતિ ॥ ૫૬॥

સ્થૂલાપ્રમાણા ષડ્રાત્રં વર્ષધારાઽઽપ્લુતા મહી ।
લોકશૂન્યા વૃક્ષશૂન્યા ગૃહશૂન્યા ભવિષ્યતિ ॥ ૫૭॥

તતશ્ચ દ્વાદશાદિત્યાઃ કરિષ્યન્ત્યુદયં મુને ।
પ્રાપ્નોતિ શુષ્કતાં પૃથ્વી સમા તેષાં ચ તેજસા ॥ ૫૮॥

કલૌ ગતે ચ દુર્ધર્ષે પ્રવૃત્તે ચ કૃતે યુગે ।
તપઃસત્ત્વસમાયુક્તો ધર્મઃ પૂર્ણો ભવિષ્યતિ ॥ ૫૯॥

તપસ્વિનશ્ચ ધર્મિષ્ઠા વેદજ્ઞા બ્રાહ્મણા ભુવિ ।
પતિવ્રતાશ્ચ ધર્મિષ્ઠા યોષિતશ્ચ ગૃહે ગૃહે ॥ ૬૦॥

રાજાનઃ ક્ષત્રિયાઃ સર્વે વિપ્રભક્તા મનસ્વિનઃ ।
પ્રતાપવન્તો ધર્મિષ્ઠાઃ પુણ્યકર્મરતાઃ સદા ॥ ૬૧॥

વૈશ્યા વાણિજ્યનિરતા વિપ્રભક્તાશ્ચ ધાર્મિકાઃ ।
શૂદ્રાશ્ચ પુણ્યશીલાશ્ચ ધર્મિષ્ઠા વિપ્રસેવિનઃ ॥ ૬૨॥

વિપ્રક્ષત્રવિશાં વંશા દેવીભક્તિપરાયણાઃ ।
દેવીમન્ત્રરતાઃ સર્વે દેવીધ્યાનપરાયણાઃ ॥ ૬૩॥

શ્રુતિસ્મૃતિપુરાણજ્ઞાઃ પુમાંસ ઋતુગામિનઃ ।
લેશો નાસ્તિ હ્યધર્મસ્ય પૂર્ણો ધર્મઃ કૃતે યુગે ॥ ૬૪॥

ધર્મસ્ત્રિપાચ્ચ ત્રેતાયાં દ્વિપાચ્ચ દ્વાપરે તતઃ ।
કલૌ વૃત્તે ચૈકપાચ્ચ સર્વલુપ્તિસ્તતઃ પરમ્ ॥ ૬૫॥

વારાઃ સપ્ત તથા વિપ્ર તિથયઃ ષોડશ સ્મૃતાઃ ।
તથા દ્વાદશ માસાશ્ચ ઋતવશ્ચ ષડેવ ચ ॥ ૬૬॥

દ્વૌ પક્ષૌ ચાયને દ્વે ચ ચતુર્ભિઃ પ્રહરૈર્દિનમ્ ।
ચતુર્ભિઃ પ્રહરૈ રાત્રિર્માસસ્ત્રિંશદ્દિનૈસ્તથા ॥ ૬૭॥

વર્ષં પઞ્ચવિધં જ્ઞેયં કાલસઙ્ખ્યાવિધિક્રમે ।
યથા ચાયાન્તિ યાન્ત્યેવ યથા યુગચતુષ્ટયમ્ ॥ ૬૮॥

વર્ષે પૂર્ણે નરાણાં ચ દેવાનાં ચ દિવાનિશમ્ ।
શતત્રયે ષષ્ઠ્યધિકે નરાણાં ચ યુગે ગતે ॥ ૬૯॥

દેવાનાં ચ યુગં જ્ઞેયં કાલસઙ્ખ્યાવિદાં મતમ્ ।
મન્વન્તરં તુ દિવ્યાનાં યુગાનામેકસપ્તતિઃ ॥ ૭૦॥

મન્વન્તરસમં જ્ઞેયમાયુષ્યઞ્ચ શચીપતેઃ ।
અષ્ટાવિંશતિમે ચેન્દ્રે ગતે બ્રહ્મદિવાનિશમ્ ॥ ૭૧॥

અષ્ટોત્તરશતે વર્ષે ગતે પાતશ્ચ બ્રહ્મણઃ ।
પ્રલયઃ પ્રાકૃતો જ્ઞેયસ્તત્રાદૃષ્ટા વસુન્ધરા ॥ ૭૨॥

જલપ્લુતાનિ વિશ્વાનિ બ્રહ્મવિષ્ણુશિવાદયઃ ।
ઋષયો જ્ઞાનિનઃ સર્વે લીનાઃ સત્યે ચિદાત્મનિ ॥ ૭૩॥

તત્રૈવ પ્રકૃતિર્લીના તત્ર પ્રાકૃતિકો લયઃ ।
લયે પ્રાકૃતિકે જાતે પાતે ચ બ્રહ્મણો મુને ॥ ૭૪॥

નિમેષમાત્રં કાલશ્ચ શ્રીદેવ્યાઃ પ્રોચ્યતે મુને ।
એવં નશ્યન્તિ સર્વાણિ બ્રહ્માણ્ડાન્યખિલાનિ ચ ॥ ૭૫॥

નિમેષાન્તરકાલેન પુનઃ સૃષ્ટિક્રમેણ ચ ।
એવં કતિવિધા સૃષ્ટિર્લયઃ કતિવિધોઽપિ વા ॥ ૭૬॥

કતિ કલ્પા ગતાયાતાઃ સઙ્ખ્યાં જાનાતિ કઃ પુમાન્ ।
સૃષ્ટીનાં ચ લયાનાં ચ બ્રહ્માણ્ડાનાં ચ નારદ ॥ ૭૭॥

બ્રહ્માદીનાં ચ બ્રહ્માણ્ડે સઙ્ખ્યાં જાનાતિ કઃ પુમાન્ ।
બ્રહ્માણ્ડાનાં ચ સર્વેષામીશ્વરશ્ચૈક એવ સઃ ॥ ૭૮॥

સર્વેષાં પરમાત્મા ચ સચ્ચિદાનન્દરૂપધૃક્ ।
બ્રહ્માદયશ્ચ તસ્યાંશાસ્તસ્યાંશશ્ચ મહાવિરાટ્ ॥ ૭૯॥

તસ્યાંશશ્ચ વિરાટ્ ક્ષુદ્રઃ સૈવેયં પ્રકૃતિઃ પરા ।
તસ્યાઃ સકાશાત્સઞ્જાતોઽપ્યર્ધનારીશ્વરસ્તતઃ ॥ ૮૦॥

સૈવ કૃષ્ણો દ્વિધાભૂતો દ્વિભુજશ્ચ ચતુર્ભુજઃ ।
ચતુર્ભુજશ્ચ વૈકુણ્ઠે ગોલોકે દ્વિભુજઃ સ્વયમ્ ॥ ૮૧॥

બ્રહ્માદિતૃણપર્યન્તં સર્વં પ્રાકૃતિકં ભવેત્ ।
યદ્યત્પ્રાકૃતિકં સૃષ્ટં સર્વં નશ્વરમેવ ચ ॥ ૮૨॥

એવંવિધં સૃષ્ટિહેતું સત્યં નિત્યં સનાતનમ્ ।
સ્વેચ્છામયં પરં બ્રહ્મ નિર્ગુણં પ્રકૃતેઃ પરમ્ ॥ ૮૩॥

નિરુપાધિ નિરાકારં ભક્તાનુગ્રહકાતરમ્ ।
કરોતિ બ્રહ્મા બ્રહ્માણ્ડં યજ્જ્ઞાનાત્કમલોદ્ભવઃ ॥ ૮૪॥

શિવો મૃત્યુજ્જયશ્ચૈવ સંહર્તા સર્વસત્ત્વવિત્ ।
યજ્જ્ઞાનાદ્યસ્ય તપસા સર્વેશસ્તુ તપો મહાન્ ॥ ૮૫॥

મહાવિભૂતિયુક્તશ્ચ સર્વજ્ઞઃ સર્વદર્શનઃ ।
સર્વવ્યાપી સર્વપાતા પ્રદાતા સર્વસમ્પદામ્ ॥ ૮૬॥

વિષ્ણુઃ સર્વેશ્વરઃ શ્રીમાન્ યદ્ભક્ત્યા યસ્ય સેવયા ।
મહામાયા ચ પ્રકૃતિઃ સર્વશક્તિમયીશ્વરી ॥ ૮૭॥

સૈવ પ્રોક્તા ભગવતી સચ્ચિદાનન્દરૂપિણી ।
યજ્જ્ઞાનાદ્યસ્ય તપસા યદ્ભક્ત્યા યસ્ય સેવયા ॥ ૮૮॥

સાવિત્રી દેવમાતા ચ વેદાધિષ્ઠાતૃદેવતા ।
પૂજ્યા દ્વિજાનાં વેદજ્ઞા યજ્જ્ઞાનાદ્યસ્ય સેવયા ॥ ૮૯॥

સર્વવિદ્યાધિદેવી સા પૂજ્યા ચ વિદુષાં પરા ।
યત્સેવયા યત્તપસા સર્વવિશ્વેષુ પૂજિતા ॥ ૯૦॥

સર્વગ્રામાધિદેવી સા સર્વસમ્પત્પ્રદાયિની ।
સર્વેશ્વરી સર્વવન્દ્યા સર્વેષાં પુત્રદાયિની ॥ ૯૧॥

સર્વસ્તુતા ચ સર્વજ્ઞા સર્વદુર્ગાર્તિનાશિની ।
કૃષ્ણવામાંશસમ્ભૂતા કૃષ્ણપ્રાણાધિદેવતા ॥ ૯૨॥

કૃષ્ણપ્રાણાધિકા પ્રેમ્ણા રાધિકા શક્તિસેવયા ।
સર્વાધિકં ચ રૂપં ચ સૌભાગ્યં માનગૌરવે ॥ ૯૩॥

કૃષ્ણવક્ષઃસ્થલસ્થાનં પત્નીત્વે પ્રાપ સેવયા ।
તપશ્ચકાર સા પૂર્વં શતશૃઙ્ગે ચ પર્વતે ॥ ૯૪॥

દિવ્યવર્ષસહસ્રં ચ પતિં પ્રાપ્ત્યર્થમેવ ચ ।

જાતે શક્તિપ્રસાદે તુ દૃષ્ટ્વા ચન્દ્રકલોપમામ્ ॥ ૯૫॥

કૃષ્ણો વક્ષઃસ્થલે કૃત્વા રુરોદ કૃપયા વિભુઃ ।
વરં તસ્યૈ દદૌ સારં સર્વેષામપિ દુર્લભમ્ ॥ ૯૬॥

મમ વક્ષઃસ્થલે તિષ્ઠ મમ ભક્તા ચ શાશ્વતી ।
સૌભાગ્યેન ચ માનેન પ્રેમ્ણાથો ગૌરવેણ ચ ॥ ૯૭॥

ત્વં મે શ્રેષ્ઠા ચ જ્યેષ્ઠા ચ પ્રેયસી સર્વયોષિતામ્ ।
વરિષ્ઠા ચ ગરિષ્ઠા ચ સંસ્તુતા પૂજિતા મયા ॥ ૯૮॥

સતતં તવ સાધ્યોઽહં વશ્યશ્ચ પ્રાણવલ્લભે ।
ઇત્યુક્ત્વા ચ જગન્નાથશ્ચકાર લલનાં તતઃ ॥ ૯૯॥

સપત્નીરહિતાં તાં ચ ચકાર પ્રાણવલ્લભામ્ ।
અન્યા યા યાશ્ચ તા દેવ્યઃ પૂજિતાઃ શક્તિસેવયા ॥ ૧૦૦॥

તપસ્તુ યાદૃશં યાસાં તાદૃક્તાદૃક્ફલં મુને ।
દિવ્યવર્ષસહસ્રં ચ તપસ્તપ્ત્વા હિમાચલે ॥ ૧૦૧॥

દુર્ગા ચ તત્પદં ધ્યાત્વા સર્વપૂજ્યા બભૂવ હ ।
સરસ્વતી તપસ્તપ્ત્વા પર્વતે ગન્ધમાદને ॥ ૧૦૨॥

લક્ષવર્ષં ચ દિવ્યં ચ સર્વવન્દ્યા બભૂવ સા ।
લક્ષ્મીર્યુગશતં દિવ્યં તપસ્તપ્ત્વા ચ પુષ્કરે ॥ ૧૦૩॥

સર્વસમ્પત્પ્રદાત્રી ચ જાતા દેવીનિષેવણાત્ ।
સાવિત્રી મલયે તપ્ત્વા પૂજ્યા વન્દ્યા બભૂવ સા ॥ ૧૦૪॥

ષષ્ટિવર્ષસહસ્રં ચ દિવ્યં ધ્યાત્વા ચ તત્પદમ્ ।
શતમન્વન્તરં તપ્તં શઙ્કરેણ પુરા વિભો ॥ ૧૦૫॥

શતમન્વન્તરં ચેદં બ્રહ્મા શક્તિં જજાપ હ ।
શતમન્વન્તરં વિષ્ણુસ્તપ્ત્વા પાતા બભૂવ હ ॥ ૧૦૬॥

દશમન્વન્તરં તપ્ત્વા શ્રીકૃષ્ણઃ પરમં તપઃ ।
ગોલોકં પ્રાપ્તવાન્દિવ્યં મોદતેઽદ્યાપિ યત્ર હિ ॥ ૧૦૭॥

દશમન્વન્તરં ધર્મસ્તપ્ત્વા વૈ ભક્તિસંયુતઃ ।
સર્વપ્રાણઃ સર્વપૂજ્યઃ સર્વાધારો બભૂવ સઃ ॥ ૧૦૮॥

એવં દેવ્યાશ્ચ તપસા સર્વે દેવાશ્ચ પૂજિતાઃ ।
મુનયો મનવો ભૂપા બ્રાહ્મણાશ્ચૈવ પૂજિતાઃ ॥ ૧૦૯॥

એવં તે કથિતં સર્વં પુરાણં સયથાગમમ્ ।
ગુરુવક્ત્રાદ્યથા જ્ઞાતં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૧૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
કલિમાહાત્મ્યવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૯.૮॥

## ૯.૯ નવમોઽધ્યાયઃ । ભૂમિસ્તોત્રવર્ણનમ્ ।

નારદ ઉવાચ ।
દેવ્યા નિમેષમાત્રેણ બ્રહ્મણઃ પાત એવ ચ ।
તસ્ય પાતઃ પ્રાકૃતિકઃ પ્રલયઃ પરિકીર્તિતઃ ॥ ૧॥

પ્રલયે પ્રાકૃતે ચોક્તા તત્રાદૃષ્ટા વસુન્ધરા ।
જલપ્લુતાનિ વિશ્વાનિ સર્વે લીનાઃ પરાત્મનિ ॥ ૨॥

વસુન્ધરા તિરોભૂતા કુત્ર વા સા ચ તિષ્ઠતિ ।
સૃષ્ટેર્વિધાનસમયે સાવિર્ભૂતા કથં પુનઃ ॥ ૩॥

કથં બભૂવ સા ધન્યા માન્યા સર્વાશ્રયા જયા ।
તસ્યાશ્ચ જન્મકથનં વદ મઙ્ગલકારણમ્ ॥ ૪॥

શ્રીનારાયણ ઉવાચ ।
સર્વાદિસૃષ્ટૌ સર્વેષાં જન્મ દેવ્યા ઇતિ શ્રુતિઃ ।
આવિર્ભાવસ્તિરોભાવઃ સર્વેષુ પ્રલયેષુ ચ ॥ ૫॥

શ્રૂયતાં વસુધાજન્મ સર્વમઙ્ગલકારણમ્ ।
વિઘ્નનિઘ્નકરં પાપનાશનં પુણ્યવર્ધનમ્ ॥ ૬॥

અહો કેચિદ્વદન્તીતિ મધુકૈટભમેદસા ।
બભૂવ વસુધા ધન્યા તદ્વિરુદ્ધમતઃ શ‌ૃણુ ॥ ૭॥

ઊચતુસ્તૌ પુરા વિષ્ણું તુષ્ટૌ યુદ્ધેન તેજસા ।
આવાં વધ્યૌ ન યત્રોર્વી પાથસા સંવૃતેતિ ચ ॥ ૮॥

તયોર્જીવનકાલે ન પ્રત્યક્ષા સાભવત્સ્ફુટમ્ ।

તતો બભૂવ મેદશ્ચ મરણાનન્તરં તયોઃ ॥ ૯॥

મેદિનીતિ ચ વિખ્યાતેત્યુક્તમેતન્મતં શ‍ૃણુ ।
જલધૌતા કૃતા પૂર્વં વર્ધિતા મેદસા યતઃ ॥ ૧૦॥

કથયામિ તે તજ્જન્મ સાર્થકં સર્વમઙ્ગલમ્ ।
પુરા શ્રુતં યચ્છ્રુત્યુક્તં ધર્મવક્ત્રાચ્ચ પુષ્કરે ॥ ૧૧॥

મહાવિરાટ્શરીરસ્ય જલસ્થસ્ય ચિરં સ્ફુટમ્ ।
મનો બભૂવ કાલેન સર્વાઙ્ગવ્યાપકં ધ્રુવમ્ ॥ ૧૨॥

તચ્ચ પ્રવિષ્ટં સર્વેષાં તલ્લોમ્નાં વિવરેષુ ચ ।
કાલેન મહતા પશ્ચાદ્ બભૂવ વસુધા મુને ॥ ૧૩॥

પ્રત્યેકં પ્રતિલોમ્નાં ચ કૂપેષુ સંસ્થિતા સદા ।
આવિર્ભૂતા તિરોભૂતા સજલા ચ પુનઃ પુનઃ ॥ ૧૪॥

આવિર્ભૂતા સૃષ્ટિકાલે તજ્જલોપર્યુપસ્થિતા ।
પ્રલયે ચ તિરોભૂતા જલસ્યાભ્યન્તરે સ્થિતા ॥ ૧૫॥

પ્રતિવિશ્વેષુ વસુધા શૈલકાનનસંયુતા ।
સપ્તસાગરસંયુક્તા સપ્તદ્વીપસમન્વિતા ॥ ૧૬॥

હેમાદ્રિમેરુસંયુક્તા ગ્રહચન્દ્રાર્કસંયુતા ।
બ્રહ્મવિષ્ણુશિવાદ્યૈશ્ચ સુરૈર્લોકૈસ્તદાજ્ઞયા ॥ ૧૭॥

પુણ્યતીર્થસમાયુક્તા પુણ્યભારતસંયુતા ।
કાઞ્ચનીભૂમિસંયુક્તા સપ્તસ્વર્ગસમન્વિતા ॥ ૧૮॥

પાતાલસપ્તં તદધસ્તદૂર્ધ્વં બ્રહ્મલોકતઃ ।
ધ્રુવલોકશ્ચ તત્રૈવ સર્વં વિશ્વં ચ તત્ર વૈ ॥ ૧૯॥

એવં સર્વાણિ વિશ્વાનિ પૃથિવ્યાં નિર્મિતાનિ ચ ।
નશ્વરાણિ ચ વિશ્વાનિ સર્વાણિ કૃત્રિમાણિ વૈ ॥ ૨૦॥

પ્રલયે પ્રાકૃતે ચૈવ બ્રહ્મણશ્ચ નિપાતને ।
મહાવિરાડાદિસૃષ્ટૌ સૃષ્ટઃ કૃષ્ણેન ચાત્મના ॥ ૨૧॥

નિત્યૌ ચ સ્થિતિપ્રલયૌ કાષ્ઠાકાલેશ્વરૈઃ સહ ।
નિત્યાધિષ્ઠાતૃદેવી સા વારાહે પૂજિતા સુરૈઃ ॥ ૨૨॥

મુનિભિર્મનુભિર્વિપ્રૈર્ગન્ધર્વાદિભિરેવ ચ ।
વિષ્ણોર્વરાહરૂપસ્ય પત્ની સા શ્રુતિસમ્મતા ॥ ૨૩॥

તત્પુત્રો મઙ્ગલો જ્ઞેયો ઘટેશો મઙ્ગલાત્મજઃ ।
નારદ ઉવાચ ।
પૂજિતા કેન રુપેણ વારાહે ચ સુરૈર્મહી ॥ ૨૪॥

વારાહે ચૈવ વારાહી સર્વૈઃ સર્વાશ્રયા સતી ।
મૂલપ્રકૃતિસમ્ભૂતા પઞ્ચીકરણમાર્ગતઃ ॥ ૨૫॥

તસ્યાઃ પૂજાવિધાનં ચાપ્યધશ્ચોર્ધ્વમનેકશઃ ।
મઙ્ગલં મઙ્ગલસ્યાપિ જન્મ વાસં વદ પ્રભો ॥ ૨૬॥

શ્રીનારાયણ ઉવાચ ।
વારાહે ચ વરાહશ્ચ બ્રહ્મણા સંસ્તુતઃ પુરા ।
ઉદ્ધાર મહીં હત્વા હિરણ્યાક્ષં રસાતલમ્ ॥ ૨૭॥

જલે તાં સ્થાપયામાસ પદ્મપત્રં યથા હ્રદે ।
તત્રૈવ નિર્મમે બ્રહ્મા વિશ્વં સર્વં મનોહરમ્ ॥ ૨૮॥

દૃષ્ટ્વા તદધિદેવીં ચ સકામાં કામુકો હરિઃ ।
વરાહરૂપી ભગવાન્ કોટિસૂર્યસમપ્રભઃ ॥ ૨૯॥

કૃત્વા રતિકલાં સર્વાં મૂર્તિં ચ સુમનોહરામ્ ।
ક્રીડાઞ્ચકાર રહસિ દિવ્યવર્ષમહર્નિશમ્ ॥ ૩૦॥

સુખસમ્ભોગસંસ્પર્શાન્મૂર્ચ્છાં સમ્પ્રાપ સુન્દરી ।
વિદગ્ધાયા વિદગ્ધેન સઙ્ગમોઽતિસુખપ્રદઃ ॥ ૩૧॥

વિષ્ણુસ્તદઙ્ગસંશ્લેષાદ્ બુબુધે ન દિવાનિશમ્ ।
વર્ષાન્તે ચેતનાં પ્રાપ્ય કામી તત્યાજ કામુકીમ્ ॥ ૩૨॥

પૂર્વરૂપં વરાહં ચ દધાર સ ચ લીલયા ।
પૂજાઞ્ચકાર તાં દેવીં ધ્યાત્વા ચ ધરણીં સતીમ્ ॥ ૩૩॥

ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈઃ સિન્દૂરૈરનુલેપનૈઃ ।
વસ્ત્રૈઃ પુષ્પૈશ્ચ બલિભિઃ સમ્પૂજ્યોવાચ તાં હરિઃ ॥ ૩૪॥

શ્રીભગવાનુવાચ ।
સર્વાધારા ભવ શુભે સર્વૈઃ સમ્પૂજિતા સુખમ્ ।

મુનિભિર્મનુભિર્દેવૈઃ સિદ્ધૈશ્ચ દાનવાદિભિઃ ॥ ૩૫॥

અમ્બુવાચીત્યાગદિને ગૃહારમ્ભે પ્રવેશને ।
વાપીતડાગારમ્ભે ચ ગૃહે ચ કૃષિકર્મણિ ॥ ૩૬॥

તવ પૂજાં કરિષ્યન્તિ મદ્વરેણ સુરાદયઃ ।
મૂઢા યે ન કરિષ્યન્તિ યાસ્યન્તિ નરકં ચ તે ॥ ૩૭॥

વસુધોવાચ ।
વહામિ સર્વં વારાહરૂપેણાહં તવાજ્ઞયા ।
લીલામાત્રેણ ભગવન્ વિશ્વં ચ સચરાચરમ્ ॥ ૩૮॥

મુક્તાં શુક્તિં હરેરર્ચાં શિવલિઙ્ગં શિવાં તથા ।
શઙ્ખં પ્રદીપં યન્ત્રં ચ માણિક્યં હીરકં તથા ॥ ૩૯॥

યજ્ઞસૂત્રં ચ પુષ્પં ચ પુસ્તકં તુલસીદલમ્ ।
જપમાલાં પુષ્પમાલાં કર્પૂરં ચ સુવર્ણકમ્ ॥ ૪૦॥

ગોરોચનં ચન્દનં ચ શાલગ્રામજલં તથા ।
એતાન્વોઢુમશક્તાહં ક્લિષ્ટા ચ ભગવઞ્છૃણુ ॥ ૪૧॥

શ્રીભગવાનુવાચ ।
દ્રવ્યાણ્યેતાનિ યે મૂઢા અર્પયિષ્યન્તિ સુન્દરિ ।
યાસ્યન્તિ કાલસૂત્રં તે દિવ્યં વર્ષશતં ત્વયિ ॥ ૪૨॥

ઇત્યેવમુક્ત્વા ભગવાન્ વિરરામ ચ નારદ ।
બભૂવ તેન ગર્ભેણ તેજસ્વી મઙ્ગલગ્રહઃ ॥ ૪૩॥

પૂજાઞ્ચક્રુઃ પૃથિવ્યાશ્ચ તે સર્વે ચાજ્ઞયા હરેઃ ।
કણ્વશાખોક્તધ્યાનેન તુષ્ટુવુશ્ચ સ્તવેન તે ॥ ૪૪॥

દદુર્મૂલેન મન્ત્રેણ નૈવેદ્યાદિકમેવ ચ ।
સંસ્તુતા ત્રિષુ લોકેષુ પૂજિતા સા બભૂવ હ ॥ ૪૫॥

નારદ ઉવાચ ।
કિં ધ્યાનં સ્તવનં તસ્યા મૂલમન્ત્રં ચ કિં વદ ।
ગૂઢં સર્વપુરાણેષુ શ્રોતું કૌતૂહલં મમ ॥ ૪૬॥

શ્રીનારાયણ ઉવાચ ।
આદૌ ચ પૃથિવી દેવી વરાહેણ ચ પૂજિતા ।

તતો હિ બ્રહ્મણા પશ્ચામૃજિતા પૃથિવી તદા ॥ ૪૭॥

તતઃ સર્વૈર્મુનીન્દ્રૈશ્ચ મનુભિર્માનવાદિભિઃ ।
ધ્યાનં ચ સ્તવનં મન્ત્રં શ‌ૃણુ વક્ષ્યામિ નારદ ॥ ૪૮॥

ૐ હ્રીં શ્રીં ક્લીં વસુધાયૈ સ્વાહેત્યનેન
મન્ત્રેણ વિષ્ણુના પૂજિતા પુરા ।
શ્વેતપઙ્કજવર્ણાભાં શરચ્ચન્દ્રનિભાનનામ્ ॥ ૪૯॥

ચન્દનોત્ક્ષિપ્તસર્વાઙ્ગીં રત્નભૂષણભૂષિતામ્ ।
રત્નાધારાં રત્નગર્ભાં રત્નાકરસમન્વિતામ્ ॥ ૫૦॥

વહ્નિશુદ્ધાંશુકાધાનાં સસ્મિતાં વન્દિતાં ભજે ।
ધ્યાનેનાનેન સા દેવી સર્વૈશ્ચ પૂજિતાભવત્ ॥ ૫૧॥

સ્તવનં શ‌ૃણુ વિપ્રેન્દ્ર કણ્વશાખોક્તમેવ ચ ।
શ્રીનારાયણ ઉવાચ ।
જયે જયે જલાધારે જલશીલે જલપ્રદે ॥ ૫૨॥

યજ્ઞસૂકરજાયે ત્વં જયં દેહિ જયાવહે ।
મઙ્ગલે મઙ્ગલાધારે માઙ્ગલ્યે મઙ્ગલપ્રદે ॥ ૫૩॥

મઙ્ગલાર્થં મઙ્ગલેશે મઙ્ગલં દેહિ મે ભવે ।
સર્વાધારે ચ સર્વજ્ઞે સર્વશક્તિસમન્વિતે ॥ ૫૪॥

સર્વકામપ્રદે દેવિ સર્વેષ્ટં દેહિ મે ભવે ।
પુણ્યસ્વરૂપે પુણ્યાનાં બીજરૂપે સનાતનિ ॥ ૫૫॥

પુણ્યાશ્રયે પુણ્યવતામાલયે પુણ્યદે ભવે ।
સર્વસસ્યાલયે સર્વસસ્યાઢ્યે સર્વસસ્યદે ॥ ૫૬॥

સર્વસસ્યહરે કાલે સર્વસસ્યાત્મિકે ભવે ।
ભૂમે ભૂમિપસર્વસ્વે ભૂમિપાલપરાયણે ॥ ૫૭॥

ભૂમિપાનાં સુખકરે ભૂમિં દેહિ ચ ભૂમિદે ।
ઇદં સ્તોત્રં મહાપુણ્યં પ્રાતરુત્થાય યઃ પઠેત્ ॥ ૫૮॥

કોટિજન્મસુ સ ભવેદ્ બલવાન્ભૂમિપેશ્વરઃ ।
ભૂમિદાનકૃતં પુણ્યં લભ્યતે પઠનાજ્જનૈઃ ॥ ૫૯॥

ભૂમિદાનહરાત્પાપાન્મુચ્યતે નાત્ર સંશયઃ ।

અમ્બુવાચીભૂકરણપાપાત્સ મુચ્યતે ધ્રુવમ્ ॥ ૬૦॥

અન્યકૂપે કૂપખનનપાપાત્સ મુચ્યતે ધ્રુવમ્ ।
પરભૂમિહરાત્પાપાન્મુચ્યતે નાત્ર સંશયઃ ॥ ૬૧॥

ભૂમૌ વીર્યત્યાગપાપાદ્ભૂમૌ દીપાદિસ્થાપનાત્ ।
પાપેન મુચ્યતે સોઽપિ સ્તોત્રસ્ય પઠનાન્મુને ॥ ૬૨॥

અશ્વમેધશતં પુણ્યં લભતે નાત્ર સંશયઃ ।
ભૂમિદેવ્યા મહાસ્તોત્રં સર્વકલ્યાણકારકમ્ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
ભૂમિસ્તોત્રવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૯.૯॥

## ૯.૧૦ દશમોઽધ્યાયઃ । પૃથિવ્યુપાખ્યાને નરકફલપ્રાપ્તિવર્ણનમ્ ।

નારદ ઉવાચ ।
ભૂમિદાનકૃતં પુણ્યં પાપં તદ્ધરણેન ચ ।
પરભૂહરણાત્પાપં પરકૂપે ખનને તથા ॥ ૧॥

અમ્બુવાચ્યાં ભૂખનને વીર્યસ્ય ત્યાગ એવ ચ ।
દીપાદિસ્થાપનાત્પાપં શ્રોતુમિચ્છામિ યત્નતઃ ॥ ૨॥

અન્યદ્વા પૃથિવીજન્યં પાપં યત્પૃચ્છ્યતે પરમ્ ।
યદસ્તિ તત્પ્રતીકારં વદ વેદવિદાંવર ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
વિતસ્તિમાત્રભૂમિં ચ યો દદાતિ ચ ભારતે ।
સન્ધ્યાપૂતાય વિપ્રાય સ યાતિ શિવમન્દિરમ્ ॥ ૪॥

ભૂમિં ચ સર્વસસ્યાઢ્યાં બ્રાહ્મણાય દદાતિ ચ ।
ભૂમિરેણુપ્રમાણાબ્દમન્તે વિષ્ણુપદે સ્થિતિઃ ॥ ૫॥

ગ્રામં ભૂમિં ચ ધાન્યં ચ બ્રાહ્મણાય દદાતિ યઃ ।
સર્વપાપાદ્વિનિર્મુક્તૌ ચોભૌ દેવીપુરઃસ્થિતૌ ॥ ૬॥

ભૂમિદાનં ચ તત્કાલે યઃ સાધુશ્ચાનુમોદતે ।
સ ચ પ્રયાતિ વૈકુણ્ઠે મિત્રગોત્રસમન્વિતઃ ॥ ૭॥

સ્વદત્તાં પરદત્તાં વા બ્રહ્મવૃત્તિં હરેત્તુ યઃ ।
સ તિષ્ઠતિ કાલસૂત્રે યાવચ્ચન્દ્રદિવાકરૌ ॥ ૮॥

તત્પુત્રપૌત્રપ્રભૃતિર્ભૂમિહીનઃ શ્રિયા હતઃ ।
પુત્રહીનો દરિદ્રશ્ચ ઘોરં યાતિ ચ રૌરવમ્ ॥ ૯॥

ગવાં માર્ગં વિનિષ્કૃષ્ય યશ્ચ સસ્યં દદાતિ ચ ।
દિવ્યં વર્ષશતં ચૈવ કુમ્ભીપાકે ચ તિષ્ઠતિ ॥ ૧૦॥

ગોષ્ઠં તડાગં નિષ્કૃષ્ય માર્ગે સસ્યં દદાતિ યઃ ।
સ તિષ્ઠત્યસિપત્રે ચ યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૧૧॥

પઞ્ચપિણ્ડાનનુદ્ધૃત્ય પરકૂપે ચ સ્નાતિ યઃ ।
પ્રાપ્નોતિ નરકં ચૈવ સ્નાનં નિષ્ફલમેવ ચ ॥ ૧૨॥

કામી ભૂમૌ ચ રહસિ વીર્યત્યાગં કરોતિ યઃ ।
ભૂમિરેણુપ્રમાણં ચ વર્ષં તિષ્ઠતિ રૌરવે ॥ ૧૩॥

અમ્બુવાચ્યાં ભૂકરણં યઃ કરોતિ ચ માનવઃ ।
સ યાતિ કૃમિદંશં ચ સ્થિતિસ્તત્ર ચતુર્યુગમ્ ॥ ૧૪॥

પરકીયે લુપ્તકૂપે કૂપં મૂઢઃ કરોતિ યઃ ।
પુષ્કરિણ્યાં ચ લુપ્તાયાં પુષ્કરિણીં દદાતિ યઃ ॥ ૧૫॥

સર્વં ફલં પરસ્યૈવ તપ્તકુણ્ડં વ્રજેચ્ચ સઃ ।
તત્ર તિષ્ઠતિ સન્તપ્તો યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૧૬॥

પરકીયે તડાગે ચ પઙ્કમુદ્ધૃત્ય ચોન્મૃજેત્ ।
રેણુપ્રમાણવર્ષં ચ બ્રહ્મલોકે વસેન્નરઃ ॥ ૧૭॥

પિણ્ડં પિત્રે ભૂમિભર્તુર્ન પ્રદાય ચ માનવઃ ।
શ્રાદ્ધં કરોતિ યો મૂઢો નરકં યાતિ નિશ્ચિતમ્ ॥ ૧૮॥

ભૂમૌ દીપં યોઽર્પયતિ સ ચાન્ધઃ સપ્તજન્મસુ ।
ભૂમૌ શઙ્ખં ચ સંસ્થાપ્ય કુષ્ઠં જન્માન્તરે લભેત્ ॥ ૧૯॥

મુક્તાં માણિક્યહીરૌ ચ સુવર્ણં ચ મણિં તથા ।
પઞ્ચ સંસ્થાપયેદ્ભૂમૌ સ ચાન્ધઃ સપ્તજન્મસુ ॥ ૨૦॥

શિવલિઙ્ગં શિવામર્ચાં યશ્ચાર્પયતિ ભૂતલે ।
શતમન્વન્તરં યાવત્કૃમિભક્ષઃ સ તિષ્ઠતિ ॥ ૨૧॥

શઙ્ખં યન્ત્રં શિલાતોયં પુષ્પં ચ તુલસીદલમ્ ।
યશ્ચાર્પયતિ ભૂમૌ ચ સ તિષ્ઠેન્નરકે ધ્રુવમ્ ॥ ૨૨॥

જપમાલાં પુષ્પમાલાં કર્પૂરં રોચનં તથા ।
યો મૂઢશ્ચાર્પયેદ્ભૂમૌ સ યાતિ નરકં ધ્રુવમ્ ॥ ૨૩॥

ભૂમૌ ચન્દનકાષ્ઠં ચ રુદ્રાક્ષં કુશમૂલકમ્ ।
સંસ્થાપ્ય ભૂમૌ નરકે વસેન્મન્વન્તરાવધિ ॥ ૨૪॥

પુસ્તકં યજ્ઞસૂત્રં ચ ભૂમૌ સંસ્થાપયેન્નરઃ ।
ન ભવેદ્વિપ્રયોનૌ ચ તસ્ય જન્માન્તરે જનિઃ ॥ ૨૫॥

બ્રહ્મહત્યાસમં પાપમિહ વૈ લભતે ધ્રુવમ્ ।
ગ્રન્થિયુક્તં યજ્ઞસૂત્રં પૂજ્યં ચ સર્વવર્ણકૈઃ ॥ ૨૬॥

યજ્ઞં કૃત્વા તુ યો ભૂમિં ક્ષીરેણ ન હિ સિઞ્ચતિ ।
સ યાતિ તપ્તભૂમિં ચ સન્તપ્તઃ સપ્તજન્મસુ ॥ ૨૭॥

ભૂકમ્પે ગ્રહણે યો હિ કરોતિ ખનનં ભુવઃ ।
જન્માન્તરે મહાપાપો હ્યઙ્ગહીનો ભવેદ્ ધ્રુવમ્ ॥ ૨૮॥

ભવનં યત્ર સર્વેષાં ભૂમિસ્તેન પ્રકીર્તિતા ।
કાશ્યપી કશ્યપસ્યેયમચલા સ્થિરરૂપતઃ ॥ ૨૯॥

વિશ્વમ્ભરા ધારણાચ્ચાનન્તાનન્તસ્વરૂપતઃ ।
પૃથિવી પૃથુકન્યાત્વાદ્વિસ્તૃતત્વાન્મહામુને ॥ ૩૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે પૃથિવ્યુપાખ્યાને
નરકફલપ્રાપ્તિવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૯.૧૦॥

## ૯.૧૧ એકાદશોઽધ્યાયઃ । ગઙ્ગોપાખ્યાનવર્ણનમ્ ।

નારદ ઉવાચ ।
શ્રુતં પૃથિવ્યુપાખ્યાનમતીવ સુમનોહરમ્ ।
ગઙ્ગોપાખ્યાનમધુના વદ વેદવિદાંવર ॥ ૧॥

ભારતે ભારતીશાપાત્સા જગામ સુરેશ્વરી ।

વિષ્ણુસ્વરૂપા પરમા સ્વયં વિષ્ણુપદીતિ ચ ॥ ૨॥

કથં કુત્ર યુગે કેન પ્રાર્થિતા પ્રેરિતા પુરા ।
તત્ક્રમં શ્રોતુમિચ્છામિ પાપઘ્નં પુણ્યદં શુભમ્ ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
રાજરાજેશ્વરઃ શ્રીમાન્ સગરઃ સૂર્યવંશજઃ ।
તસ્ય ભાર્યા ચ વૈદર્ભી શૈવ્યા ચ દ્વે મનોહરે ॥ ૪॥

તત્પત્ન્યામેકપુત્રશ્ચ બભૂવ સુમનોહરઃ ।
અસમઞ્જ ઇતિ ખ્યાતઃ શૈવ્યાયાં કુલવર્ધનઃ ॥ ૫॥

અન્યા ચારાધયામાસ શઙ્કરં પુત્રકામુકી ।
બભૂવ ગર્ભસ્તસ્યાશ્ચ હરસ્ય ચ વરેણ હ ॥ ૬॥

ગતે શતાબ્દે પૂર્ણે ચ માંસપિણ્ડં સુષાવ સા ।
તદ્ દૃષ્ટ્વા સા શિવં ધ્યાત્વા રુરોદોચ્ચૈઃ પુનઃ પુનઃ ॥ ૭॥

શમ્ભુર્બ્રાહ્મણરૂપેણ તત્સમીપં જગામ હ ।
ચકાર સંવિભજ્યૈતત્પિણ્ડં ષષ્ટિસહસ્રધા ॥ ૮॥

સર્વે બભૂવુઃ પુત્રાશ્ચ મહાબલપરાક્રમાઃ ।
ગ્રીષ્મમધ્યાહ્નમાર્તણ્ડપ્રભામુષ્ટકલેવરાઃ ॥ ૯॥

કપિલસ્ય મુનેઃ શાપાદ્ બભૂવુર્ભસ્મસાચ્ચ તે ।
રાજા રુરોદ તચ્છ્રુત્વા જગામ ગહને વને ॥ ૧૦॥

તપશ્ચકારાસમઞ્જો ગઙ્ગાનયનકારણાત્ ।
લક્ષવર્ષં તપસ્તપ્ત્વા મમાર કાલયોગતઃ ॥ ૧૧॥

અંશુમાંસ્તસ્ય તનયો ગઙ્ગાનયનકારણાત્ ।
તપઃ કૃત્વા લક્ષવર્ષં મમાર કાલયોગતઃ ॥ ૧૨॥

ભગીરથસ્તસ્ય પુત્રો મહાભાગવતઃ સુધીઃ ।
વૈષ્ણવો વિષ્ણુભક્તશ્ચ ગુણવાનજરામરઃ ॥ ૧૩॥

તપઃ કૃત્વા લક્ષવર્ષં ગઙ્ગાનયનકારણાત્ ।
દદર્શ કૃષ્ણં ગ્રીષ્મસ્થસૂર્યકોટિસમપ્રભમ્ ॥ ૧૪॥

દ્વિભુજં મુરલીહસ્તં કિશોરં ગોપવેષિણમ્ ।
ગોપાલસુન્દરીરૂપં ભક્તાનુગ્રહરૂપિણમ્ ॥ ૧૫॥

સ્વેચ્છામયં પરં બ્રહ્મ પરિપૂર્ણતમં પ્રભુમ્ ।
બ્રહ્મવિષ્ણુશિવાદ્યૈશ્ચ સ્તુતં મુનિગણૈર્નુતમ્ ॥ ૧૬॥

નિર્લિપ્તં સાક્ષિરૂપં ચ નિર્ગુણં પ્રકૃતેઃ પરમ્ ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યં ભક્તાનુગ્રહકારણમ્ ॥ ૧૭॥

વહ્નિશુદ્ધાંશુકાધાનં રત્નભૂષણભૂષિતમ્ ।
તુષ્ટાવ દૃષ્ટ્વા નૃપતિઃ પ્રણમ્ય ચ પુનઃ પુનઃ ॥ ૧૮॥

લીલયા ચ વરં પ્રાપ વાઞ્છિતં વંશતારણમ્ ।
કૃત્વા ચ સ્તવનં દિવ્યં પુલકાઙ્કિતવિગ્રહઃ ॥ ૧૯॥

શ્રીભગવાનુવાચ ।
ભારતં ભારતીશાપાદ્ ગચ્છ શીઘ્રં સુરેશ્વરિ ।
સગરસ્ય સુતાન્સર્વાન્પૂતાન્કુરુ મમાજ્ઞયા ॥ ૨૦॥

ત્વત્સ્પર્શવાયુના પૂતા યાસ્યન્તિ મમ મન્દિરમ્ ।
બિભ્રતો મમ મૂર્તીશ્ચ દિવ્યસ્યન્દનગામિનઃ ॥ ૨૧॥

મત્પાર્ષદા ભવિષ્યન્તિ સર્વકાલં નિરામયાઃ ।
સમુચ્છિદ્ય કર્મભોગાન્ કૃતાઞ્જન્મનિ જન્મનિ ॥ ૨૨॥

કોટિજન્માર્જિતં પાપં ભારતે યત્કૃતં નૃભિઃ ।
ગઙ્ગાયા વાતસ્પર્શેન નશ્યતીતિ શ્રુતૌ શ્રુતમ્ ॥ ૨૩॥

સ્પર્શનાદ્દર્શનાદ્દેવ્યાઃ પુણ્યં દશગુણં તતઃ ।
મૌસલસ્નાનમાત્રેણ સામાન્યદિવસે નૃણામ્ ॥ ૨૪॥

શતકોટિજન્મપાપં નશ્યતીતિ શ્રુતૌ શ્રુતમ્ ।
યાનિ કાનિ ચ પાપાનિ બ્રહ્મહત્યાદિકાનિ ચ ॥ ૨૫॥

જન્મસઙ્ખ્યાર્જિતાન્યેવ કામતોઽપિ કૃતાનિ ચ ।
તાનિ સર્વાણિ નશ્યન્તિ મૌસલસ્નાનતો નૃણામ્ ॥ ૨૬॥

પુણ્યાહસ્નાનતઃ પુણ્યં વેદા નૈવ વદન્તિ ચ ।
કિઞ્ચિદ્વદન્તિ તે વિપ્ર ફલમેવ યથાગમમ્ ॥ ૨૭॥

બ્રહ્મવિષ્ણુશિવાદ્યાશ્ચ સર્વં નૈવ વદન્તિ ચ ।
સામાન્યદિવસસ્નાનસઙ્કલ્પં શ‍ૃણુ સુન્દરિ ॥ ૨૮॥

પુણ્યં દશગુણં ચૈવ મૌસલસ્નાનતઃ પરમ્ ।
તતસ્ત્રિંશદ્ગુણં પુણ્યં રવિસઙ્ક્રમણે દિને ॥ ૨૯॥

અમાયાં ચાપિ તત્તુલ્યં દ્વિગુણં દક્ષિણાયને ।
તતો દશગુણં પુણ્યં નરાણામુત્તરાયણે ॥ ૩૦॥

ચાતુર્માસ્યાં પૌર્ણમાસ્યામનન્તં પુણ્યમેવ ચ ।
અક્ષયાયાં ચ તત્તુલ્યં ચૈતદ્વેદે નિરૂપિતમ્ ॥ ૩૧॥

અસઙ્ખ્યપુણ્યફલદમેતેષુ સ્નાનદાનકમ્ ।
સામાન્યદિવસસ્નાનાદ્દાનાચ્છતગુણં ફલમ્ ॥ ૩૨॥

મન્વન્તરાદ્યાયાં તિથૌ યુગાદ્યાયાં તથૈવ ચ ।
માઘસ્ય સિતસપ્તમ્યાં ભીષ્માષ્ટમ્યાં તથૈવ ચ ॥ ૩૩॥

અથાપ્યશોકાષ્ટમ્યાં ચ નવમ્યાં ચ તથા હરેઃ ।
તતોઽપિ દ્વિગુણં પુણ્યં નન્દાયાં તવ દુર્લભમ્ ॥ ૩૪॥

દશહરાદશમ્યાં તુ યુગાદ્યાદિસમં ફલમ્ ।
નન્દાસમં ચ વારુણ્યાં મહત્પૂર્વે ચતુર્ગુણમ્ ॥ ૩૫॥

તતશ્ચતુર્ગુણં પુણ્યં દ્વિમહત્પૂર્વકે સતિ ।
પુણ્યં કોટિગુણં ચૈવ સામાન્યસ્નાનતોઽપિ યત્ ॥ ૩૬॥

ચન્દ્રોપરાગસમયે સૂર્યે દશગુણં તતઃ ।
પુણ્યમર્ધોદયે કાલે તતઃ શતગુણં ફલમ્ ॥ ૩૭॥

ઇત્યેવમુક્ત્વા દેવેશો વિરરામ તયોઃ પુરઃ ।
તમુવાચ તતો ગઙ્ગા ભક્તિનમ્રાઽઽત્મકન્ધરા ॥ ૩૮॥

ગઙ્ગોવાચ ।
યામિ ચેદ્ભારતં નાથ ભારતીશાપતઃ પુરા ।
તવાજ્ઞયા ચ રાજેન્દ્ર તપસા ચૈવ સામ્પ્રતમ્ ॥ ૩૯॥

દાસ્યન્તિ પાપિનો મહ્યં પાપાનિ યાનિ કાનિ ચ ।
તાનિ મે કેન નશ્યન્તિ તમુપાયં વદ પ્રભો ॥ ૪૦॥

કતિકાલં પરિમિતં સ્થિતિર્મે તત્ર ભારતે ।
કદા યાસ્યામિ દેવેશ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૪૧॥

મમાન્યદ્વાઞ્છિતં યદ્યત્સર્વં જાનાસિ સર્વવિત્ ।

સર્વાન્તરાત્મન્ સર્વજ્ઞ તદુપાયં વદ પ્રભો ॥ ૪૨॥

શ્રીભગવાનુવાચ ।
જાનામિ વાઞ્છિતં ગઙ્ગે તવ સર્વં સુરેશ્વરિ ।
પતિસ્તે દ્રવરૂપાયા લવણોદો ભવિષ્યતિ ॥ ૪૩॥

સ મમાંશસ્વરૂપશ્ચ ત્વં ચ લક્ષ્મીસ્વરૂપિણી ।
વિદગ્ધાયા વિદગ્ધેન સઙ્ગમો ગુણવાન્ ભુવિ ॥ ૪૪॥

યાવત્યઃ સન્તિ નદ્યશ્ચ ભારત્યાદ્યાશ્ચ ભારતે ।
સૌભાગ્યા ત્વં ચ તાસ્વેવ લવણોદસ્ય સૌરતે ॥ ૪૫॥

અદ્યપ્રભૃતિ દેવેશિ કલેઃ પઞ્ચસહસ્રકમ્ ।
વર્ષં સ્થિતિસ્તે ભારત્યાઃ શાપેન ભારતે ભુવિ ॥ ૪૬॥

નિત્યં ત્વમબ્ધિના સાર્ધં કરિષ્યસિ રહો રતિમ્ ।
ત્વમેવ રસિકા દેવિ રસિકેન્દ્રેણ સંયુતા ॥ ૪૭॥

ત્વાં સ્તોષ્યન્તિ ચ સ્તોત્રેણ ભગીરથકૃતેન ચ ।
ભારતસ્થા જનાઃ સર્વે પૂજયિષ્યન્તિ ભક્તિતઃ ॥ ૪૮॥

કણ્વશાખોક્તધ્યાનેન ધ્યાત્વા ત્વાં પૂજયિષ્યતિ ।
યઃ સ્તૌતિ પ્રણમેન્નિત્યં સોઽશ્વમેધફલં લભેત્ ॥ ૪૯॥

ગઙ્ગા ગઙ્ગેતિ યો બ્રૂયાદ્યોજનાનાં શતૈરપિ ।
મુચ્યતે સર્વપાપેભ્યો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૫૦॥

સહસ્રપાપિનાં સ્નાનાદ્યત્પાપં તે ભવિષ્યતિ ।
પ્રકૃતેર્ભક્તસંસ્પર્શાદેવ તદ્ધિ વિનઙ્ક્ષ્યતિ ॥ ૫૧॥

પાપિનાં તુ સહસ્રાણાં શવસ્પર્શેન યત્ત્વયિ ।
તન્મન્ત્રોપાસકસ્નાનાત્તદઘં ચ વિનઙ્ક્ષ્યતિ ॥ ૫૨॥

તત્રૈવ ત્વમધિષ્ઠાનં કરિષ્યસ્યઘમોચનમ્ ।
સાર્ધં સરિદ્ભિઃ શ્રેષ્ઠાભિઃ સરસ્વત્યાદિભિઃ શુભે ॥ ૫૩॥

તત્તુ તીર્થં ભવેત્સદ્યો યત્ર ત્વદ્ગુણકીર્તનમ્ ।
ત્વદ્રેણુસ્પર્શમાત્રેણ પૂતો ભવતિ પાતકી ॥ ૫૪॥

રેણુપ્રમાણવર્ષં ચ દેવીલોકે વસેદ્ ધ્રુવમ્ ।
જ્ઞાનેન ત્વયિ યે ભક્ત્યા મન્નામસ્મૃતિપૂર્વકમ્ ॥ ૫૫॥

સમુત્સૃજન્તિ પ્રાણાંશ્ચ તે ગચ્છન્તિ હરેઃ પદમ્ ।
પાર્ષદપ્રવરાસ્તે ચ ભવિષ્યન્તિ હરેશ્ચિરમ્ ॥ ૫૬॥

લયં પ્રાકૃતિકં તે ચ દ્રક્ષ્યન્તિ ચાપ્યસઙ્ખ્યકમ્ ।
મૃતસ્ય બહુપુણ્યેન તચ્છવં ત્વયિ વિન્યસેત્ ॥ ૫૭॥

પ્રયાતિ સ ચ વૈકુણ્ઠં યાવદઙ્ગઃ સ્થિતિસ્ત્વયિ ।
કાયવ્યૂહં તતઃ કૃત્વા ભોજયિત્વા સ્વકર્મકમ્ ॥ ૫૮॥

તસ્મૈ દદામિ સારૂપ્યં કરોમિ તં ચ પાર્ષદમ્ ।
અજ્ઞાની ત્વજ્જલસ્પર્શાદ્યદિ પ્રાણાન્સમુત્સૃજેત્ ॥ ૫૯॥

તસ્મૈ દદામિ સાલોક્યં કરોમિ તં ચ પાર્ષદમ્ ।
અન્યત્ર વા ત્યજેત્પ્રાણાંસ્ત્વન્નામસ્મૃતિપૂર્વકમ્ ॥ ૬૦॥

તસ્મૈ દદામિ સાલોક્યં યાવદ્વૈ બ્રહ્મણો વયઃ ।
અન્યત્ર વા ત્યજેત્પ્રાણાંસ્ત્વન્નામસ્મૃતિપૂર્વકમ્ ॥ ૬૧॥

તસ્મૈ દદામિ સારૂપ્યમસઙ્ખ્યં પ્રાકૃતં લયમ્ ।
રત્નેન્દ્રસારનિર્માણયાનેન સહ પાર્ષદૈઃ ॥ ૬૨॥

સદ્યઃ પ્રયાતિ ગોલોકં મમ તુલ્યો ભવેદ્ ધ્રુવમ્ ।
તીર્થેઽપ્યતીર્થે મરણે વિશેષો નાસ્તિ કશ્ચન ॥ ૬૩॥

મન્મન્ત્રોપાસકાનાં તુ નિત્યં નૈવેદ્યભોજિનામ્ ।
પૂતં કર્તું સશક્તો હિ લીલયા ભુવનત્રયમ્ ॥ ૬૪॥

રત્નેન્દ્રસારયાનેન ગોલોકં સમ્પ્રયાન્તિ ચ ।
મદ્ભક્તા બાન્ધવા યેષાં તેઽપિ પશ્ચાદયોઽપિ હિ ॥ ૬૫॥

પ્રયાન્તિ રત્નયાનેન ગોલોકં ચાતિદુર્લભમ્ ।
યત્ર યત્ર સ્મૃતાસ્તે ચ જ્ઞાનેન જ્ઞાનિનઃ સતિ ॥ ૬૬॥

જીવન્મુક્તાશ્ચ તે પૂતા મદ્ભક્તેઃ સંવિધાનતઃ ।
ઇત્યુક્ત્વા શ્રીહરિસ્તાંશ્ચ પ્રત્યુવાચ ભગીરથમ્ ॥ ૬૭॥

સ્તુહિ ગઙ્ગામિમાં ભક્ત્યા પૂજાં ચ કુરુ સામ્પ્રતમ્ ।
ભગીરથસ્તાં તુષ્ટાવ પૂજયામાસ ભક્તિતઃ ॥ ૬૮॥

કૌથુમોક્તેન ધ્યાનેન સ્તોત્રેણાપિ પુનઃ પુનઃ ।

પ્રણનામ ચ શ્રીકૃષ્ણં પરમાત્માનમીશ્વરમ્ ॥ ૬૯॥

ભગીરથશ્ચ ગઙ્ગા ચ સોઽન્તર્ધાનં ચકાર હ ।
નારદ ઉવાચ ।
કેન ધ્યાનેન સ્તોત્રેણ કેન પૂજાક્રમેણ ચ ॥ ૭૦॥

પૂજાં ચકાર નૃપતિર્વદ વેદવિદાંવર ।
શ્રીનારાયણ ઉવાચ ।
સ્નાત્વા નિત્યક્રિયાં કૃત્વા ધૃત્વા ધૌતે ચ વાસસી ॥ ૭૧॥

સમ્પૂજ્ય દેવષટ્કં ચ સંયતો ભક્તિપૂર્વકમ્ ।
ગણેશં ચ દિનેશં ચ વહ્નિં વિષ્ણું શિવં શિવામ્ ॥ ૭૨॥

સમ્પૂજ્ય દેવષટ્કં ચ સોઽધિકારી ચ પૂજને ।
ગણેશં વિઘ્નનાશાય આરોગ્યાય દિવાકરમ્ ॥ ૭૩॥

વહ્નિં શૌચાય વિષ્ણું ચ લક્ષ્મ્યર્થં પૂજયેન્નરઃ ।
શિવં જ્ઞાનાય જ્ઞાનેશં શિવાં ચ મુક્તિસિદ્ધયે ॥ ૭૪॥

સમ્પૂજ્યૈતાઁલ્લભેત્પ્રાજ્ઞો વિપરીતમતોઽન્યથા ।
દધ્યાવનેન ધ્યાનેન તદ્ધ્યાનં શ‍ૃણુ નારદ ॥ ૭૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
ગઙ્ગોપાખ્યાનવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૯.૧૧॥

## ૯.૧૨ દ્વાદશોઽધ્યાયઃ । ગઙ્ગોપાખ્યાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ધ્યાનં ચ કણ્વશાખોક્તં સર્વપાપપ્રણાશનમ્ ।
શ્વેતપઙ્કજવર્ણાભાં ગઙ્ગાં પાપપ્રણાશિનીમ્ ॥ ૧॥

કૃષ્ણવિગ્રહસમ્ભૂતાં કૃષ્ણતુલ્યાં પરાં સતીમ્ ।
વહ્નિશુદ્ધાંશુકાધાનાં રત્નભૂષણભૂષિતામ્ ॥ ૨॥

શરત્પૂર્ણેન્દુશતકમૃષ્ટશોભાકરાં પરામ્ ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યાં શશ્વત્સુસ્થિરયૌવનામ્ ॥ ૩॥

નારાયણપ્રિયાં શાન્તાં તત્સૌભાગ્યસમન્વિતામ્ ।

બિભ્રતીં કબરીભારં માલતીમાલ્યસંયુતમ્ ॥ ૪॥

સિન્દૂરબિન્દુલલિતં સાર્ધં ચન્દનબિન્દુભિઃ ।
કસ્તૂરીપત્રકં ગણ્ડે નાનાચિત્રસમન્વિતમ્ ॥ ૫॥

પક્વબિમ્બવિનિન્દ્યાચ્છચાર્વોષ્ઠપુટમુત્તમમ્ ।
મુક્તાપઙ્ક્તિપ્રભામુષ્ટદન્તપઙ્ક્તિમનોરમમ્ ॥ ૬॥

સુચારુવક્ત્રનયનં સકટાક્ષં મનોહરમ્ ।
કઠિનં શ્રીફલાકારં સ્તનયુગ્મં ચ બિભ્રતીમ્ ॥ ૭॥

બૃહચ્છ્રોણિ સુકઠિનાં રમ્ભાસ્તમ્ભવિનિન્દિતામ્ ।
સ્થલપદ્મપ્રભામુષ્ટપાદપદ્મયુગં વરમ્ ॥ ૮॥

રત્નપાદુકસંયુક્તં કુઙ્કુમાક્તં સયાવકમ્ ।
દેવેન્દ્રમૌલિમન્દારમકરન્દકણારુણમ્ ॥ ૯॥

સુરસિદ્ધમુનીન્દ્રૈશ્ચ દત્તાર્ઘસંયુતં સદા ।
તપસ્વિમૌલિનિકરભ્રમરશ્રેણિસંયુતમ્ ॥ ૧૦॥

મુક્તિપ્રદં મુમુક્ષૂણાં કામિનાં સર્વભોગદમ્ ।
વરાં વરેણ્યાં વરદાં ભક્તાનુગ્રહકારિણીમ્ ॥ ૧૧॥

શ્રીવિષ્ણોઃ પદદાત્રીં ચ ભજે વિષ્ણુપદીં સતીમ્ ।
ઇત્યનેનૈવ ધ્યાનેન ધ્યાત્વા ત્રિપથગાં શુભામ્ ॥ ૧૨॥

દત્ત્વા સમ્પૂજયેદ્ બ્રહ્મન્નુપચારાણિ ષોડશ ।
આસનં પાદ્યમર્ઘ્યં ચ સ્નાનીયં ચાનુલેપનમ્ ॥ ૧૩॥

ધૂપં દીપં ચ નૈવેદ્યં તામ્બૂલં શીતલં જલમ્ ।
વસનં ભૂષણં માલ્યં ગન્ધમાચમનીયકમ્ ॥ ૧૪॥

મનોહરં સુતલ્પં ચ દેયાન્યેતાનિ ષોડશ ।
દત્ત્વા ભક્ત્યા ચ પ્રણમેત્સંસ્તૂય સમ્પુટાઞ્જલિઃ ॥ ૧૫॥

સમ્પૂજ્યૈવ પ્રકારેણ સોઽશ્વમેધફલં લભેત્ ।
નારદ ઉવાચ ।
શ્રોતુમિચ્છામિ દેવેશ લક્ષ્મીકાન્ત જગત્પતે ॥ ૧૬॥

વિષ્ણોર્વિષ્ણુપદીસ્તોત્રં પાપઘ્નં પુણ્યકારકમ્ ।
શ્રીનારાયણ ઉવાચ ।

શ‍ૃણુ નારદ વક્ષ્યામિ પાપઘ્નં પુણ્યકારકમ્ ॥ ૧૭॥

શિવસઙ્ગીતસમ્મુગ્ધશ્રીકૃષ્ણાઙ્ગસમુદ્ભવામ્ ।
રાધાઙ્ગદ્રવસંયુક્તાં તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૮॥

યજ્જન્મ સૃષ્ટેરાદૌ ચ ગોલોકે રાસમણ્ડલે ।
સન્નિધાને શઙ્કરસ્ય તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૧૯॥

ગોપૈર્ગોપીભિરાકીર્ણે શુભે રાધામહોત્સવે ।
કાર્તિકીપૂર્ણિમાયાં ચ તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૦॥

કોટિયોજનવિસ્તીર્ણા દૈર્ઘ્યે લક્ષગુણા તતઃ ।
સમાવૃતા યા ગોલોકે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૧॥

ષષ્ટિલક્ષયોજના યા તતો દૈર્ઘ્યે ચતુર્ગુણા ।
સમાવૃતા યા વૈકુણ્ઠે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૨॥

ત્રિંશલ્લક્ષયોજના યા દૈર્ઘ્યે પઞ્ચગુણા તતઃ ।
આવૃતા બ્રહ્મલોકે યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૩॥

ત્રિંશલ્લક્ષયોજના યા દૈર્ઘ્યે ચતુર્ગુણા તતઃ ।
આવૃતા શિવલોકે યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૪॥

લક્ષયોજનવિસ્તીર્ણા દૈર્ઘ્યે સપ્તગુણા તતઃ ।
આવૃતા ધ્રુવલોકે યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૫॥

લક્ષયોજનવિસ્તીર્ણા દૈર્ઘ્યે પઞ્ચગુણા તતઃ ।
આવૃતા ચન્દ્રલોકે યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૬॥

ષષ્ટિસહસ્રયોજના યા દૈર્ઘ્યે દશગુણા તતઃ ।
આવૃતા સૂર્યલોકે યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૭॥

લક્ષયોજનવિસ્તીર્ણા દૈર્ઘ્યે પઞ્ચગુણા તતઃ ।
આવૃતા યા તપોલોકે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૮॥

સહસ્રયોજનાયામા દૈર્ઘ્યે દશગુણા તતઃ ।
આવૃતા જનલોકે યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૨૯॥

દશલક્ષયોજના યા દૈર્ઘ્યે પઞ્ચગુણા તતઃ ।
આવૃતા યા મહર્લોકે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૩૦॥

સહસ્રયોજનાયામા દૈર્ઘ્યે શતગુણા તતઃ ।
આવૃતા યા ચ કૈલાસે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૩૧॥

શતયોજનવિસ્તીર્ણા દૈર્ઘ્યે દશગુણા તતઃ ।
મન્દાકિની યેન્દ્રલોકે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૩૨॥

પાતાલે ભોગવતી ચ વિસ્તીર્ણા દશયોજના ।
તતો દશગુણા દૈર્ઘ્યે તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૩૩॥

ક્રોશૈકમાત્રવિસ્તીર્ણા તતઃ ક્ષીણા ચ કુત્રચિત્ ।
ક્ષિતૌ ચાલકનન્દા યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૩૪॥

સત્યે યા ક્ષીરવર્ણા ચ ત્રેતાયામિન્દુસન્નિભા ।
દ્વાપરે ચન્દનાભા યા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૩૫॥

જલપ્રભા કલૌ યા ચ નાન્યત્ર પૃથિવીતલે ।
સ્વર્ગે ચ નિત્યં ક્ષીરાભા તાં ગઙ્ગાં પ્રણમામ્યહમ્ ॥ ૩૬॥

યત્તોયકણિકાસ્પર્શે પાપિનાં જ્ઞાનસમ્ભવઃ ।
બ્રહ્મહત્યાદિકં પાપં કોટિજન્માર્જિતં દહેત્ ॥ ૩૭॥

ઇત્યેવં કથિતા બ્રહ્મન્ ગઙ્ગાપદ્યૈકવિંશતિઃ ।
સ્તોત્રરૂપં ચ પરમં પાપઘ્નં પુણ્યજીવનમ્ ॥ ૩૮॥

નિત્યં યો હિ પઠેદ્ભક્ત્યા સમ્પૂજ્ય ચ સુરેશ્વરીમ્ ।
સોઽશ્વમેધફલં નિત્યં લભતે નાત્ર સંશયઃ ॥ ૩૯॥

અપુત્રો લભતે પુત્રં ભાર્યાહીનો લભેત્સ્ત્રિયમ્ ।
રોગાત્પ્રમુચ્યતે રોગી બન્ધાન્મુક્તો ભવેદ્ ધ્રુવમ્ ॥ ૪૦॥

અસ્પષ્ટકીર્તિઃ સુયશા મૂર્ખો ભવતિ પણ્ડિતઃ ।
યઃ પઠેત્પ્રાતરુત્થાય ગઙ્ગાસ્તોત્રમિદં શુભમ્ ॥ ૪૧॥

શુભં ભવેચ્ચ દુઃસ્વપ્ને ગઙ્ગાસ્નાનફલં લભેત્ ।
શ્રીનારાયણ ઉવાચ ।
સ્તોત્રેણાનેન ગઙ્ગા ચ સ્તુત્વા ચૈવ ભગીરથઃ ॥ ૪૨॥

જગામ તાં ગૃહીત્વા ચ યત્ર નષ્ટાશ્ચ સાગરાઃ ।
વૈકુણ્ઠં તે યયુસ્તૂર્ણં ગઙ્ગાયાઃ સ્પર્શવાયુના ॥ ૪૩॥

ભગીરથેન સા નીતા તેન ભાગીરથી સ્મૃતા ।

ઇત્યેવં કથિતં સર્વં ગઙ્ગોપાખ્યાનમુત્તમમ્ ॥ ૪૪॥

પુણ્યદં મોક્ષદં સારં કિં ભૂયઃ શ્રોતુમિચ્છસિ ।
નારદ ઉવાચ ।
કથં ગઙ્ગા ત્રિપથગા જાતા ભુવનપાવની ॥ ૪૫॥

કુત્ર વા કેન વિધિના તત્સર્વં વદ મે પ્રભો ।
તત્રસ્થાશ્ચ જના યે યે તે ચ કિં ચક્રુરુત્તમમ્ ॥ ૪૬॥

એતત્સર્વં તુ વિસ્તીર્ણં કૃત્વા વક્તુમિહાર્હસિ ।
શ્રીનારાયણાય ઉવાચ ।
કાર્તિક્યાં પૂર્ણિમાયાં તુ રાધાયાઃ સુમહોત્સવઃ ॥ ૪૭॥

કૃષ્ણઃ સમ્પૂજ્ય તાં રાધામુવાસ રાસમણ્ડલે ।
કૃષ્ણેન પૂજિતાં તાં તુ સમ્પૂજ્ય હૃષ્ટમાનસાઃ ॥ ૪૮॥

ઊષુર્બ્રહ્માદયઃ સર્વે ઋષયઃ શૌનકાદયઃ ।
એતસ્મિન્નન્તરે કૃષ્ણસઙ્ગીતા ચ સરસ્વતી ॥ ૪૯॥

જગૌ સુન્દરતાલેન વીણયા ચ મનોહરમ્ ।
તુષ્ટો બ્રહ્મા દદૌ તસ્યૈ રત્નેન્દ્રસારહારકમ્ ॥ ૫૦॥

શિવો મણીન્દ્રસારં તુ સર્વબ્રહ્માણ્ડદુર્લભમ્ ।
કૃષ્ણઃ કૌસ્તુભરત્નં ચ સર્વરત્નાત્પરં વરમ્ ॥ ૫૧॥

અમૂલ્યરત્નનિર્માણં હારસારં ચ રાધિકા ।
નારાયણશ્ચ ભગવાન્ દદૌ માલાં મનોહરામ્ ॥ ૫૨॥

અમૂલ્યરત્નનિર્માણં લક્ષ્મીઃ કનકકુણ્ડલમ્ ।
વિષ્ણુમાયા ભગવતી મૂલપ્રકૃતિરીશ્વરી ॥ ૫૩॥

દુર્ગા નારાયણીશાના બ્રહ્મભક્તિં સુદુર્લભામ્ ।
ધર્મબુદ્ધિં ચ ધર્મશ્ચ યશશ્ચ વિપુલં ભવે ॥ ૫૪॥

વહ્નિશુદ્ધાંશુકં વહ્નિર્વાયુશ્ચ મણિનૂપુરાન્ ।
એતસ્મિન્નન્તરે શમ્ભુર્બ્રહ્મણા પ્રેરિતો મુહુઃ ॥ ૫૫॥

જગૌ શ્રીકૃષ્ણસઙ્ગીતં રાસોલ્લાસસમન્વિતમ્ ।
મૂર્ચ્છાં પ્રાપુઃ સુરાઃ સર્વે ચિત્રપુત્તલિકા યથા ॥ ૫૬॥

કષ્ટેન ચેતનાં પ્રાપ્ય દદૃશૂ રાસમણ્ડલે ।

સ્થલં સર્વં જલાકીર્ણં રાધાકૃષ્ણવિહીનકમ્ ॥ ૫૭॥

અત્યુચ્ચૈ રુરુદુઃ સર્વે ગોપા ગોપ્યઃ સુરા દ્વિજાઃ ।
ધ્યાનેન બ્રહ્મા બુબુધે સર્વં તીર્થમભીપ્સિતમ્ ॥ ૫૮॥

ગતશ્ચ રાધયા સાર્ધં શ્રીકૃષ્ણો દ્રવતામિતિ ।
તતો બ્રહ્માદયઃ સર્વે તુષ્ટુવુઃ પરમેશ્વરમ્ ॥ ૫૯॥

સ્વમૂર્તિં દર્શય વિભો વાઞ્છિતં વરમેવ નઃ ।
એતસ્મિન્નન્તરે તત્ર વાગ્બભૂવાશરીરિણી ॥ ૬૦॥

તામેવ શુશ્રુવુઃ સર્વે સુવ્યક્તાં મધુરાન્વિતામ્ ।
સર્વાત્માહમિયં શક્તિર્ભક્તાનુગ્રહવિગ્રહા ॥ ૬૧॥

મમાપ્યસ્યાશ્ચ દેહેન કર્તવ્યં ચ કિમાવયોઃ ।
મનવો માનવાઃ સર્વે મુનયશ્ચૈવ વૈષ્ણવાઃ ॥ ૬૨॥

મન્મન્ત્રપૂતા માં દ્રષ્ટુમાગમિષ્યન્તિ મત્પદમ્ ।
મૂર્તિં દ્રષ્ટું ચ સુવ્યક્તાં યદીચ્છથ સુરેશ્વરાઃ ॥ ૬૩॥

કરોતુ શમ્ભુસ્તત્રૈવં મદીયં વાક્યપાલનમ્ ।
સ્વયં વિધાતસ્ત્વં બ્રહ્મન્નાજ્ઞાં કુરુ જગદ્ગુરુમ્ ॥ ૬૪॥

કર્તું શાસ્ત્રવિશેષં ચ વેદાઙ્ગં સુમનોહરમ્ ।
અપૂર્વમન્ત્રનિકરૈઃ સર્વાભીષ્ટફલપ્રદૈઃ ॥ ૬૫॥

સ્તોત્રૈશ્ચ નિકરૈર્ધ્યાનૈર્યુતં પૂજાવિધિક્રમૈઃ ।
મન્મન્ત્રકવચસ્તોત્રં કૃત્વા યત્નેન ગોપનમ્ ॥ ૬૬॥

ભવન્તિ વિમુખા યેન જના માં તત્કરિષ્યતિ ।
સહસ્રેષુ શતેષ્વેકો મન્મન્ત્રોપાસકો ભવેત્ ॥ ૬૭॥

જના મન્મન્ત્રપૂતાશ્ચ ગમિષ્યન્તિ ચ મત્પદમ્ ।
અન્યથા ન ભવિષ્યન્તિ સર્વે ગોલોકવાસિનઃ ॥ ૬૮॥

નિષ્ફલં ભવિતા સર્વં બ્રહ્માણ્ડં ચૈવ બ્રહ્મણઃ ।
જનાઃ પઞ્ચપ્રકારાશ્ચ યુક્તાઃ સ્રષ્ટું ભવે ભવે ॥ ૬૯॥

પૃથિવીવાસિનઃ કેચિત્કેચિત્સ્વર્ગનિવાસિનઃ ।
ઇદં કર્તું મહાદેવઃ કરોતિ દેવસંસદિ ॥ ૭૦॥

પ્રતિજ્ઞાં સુદૃઢાં સદ્યસ્તતો મૂર્તિં ચ દ્રક્ષ્યતિ ।
ઇત્યેવમુક્ત્વા ગગને વિરરામ સનાતનઃ ॥ ૭૧॥

તચ્છ્રુત્વા જગતાં ધાતા તમુવાચ શિવં મુદા ।
બ્રહ્મણો વચનં શ્રુત્વા જ્ઞાનેશો જ્ઞાનિનાં વરઃ ॥ ૭૨॥

ગઙ્ગાતોયં કરે કૃત્વા સ્વીકારં ચ ચકાર સઃ ।
સંયુક્તં વિષ્ણુમાયાયા મન્ત્રૌઘૈઃ શાસ્ત્રમુત્તમમ્ ॥ ૭૩॥

વેદસારં કરિષ્યામિ પ્રતિજ્ઞાપાલનાય ચ ।
ગઙ્ગાતોયમુપસ્મૃશ્ય મિથ્યા યદિ વદેજ્જનઃ ॥ ૭૪॥

સ યાતિ કાલસૂત્રં ચ યાવદ્વૈ બ્રહ્મણો વયઃ ।
ઇત્યુક્તે શઙ્કરે બ્રહ્મન્ ગોલોકે સુરસંસદિ ॥ ૭૫॥

આવિર્બભૂવ શ્રીકૃષ્ણો રાધયા સહિતસ્તતઃ ।
તં સુદૃષ્ટ્વા ચ સંહૃષ્ટાસ્તુષ્ટુવુઃ પુરુષોત્તમમ્ ॥ ૭૬॥

પરમાનન્દપૂર્ણાશ્ચ ચકુશ્ચ પુનરુત્સવમ્ ।
કાલેન શમ્ભુર્ભગવાન્ મુક્તિદીપં ચકાર સઃ ॥ ૭૭॥

ઇત્યેવં કથિતં સર્વં સુગોપ્યં ચ સુદુર્લભમ્ ।
સ એવ દ્રવરૂપા સા ગઙ્ગા ગોલોકસમ્ભવા ॥ ૭૮॥

રાધાકૃષ્ણાઙ્ગસમ્ભૂતા ભુક્તિમુક્તિફલપ્રદા ।
સ્થાને સ્થાને સ્થાપિતા સા કૃષ્ણેન ચ પરાત્મના ।
કૃષ્ણસ્વરૂપા પરમા સર્વબ્રહ્માણ્ડપૂજિતા ॥ ૭૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
ગઙ્ગોપાખ્યાનવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૯.૧૨॥

## ૯.૧૩ ત્રયોદશોઽધ્યાયઃ । ગઙ્ગોપાખ્યાનવર્ણનમ્ ।

નારદ ઉવાચ ।
કલેઃ પઞ્ચસહસ્રાબ્દે સમતીતે સુરેશ્વર ।
ક્વ ગતા સા મહાભાગ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।

ભારતં ભારતીશાપાત્સમાગત્યેશ્વરેચ્છયા ।
જગામ તત્ર વૈકુણ્ઠે શાપાન્તે પુનરેવ સા ॥ ૨॥

ભારતી ભારતં ત્યક્ત્વા તજ્જગામ હરેઃ પદમ્ ।
પદ્માવતી ચ શાપાન્તે ગઙ્ગા સા ચૈવ નારદ ॥ ૩॥

ગઙ્ગા સરસ્વતી લક્ષ્મીશ્ચૈતાસ્તિસ્રઃ પ્રિયા હરેઃ ।
તુલસીસહિતા બ્રહ્મંશ્ચતસ્રઃ કીર્તિતાઃ શ્રુતૌ ॥ ૪॥

નારદ ઉવાચ ।
કેનોપાયેન સા દેવી વિષ્ણુપાદાબ્જસમ્ભવા ।
બ્રહ્મકમણ્ડલુસ્થા ચ શ્રુતા શિવપ્રિયા ચ સા ॥ ૫॥

બભૂવ સા મુનિશ્રેષ્ઠ ગઙ્ગા નારાયણપ્રિયા ।
અહો કેન પ્રકારેણ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૬॥

શ્રીનારાયણ ઉવાચ ।
પુરા બભૂવ ગોલોકે સા ગઙ્ગા દ્રવરૂપિણી ।
રાધાકૃષ્ણાઙ્ગસમ્ભૂતા તદંશા તત્સ્વરૂપિણી ॥ ૭॥

દ્રવાધિષ્ઠાતૃદેવી યા રૂપેણાપ્રતિમા ભુવિ ।
નવયૌવનસમ્પન્ના સર્વાભરણભૂષિતા ॥ ૮॥

શરન્મધ્યાહ્નપદ્માસ્યા સસ્મિતા સુમનોહરા ।
તપ્તકાઞ્ચનવર્ણાભા શરચ્ચન્દ્રસમપ્રભા ॥ ૯॥

સ્નિગ્ધપ્રભાતિસુસ્નિગ્ધા શુદ્ધસત્ત્વસ્વરૂપિણી ।
સુપીનકઠિનશ્રોણિઃ સુનિતમ્બયુગન્ધરા ॥ ૧૦॥

પીનોન્નતં સુકઠિનં સ્તનયુગ્મં સુવર્તુલમ્ ।
સુચારુનેત્રયુગલં સુકટાક્ષં સુવઙ્કિમમ્ ॥ ૧૧॥

વઙ્કિમં કબરીભારં માલતીમાલ્યસંયુતમ્ ।
સિન્દૂરબિન્દુલલિતં સાર્ધં ચન્દનબિન્દુભિઃ ॥ ૧૨॥

કસ્તૂરીપત્રિકાયુક્તં ગણ્ડયુગ્મં મનોરમમ્ ।
બન્ધૂકકુસુમાકારમધરોષ્ઠં ચ સુન્દરમ્ ॥ ૧૩॥

પક્વદાડિમબીજાભદન્તપઙ્ક્તિસમુજ્જ્વલમ્ ।
વાસસી વહ્નિશુદ્ધે ચ નીવીયુક્તે ચ બિભ્રતી ॥ ૧૪॥

સા સકામા કૃષ્ણપાર્શ્વે સમુવાસ સુલજ્જિતા ।
વાસસા મુખમાચ્છાદ્ય લોચનાભ્યાં વિભોર્મુખમ્ ॥ ૧૫॥

નિમેષરહિતાભ્યાં ચ પિબન્તી સતતં મુદા ।
પ્રફુલ્લવદના હર્ષાન્નવસઙ્ગમલાલસા ॥ ૧૬॥

મૂર્ચ્છિતા પ્રભુરૂપેણ પુલકાઙ્કિતવિગ્રહા ।
એતસ્મિન્નન્તરે તત્ર વિદ્યમાના ચ રાધિકા ॥ ૧૭॥

ગોપીત્રિંશત્કોટિયુક્તા ચન્દ્રકોટિસમપ્રભા ।
કોપેનારક્તપદ્માસ્યા રક્તપઙ્કજલોચના ॥ ૧૮॥

પીતચમ્પકવર્ણાભા ગજેન્દ્રમન્દગામિની ।
અમૂલ્યરત્નનિર્માણનાનાભૂષણભૂષિતા ॥ ૧૯॥

અમૂલ્યરત્નખચિતમમૂલ્યં વહ્નિશૌચકમ્ ।
પીતવસ્ત્રસ્ય યુગલં નીવીયુક્તં ચ બિભ્રતી ॥ ૨૦॥

સ્થલપદ્મપ્રભામુષ્ટં કોમલં ચ સુરઞ્જિતમ્ ।
કૃષ્ણદત્તાર્ઘ્યસંયુક્તં વિન્યસન્તી પદામ્બુજમ્ ॥ ૨૧॥

રત્નેન્દ્રસારનિર્માણવિમાનાદવરુહ્ય સા ।
સેવ્યમાના ચ ઋષિભિઃ શ્વેતચામરવાયુના ॥ ૨૨॥

કસ્તૂરીબિન્દુભિર્યુક્તં ચન્દનેન સમન્વિતમ્ ।
દીપ્તદીપપ્રભાકારં સિન્દૂરં બિન્દુશોભિતમ્ ॥ ૨૩॥

દધતી ભાલમધ્યે ચ સીમન્તાધઃસ્થલોજ્જ્વલે ।
પારિજાતપ્રસૂનાનાં માલાયુક્તં સુવઙ્કિમમ્ ॥ ૨૪॥

સુચારુકબરીભારં કમ્પયન્તી સુકમ્પિતા ।
સુચારુરાગસંયુક્તમોષ્ઠં કમ્પયતી રુષા ॥ ૨૫॥

ગત્વોવાસ કૃષ્ણપાર્શ્વે રત્નસિંહાસને શુભે ।
સખીનાં ચ સમૂહૈશ્ચ પરિપૂર્ણા વિભોઃ પ્રિયા ॥ ૨૬॥

તાં દૃષ્ટ્વા ચ સમુત્તસ્થૌ કૃષ્ણઃ સાદરપૂર્વકમ્ ।
સમ્ભાષ્ય મધુરાલાપૈઃ સસ્મિતશ્ચ સસમ્ભ્રમઃ ॥ ૨૭॥

પ્રણેમુરતિસન્ત્રસ્તા ગોપા નમ્રાત્મકન્ધરાઃ ।
તુષ્ટુવુસ્તે ચ ભક્ત્યા ચ તુષ્ટાવ પરમેશ્વરઃ ॥ ૨૮॥

ઉત્થાય ગઙ્ગા સહસા સ્તુતિં બહુ ચકાર સા ।
કુશલં પરિપપ્રચ્છ ભીતાતિવિનયેન ચ ॥ ૨૯॥

નમ્રભાગસ્થિતા ત્રસ્તા શુષ્કકણ્ઠોષ્ઠતાલુકા ।
ધ્યાનેન શરણાયત્તા શ્રીકૃષ્ણચરણામ્બુજે ॥ ૩૦॥

તાં હૃત્પદ્મસ્થિતાં કૃષ્ણો ભીતાયૈ ચાભયં દદૌ ।
બભૂવ સ્થિરચિત્તા સા સર્વેશ્વરવરેણ ચ ॥ ૩૧॥

ઊર્ધ્વસિંહાસનસ્થાં ચ રાધાં ગઙ્ગા દદર્શ સા ।
સુસ્નિગ્ધાં સુખદૃશ્યાં ચ જ્વલન્તીં બ્રહ્મતેજસા ॥ ૩૨॥

અસઙ્ખ્યબ્રહ્મણઃ કર્ત્રીમાદિસૃષ્ટેઃ સનાતનીમ્ ।
સદા દ્વાદશવર્ષીયાં કન્યાભિનવયૌવનામ્ ॥ ૩૩॥

વિશ્વવૃન્દે નિરુપમાં રૂપેણ ચ ગુણેન ચ ।
શાન્તાં કાન્તામનન્તાં તામાદ્યન્તરહિતાં સતીમ્ ॥ ૩૪॥

શુભાં સુભદ્રાં સુભગાં સ્વામિસૌભાગ્યસંયુતામ્ ।
સૌન્દર્યસુન્દરીં શ્રેષ્ઠાં સર્વાસુ સુન્દરીષુ ચ ॥ ૩૫॥

કૃષ્ણાર્ધાઙ્ગાં કૃષ્ણસમાં તેજસા વયસા ત્વિષા ।
પૂજિતાં ચ મહાલક્ષ્મીં લક્ષ્મ્યા લક્ષ્મીશ્વરેણ ચ ॥ ૩૬॥

પ્રચ્છાદ્યમાનાં પ્રભયા સભામીશસ્ય સુપ્રભામ્ ।
સખીદત્તં ચ તામ્બૂલં ભુક્તવન્તીં ચ દુર્લભમ્ ॥ ૩૭॥

અજન્યાં સર્વજનનીં ધન્યાં માન્યાં ચ માનિનીમ્ ।
કૃષ્ણપ્રાણાધિદેવીં ચ પ્રાણપ્રિયતમાં રમામ્ ॥ ૩૮॥

દૃષ્ટ્વા રાસેશ્વરીં તૃપ્તિં ન જગામ સુરેશ્વરી ।
નિમેષરહિતાભ્યાં ચ લોચનાભ્યાં પપૌ ચ તામ્ ॥ ૩૯॥

એતસ્મિન્નન્તરે રાધા જગદીશમુવાચ સા ।
વાચા મધુરયા શાન્તા વિનીતા સસ્મિતા મુને ॥ ૪૦॥

રાધોવાચ ।
કેયં પ્રાણેશ કલ્યાણી સસ્મિતા ત્વન્મુખામ્બુજમ્ ।
પશ્યન્તી સસ્મિતં પાર્શ્વે સકામા વક્રલોચના ॥ ૪૧॥

મૂર્ચ્છાં પ્રાપ્નોતિ રૂપેણ પુલકાઙ્કિતવિગ્રહા ।
વસ્ત્રેણ મુખમાચ્છાદ્ય નિરીક્ષન્તી પુનઃ પુનઃ ॥ ૪૨॥

ત્વં ચાપિ તાં સન્નિરીક્ષ્ય સકામઃ સસ્મિતઃ સદા ।
મયિ જીવતિ ગોલોકે ભૂતા દુર્વૃત્તિરીદૃશી ॥ ૪૩॥

ત્વમેવ ચૈવ દુર્વૃત્તં વારં વારં કરોષિ ચ ।
ક્ષમાં કરોમિ પ્રેમ્ણા ચ સ્ત્રીજાતિઃ સ્નિગ્ધમાનસા ॥ ૪૪॥

સઙ્ગૃહ્યેમાં પ્રિયામિષ્ટાં ગોલોકાદ્ ગચ્છ લમ્પટ ।
અન્યથા ન હિ તે ભદ્રં ભવિષ્યતિ વ્રજેશ્વર ॥ ૪૫॥

દૃષ્ટસ્ત્વં વિરજાયુક્તો મયા ચન્દનકાનને ।
ક્ષમા કૃતા મયા પૂર્વં સખીનાં વચનાદહો ॥ ૪૬॥

ત્વયા મચ્છબ્દમાત્રેણ તિરોધાનં કૃતં પુરા ।
દેહં તત્યાજ વિરજા નદીરૂપા બભૂવ સા ॥ ૪૭॥

કોટિયોજનવિસ્તીર્ણા તતો દૈર્ઘ્યે ચતુર્ગુણા ।
અદ્યાપિ વિદ્યમાના સા તવ સત્કીર્તિરૂપિણી ॥ ૪૮॥

ગૃહં મયિ ગતાયાં ચ પુનર્ગત્વા તદન્તિકે ।
ઉચ્ચૈ રુરોદ વિરજે વિરજે ચેતિ સંસ્મરન્ ॥ ૪૯॥

તદા તોયાત્સમુત્થાય સા યોગાત્સિદ્ધયોગિની ।
સાલઙ્કારા મૂર્તિમતી દદૌ તુભ્યં ચ દર્શનમ્ ॥ ૫૦॥

તતસ્તાં ચ સમાક્ષિપ્ય વીર્યાધાનં કૃતં ત્વયા ।
તતો બભૂવુસ્તસ્યાં ચ સમુદ્રાઃ સપ્ત એવ ચ ॥ ૫૧॥

દૃષ્ટસ્ત્વં શોભયા ગોપ્યા યુક્તશ્ચમ્પકકાનને ।
સદ્યો મચ્છબ્દમાત્રેણ તિરોધાનં કૃતં ત્વયા ॥ ૫૨॥

શોભા દેહં પરિત્યજ્ય જગામ ચન્દ્રમણ્ડલે ।
તતસ્તસ્યાઃ શરીરં ચ સ્નિગ્ધં તેજો બભૂવ હ ॥ ૫૩॥

સંવિભજ્ય ત્વયા દત્તં હૃદયેન વિદૂયતા ।
રત્નાય કિઞ્ચિત્સ્વર્ણાય કિઞ્ચિન્મણિવરાય ચ ॥ ૫૪॥

કિઞ્ચિત્સ્ત્રીણાં મુખાબ્જેભ્યઃ કિઞ્ચિદ્રાજ્ઞે ચ કિઞ્ચન ।
કિઞ્ચિત્કિસલયેભ્યશ્ચ પુષ્પેભ્યશ્ચાપિ કિઞ્ચન ॥ ૫૫॥

કિઞ્ચિત્ફલેભ્યઃ પક્વેભ્યઃ સસ્યેભ્યશ્ચાપિ કિઞ્ચન ।
નૃપદેવગૃહેભ્યશ્ચ સંસ્કૃતેભ્યશ્ચ કિઞ્ચન ॥ ૫૬॥

કિઞ્ચિન્નૂતનપત્રેભ્યો દુગ્ધેભ્યશ્ચાપિ કિઞ્ચન ।
દૃષ્ટસ્ત્વં પ્રભયા ગોપ્યા યુક્તો વૃન્દાવને વને ॥ ૫૭॥

સદ્યો મચ્છબ્દમાત્રેણ તિરોધાનં કૃતં ત્વયા ।
પ્રભા દેહં પરિત્યજ્ય જગામ સૂર્યમણ્ડલે ॥ ૫૮॥

તતસ્તસ્યાઃ શરીરં ચ તીવ્રં તેજો બભૂવ હ ।
સંવિભજ્ય ત્વયા દત્તં પ્રેમ્ણા પ્રરુદતા પુરા ॥ ૫૯॥

વિસૃષ્ટં ચક્ષુષોઃ કૃષ્ણ લજ્જયા મદ્ભયેન ચ ।
હુતાશનાય કિઞ્ચિચ્ચ યક્ષેભ્યશ્ચાપિ કિઞ્ચન ॥ ૬૦॥

કિઞ્ચિત્પુરુષસિંહેભ્યો દેવેભ્યશ્ચાપિ કિઞ્ચન ।
કિઞ્ચિદ્વિષ્ણુજનેભ્યશ્ચ નાગેભ્યોઽપિ ચ કિઞ્ચન ॥ ૬૧॥

બ્રાહ્મણેભ્યો મુનિભ્યશ્ચ તપસ્વિભ્યશ્ચ કિઞ્ચન ।
સ્ત્રીભ્યઃ સૌભાગ્યયુક્તાભ્યો યશસ્વિભ્યશ્ચ કિઞ્ચન ॥ ૬૨॥

તત્તુ દત્ત્વા ચ સર્વેભ્યઃ પૂર્વં પ્રરુદિતં ત્વયા ।
શાન્તિગોપ્યા યુતસ્ત્વં ચ દૃષ્ટોઽસિ રાસમણ્ડલે ॥ ૬૩॥

વસન્તે પુષ્પશય્યાયાં માલ્યવાંશ્ચન્દનોક્ષિતઃ ।
રત્નપ્રદીપૈર્યુક્તે ચ રત્નનિર્માણમન્દિરે ॥ ૬૪॥

રત્નભૂષણભૂષાઢ્યો રત્નભૂષિતયા સહ ।
તયા દત્તં ચ તામ્બૂલં ભુક્તવાંશ્ચ પુરા વિભો ॥ ૬૫॥

સદ્યો મચ્છબ્દમાત્રેણ તિરોધાનં કૃતં ત્વયા ।
શાન્તિર્દેહં પરિત્યજ્ય ભિયા લીના ત્વયિ પ્રભો ॥ ૬૬॥

તતસ્તસ્યાઃ શરીરં ચ ગુણશ્રેષ્ઠં બભૂવ હ ।
સંવિભજ્ય ત્વયા દત્તં પ્રેમ્ણા પ્રરુદતા પુરા ॥ ૬૭॥

વિશ્વે તુ વિપિને કિઞ્ચિદ્બ્રહ્મણે ચ મયિ પ્રભો ।
શુદ્ધસત્ત્વસ્વરૂપાયૈ કિઞ્ચિલ્લક્ષ્મ્યૈ પુરા વિભો ॥ ૬૮॥

ત્વન્મન્ત્રોપાસકેભ્યશ્ચ શાક્તેભ્યશ્ચાપિ કિઞ્ચન ।

તપસ્વિભ્યશ્ચ ધર્માય ધર્મિષ્ઠેભ્યશ્ચ કિઞ્ચન ॥ ૬૯॥

મયા પૂર્વં ચ ત્વં દૃષ્ટો ગોપ્યા ચ ક્ષમયા સહ ।
સુવેષયુક્તો માલાવાન્ ગન્ધચન્દનચર્ચિતઃ ॥ ૭૦॥

રત્નભૂષિતયા ગન્ધચન્દનોક્ષિતયા સહ ।
સુખેન મૂર્ચ્છિતસ્તલ્પે પુષ્પચન્દનચર્ચિતે ॥ ૭૧॥

શ્લિષ્ટો નિદ્રિતયા સદ્યઃ સુખેન નવસઙ્ગમાત્ ।
મયા પ્રબોધિતા સા ચ ભવાંશ્ચ સ્મરણં કુરુ ॥ ૭૨॥

ગૃહીતં પીતવસ્ત્રં ચ મુરલી ચ મનોહરા ।
વનમાલાકૌસ્તુભશ્ચાપ્યમૂલ્યં રત્નકુણ્ડલમ્ ॥ ૭૩॥

પશ્ચાત્પ્રદત્તં પ્રેમ્ણા ચ સખીનાં વચનાદહો ।
લજ્જયા કૃષ્ણવર્ણોઽભૂદ્ભવાન્ પાપેન યઃ પ્રભો ॥ ૭૪॥

ક્ષમા દેહં પરિત્યજ્ય લજ્જયા પૃથિવીં ગતા ।
તતસ્તસ્યાઃ શરીરં ચ ગુણશ્રેષ્ઠં બભૂવ હ ॥ ૭૫॥

સંવિભજ્ય ત્વયા દત્તં પ્રેમ્ણા પ્રરુદતા પુનઃ ।
કિઞ્ચિદ્દત્તં વિષ્ણવે ચ વૈષ્ણવેભ્યશ્ચ કિઞ્ચન ॥ ૭૬॥

ધાર્મિકેભ્યશ્ચ ધર્માય દુર્બલેભ્યશ્ચ કિઞ્ચન ।
તપસ્વિભ્યોઽપિ દેવેભ્યઃ પણ્ડિતેભ્યશ્ચ કિઞ્ચન ॥ ૭૭॥

એતત્તે કથિતં સર્વં કિં ભૂયઃ શ્રોતુમિચ્છસિ ।
ત્વદ્ગુણં ચૈવ બહુશો ન જાનામિ પરં પ્રભો ॥ ૭૮॥

ઇત્યેવમુક્ત્વા સા રાધા રક્તપઙ્કજલોચના ।
ગઙ્ગાં વક્તું સમારેભે નમ્રાસ્યાં લજ્જિતાં સતીમ્ ॥ ૭૯॥

ગઙ્ગા રહસ્યં વિજ્ઞાય યોગેન સિદ્ધયોગિની ।
તિરોભૂય સભામધ્યે સ્વજલં પ્રવિવેશ સા ॥ ૮૦॥

રાધા યોગેન વિજ્ઞાય સર્વત્રાવસ્થિતાં ચ તામ્ ।
પાનં કર્તું સમારેભે ગણ્ડૂષાત્સિદ્ધયોગિની ॥ ૮૧॥

ગઙ્ગા રહસ્યં વિજ્ઞાય યોગેન સિદ્ધયોગિની ।
શ્રીકૃષ્ણચરણામ્ભોજે વિવેશ શરણં યયૌ ॥ ૮૨॥

ગોલોકે સા ચ વૈકુણ્ઠે બ્રહ્મલોકાદિકે તથા ।
દદર્શ રાધા સર્વત્ર નૈવ ગઙ્ગાં દદર્શ સા ॥ ૮૩॥

સર્વત્ર જલશૂન્યં ચ શુષ્કપઙ્કં ચ ગોલકમ્ ।
જલજન્તુસમૂહૈશ્ચ મૃતદેહૈઃ સમન્વિતમ્ ॥ ૮૪॥

બ્રહ્મવિષ્ણુશિવાનન્તધર્મેન્દ્રેન્દુદિવાકરાઃ ।
મનવો મુનયઃ સર્વે દેવસિદ્ધતપસ્વિનઃ ॥ ૮૫॥

ગોલોકં ચ સમાજગ્મુઃ શુષ્કકણ્ઠોષ્ઠતાલુકાઃ ।
સર્વે પ્રણેમુર્ગોવિન્દં સર્વેશં પ્રકૃતેઃ પરમ્ ॥ ૮૬॥

વરં વરેણ્યં વરદં વરિષ્ઠં વરકારણમ્ ।
ગોપિકાગોપવૃન્દાનાં સર્વેષાં પ્રવરં પ્રભુમ્ ॥ ૮૭॥

નિરીહં ચ નિરાકારં નિર્લિપ્તં ચ નિરાશ્રયમ્ ।
નિર્ગુણં ચ નિરુત્સાહં નિર્વિકારં નિરઞ્જનમ્ ॥ ૮૮॥

સ્વેચ્છામયં ચ સાકારં ભક્તાનુગ્રહકારકમ્ ।
સત્ત્વસ્વરૂપં સત્યેશં સાક્ષિરૂપં સનાતનમ્ ॥ ૮૯॥

પરં પરેશં પરમં પરમાત્માનમીશ્વરમ્ ।
પ્રણમ્ય તુષ્ટુવુઃ સર્વે ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૯૦॥

સગદ્ગદાઃ સાશ્રુનેત્રાઃ પુલકાઙ્કિતવિગ્રહાઃ ।
સર્વે સંસ્તૂય સર્વેશં ભગવન્તં પરાત્પરમ્ ॥ ૯૧॥

જ્યોતિર્મયં પરં બ્રહ્મ સર્વકારણકારણમ્ ।
અમૂલ્યરત્નનિર્માણચિત્રસિંહાસનસ્થિતમ્ ॥ ૯૨॥

સેવ્યમાનં ચ ગોપાલૈઃ શ્વેતચામરવાયુના ।
ગોપાલિકાનૃત્યગીતં પશ્યન્તં સસ્મિતં મુદા ॥ ૯૩॥

પ્રાણાધિકપ્રિયતમં રાધાવક્ષઃસ્થલસ્થિતમ્ ।
તયા પ્રદત્તં તામ્બૂલં ભુક્તવન્તં સુવાસિતમ્ ॥ ૯૪॥

પરિપૂર્ણતમં રાસે દદૃશુશ્ચ સુરેશ્વરમ્ ।
મુનયો મનવઃ સિદ્ધાસ્તાપસાશ્ચ તપસ્વિનઃ ॥ ૯૫॥

પ્રહૃષ્ટમનસઃ સર્વે જગ્મુઃ પરમવિસ્મયમ્ ।
પરસ્પરં સમાલોક્ય પ્રોચુસ્તે ચ ચતુર્મુખમ્ ॥ ૯૬॥

નિવેદિતં જગન્નાથં સ્વાભિપ્રાયમભીપ્સિતમ્ ।
બ્રહ્મા તદ્વચનં શ્રુત્વા વિષ્ણું કૃત્વા સ્વદક્ષિણે ॥ ૯૭॥

વામતો વામદેવં ચ જગામ કૃષ્ણસન્નિધિમ્ ।
પરમાનન્દયુક્તં ચ પરમાનન્દરૂપિણીમ્ ॥ ૯૮॥

સર્વં કૃષ્ણમયં ધાતા દદર્શ રાસમણ્ડલે ।
સર્વં સમાનવેષં ચ સમાનાસનસંસ્થિતમ્ ॥ ૯૯॥

દ્વિભુજં મુરલીહસ્તં વનમાલાવિભૂષિતમ્ ।
મયૂરપિચ્છચૂડં ચ કૌસ્તુભેન વિરાજિતમ્ ॥ ૧૦૦॥

અતીવ કમનીયં ચ સુન્દરં શાન્તવિગ્રહમ્ ।
ગુણભૂષણરૂપેણ તેજસા વયસા ત્વિષા ॥ ૧૦૧॥

પરિપૂર્ણતમં સર્વં સર્વૈશ્વર્યસમન્વિતમ્ ।
કિં સેવ્યં સેવકં કિં વા દૃષ્ટ્વા નિર્વક્તુમક્ષમઃ ॥ ૧૦૨॥

ક્ષણં તેજઃ સ્વરૂપં ચ રૂપં તત્ર સ્થિતં ક્ષણમ્ ।
નિરાકારં ચ સાકારં દદર્શ દ્વિવિધં ક્ષણમ્ ॥ ૧૦૩॥

એકમેવ ક્ષણં કૃષ્ણં રાધયા રહિતં પરમ્ ।
પ્રત્યેકાસનસંસ્થં ચ તયા સાર્ધં ચ તત્ક્ષણમ્ ॥ ૧૦૪॥

રાધારૂપધરં કૃષ્ણં કૃષ્ણરૂપં કલત્રકમ્ ।
કિં સ્ત્રીરૂપં ચ પુરુષં વિધાતા ધ્યાતુમક્ષમઃ ॥ ૧૦૫॥

હૃત્પદ્મસ્થં ચ શ્રીકૃષ્ણં ધ્યાત્વા ધ્યાનેન ચક્ષુષા ।
ચકાર સ્તવનં ભક્ત્યા પરિહારમનેકધા ॥ ૧૦૬॥

તતઃ સ્વચક્ષુરુન્મીલ્ય પુનશ્ચ તદનુજ્ઞયા ।
દદર્શ કૃષ્ણમેકં ચ રાધાવક્ષઃસ્થલસ્થિતમ્ ॥ ૧૦૭॥

સ્વપાર્ષદૈઃ પરિવૃતં ગોપીમણ્ડલમણ્ડિતમ્ ।
પુનઃ પ્રણેમુસ્તં દૃષ્ટ્વા તુષ્ટુવુઃ પરમેશ્વરમ્ ॥ ૧૦૮॥

તદભિપ્રાયમાજ્ઞાય તાનુવાચ રમેશ્વરઃ ।
સર્વાત્મા સ ચ સર્વજ્ઞઃ સર્વેશઃ સર્વભાવનઃ ॥ ૧૦૯॥

શ્રીભગવાનુવાચ ।

આગચ્છ કુશલં બ્રહ્મન્નાગચ્છ કમલાપતે ।
ઇહાગચ્છ મહાદેવ શશ્વત્કુશલમસ્તુ વઃ ॥ ૧૧૦॥

આગતા હિ મહાભાગા ગઙ્ગાનયનકારણાત્ ।
ગઙ્ગા ચ ચરણામ્ભોજે ભયેન શરણં ગતા ॥ ૧૧૧॥

રાધેમાં પાતુમિચ્છન્તી દૃષ્ટ્વા મત્સન્નિધાનતઃ ।
દાસ્યામીમાં ચ ભવતાં યૂયં કુરુત નિર્ભયામ્ ॥ ૧૧૨॥

શ્રીકૃષ્ણસ્ય વચઃ શ્રુત્વા સસ્મિતઃ કમલોદ્ભવઃ ।
તુષ્ટાવ રાધામારાધ્યાં શ્રીકૃષ્ણપરિપૂજિતામ્ ॥ ૧૧૩॥

વક્ત્રૈશ્ચતુર્ભિઃ સંસ્તૂય ભક્તિનમ્રાત્મકન્ધરઃ ।
ધાતા ચતુર્ણાં વેદાનામુવાચ ચતુરાનનઃ ॥ ૧૧૪॥

ચતુરાનન ઉવાચ ।
ગઙ્ગા ત્વદઙ્ગસમ્ભૂતા પ્રભોશ્ચ રાસમણ્ડલે ।
યુવયોર્દ્રવરૂપા સા મુગ્ધયોઃ શઙ્કરસ્વનાત્ ॥ ૧૧૫॥

કૃષ્ણાંશા ચ ત્વદંશા ચ ત્વત્કન્યાસદૃશી પ્રિયા ।
ત્વન્મન્ત્રગ્રહણં કૃત્વા કરોતુ તવ પૂજનમ્ ॥ ૧૧૬॥

ભવિષ્યતિ પતિસ્તસ્યા વૈકુણ્ઠેશશ્ચતુર્ભુજઃ ।
ભૂસ્થાયાઃ કલયા તસ્યાઃ પતિર્લવણવારિધિઃ ॥ ૧ રે ૭॥

ગોલોકસ્થા ચ યા ગઙ્ગા સર્વત્રસ્થા તથામ્બિકે ।
તદમ્બિકા ત્વં દેવેશી સર્વદા સા ત્વદાત્મજા ॥ ૧૧૮॥

બ્રહ્મણો વચનં શ્રુત્વા સ્વીચકાર ચ સસ્મિતા ।
વહિર્બભૂવ સા કૃષ્ણપાદાઙ્ગુષ્ઠનખાગ્રતઃ ॥ ૧૧૯॥

તત્રૈવ સત્કૃતા શાન્તા તસ્થૌ તેષાં ચ મધ્યતઃ ।
ઉવાસ તોયાદુત્થાય તદધિષ્ઠાતૃદેવતા ॥ ૧૨૦॥

તત્તોયં બ્રહ્મણા કિઞ્ચિત્સ્થાપિતં ચ કમણ્ડલૌ ।
કિઞ્ચિદ્ધાર શિરસિ ચન્દ્રાર્ધકૃતશેખરઃ ॥ ૧૨૧॥

ગઙ્ગાયૈ રાધિકામન્ત્રં પ્રદદૌ કમલોદ્ભવઃ ।
તત્સ્તોત્રં કવચં પૂજાં વિધાનં ધ્યાનમેવ ચ ॥ ૧૨૨॥

સર્વં તત્સામવેદોક્તં પુરશ્ચર્યાક્રમં તથા ।

ગઙ્ગા તામેવ સમ્પૂજ્ય વૈકુણ્ઠં પ્રયયૌ સહ ॥ ૧૨૩॥

લક્ષ્મીઃ સરસ્વતી ગઙ્ગા તુલસી વિશ્વપાવની ।
એતા નારાયણસ્યૈવ ચતસ્રો યોષિતો મુને ॥ ૧૨૪॥

અથ તં સસ્મિતઃ કૃષ્ણો બ્રહ્માણં સમુવાચ સઃ ।
સર્વકાલસ્ય વૃત્તાન્તં દુર્બોધમવિપશ્ચિતમ્ ॥ ૧૨૫॥

શ્રીકૃષ્ણ ઉવાચ ।
ગૃહાણ ગઙ્ગાં હે બ્રહ્મન્ હે વિષ્ણો હે મહેશ્વર ।
શ ૃણુ કાલસ્ય વૃત્તાન્તં મત્તો બ્રહ્મન્નિશામય ॥ ૧૨૬॥

યૂયં ચ યેઽન્યે દેવાશ્ચ મુનયો મનવસ્તથા ।
સિધ્દ્વા યશસ્વિનશ્ચૈવ યે યેઽત્રૈવ સમાગતાઃ ॥ ૧૨૭॥

એતે જીવન્તિ ગોલોકે કાલચક્રવિવર્જિતે ।
જલાપ્લુતે સર્વવિશ્વં જાતં કલ્પક્ષયોઽધુના ॥ ૧૨૮॥

બ્રહ્માદ્યા યેઽન્યવિશ્વસ્થાસ્તે વિલીનાધુના મયિ ।
વૈકુણ્ઠં ચ વિના સર્વં જલમગ્નં ચ પદ્મજ ॥ ૧૨૯॥

ગત્વા સૃષ્ટિં કુરુ પુનર્બ્રહ્મલોકાદિકં ભવમ્ ।
સ્વં બ્રહ્માણ્ડં વિરચય પશ્ચાદ્ ગઙ્ગા પ્રયાસ્યતિ ॥ ૧૩૦॥

એવમન્યેષુ વિશ્વેષુ સૃષ્ટૌ બ્રહ્માદિકં પુનઃ ।
કરોમ્યહં પુનઃ સૃષ્ટિં ગચ્છ શીઘ્રં સુરૈઃ સહ ॥ ૧૩૧॥

ગતો બહુતરઃ કાલો યુષ્માકં ચ ચતુર્મુખાઃ ।
ગતાઃ કતિવિધાસ્તે ચ ભવિષ્યન્તિ ચ વેધસઃ ॥ ૧૩૨॥

ઇત્યુક્ત્વા રાધિકાનાથો જગામાન્તઃપુરે મુને ।
દેવા ગત્વા પુનઃ સૃષ્ટિં ચક્રુરેવ પ્રયત્નતઃ ॥ ૧૩૩॥

ગોલોકે ચ સ્થિતા ગઙ્ગા વૈકુણ્ઠે શિવલોકકે ।
બ્રહ્મલોકે સ્થિતાન્યત્ર યત્ર યત્ર પુરઃ સ્થિતા ॥ ૧૩૪॥

તત્રૈવ સા ગતા ગઙ્ગા ચાજ્ઞયા પરમાત્મનઃ ।
નિર્ગતા વિષ્ણુપાદાબ્જાત્તેન વિષ્ણુપદી સ્મૃતા ॥ ૧૩૫॥

ઇત્યેવં કથિતં બ્રહ્મન્ ગઙ્ગોપાખ્યાનમુત્તમમ્ ।
સુખદં મોક્ષદં સારં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૩૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
ગઙ્ગોપાખ્યાનવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૯.૧૩॥

## ૯.૧૪ ચતુર્દશોઽધ્યાયઃ । ગઙ્ગાયાઃ કૃષ્ણપત્નીત્વવર્ણનમ્ ।

નારદ ઉવાચ ।
લક્ષ્મીઃ સરસ્વતી ગઙ્ગા તુલસી વિશ્વપાવની ।
એતા નારાયણસ્યૈવ ચતસ્રશ્ચ પ્રિયા ઇતિ ॥ ૧॥

ગઙ્ગા જગામ વૈકુણ્ઠમિદમેવ શ્રુતં મયા ।
કથં સા તસ્ય પત્ની ચ બભૂવેતિ ચ ન શ્રુતમ્ ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
ગઙ્ગા જગામ વૈકુણ્ઠં તત્પશ્ચાજ્જગતાં વિધિઃ ।
ગત્વોવાચ તયા સાર્ધં પ્રણમ્ય જગદીશ્વરમ્ ॥ ૩॥

બ્રહ્મોવાચ ।
રાધાકૃષ્ણાઙ્ગસમ્ભૂતા યા દેવી દ્રવરૂપિણી ।
નવયૌવનસમ્પન્ના સુશીલા સુન્દરી વરા ॥ ૪॥

શુદ્ધસત્ત્વસ્વરૂપા ચ ક્રોધાહઙ્કારવર્જિતા ।
તદઙ્ગસમ્ભવા નાન્યં વૃણોતીયં ચ તં વિના ॥ ૫॥

તત્રાતિમાનિની રાધા સા ચ તેજસ્વિની વરા ।
સમુદ્યુક્તા પાતુમિમાં ભીતેયં બુદ્ધિપૂર્વકમ્ ॥ ૬॥

વિવેશ ચરણામ્ભોજે કૃષ્ણસ્ય પરમાત્મનઃ ।
સર્વત્ર ગોલકં શુષ્કં દૃષ્ટ્વાહમગમં તદા ॥ ૭॥

ગોલોકે યત્ર કૃષ્ણશ્ચ સર્વવૃત્તાન્તપ્રાપ્તયે ।
સર્વાન્તરાત્મા સર્વેષાં જ્ઞાત્વાભિપ્રાયમેવ ચ ॥ ૮॥

બહિશ્ચકાર ગઙ્ગા ચ પાદાઙ્ગુષ્ઠનખાગ્રતઃ ।
દત્ત્વાસ્યૈ રાધિકામન્ત્રં પૂરયિત્વા ચ ગોલકમ્ ॥ ૯॥

પ્રણમ્ય તાં ચ રાધેશં ગૃહીત્વાત્રાગમં પ્રભો ।

ગાન્ધર્વેણ વિવાહેન ગૃહાણેમાં સુરેશ્વરીમ્ ॥ ૧૦॥

સુરેશ્વરેષુ રસિકો રસિકેયં સમાગતા ।
ત્વં રત્નં પુંસુ દેવેશ સ્ત્રીરત્નં સ્ત્રીષ્વિયં સતી ॥ ૧૧॥

વિદગ્ધયા વિદગ્ધેન સઙ્ગમો ગુણવાન્ ભવેત્ ।
ઉપસ્થિતાં સ્વયં કન્યાં ન ગૃહ્ણાતીહ યઃ પુમાન્ ॥ ૧૨॥

તં વિહાય મહાલક્ષ્મી રુષ્ટા યાતિ ન સંશયઃ ।
યો ભવેત્પણ્ડિતઃ સો ઽપિ પ્રકૃતિં નાવમન્યતે ॥ ૧૩॥

સર્વે પ્રાકૃતિકાઃ પુંસઃ કામિન્યઃ પ્રકૃતેઃ કલાઃ ।
ત્વમેવ ભગવાન્નાથો નિર્ગુણઃ પ્રકૃતેઃ પરઃ ॥ ૧૪॥

અર્ધાઙ્ગં દ્વિભુજઃ કૃષ્ણો યોઽર્ધાઙ્ગેન ચતુર્ભુજઃ ।
કૃષ્ણવામાઙ્ગસમ્ભૂતા બભૂવ રાધિકા પુરા ॥ ૧૫॥

દક્ષિણાંશઃ સ્વયં સા ચ વામાંશઃ કમલા તથા ।
તેનેયં ત્વાં વૃણોત્યેવ યતસ્ત્વદ્દેહસમ્ભવા ॥ ૧૬॥

એકાઙ્ગં ચૈવ સ્વીપુંસોર્યથા પ્રકૃતિપૂરુષૌ ।
ઇત્યેવમુક્ત્વા ધાતા તાં તં સમર્પ્ય જગામ સઃ ॥ ૧૭॥

ગાન્ધર્વેણ વિવાહેન તાં જગ્રાહ હરિઃ સ્વયમ્ ।
નારાયણઃ કરં ધૃત્વા પુષ્પચન્દનચર્ચિતમ્ ॥ ૧૮॥

રેમે રમાપતિસ્તત્ર ગઙ્ગયા સહિતો મુદા ।
ગઙ્ગા પૃથ્વીં ગતા યા સા સ્વસ્થાનં પુનરાગતા ॥ ૧૯॥

નિર્ગતા વિષ્ણુપાદાબ્જાત્તેન વિષ્ણુપદીતિ ચ ।
મૂર્ચ્છાં સમ્પ્રાપ સા દેવી નવસઙ્ગમલીલયા ॥ ૨૦॥

રસિકા સુખસમ્ભોગાદ્રસિકેશ્વરસંયુતા ।
તાં દૃષ્ટ્વા દુઃખિતા વાણી પદ્મયા વર્જિતાપિ ચ ॥ ૨૧॥

નિત્યમીર્ષ્યતિ તાં વાણી ન ચ ગઙ્ગા સરસ્વતીમ્ ।
ગઙ્ગા શશાપ કોપેન ભારતે ચ હરિપ્રિયા ॥ ૨૨॥

ગઙ્ગયા સહ તસ્યૈવ તિસ્રો ભાર્યા રમાપતેઃ ।
સાર્ધં તુલસ્યા પશ્ચાચ્ચ ચતસ્રશ્ચાભવન્મુને ॥ ૨૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે ગઙ્ગાયાઃ
કૃષ્ણપત્નીત્વવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૯.૧૪॥

## ૯.૧૫ પઞ્ચદશોઽધ્યાયઃ । નારાયણનારદસંવાદે શક્તિપ્રાદુર્ભાવઃ ।

નારદ ઉવાચ ।
નારાયણપ્રિયા સાધ્વી કથં સા ચ બભૂવ હ ।
તુલસી કુત્ર સમ્ભૂતા કા વા સા પૂર્વજન્મનિ ॥ ૧॥

કસ્ય વા સા કુલે જાતા કસ્ય કન્યા કુલે સતી ।
કેન વા તપસા સા ચ સમ્પ્રાપ્તા પ્રકૃતેઃ પરમ્ ॥ ૨॥

નિર્વિકારં નિરીહં ચ સર્વવિશ્વસ્વરૂપકમ્ ।
નારાયણં પરં બ્રહ્મ પરમેશ્વરમીશ્વરમ્ ॥ ૩॥

સર્વારાધ્યં ચ સર્વેશં સર્વજ્ઞં સર્વકારણમ્ ।
સર્વાધારં સર્વરૂપં સર્વેષાં પરિપાલકમ્ ॥ ૪॥

કથમેતાદૃશી દેવી વૃક્ષત્વં સમવાપ હ ।
કથં સાપ્યસુરગ્રસ્તા સમ્બભૂવ તપસ્વિની ॥ ૫॥

સુસ્નિગ્ધં મે મનો લોલં પ્રેરયન્માં મુહુર્મુહુઃ ।
છેત્તુમર્હસિ સન્દેહં સર્વં સન્દેહભઞ્જન ॥ ૬॥

શ્રીનારાયણ ઉવાચ ।
મનુશ્ચ દક્ષસાવર્ણિઃ પુણ્યવાન્ વૈષ્ણવઃ શુચિઃ ।
યશસ્વી કીર્તિમાંશ્ચૈવ વિષ્ણોરંશસમુદ્ભવઃ ॥ ૭॥

તત્પુત્રો બ્રહ્મસાવર્ણિર્ધર્મિષ્ઠો વૈષ્ણવઃ શુચિઃ ।
તત્પુત્રો ધર્મસાવર્ણિર્વૈષ્ણવશ્ચ જિતેન્દ્રિયઃ ॥ ૮॥

તત્પુત્રો રુદ્રસાવર્ણિર્ભક્તિમાન્વિજિતેન્દ્રિયઃ ।
તત્પુત્રો દેવસાવર્ણિર્વિષ્ણુવ્રતપરાયણઃ ॥ ૯॥

તત્પુત્ર ઇન્દ્રસાવર્ણિર્મહાવિષ્ણુપરાયણઃ ।
વૃષધ્વજશ્ચ તત્પુત્રો વૃષધ્વજપરાયણઃ ॥ ૧૦॥

યસ્યાશ્રમે સ્વયં શમ્ભુરાસીદ્દેવયુગત્રયમ્ ।

પુત્રાદપિ પરઃ સ્નેહો નૃપે તસ્મિઞ્છિવસ્ય ચ ॥ ૧૧॥

ન ચ નારાયણં મેને ન લક્ષ્મીં ન સરસ્વતીમ્ ।
પૂજાં ચ સર્વદેવાનાં દૂરીભૂતા ચકાર સઃ ॥ ૧૨॥

ભાદ્રે માસિ મહાલક્ષ્મીપૂજાં મત્તો બભઞ્જ હ ।
તથા માઘીયપઞ્ચમ્યાં વિસ્મૃતા સર્વદૈવતૈઃ ॥ ૧૩॥

પાપઃ સરસ્વતીપૂજાં દૂરીભૂતા ચકાર સઃ ।
યજ્ઞં ચ વિષ્ણુપૂજાં ચ નિન્દન્તં તં દિવાકરઃ ॥ ૧૪॥

ચુકોપ દેવો ભૂપેન્દ્રં શશાપ શિવકારણાત્ ।
ભ્રષ્ટશ્રીસ્ત્વઞ્ચ ભવેતિ તં શશાપ દિવાકરઃ ॥ ૧૫॥

શૂલં ગૃહીત્વા તં સૂર્યમધાવચ્છઙ્કરઃ સ્વયમ્ ।
પિત્રા સાર્ધં દિનેશશ્ચ બ્રહ્માણં શરણં યયૌ ॥ ૧૬॥

શિવસ્ત્રિશૂલહસ્તશ્ચ બ્રહ્મલોકં યયૌ ક્રુધા ।
બ્રહ્મા સૂર્યં પુરસ્કૃત્ય વૈકુણ્ઠં ચ યયૌ ભિયા ॥ ૧૭॥

બ્રહ્મકશ્યપમાર્તણ્ડાઃ સન્ત્રસ્તાઃ શુષ્કતાલુકાઃ ।
નારાયણં ચ સર્વેશં તે યયુઃ શરણં ભિયા ॥ ૧૮॥

મૂર્ધ્ના પ્રણેમુસ્તે ગત્વા તુષ્ટુવુશ્ચ પુનઃ પુનઃ ।
સર્વં નિવેદનં ચક્રુર્ભયસ્ય કારણં હરૌ ॥ ૧૯॥

નારાયણશ્ચ કૃપયા તેભ્યશ્ચ હ્યભયં દદૌ ।
સ્થિરા ભવત હે ભીતા ભયં કિઞ્ચ મયિ સ્થિતે ॥ ૨૦॥

સ્મરન્તિ યે યત્ર તત્ર માં વિપત્તૌ ભયાન્વિતાઃ ।
તાંસ્તત્ર ગત્વા રક્ષામિ ચક્રહસ્તસ્ત્વરાન્વિતઃ ॥ ૨૧॥

પાતાહં જગતાં દેવાઃ કર્તા ચ સતતં સદા ।
સ્રષ્ટા ચ બ્રહ્મરૂપેણ સંહર્તા શિવરૂપતઃ ॥ ૨૨॥

શિવોઽહં ત્વમહં ચાપિ સૂર્યોઽહં ત્રિગુણાત્મકઃ ।
વિધાય નાનારૂપં ચ કરોમિ સૃષ્ટિપાલનમ્ ॥ ૨૩॥

યૂયં ગચ્છત ભદ્રં વો ભવિષ્યતિ ભયં કુતઃ ।
અદ્યપ્રભૃતિ મદ્વરેણ ભયં વો નાસ્તિ શઙ્કરાત્ ॥ ૨૪॥

સર્વેશો વૈ સ ભગવાચ્છઙ્કરશ્ચ સતાં પતિઃ ।
ભક્તાધીનશ્ચ ભક્તાનાં ભક્તાત્મા ભક્તવત્સલઃ ॥ ૨૫॥

સુદર્શનઃ શિવશ્ચૈવ મમ પ્રાણાધિકઃ પ્રિયઃ ।
બ્રહ્માણ્ડેષુ ન તેજસ્વી હે બ્રહ્મન્નનયોઃ પરઃ ॥ ૨૬॥

શક્તઃ સ્રષ્ટું મહાદેવઃ સૂર્યકોટિં ચ લીલયા ।
કોટિં ચ બ્રહ્મણામેવં નાસાધ્યં શૂલિનઃ પ્રભોઃ ॥ ૨૭॥

બાહ્યજ્ઞાનં નૈવ કિઞ્ચિદ્ધ્યાયતે માં દિવાનિશમ્ ।
મન્મન્ત્રાન્મદ્ગુણાન્ભક્ત્યા પઞ્ચવક્ત્રેણ ગાયતિ ॥ ૨૮॥

અહમેવં ચિન્તયામિ તત્કલ્યાણં દિવાનિશમ્ ।
યે યથા માં પ્રપદ્યન્તે તાંસ્તથૈવ ભજામ્યહમ્ ॥ ૨૯॥

શિવસ્વરૂપો ભગવાઞ્છિવાધિષ્ઠાતૃદેવતા ।
શિવં ભવતિ તસ્માચ્ચ શિવં તેન વિદુર્બુધાઃ ॥ ૩૦॥

એતસ્મિન્નન્તરે તત્ર જગામ શઙ્કરઃ સ્થિતઃ ।
શૂલહસ્તો વૃષારૂઢો રક્તપઙ્કજલોચનઃ ॥ ૩૧॥

અવરુહ્ય વૃષાત્તૂર્ણં ભક્તિનમ્રાત્મકન્ધરઃ ।
નનામ ભક્ત્યા તં શાન્તં લક્ષ્મીકાન્તં પરાત્પરમ્ ॥ ૩૨॥

રત્નસિંહાસનસ્થં ચ રત્નાલઙ્કારભૂષિતમ્ ।
કિરીટિનં કુણ્ડલિનં ચક્રિણં વનમાલિનમ્ ॥ ૩૩॥

નવીનનીરદશ્યામં સુન્દરં ચ ચતુર્ભુજમ્ ।
ચતુર્ભુજૈઃ સેવિતં ચ શ્વેતચામરવાયુના ॥ ૩૪॥

ચન્દનોક્ષિતસર્વાઙ્ગં ભૂષિતં પીતવાસસમ્ ।
લક્ષ્મીપ્રદત્તતામ્બૂલં ભુક્તવન્તં ચ નારદ ॥ ૩૫॥

વિદ્યાધરીનૃત્યગીતં પશ્યન્તં સસ્મિતં સદા ।
ઈશ્વરં પરમાત્માનં ભક્તાનુગ્રહવિગ્રહમ્ ॥ ૩૬॥

તં નનામ મહાદેવો બ્રહ્મણા નમિતશ્ચ સઃ ।
નનામ સૂર્યો ભક્ત્યા ચ સન્ત્રસ્તશ્ચન્દ્રશેખરમ્ ॥ ૩૭॥

કશ્યપશ્ચ મહાભક્ત્યા તુષ્ટાવ ચ નનામ ચ ।
શિવઃ સંસ્તૂય સર્વેશં સમુવાસ સુખાસને ॥ ૩૮॥

સુખાસને સુખાસીનં વિશ્રાન્તં ચન્દ્રશેખરમ્ ।
શ્વેતચામરવાતેન સેવિતં વિષ્ણુપાર્ષદૈઃ ॥ ૩૯॥

પીયૂષતુલ્યમધુરં વચનં સુમનોહરમ્ ।
વિષ્ણુરુવાચ ।
આગતોઽસિ કથં ચાત્ર વદ કોપસ્ય કારણમ્ ॥ ૪૦॥

મહાદેવ ઉવાચ ।
વૃષધ્વજં ચ મદ્ભક્તં મમ પ્રાણાધિકં પ્રિયમ્ ।
સૂર્યઃ શશાપ ઇતિ મે પ્રકોપસ્ય તુ કારણમ્ ॥ ૪૧॥

પુત્રવત્સલશોકેન સૂર્યં હન્તું સમુદ્યતઃ ।
સ બ્રહ્માણં પ્રપન્નશ્ચ સૂર્યશ્ચ સ વિધિસ્ત્વયિ ॥ ૪૨॥

ત્વયિ યે શરણાપન્ના ધ્યાનેન વચસાપિ વા ।
નિરાપદો વિશઙ્કાસ્તે જરા મૃત્યુશ્ચ તૈર્જિતઃ ॥ ૪૩॥

પ્રત્યક્ષં શરણાપન્નાસ્તત્ફલં કિં વદામિ ભોઃ ।
હરિસ્મૃતિશ્ચાભયદા સર્વમઙ્ગલદા સદા ॥ ૪૪॥

કિં મે ભક્તસ્ય ભવિતા તન્મે બ્રૂહિ જગત્પ્રભો ।
શ્રીહતસ્યાસ્ય મૂઢસ્ય સૂર્યશાપેન હેતુના ॥ ૪૫॥

વિષ્ણુરુવાચ ।
કાલોઽતિયાતો દૈવેન યુગાનામેકવિંશતિઃ ।
વૈકુણ્ઠં ઘટિકાર્ધેન શીઘ્રં ગચ્છ ત્વમાલયમ્ ॥ ૪૬॥

વૃષધ્વજો મૃતઃ કાલાદ્દુર્નિવાર્યાત્સુદારુણાત્ ।
રથધ્વજશ્ચ તત્પુત્રો મૃતઃ સોઽપિ શ્રિયા હતઃ ॥ ૪૭॥

તત્પુત્રૌ ચ મહાભાગૌ ધર્મધ્વજકુશધ્વજૌ ।
હૃતશ્રિયૌ સૂર્યશાપાત્સ્મૃતૌ પરમવૈષ્ણવૌ ॥ ૪૮॥

રાજ્યભ્રષ્ટૌ શ્રિયા ભ્રષ્ટૌ કમલાતપસા રતૌ ।
તયોશ્ચ ભાર્યયોર્લક્ષ્મીઃ કલયા ચ ભવિષ્યતિ ॥ ૪૯॥

સમ્પદ્યુક્તૌ તદા તૌ ચ નૃપશ્રેષ્ઠૌ ભવિષ્યતઃ ।
મૃતસ્તે સેવકઃ શમ્ભો ગચ્છ યૂયં ચ ગચ્છત ॥ ૫૦॥

ઇત્યુક્ત્વા ચ સલક્ષ્મીકઃ સભાતોઽભ્યન્તરઙ્ગતઃ ।
દેવા જગ્મુઃ સમ્પ્રહૃષ્ટાઃ સ્વાશ્રમં પરયા મુદા ।
શિવશ્ચ તપસે શીઘ્રં પરિપૂર્ણતમો યયૌ ॥ ૫૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
શક્તિપ્રાદુર્ભાવો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૯.૧૫॥

## ૯.૧૬ ષોડશોઽધ્યાયઃ । મહાલક્ષ્મ્યા વેદવતીરૂપેણ રાજગૃહે જન્મવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
લક્ષ્મીં તૌ ચ સમારાધ્ય ચોગ્રેણ તપસા મુને ।
વરમિષ્ટં ચ પ્રત્યેકં સમ્પ્રાપતુરભીપ્સિતમ્ ॥ ૧॥

મહાલક્ષ્મીવરેણૈવ તૌ પૃથ્વીશૌ બભૂવતુઃ ।
પુણ્યવન્તૌ પુત્રવન્તૌ ધર્મધ્વજકુશધ્વજૌ ॥ ૨॥

કુશધ્વજસ્ય પત્ની ચ દેવી માલાવતી સતી ।
સા સુષાવ ચ કાલેન કમલાંશાં સુતાં સતીમ્ ॥ ૩॥

સા ચ ભૂયિષ્ઠકાલેન જ્ઞાનયુક્તા બભૂવ હ ।
કૃત્વા વેદધ્વનિં સ્પષ્ટમુત્તસ્થૌ સૂતિકાગૃહાત્ ॥ ૪॥

વેદધ્વનિં સા ચકાર જાતમાત્રેણ કન્યકા ।
તસ્માત્તાં ચ વેદવતીં પ્રવદન્તિ મનીષિણઃ ॥ ૫॥

જાતમાત્રેણ સુસ્નાતા જગામ તપસે વનમ્ ।
સર્વૈર્નિષિદ્ધા યત્નેન નારાયણપરાયણા ॥ ૬॥

એકમન્વન્તરં ચૈવ પુષ્કરે ચ તપસ્વિની ।
અત્યુગ્રાં ચ તપસ્યાં ચ લીલયા હિ ચકાર સા ॥ ૭॥

તથાપિ પુષ્ટા ન ક્લિષ્ટા નવયૌવનસંયુતા ।
સુશ્રાવ સા ચ સહસા સુવાચમશરીરિણીમ્ ॥ ૮॥

જન્માન્તરે ચ તે ભર્તા ભવિષ્યતિ હરિઃ સ્વયમ્ ।
બ્રહ્માદિભિર્દુરારાધ્યં પતિં લપ્સ્યસિ સુન્દરિ ॥ ૯॥

ઇતિ શ્રુત્વા ચ સા હૃષ્ટા ચકાર હ પુનસ્તપઃ ।

અતીવ નિર્જનસ્થાને પર્વતે ગન્ધમાદને ॥ ૧૦॥

તત્રૈવ સુચિરં તપ્ત્વા વિશ્વસ્ય સમુવાસ સા ।
દદર્શ પુરતસ્તત્ર રાવણં દુર્નિવારણમ્ ॥ ૧૧॥

દૃષ્ટ્વા સાતિથિભક્ત્યા ચ પાદ્યં તસ્મૈ દદૌ કિલ ।
સુસ્વાદુભૂતં ચ ફલં જલં ચાપિ સુશીતલમ્ ॥ ૧૨॥

તચ્ચ ભુક્ત્વા સ પાપિષ્ઠશ્ચોવાસ તત્સમીપતઃ ।
ચકાર પ્રશ્નમિતિ તાં કા ત્વં કલ્યાણિ વર્તસે ॥ ૧૩॥

તાં દૃષ્ટ્વા સ વરારોહાં પીનશ્રોણિપયોધરામ્ ।
શરત્પદ્મોત્સવાસ્યાં ચ સસ્મિતાં સુદતીં સતીમ્ ॥ ૧૪॥

મૂર્ચ્છામવાપ કૃપણઃ કામબાણપ્રપીડિતઃ ।
સ કરેણ સમાકૃષ્ય શ‍ૃઙ્ગારં કર્તુમુદ્યતઃ ॥ ૧૫॥

સતી ચુકોપ દૃષ્ટ્વા તં સ્તમ્ભિતં ચ ચકાર હ ।
સ જડો હસ્તપાદૈશ્ચ કિઞ્ચિદ્વક્તું ન ચ ક્ષમઃ ॥ ૧૬॥

તુષ્ટાવ મનસા દેવીં પ્રયયૌ પદ્મલોચનામ્ ।
સા તુષ્ટા તસ્ય સ્તવનં સુકૃતં ચ ચકાર હ ॥ ૧૭॥

સા શશાપ મદર્થે ત્વં વિનઙ્ક્ષ્યસિ સબાન્ધવઃ ।
સ્પૃષ્ટાહં ચ ત્વયા કામાદ્ બલં ચાપ્યવલોકય ॥ ૧૮॥

ઇત્યુક્ત્વા સા ચ યોગેન દેહત્યાગં ચકાર હ ।
ગઙ્ગાયાં તાં ચ સંન્યસ્ય સ્વગૃહં રાવણો યયૌ ॥ ૧૯॥

અહો કિમદ્ભુતં દૃષ્ટં કિં કૃતં વાનયાધુના ।
ઇતિ સઞ્ચિન્ત્ય સઞ્ચિન્ત્ય વિલલાપ પુનઃ પુનઃ ॥ ૨૦॥

સા ચ કાલાન્તરે સાધ્વી બભૂવ જનકાત્મજા ।
સીતાદેવીતિ વિખ્યાતા યદર્થે રાવણો હતઃ ॥ ૨૧॥

મહાતપસ્વિની સા ચ તપસા પૂર્વજન્મતઃ ।
લેભે રામં ચ ભર્તારં પરિપૂર્ણતમં હરિમ્ ॥ ૨૨॥

સમ્પ્રાપ તપસાઽઽરાધ્ય દુરારાધ્યં જગત્પતિમ્ ।
સા રમા સુચિરં રેમે રામેણ સહ સુન્દરી ॥ ૨૩॥

જાતિસ્મરા ન સ્મરતિ તપસશ્ચ ક્લમં પુરા ।
સુખેન તજ્જહૌ સર્વં દુઃખં ચાપિ સુખં ફલે ॥ ૨૪॥

નાનાપ્રકારવિભવં ચકાર સુચિરં સતી ।
સમ્પ્રાપ્ય સુકુમારં તમતીવ નવયૌવના ॥ ૨૫॥

ગુણિનં રસિકં શાન્તં કાન્તં દેવમનુત્તમમ્ ।
સ્ત્રીણાં મનોજ્ઞં રુચિરં તથા લેભે યથેપ્સિતમ્ ॥ ૨૬॥

પિતુઃ સત્યપાલનાર્થં સત્યસન્ધો રઘૂદ્વહઃ ।
જગામ કાનનં પશ્ચાત્કાલેન ચ બલીયસા ॥ ૨૭॥

તસ્થૌ સમુદ્રનિકટે સીતયા લક્ષ્મણેન ચ ।
દદર્શ તત્ર વહ્નિં ચ વિપ્રરૂપધરં હરિઃ ॥ ૨૮॥

રામં ચ દુઃખિતં દૃષ્ટ્વા સ ચ દુઃખી બભૂવ હ ।
ઉવાચ કિઞ્ચિત્સત્યેષ્ટં સત્યં સત્યપરાયણઃ ॥ ૨૯॥

દ્વિજ ઉવાચ ।
ભગવચ્છ્રૂયતાં રામ કાલોઽયં યદુપસ્થિતઃ ।
સીતાહરણકાલોઽયં તવૈવ સમુપસ્થિતઃ ॥ ૩૦॥

દૈવં ચ દુર્નિવાર્યં ચ ન ચ દૈવાત્પરો બલી ।
જગત્પ્રસૂં મયિ ન્યસ્ય છાયાં રક્ષાન્તિકેઽધુના ॥ ૩૧॥

દાસ્યામિ સીતાં તુભ્યં ચ પરીક્ષાસમયે પુનઃ ।
દેવૈઃ પ્રસ્થાપિતોઽહં ચ ન ચ વિપ્રો હુતાશનઃ ॥ ૩૨॥

રામસ્તદ્વચનં શ્રુત્વા ન પ્રકાશ્ય ચ લક્ષ્મણમ્ ।
સ્વીકારં વચસશ્ચક્રે હૃદયેન વિદૂયતા ॥ ૩૩॥

વહ્નિર્યોગેન સીતાયા માયાસીતાં ચકાર હ ।
તત્તુલ્યગુણસર્વાઙ્ગાં દદૌ રામાય નારદ ॥ ૩૪॥

સીતાં ગૃહીત્વા સ યયૌ ગોપ્યં વક્તું નિષિધ્ય ચ ।
લક્ષ્મણો નૈવ બુબુધે ગોપ્યમન્યસ્ય કા કથા ॥ ૩૫॥

એતસ્મિન્નન્તરે રામો દદર્શ કાનકં મૃગમ્ ।
સીતા તં પ્રેરયામાસ તદર્થે યત્નપૂર્વકમ્ ॥ ૩૬॥

સંન્યસ્ય લક્ષ્મણં રામો જાનક્યા રક્ષણે વને ।

સ્વયં જગામ તૂર્ણં તં વિવ્યાધ સાયકેન ચ ॥ ૩૭॥

લક્ષ્મણેતિ ચ શબ્દં સ કૃત્વા ચ માયયા મૃગઃ ।
પ્રાણાંસ્તત્યાજ સહસા પુરો દૃષ્ટ્વા હરિં સ્મરન્ ॥ ૩૮॥

મૃગદેહં પરિત્યજ્ય દિવ્યરૂપં વિધાય ચ ।
રત્નનિર્માણયાનેન વૈકુણ્ઠં સ જગામ હ ॥ ૩૯॥

વૈકુણ્ઠલોકદ્વાર્યાસીત્કિઙ્કરો દ્વારપાલયોઃ ।
પુનર્જગામ તદ્દ્વારમાદેશાદ્ દ્વારપાલયોઃ ॥ ૪૦॥

અથ શબ્દં ચ સા શ્રુત્વા લક્ષ્મણેતિ ચ વિક્લવમ્ ।
તં હિ સા પ્રેરયામાસ લક્ષ્મણં રામસન્નિધૌ ॥ ૪૧॥

ગતે ચ લક્ષ્મણે રામં રાવણો દુર્નિવારણઃ ।
સીતાં ગૃહીત્વા પ્રયયૌ લઙ્કામેવ સ્વલીલયા ॥ ૪૨॥

વિષસાદ ચ રામશ્ચ વને દૃષ્ટ્વા ચ લક્ષ્મણમ્ ।
તૂર્ણં ચ સ્વાશ્રમં ગત્વા સીતાં નૈવ દદર્શ સઃ ॥ ૪૩॥

મૂર્ચ્છાં સમ્પ્રાપ સુચિરં વિલલાપ ભૃશં પુનઃ ।
પુનઃ પુનશ્ચ બભ્રામ તદન્વેષણપૂર્વકમ્ ॥ ૪૪॥

કાલેન પ્રાપ્ય તદ્વાર્તાં ગોદાવરીનદીતટે ।
સહાયાન્વાનરાન્કૃત્વા બબન્ધ સાગરં હરિઃ ॥ ૪૫॥

લઙ્કાં ગત્વા રઘુશ્રેષ્ઠો જઘાન સાયકેન ચ ।
કાલેન પ્રાપ્ય તં હત્વા રાવણં બાન્ધવૈઃ સહ ॥ ૪૬॥

તાં ચ વહ્નિપરીક્ષાં ચ કારયામાસ સત્વરમ્ ।
હુતાશસ્તત્ર કાલે તુ વાસ્તવીં જાનકીં દદૌ ॥ ૪૭॥

ઉવાચ છાયા વહ્નિં ચ રામં ચ વિનયાન્વિતા ।
કરિષ્યામીતિ કિમહં તદુપાયં વદસ્વ મે ॥ ૪૮॥

શ્રીરામાગ્ની ઊચતુઃ
ત્વં ગચ્છ તપસે દેવિ પુષ્કરં ચ સુપુણ્યદમ્ ।
કૃત્વા તપસ્યા તત્રૈવ સ્વર્ગલક્ષ્મીર્ભવિષ્યસિ ॥ ૪૯॥

સા ચ તદ્વચનં શ્રુત્વા પ્રતપ્ય પુષ્કરે તપઃ ।
દિવ્યં ત્રિલક્ષવર્ષં ચ સ્વર્ગલક્ષ્મીર્બભૂવ હ ॥ ૫૦॥

સા ચ કાલેન તપસા યજ્ઞકુણ્ડસમુદ્ભવા ।
કામિની પાણ્ડવાનાં ચ દ્રૌપદી દ્રુપદાત્મજા ॥ ૫૧॥

કૃતે યુગે વેદવતી કુશધ્વજસુતા શુભા ।
ત્રેતાયાં રામપત્ની ચ સીતેતિ જનકાત્મજા ॥ ૫૨॥

તચ્છાયા દ્રૌપદી દેવી દ્વાપરે દ્રુપદાત્મજા ।
ત્રિહાયણી ચ સા પ્રોક્તા વિદ્યમાના યુગત્રયે ॥ ૫૩॥

નારદ ઉવાચ ।
પ્રિયાઃ પઞ્ચ કથં તસ્યા બભૂવુર્મુનિપુઙ્ગવ ।
ઇતિ મચ્ચિત્તસન્દેહં ભઞ્જ સન્દેહભઞ્જન ॥ ૫૪॥

શ્રીનારાયણ ઉવાચ ।
લઙ્કાયાં વાસ્તવી સીતા રામં સમ્પ્રાપ નારદ ।
રૂપયૌવનસમ્પન્ના છાયા ચ બહુચિન્તયા ॥ ૫૫॥

રામાગ્ન્યોરાજ્ઞયા તમુમુપાસ્તે શઙ્કરં પરમ્ ।
કામાતુરા પતિવ્યગ્રા પ્રાર્થયન્તી પુનઃ પુનઃ ॥ ૫૬॥

પતિં દેહિ પતિં દેહિ પતિં દેહિ ત્રિલોચન ।
પતિં દેહિ પતિં દેહિ પઞ્ચવારં ચકાર સા ॥ ૫૭॥

શિવસ્તત્પ્રાર્થનાં શ્રુત્વા પ્રહસ્ય રસિકેશ્વરઃ ।
પ્રિયે તવ પ્રિયાઃ પઞ્ચ ભવિષ્યન્તિ વરં દદૌ ॥ ૫૮॥

તેન સા પાણ્ડવાનાં ચ બભૂવ કામિની પ્રિયા ।
ઇતિ તે કથિતં સર્વં પ્રસ્તાવં વાસ્તવં શ‍ૃણુ ॥ ૫૯॥

અથ સમ્પ્રાપ્ય લઙ્કાયાં સીતાં રામો મનોહરામ્ ।
વિભીષણાય તાં લઙ્કાં દત્ત્વાયોધ્યાં યયૌ પુનઃ ॥ ૬૦॥

એકાદશસહસ્રાબ્દં કૃત્વા રાજ્યં ચ ભારતે ।
જગામ સર્વૈર્લોકૈશ્ચ સાર્ધં વૈકુણ્ઠમેવ ચ ॥ ૬૧॥

કમલાંશા વેદવતી કમલાયાં વિવેશ સા ।
કથિતં પુણ્યમાખ્યાનં પુણ્યદં પાપનાશનમ્ ॥ ૬૨॥

સતતં મૂર્તિમન્તશ્ચ વેદાશ્ચત્વાર એવ ચ ।

સન્તિ યસ્યાશ્ચ જિહ્વાગ્રે સા ચ વેદવતી શ્રુતા ॥ ૬૩॥

ધર્મધ્વજસુતાખ્યાનં નિબોધ કથયામિ તે ॥ ૬૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે મહાલક્ષ્મ્યા વેદવતીરૂપેણ
રાજગૃહે જન્મવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૯.૧૬॥

## ૯.૧૭ સપ્તદશોઽધ્યાયઃ । ધર્મધ્વજસુતાતુલસ્યુપાખ્યાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ધર્મધ્વજસ્ય પત્ની માધવીતિ ચ વિશ્રુતા ।
નૃપેણ સાર્ધં સારામે રેમે ચ ગન્ધમાદને ॥ ૧॥

શય્યાં રતિકરીં કૃત્વા પુષ્પચન્દનચર્ચિતામ્ ।
ચન્દનાલિપ્તસર્વાઙ્ગીં પુષ્પચન્દનવાયુના ॥ ૨॥

સ્ત્રીરત્નમતિચાર્વઙ્ગી રત્નભૂષણભૂષિતા ।
કામુકી રસિકા સૃષ્ટા રસિકેન ચ સંયુતા ॥ ૩॥

સુરતે વિરતિર્નાસ્તિ તયોઃ સુરતિવિજ્ઞયોઃ ।
ગતં દેવવર્ષશતં ન જ્ઞાતં ચ દિવાનિશમ્ ॥ ૪॥

તતો રાજા મતિં પ્રાપ્ય સુરતાદ્વિરરામ ચ ।
કામુકી સુન્દરી કિઞ્ચિન્ન ચ તૃપ્તિં જગામ સા ॥ ૫॥

દધાર ગર્ભં સા સદ્યો દૈવાદબ્દશતં સતી ।
શ્રીગર્ભા શ્રીયુતા સા ચ સમ્બભૂવ દિને દિને ॥ ૬॥

શુભે ક્ષણે શુભદિને શુભયોગે ચ સંયુતે ।
શુભલગ્ને શુભાંશે ચ શુભસ્વામિગ્રહાન્વિતે ॥ ૭॥

કાર્તિકીપૂર્ણિમાયાં તુ સિતવારે ચ પાદ્મજ ।
સુષાવ સા ચ પદ્માંશાં પદ્મિનીં તાં મનોહરામ્ ॥ ૮॥

શરત્પાર્વણચન્દ્રાસ્યાં શરત્પઙ્કજલોચનામ્ ।
પક્વબિમ્બાધરોષ્ઠીં ચ પશ્યન્તીં સસ્મિતાં ગૃહમ્ ॥ ૯॥

હસ્તપાદતલારક્તાં નિમ્નનાભિં મનોરમામ્ ।
તદધસ્ત્રિવલીયુક્તાં નિતમ્બયુગવર્તુલામ્ ॥ ૧૦॥

શીતે સુખોષ્ણસર્વાઙ્ગીં ગ્રીષ્મે ચ સુખશીતલામ્ ।
શ્યામાં સુકેશીં રુચિરાં ન્યગ્રોધપરિમણ્ડલામ્ ॥ ૧૧॥

પીતચમ્પકવર્ણાભાં સુન્દરીષ્વેવ સુન્દરીમ્ ।
નરા નાર્યશ્ચ તાં દૃષ્ટ્વા તુલનાં દાતુમક્ષમાઃ ॥ ૧૨॥

તેન નામ્ના ચ તુલસીં તાં વદન્તિ મનીષિણઃ ।
સા ચ ભૂયિષ્ઠમાનેન યોગ્યા સ્ત્રી પ્રકૃતિર્યથા ॥ ૧૩॥

સર્વૈર્નિષિદ્ધા તપસે જગામ બદરીવનમ્ ।
તત્ર દેવાબ્દલક્ષં ચ ચકાર પરમં તપઃ ॥ ૧૪॥

મનસા નારાયણઃ સ્વામી ભવિતેતિ ચ નિશ્ચિતા ।
ગ્રીષ્મે પઞ્ચતપાઃ શીતે તોયવસ્ત્રા ચ પ્રાવૃષિ ॥ ૧૫॥

આસનસ્થા વૃષ્ટિધારાઃ સહન્તીતિ દિવાનિશમ્ ।
વિંશત્સહસ્રવર્ષં ચ ફલતોયાશના ચ સા ॥ ૧૬॥

ત્રિંશત્સહસ્રવર્ષં ચ પત્રાહારા તપસ્વિની ।
ચત્વારિંશત્સહસ્રાબ્દં વાય્વાહારા કૃશોદરી ॥ ૧૭॥

તતો દશસહસ્રાબ્દં નિરાહારા બભૂવ સા ।
નિર્લક્ષ્યાં ચૈકપાદસ્થાં દૃષ્ટ્વા તાં કમલોદ્ભવઃ ॥ ૧૮॥

સમાયયૌ વરં દાતું પરં બદરિકાશ્રમમ્ ।
ચતુર્મુખં ચ સા દૃષ્ટ્વા નનામ હંસવાહનમ્ ॥ ૧૯॥

તામુવાચ જગત્કર્તા વિધાતા જગતામપિ ।
બ્રહ્મોવાચ ।
વરં વૃણીષ્વ તુલસિ યત્તે મનસિ વાઞ્છિતમ્ ॥ ૨૦॥

હરિભક્તિં હરેર્દાસ્યમજરામરતામપિ ।
તુલસ્યુવાચ ।
શૃણુ તાત પ્રવક્ષ્યામિ યન્મે મનસિ વાઞ્છિતમ્ ॥ ૨૧॥

સર્વજ્ઞસ્યાપિ પુરતઃ કા લજ્જા મમ સામ્પ્રતમ્ ।
અહં તુ તુલસી ગોપી ગોલોકેઽહં સ્થિતા પુરા ॥ ૨૨॥

કૃષ્ણપ્રિયા કિઙ્કરી ચ તદંશા તત્સખી પ્રિયા ।

ગોવિન્દરતિસમ્ભુક્તામતૃપ્તાં માં ચ મૂર્ચ્છિતામ્ ॥ ૨૩॥

રાસેશ્વરી સમાગત્ય દદર્શ રાસમણ્ડલે ।
ગોવિન્દં ભર્ત્સયામાસ માં શશાપ રુષાન્વિતા ॥ ૨૪॥

યાહિ ત્વં માનવીં યોનિમિત્યેવં ચ શશાપ હ ।
મામુવાચ સ ગોવિન્દો મદંશં ચ ચતુર્ભુજમ્ ॥ ૨૫॥

લભિષ્યસિ તપસ્તપ્ત્વા ભારતે બ્રહ્મણો વરાત્ ।
ઇત્યેવમુક્ત્વા દેવેશોઽપ્યન્તર્ધાનં ચકાર સઃ ॥ ૨૬॥

દેવ્યા ભિયા તનું ત્યક્ત્વા પ્રાપ્તં જન્મ ગુરો ભુવિ ।
અહં નારાયણં કાન્તં શાન્તં સુન્દરવિગ્રહમ્ ॥ ૨૭॥

સામ્પ્રતં તં પતિં લબ્ધું વરયે ત્વં ચ દેહિ મે ।
બ્રહ્મદેવ ઉવાચ ।
સુદામા નામ ગોપશ્ચ શ્રીકૃષ્ણાઙ્ગસમુદ્ભવઃ ॥ ૨૮॥

તદંશશ્ચાતિતેજસ્વી લેભે જન્મ ચ ભારતે ।
સામ્પ્રતં રાધિકાશાપાદ્દનુવંશસમુદ્ભવઃ ॥ ૨૯॥

શઙ્ખચૂડેતિ વિખ્યાતસ્ત્રૈલોક્યે ન ચ તત્સમઃ ।
ગોલોકે ત્વાં પુરા દૃષ્ટ્વા કામોન્મથિતમાનસઃ ॥ ૩૦॥

વિલમ્ભિતું ન શશાક રાધિકાયાઃ પ્રભાવતઃ ।
સ ચ જાતિસ્મરસ્તસ્માત્સદામાભૂચ્ચ સાગરે ॥ ૩૧॥

જાતિસ્મરા ત્વમપિ સા સર્વં જાનાસિ સુન્દરિ ।
અધુના તસ્ય પત્ની ત્વં સમ્ભવિષ્યસિ શોભને ॥ ૩૨॥

પશ્ચાન્નારાયણં શાન્તં કાન્તમેવ વરિષ્યસિ ।
શાપાન્નારાયણસ્યૈવ કલયા દૈવયોગતઃ ॥ ૩૩॥

ભવિષ્યસિ વૃક્ષરૂપા ત્વં પૂતા વિશ્વપાવની ।
પ્રધાના સર્વપુષ્પેષુ વિષ્ણુપ્રાણાધિકા ભવેઃ ॥ ૩૪॥

ત્વયા વિના ચ સર્વેષાં પૂજા ચ વિફલા ભવેત્ ।
વૃન્દાવને વૃક્ષરૂપા નામ્ના વૃન્દાવનીતિ ચ ॥ ૩૫॥

ત્વત્પત્રૈર્ગોપિગોપાશ્ચ પૂજયિષ્યન્તિ માધવમ્ ।
વૃક્ષાધિદેવીરૂપેણ સાર્ધં કૃષ્ણેન સન્તતમ્ ॥ ૩૬॥

વિહરિષ્યસિ ગોપેન સ્વચ્છન્દં મદ્વરેણ ચ ।
ઇત્યેવં વચનં શ્રુત્વા સસ્મિતા હૃષ્ટમાનસા ॥ ૩૭॥

પ્રણનામ ચ બ્રહ્માણં તં ચ કિઞ્ચિદુવાચ સા ।
તુલસ્યુવાચ ।
યથા મે દ્વિભુજે કૃષ્ણે વાઞ્છા ચ શ્યામસુન્દરે ॥ ૩૮॥

સત્યં બ્રવીમિ હે તાત ન તથા ચ ચતુર્ભુજે ।
અતૃપ્તાહં ચ ગોવિન્દે દૈવાચ્છૃઙ્ગારભઙ્ગતઃ ॥ ૩૯॥

ગોવિન્દસ્યૈવ વચનાત્પ્રાર્થયામિ ચતુર્ભુજમ્ ।
ત્વત્પ્રસાદેન ગોવિન્દં પુનરેવ સુદુર્લભમ્ ॥ ૪૦॥

ધ્રુવમેવ લભિષ્યામિ રાધાભીતિં પ્રમોચય ।
બ્રહ્મદેવ ઉવાચ ।
ગૃહાણ રાધિકામન્ત્રં દદામિ ષોડશાક્ષરમ્ ॥ ૪૧॥

તસ્યાશ્ચ પ્રાણતુલ્યા ત્વં મદ્વરેણ ભવિષ્યસિ ।
શ‍ૃઙ્ગારં યુવયોર્ગોપ્યં ન જ્ઞાસ્યતિ ચ રાધિકા ॥ ૪૨॥

રાધાસમા ત્વં સુભગે ગોવિન્દસ્ય ભવિષ્યસિ ।
ઇત્યેવમુક્ત્વા દત્ત્વા ચ દેવ્યા વૈ ષોડશાક્ષરમ્ ॥ ૪૩॥

મન્ત્રં ચૈવ જગદ્ધાતા સ્તોત્રં ચ કવચં પરમ્ ।
સર્વં પૂજાવિધાનં ચ પુરશ્ચર્યાવિધિક્રમમ્ ॥ ૪૪॥

પરાં શુભાશિષં ચૈવ પૂજાં ચૈવ ચકાર સા ।
બભૂવ સિદ્ધા સા દેવી તત્પ્રસાદાદ્રમા યથા ॥ ૪૫॥

સિદ્ધં મન્ત્રેણ તુલસી વરં પ્રાપ યથોદિતમ્ ।
બુભુજે ચ મહાભોગં યદ્વિશ્વેષુ ચ દુર્લભમ્ ॥ ૪૬॥

પ્રસન્નમનસા દેવી તત્યાજ તપસઃ ક્લમમ્ ।
સિદ્ધે ફલે નરાણાં ચ દુઃખં ચ સુખમુત્તમમ્ ॥ ૪૭॥

ભુક્ત્વા પીત્વા ચ સન્તુષ્ટા શયનં ચ ચકાર સા ।
તલ્પે મનોરમે તત્ર પુષ્પચન્દનચર્ચિતે ॥ ૪૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં

સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
ધર્મધ્વજસુતાતુલસ્યુપાખ્યાનવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૯.૧૭॥

## ૯.૧૮ અષ્ટાદશોઽધ્યાયઃ । શઙ્ખચૂડેન સહ તુલસ્યાઃ સઙ્ગતિવર્ણનમ્ ।

નારાયણ ઉવાચ ।
તુલસી પરિતુષ્ટા ચ સુષ્વાપ હૃષ્ટમાનસા ।
નવયૌવનસમ્પન્ના વૃષધ્વજવરાઙ્ગના ॥ ૧॥

ચિક્ષેપ પઞ્ચબાણશ્ચ પઞ્ચબાણાંશ્ચ તાં પ્રતિ ।
પુષ્પાયુધેન સા દગ્ધા પુષ્પચન્દનચર્ચિતા ॥ ૨॥

પુલકાઙ્કિતસર્વાઙ્ગી કમ્પિતારક્તલોચના ।
ક્ષણં સા શુષ્કતાં પ્રાપ ક્ષણં મૂર્ચ્છામવાપ હ ॥ ૩॥

ક્ષણમુદ્વિગ્નતાં પ્રાપ ક્ષણં તન્દ્રાં સુખાવહામ્ ।
ક્ષણં ચ દહનં પ્રાપ ક્ષણં પ્રાપ પ્રસન્નતામ્ ॥ ૪॥

ક્ષણં સા ચેતનાં પ્રાપ ક્ષણં પ્રાપ વિષણ્ણતામ્ ।
ઉત્તિષ્ઠન્તી ક્ષણં તલ્પાદ્ ગચ્છન્તી નિકટે ક્ષણમ્ ॥ ૫॥

ભ્રમન્તી ક્ષણમુદ્વેગાન્નિવસન્તી ક્ષણં પુનઃ ।
ક્ષણમેવ સમુદ્વેગાત્સુષ્વાપ પુનરેવ સા ॥ ૬॥

પુષ્પચન્દનતલ્પં ચ તદ્ બભૂવાતિકણ્ટકમ્ ।
વિષહારિ સુખં દિવ્યં સુન્દરં ચ ફલં જલમ્ ॥ ૭॥

નિલયં ચ બિલાકારં સૂક્ષ્મવસ્ત્રં હુતાશનઃ ।
સિન્દૂરપત્રકં ચૈવ વ્રણતુલ્યં ચ દુઃખદમ્ ॥ ૮॥

ક્ષણં દદર્શ તન્દ્રાયાં સુવેષં પુરુષં સતી ।
સુન્દરં ચ યુવાનં ચ સસ્મિતં રસિકેશ્વરમ્ ॥ ૯॥

ચન્દનોક્ષિતસર્વાઙ્ગં રત્નભૂષણભૂષિતમ્ ।
આગચ્છન્તં માલ્યવન્તં પિબન્તં તન્મુખામ્બુજમ્ ॥ ૧૦॥

કથયન્તં રતિકથાં બ્રુવન્તં મધુરં મુહુઃ ।
સમ્ભુક્તવન્તં તલ્પે ચ સમાશ્લિષ્યન્તમીપ્સિતમ્ ॥ ૧૧॥

પુનરેવ તુ ગચ્છન્તમાગચ્છન્તં ચ સન્નિધૌ ।

યાન્તં ક્વ યાસિ પ્રાણેશ તિષ્ઠત્યેવમુવાચ સા ॥ ૧૨॥

પુનશ્ચ ચેતનાં પ્રાપ્ય વિલલાપ પુનઃ પુનઃ ।
એવં સા યૌવનં પ્રાપ્ય તસ્થૌ તત્રૈવ નારદ ॥ ૧૩॥

શઙ્ખચૂડો મહાયોગી જૈગીષવ્યાન્મનોહરમ્ ।
કૃષ્ણમન્ત્રં ચ સમ્પ્રાપ્ય કૃત્વા સિદ્ધં તુ પુષ્કરે ॥ ૧૪॥

કવચં ચ ગલે બદ્ધ્વા સર્વમઙ્ગલમઙ્ગલમ્ ।
બ્રહ્મણશ્ચ વરં પ્રાપ્ય યત્તે મનસિ વાઞ્છિતમ્ ॥ ૧૫॥

આજ્ઞયા બ્રહ્મણઃ સોઽપિ બદરીં ચ સમાયયૌ ।
આગચ્છન્તં શઙ્ખચૂડં દદર્શ તુલસી મુને ॥ ૧૬॥

નવયૌવનસમ્પન્નં કામદેવસમપ્રભમ્ ।
શ્વેતચમ્પકવર્ણાભં રત્નભૂષણભૂષિતમ્ ॥ ૧૭॥

શરત્પાર્વણચન્દ્રાસ્યં શરત્પઙ્કજલોચનમ્ ।
રત્નસારવિનિર્માણવિમાનસ્થં મનોહરમ્ ॥ ૧૮॥

રત્નકુણ્ડલયુગ્મેન ગણ્ડસ્થલવિરાજિતમ્ ।
પારિજાતપ્રસૂનાનાં માલાવન્તં ચ સુસ્મિતમ્ ॥ ૧૯॥

કસ્તૂરીકુઙ્કુમાયુક્તં સુગન્ધિચન્દનાન્વિતમ્ ।
સા દૃષ્ટ્વા સન્નિધાવેનં મુખમાચ્છાદ્ય વાસસા ॥ ૨૦॥

સસ્મિતા તં નિરીક્ષન્તી સકટાક્ષં પુનઃ પુનઃ ।
બભૂવાતિનમ્રમુખી નવસઙ્ગમલજ્જિતા ॥ ૨૧॥

શરદિન્દુવિનિન્દ્યૈકસ્વમુખેન્દુવિરાજિતા ।
અમૂલ્યરત્નનિર્માણયાવકાવલિસંયુતા ॥ ૨૨॥

મણીન્દ્રસારનિર્માણક્વણન્મઞ્જીરરઞ્જિતા ।
દધતી કબરીભારં માલતીમાલ્યસંયુતમ્ ॥ ૨૩॥

અમૂલ્યરત્નનિર્માણમકરાકૃતિકુણ્ડલા ।
ચિત્રકુણ્ડલયુગ્મેન ગણ્ડસ્થલવિરાજિતા ॥ ૨૪॥

રત્નેન્દ્રસારહારેણ સ્તનમધ્યસ્થલોજ્જ્વલા ।
રત્નકઙ્કણકેયૂરશઙ્ખભૂષણભૂષિતા ॥ ૨૫॥

રત્નાઙ્ગુલીયકૈર્દિવ્યૈરઙ્ગુલ્યાવલિરાજિતા ।
દૃષ્ટ્વા તાં લલિતાં રમ્યાં સુશીલાં સુન્દરીં સતીમ્ ॥ ૨૬॥

ઉવાસ તત્સમીપે તુ મધુરં તામુવાચ સઃ ।
શઙ્ખચૂડ ઉવાચ ।
કા ત્વં કસ્ય ચ કન્યા ચ ધન્યા માન્યા ચ યોષિતામ્ ॥ ૨૭॥

કા ત્વં માનિનિ કલ્યાણિ સર્વકલ્યાણદાયિનિ ।
મૌનીભૂતે કિઙ્કરે માં સમ્ભાષાં કુરુ સુન્દરિ ॥ ૨૮॥

ઇત્યેવં વચનં શ્રુત્વા સકામા વામલોચના ।
સસ્મિતા નમ્રવદના સકામં તમુવાચ સા ॥ ૨૯॥

તુલસ્યુવાચ ।
ધર્મધ્વજસુતાહં ચ તપસ્યાયાં તપોવને ।
તપસ્વિન્યહં તિષ્ઠામિ કસ્ત્વં ગચ્છ યથાસુખમ્ ॥ ૩૦॥

કામિનીં કુલજાતાં ચ રહસ્યેકાકિનીં સતીમ્ ।
ન પૃચ્છતિ કુલે જાત ઇત્યેવં મે શ્રુતૌ શ્રુતમ્ ॥ ૩૧॥

લમ્પટોઽસત્કુલે જાતો ધર્મશાસ્ત્રાર્થવર્જિતઃ ।
યેનાશ્રુતઃ શ્રુતેરર્થઃ સ કામીચ્છતિ કામિનીમ્ ॥ ૩૨॥

આપાતમધુરાં મત્તામન્તકાં પુરુષસ્ય તામ્ ।
વિષકુમ્ભાકારરૂપામમૃતાસ્યાં ચ સન્તતમ્ ॥ ૩૩॥

હૃદયે ક્ષુરધારાભાં શશ્વન્મધુરભાષિણીમ્ ।
સ્વકાર્યપરિનિષ્પત્ત્યૈ તત્પરા સતતં ચ તામ્ ॥ ૩૪॥

કાર્યાર્થે સ્વામિવશગામન્યથૈવાવશાં સદા ।
સ્વાન્તર્મલિનરૂપાં ચ પ્રસન્નવદનેક્ષણામ્ ॥ ૩૫॥

શ્રુતૌ પુરાણે યાસાં ચ ચરિત્રમતિદૂષિતમ્ ।
તાસુ કો વિશ્વસેત્પ્રાજ્ઞઃ પ્રજ્ઞાવાંશ્ચ દુરાશયઃ ॥ ૩૬॥

તાસાં કો વા રિપુર્મિત્રં પ્રાર્થયન્તિ નવં નવમ્ ।
દૃષ્ટ્વા સુવેષં પુરુષમિચ્છન્તિ હૃદયે સદા ॥ ૩૭॥

બાહ્યે સ્વાર્થં સતીત્વં ચ જ્ઞાપયન્તી પ્રયત્નતઃ ।
શશ્વત્કામા ચ રામા ચ કામાધારા મનોહરા ॥ ૩૮॥

બાહ્યે છલાત્ખેદયન્તી સ્વાન્તર્મૈથુનમાનસા ।
કાન્તં હસન્તી રહસિ બાહ્યેઽતીવ સુલજ્જિતા ॥ ૩૯॥

માનિની મૈથુનાભાવે કોપના કલહાઙ્કુરા ।
સુપ્રીતા ભૂરિસમ્ભોગાત્સ્વલ્પમૈથુનદુઃખિતા ॥ ૪૦॥

સુમિષ્ટાન્નાચ્છીતતોયાદાકાઙ્ક્ષન્તી ચ માનસે ।
સુન્દરં રસિકં કાન્તં યુવાનં ગુણિનં સદા ॥ ૪૧॥

સુતાત્પરમભિસ્નેહં કુર્વતી રસિકોપરિ ।
પ્રાણાધિકં પ્રિયતમં સમ્ભોગકુશલં પ્રિયમ્ ॥ ૪૨॥

પશ્યન્તી રિપુતુલ્યં ચ વૃદ્ધં વા મૈથુનાક્ષમમ્ ।
કલહં કુર્વતી શશ્વત્તેન સાર્ધં સુકોપના ॥ ૪૩॥

વાચયા ભક્ષયન્તી તં સર્પ આખુમિવોલ્બણમ્ ।
દુઃસાહસસ્વરૂપા ચ સર્વદોષાશ્રયા સદા ॥ ૪૪॥

બ્રહ્મવિષ્ણુશિવાદીનાં દુઃસાધ્યા મોહરૂપિણી ।
તપોમાર્ગાર્ગલા શશ્વન્મોક્ષદ્વારકપાટિકા ॥ ૪૫॥

હરેર્ભક્તિવ્યવહિતા સર્વમાયાકરણ્ડિકા ।
સંસારકારાગારે ચ શશ્વન્નિગડરૂપિણી ॥ ૪૬॥

ઇન્દ્રજાલસ્વરૂપા ચ મિથ્યા ચ સ્વપ્નરૂપિણી ।
બિભ્રતી બાહ્યસૌન્દર્યમધોઽઙ્ગમતિકુત્સિતમ્ ॥ ૪૭॥

નાનાવિણ્મૂત્રપૂયાનામાધારં મલસંયુતમ્ ।
દુર્ગન્ધિદોષસંયુક્તં રક્તારક્તમસંસ્કૃતમ્ ॥ ૪૮॥

માયારૂપા માયિનાં ચ વિધિના નિર્મિતા પુરા ।
વિષરૂપા મુમુક્ષૂણામદૃશ્યાપ્યભિવાઞ્છતામ્ ॥ ૪૯॥

ઇત્યુક્ત્વા તુલસી તં તુ વિરરામ ચ નારદ ।
સસ્મિતઃ શઙ્ખચૂડશ્ચ પ્રવક્તુમુપચક્રમે ॥ ૫૦॥

શઙ્ખચૂડ ઉવાચ ।
ત્વયા યત્કથિતં દેવિ ન ચ સર્વમલીકકમ્ ।
કિઞ્ચિત્સત્યમલીકં ચ કિઞ્ચિન્મત્તો નિશામય ॥ ૫૧॥

નિર્મિતં દ્વિવિધં ધાત્રા સ્ત્રીરૂપં સર્વમોહનમ્ ।

કૃત્વા રૂપં વાસ્તવં ચ પ્રશસ્યં ચાપ્રશંસિતમ્ ॥ ૫૨॥

લક્ષ્મીઃ સરસ્વતી દુર્ગા સાવિત્રી રાધિકાદિકા ।
સૃષ્ટિસૂત્રસ્વરૂપા ચ આદ્યા સૃષ્ટિર્વિનિર્મિતા ॥ ૫૩॥

એતાસામંશરૂપં ચ સ્ત્રીરૂપં વાસ્તવં સ્મૃતમ્ ।
તત્પ્રશસ્યં યશોરૂપં સર્વમઙ્ગલકારકમ્ ॥ ૫૪॥

શતરૂપા દેવહૂતી સ્વધા સ્વાહા ચ દક્ષિણા ।
છાયાવતી રોહિણી ચ વરુણાની શચી તથા ॥ ૫૫॥

કુબેરસ્ય ચ પત્ની યાપ્યદિતિશ્ચ દિતિસ્તથા ।
લોપામુદ્રાનસૂયા ચ કોટભી તુલસી તથા ॥ ૫૬॥

અહલ્યારુન્ધતી મેના તારા મન્દોદરી તથા ।
દમયન્તી વેદવતી ગઙ્ગા ચ મનસા તથા ॥ ૫૭॥

પુષ્ટિસ્તુષ્ટિઃ સ્મૃતિર્મેધા કાલિકા ચ વસુન્ધરા ।
ષષ્ઠી મઙ્ગલચણ્ડી ચ મૂર્તિશ્ચ ધર્મકામિની ॥ ૫૮॥

સ્વસ્તિઃ શ્રદ્ધા ચ શાન્તિશ્ચ કાન્તિઃ ક્ષાન્તિસ્તથા પરા ।
નિદ્રા તન્દ્રા ક્ષુત્પિપાસા સન્ધ્યા રાત્રિદિનાનિ ચ ॥ ૫૯॥

સમ્પત્તિર્ધૃતિકીર્તી ચ ક્રિયા શોભા પ્રભા શિવા ।
યત્સ્ત્રીરૂપં ચ સમ્ભૂતમુત્તમં તુ યુગે યુગે ॥ ૬૦॥

કલાકલાંશરૂપં ચ સ્વર્વેશ્યાદિકમેવ ચ ।
તદપ્રશસ્યં વિશ્વેષુ પુંશ્ચલીરૂપમેવ ચ ॥ ૬૧॥

સત્ત્વપ્રધાનં યદ્રૂપં તદ્યુક્તં ચ પ્રભાવતઃ ।
તદુત્તમં ચ વિશ્વેષુ સાધ્વીરૂપં પ્રશંસિતમ્ ॥ ૬૨॥

તદ્વાસ્તવં ચ વિજ્ઞેયં પ્રવદન્તિ મનીષિણઃ ।
રજોરૂપં તમોરૂપં કલાસુ વિવિધં સ્મૃતમ્ ॥ ૬૩॥

મધ્યમા રજસશ્ચાંશાસ્તાસ્તુ ભોગેષુ લોલુપાઃ ।
સુખસમ્ભોગવશ્યાશ્ચ સ્વકાર્યે નિરતાઃ સદા ॥ ૬૪॥

કપટા મોહકારિણ્યો ધર્માર્થવિમુખાઃ સદા ।
રજોરૂપસ્ય સાધ્વીત્વમતો નૈવોપજાયતે ॥ ૬૫॥

ઇદં મધ્યમરૂપં ચ પ્રવદન્તિ મનીષિણઃ ।
તમોરૂપં દુર્નિવાર્યમધમં તદ્વિદુર્બુધાઃ ॥ ૬૬॥

ન પૃચ્છતિ કુલે જાતઃ પણ્ડિતશ્ચ પરસ્ત્રિયમ્ ।
નિર્જને નિર્જલે વાપિ રહસ્યપિ પરસ્ત્રિયમ્ ॥ ૬૭॥

આગચ્છામિ ત્વત્સમીપમાજ્ઞયા બ્રહ્મણોઽધુના ।
ગાન્ધર્વેણ વિવાહેન ત્વાં ગ્રહીષ્યામિ શોભને ॥ ૬૮॥

અહમેવ શઙ્ખચૂડો દેવવિદ્રાવકારકઃ ।
દનુવંશ્યો વિશેષેણ સુદામાહં હરેઃ પુરા ॥ ૬૯॥

અહમષ્ટસુ ગોપેષુ ગોપોઽપિ પાર્ષદેષુ ચ ।
અધુના દાનવેન્દ્રોઽહં રાધિકાયાશ્ચ શાપતઃ ॥ ૭૦॥

જાતિસ્મરોઽહં જાનામિ કૃષ્ણમન્ત્રપ્રભાવતઃ ।
જાતિસ્મરા ત્વં તુલસી સમ્ભુક્તા હરિણા પુરા ॥ ૭૧॥

ત્વમેવ રાધિકાકોપાજ્જાતાસિ ભારતે ભુવિ ।
ત્વાં સમ્ભોક્તુમુત્સુકોઽહં નાલં રાધાભયાત્તતઃ ॥ ૭૨॥

ઇત્યેવમુક્ત્વા સ પુમાન્વિરરામ મહામુને ।
સસ્મિતં તુલસી તુષ્ટા પ્રવક્તુમુપચક્રમે ॥ ૭૩॥

તુલસ્યુવાચ ।
એવંવિધો બુધો નિત્યં વિશ્વેષુ ચ પ્રશંસિતઃ ।
કાન્તમેવંવિધં કાન્તા શશ્વદિચ્છતિ કામતઃ ॥ ૭૪॥

ત્વયાહમધુના સત્યં વિચારેણ પરાજિતા ।
સ નિન્દિતશ્ચાપ્યશુચિર્યઃ પુમાંશ્ચ સ્ત્રિયા જિતઃ ॥ ૭૫॥

નિન્દન્તિ પિતરો દેવા બાન્ધવાઃ સ્ત્રીજિતં નરમ્ ।
સ્ત્રીજિતં મનસા માતા પિતા ભ્રાતા ચ નિન્દતિ ॥ ૭૬॥

શુધ્ધો વિપ્રો દશાહેન જાતકે મૃતકે યથા ।
ભૂમિપો દ્વાદશાહેન વૈશ્યઃ પઞ્ચદશાહતઃ ॥ ૭૭॥

શૂદ્રો માસેન વેદેષુ માતૃવદ્ધીનસઙ્કરઃ ।
અશુચિઃ સ્ત્રીજિતઃ શુદ્ધ્યેચ્ચિતાદહનકાલતઃ ॥ ૭૮॥

ન ગૃહ્ણન્તીચ્છયા તસ્ય પિતરઃ પિણ્ડતર્પણમ્ ।

ન ગચ્છન્ત્યેવ દેવાશ્ચ તસ્ય પુષ્પજલાદિકમ્ ॥ ૭૯॥

કિં વા જ્ઞાનેન તપસા જપહોમપ્રપૂજનૈઃ ।
કિં વિદ્યયા ચ યશસા સ્ત્રીભિર્યસ્ય મનો હૃતમ્ ॥ ૮૦॥

વિદ્યાપ્રભાવજ્ઞાનાર્થં મયા ત્વં ચ પરીક્ષિતઃ ।
કૃત્વા પરીક્ષાં કાન્તસ્ય વૃણોતિ કામિની વરમ્ ॥ ૮૧॥

વરાય ગુણહીનાય વૃદ્ધાયાજ્ઞાનિને તથા ।
દરિદ્રાય ચ મૂર્ખાય રોગિણે કુત્સિતાય ચ ॥ ૮૨॥

અત્યન્તકોપયુક્તાય વાત્યન્તદુર્મુખાય ચ ।
પઙ્ગવે ચાઙ્ગહીનાય ચાન્ધાય બધિરાય ચ ॥ ૮૩॥

જડાય ચૈવ મૂકાય ક્લીબતુલ્યાય પાપિને ।
બ્રહ્મહત્યાં લભેત્સોઽપિ સ્વકન્યાં પ્રદદાતિ યઃ ॥ ૮૪॥

શાન્તાય ગુણિને ચૈવ યૂને ચ વિદુષેઽપિ ચ ।
સાધવે ચ સુતાં દત્ત્વા દશયજ્ઞફલં લભેત્ ॥ ૮૫॥

યઃ કન્યાપાલનં કૃત્વા કરોતિ યદિ વિક્રયમ્ ।
વિક્રેતા ધનલોભેન કુમ્ભીપાકં સ ગચ્છતિ ॥ ૮૬॥

કન્યામૂત્રં પુરીષં ચ તત્ર ભક્ષતિ પાતકી ।
કૃમિભિર્દંશિતઃ કાકૈર્યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૮૭॥

તદન્તે વ્યાધિસંયુક્તઃ સ લભેજ્જન્મ નિશ્ચિતમ્ ।
વિક્રીણાતિ માંસભારં વહત્યેવ દિવાનિશમ્ ॥ ૮૮॥

ઇત્યેવમુક્ત્વા તુલસી વિરરામ તપોનિધે ।
બ્રહ્મોવાચ ।
કિં કરોષિ શઙ્ખચૂડ સંવાદમનયા સહ ॥ ૮૯॥

ગાન્ધર્વેણ વિવાહેન ત્વં ચાસ્યા ગ્રહણં કુરુ ।
પુરુષેષ્વસિ રત્નં ત્વં સ્ત્રીષુ રત્નં ત્વિયં સતી ॥ ૯૦॥

વિદગ્ધાયા વિદગ્ધેન સઙ્ગમો ગુણવાન્ભવેત્ ।
નિર્વિરોધસુખં રાજન્ કો વા ત્યજતિ દુર્લભમ્ ॥ ૯૧॥

યોઽવિરોધસુખત્યાગી સ પશુર્નાત્ર સંશયઃ ।
કિં પરીક્ષસિ ત્વં કાન્તમીદૃશં ગુણિનં સતિ ॥ ૯૨॥

દેવાનામસુરાણાં ચ દાનવાનાં વિમર્દકમ્ ।
યથા લક્ષ્મીશ્ચ લક્ષ્મીશે યથા કૃષ્ણે ચ રાધિકા ॥ ૯૩॥

યથા મયિ ચ સાવિત્રી ભવાની ચ ભવે યથા ।
યથા ધરા વરાહે ચ દક્ષિણા ચ યથાધ્વરે ॥ ૯૪॥

ધ્યથાત્રેરનસૂયા ચ દમયન્તી યથા નલે ।
રોહિણી ચ યથા ચન્દ્રે યથા કામે રતિઃ સતી ॥ ૯૫॥

યથાદિતિઃ કશ્યપે ચ વસિષ્ઠેઽરુન્ધતી સખી ।
યથાહલ્યા ગૌતમે ચ દેવહૂતિશ્ચ કર્દમે ॥ ૯૬॥

યથા બૃહસ્પતૌ તારા શતરૂપા મનૌ યથા ।
યથા ચ દક્ષિણા યજ્ઞે યથા સ્વાહા હુતાશને ॥ ૯૭॥

યથા શચી મહેન્દ્રે ચ યથા પુષ્ટિર્ગણેશ્વરે ।
દેવસેના યથા સ્કન્દે ધર્મે ભૂર્તિર્યથા સતી ॥ ૯૮॥

સૌભાગ્યા સુપ્રિયા ત્વં ચ શઙ્ખચૂડે તથા ભવ ।
અનેન સાર્ધં સુચિરં સુન્દરેણ ચ સુન્દરિ ॥ ૯૯॥

સ્થાને સ્થાને વિહારં ચ યથેચ્છં કુરુ સન્તતમ્ ।
પશ્ચાત્પ્રાપ્યસિ ગોલોકે શ્રીકૃષ્ણં પુનરેવ ચ ।
ચતુર્ભુજં ચ વૈકુણ્ઠે શઙ્ખચૂડે મૃતે સતિ ॥ ૧૦૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે શઙ્ખચૂડેન સહ
તુલસ્યાઃ સઙ્ગતિવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૯.૧૮॥

## ૯.૧૯ એકોનવિંશોઽધ્યાયઃ । શઙ્ખચૂડેન સહ તુલસીસઙ્ગમવર્ણનમ્ ।

નારદ ઉવાચ ।
વિચિત્રમિદમાખ્યાનં ભવતા સમુદાહૃતમ્ ।
શ્રુતેન યેન મે તૃપ્તિર્ન કદાપિ હિ જાયતે ॥ ૧॥

તતઃ પરં તુ યજ્જાતં તત્ત્વં વદ મહામતે ।
શ્રીનારાયણ ઉવાચ ।

ઇત્યેવમાશિષં દત્ત્વા સ્વાલયં ચ યયૌ વિધિઃ ॥ ૨॥

ગાન્ધર્વેણ વિવાહેન જગૃહે તાં ચ દાનવઃ ।
સ્વર્ગે દુન્દુભિવાદ્યં ચ પુષ્પવૃષ્ટિર્બભૂવ હ ॥ ૩॥

સ રેમે રામયા સાર્ધં વાસગેહે મનોરમે ।
મૂર્ચ્છાં સા પ્રાપ તુલસી નવસઙ્ગમસઙ્ગતા ॥ ૪॥

નિમગ્ના નિર્જલે સાધ્વી સમ્ભોગસુખસાગરે ।
ચતુઃષષ્ટિકલામાનં ચતુઃષષ્ટિવિધં સુખમ્ ॥ ૫॥

કામશાસ્ત્રે યન્નિરુક્તં રસિકાનાં યથેપ્સિતમ્ ।
અઙ્ગપ્રત્યઙ્ગસંશ્લેષપૂર્વકં સ્ત્રીમનોહરમ્ ॥ ૬॥

તત્સર્વં રસશૃઙ્ગારં ચકાર રસિકેશ્વરઃ ।
અતીવ રમ્યદેશે ચ સર્વજન્તુવિવર્જિતે ॥ ૭॥

પુષ્પચન્દનતલ્પે ચ પુષ્પચન્દનવાયુના ।
પુષ્પોદ્યાને નદીતીરે પુષ્પચન્દનચર્ચિતે ॥ ૮॥

ગહીત્વા રસિકો રાસે પુષ્પચન્દનચર્ચિતામ્ ।
ભૂષિતો ભૂષણેનૈવ રત્નભૂષણભૂષિતામ્ ॥ ૯॥

સુરતે વિરતિર્નાસ્તિ તયોઃ સુરતિવિજ્ઞયોઃ ।
જહાર માનસં ભર્તુર્લોલયા લીલયા સતી ॥ ૧૦॥

ચેતનાં રસિકાયાશ્ચ જહાર રસભાવવિત્ ।
વક્ષસશ્ચન્દનં રાજ્ઞાસ્તિલકં વિજહાર સા ॥ ૧૧॥

સ ચ જહાર તસ્યાશ્ચ સિન્દૂરં બિન્દુપત્રકમ્ ।
તદ્વક્ષસ્યુરોજે ચ નખરેખાં દદૌ મુદા ॥ ૧૨॥

સા દદૌ તદ્વામપાર્શ્વે કરભૂષણલક્ષણમ્ ।
રાજા તદોષ્ઠપુટકે દદૌ રદનદંશનમ્ ॥ ૧૩॥

તદ્ગણ્ડયુગલે સા ચ પ્રદદૌ તચ્ચતુર્ગુણમ્ ।
આલિઙ્ગનં ચુમ્બનં ચ જઙ્ઘાદિમર્દનં તથા ॥ ૧૪॥

એવં પરસ્પરં ક્રીડાં ચક્રતુસ્તૌ વિજાનતૌ ।
સુરતે વિરતે તૌ ચ સમુત્થાય પરસ્પરમ્ ॥ ૧૫॥

સુવેષં ચક્રતુસ્તત્ર યદ્યન્મનસિ વાઞ્છિતમ્ ।
ચન્દનૈઃ કુઙ્કુમારક્તૈઃ સા તસ્ય તિલકં દદૌ ॥ ૧૬॥

સર્વાઙ્ગે સુન્દરે રમ્યે ચકાર ચાનુલેપનમ્ ।
સુવાસં ચૈવ તામ્બૂલં વહ્નિશુદ્ધે ચ વાસસી ॥ ૧૭॥

પારિજાતસ્ય કુસુમં જરારોગહરં પરમ્ ।
અમૂલ્યરત્નનિર્માણમઙ્ગુલીયકમુત્તમમ્ ॥ ૧૮॥

સુન્દરં ચ મણિવરં ત્રિષુ લોકેષુ દુર્લભમ્ ।
દાસી તવાહમિત્યેવં સમુચ્ચાર્ય પુનઃ પુનઃ ॥ ૧૯॥

નનામ પરયા ભક્ત્યા સ્વામિનં ગુણશાલિનમ્ ।
સસ્મિતા તન્મુખામ્ભોજં લોચનાભ્યાં પુનઃ પુનઃ ॥ ૨૦॥

નિમેષરહિતાભ્યાં ચાપ્યપશ્યત્કામસુન્દરમ્ ।
સ ચ તાં ચ સમાકૃષ્ય ચકાર વક્ષસિ પ્રિયામ્ ॥ ૨૧॥

સસ્મિતં વાસસાચ્છન્નં દદર્શ મુખપઙ્કજમ્ ।
ચુચુમ્બ કઠિને ગણ્ડે બિમ્બોષ્ઠૌ પુનરેવ ચ ॥ ૨૨॥

દદૌ તસ્યૈ વસ્ત્રયુગ્મં વરુણાદાહૃતં ચ યત્ ।
તદાહૃતાં રત્નમાલાં ત્રિષુ લોકેષુ દુર્લભામ્ ॥ ૨૩॥

દદૌ મઞ્જીરયુગ્મં ચ સ્વાહાયા આહૃતં ચ યત્ ।
કેયૂરયુગ્મં છાયાયા રોહિણ્યાશ્ચૈવ કુણ્ડલમ્ ॥ ૨૪॥

અઙ્ગુલીયકરત્નાનિ રત્યાશ્ચ કરભૂષણમ્ ।
શઙ્ખં ચ રુચિરં ચિત્રં યદ્દત્તં વિશ્વકર્મણા ॥ ૨૫॥

વિચિત્રપદ્મકશ્રેણીં શય્યાં ચાપિ સુદુર્લભામ્ ।
ભૂષણાનિ ચ દત્ત્વા સ ભૂપો હાસં ચકાર હ ॥ ૨૬॥

નિર્મમે કબરીભારે તસ્યા માઙ્ગલ્યભૂષણમ્ ।
સુચિત્રં પત્રકં ગણ્ડમણ્ડલેઽસ્યાઃ સમં તથા ॥ ૨૭॥

ચન્દ્રલેખાત્રિભિર્યુક્તં ચન્દનેન સુગન્ધિના ।
પરીતં પરિતશ્ચિત્રૈઃ સાર્ધં કુઙ્કુમબિન્દુભિઃ ॥ ૨૮॥

જ્વલત્પ્રદીપાકારં ચ સિન્દૂરતિલકં દદૌ ।
તત્પાદપદ્મયુગલે સ્થલપદ્મવિનિન્દિતે ॥ ૨૯॥

ચિત્રાલક્તકરાગં ચ નખરેષુ દદૌ મુદા ।
સ્વવક્ષસિ મુહુર્ન્યસ્ય સરાગં ચરણામ્બુજમ્ ॥ ૩૦॥

હે દેવિ તવ દાસોઽહમિત્યુચ્ચાર્ય પુનઃ પુનઃ ।
રત્નભૂષિતહસ્તેન તાં ચ કૃત્વા સ્વવક્ષસિ ॥ ૩૧॥

તપોવનં પરિત્યજ્ય રાજા સ્થાનાન્તરં યયૌ ।
મલયે દેવનિલયે શૈલે શૈલે તપોવને ॥ ૩૨॥

સ્થાને સ્થાનેઽતિરમ્યે ચ પુષ્પોદ્યાને ચ નિર્જને ।
કન્દરે કન્દરે સિન્ધુતીરે ચૈવાતિસુન્દરે ॥ ૩૩॥

પુષ્પભદ્રાનદીતીરે નીરવાતમનોહરે ।
પુલિને પુલિને દિવ્યે નદ્યાં નદ્યાં નદે નદે ॥ ૩૪॥

મધૌ મધુકરાણાં ચ મધુરધ્વનિનાદિતે ।
વિસ્પન્દને સુરસને નન્દને ગન્ધમાદને ॥ ૩૫॥

દેવોદ્યાને નન્દને ચ ચિત્રચન્દનકાનને ।
ચમ્પકાનાં કેતકીનાં માધવીનાં ચ માધવે ॥ ૩૬॥

કુન્દાનાં માલતીનાં ચ કુમુદામ્ભોજકાનને ।
કલ્પવૃક્ષે કલ્પવૃક્ષે પારિજાતવને વને ॥ ૩૭॥

નિર્જને કાઞ્ચને સ્થાને ધન્યે કાઞ્ચનપર્વતે ।
કાઞ્ચીવને કિઞ્જલકે કઞ્ચુકે કાઞ્ચનાકરે ॥ ૩૮॥

પુષ્પચન્દનતલ્પેષુ પુંસ્કોકિલરુતશ્રુતે ।
પુષ્પચન્દનસંયુક્તઃ પુષ્પચન્દનવાયુના ॥ ૩૯॥

કામુક્યા કામુકઃ કામાત્સ રેમે રામયા સહ ।
ન હિ તૃપ્તો દાનવેન્દ્રસ્તૃપ્તિં નૈવ જગામ સા ॥ ૪૦॥

હવિષા કૃષ્ણવર્ત્મેવ વવૃધે મદનસ્તયોઃ ।
તયા સહ સમાગત્ય સ્વાશ્રમં દાનવસ્તતઃ ॥ ૪૧॥

રમ્યં ક્રીડાલયં ગત્વા વિજહાર પુનઃ પુનઃ ।
એવં સ બુભુજે રાજ્યં શઙ્ખચૂડઃ પ્રતાપવાન્ ॥ ૪૨॥

એકમન્વન્તરં પૂર્ણં રાજરાજેશ્વરો મહાન્ ।

દેવાનામસુરાણાં ચ દાનવાનાં ચ સન્તતમ્ ॥ ૪૩॥

ગન્ધર્વાણાં કિન્નરાણાં રાક્ષસાનાં ચ શાન્તિદઃ ।
હૃતાધિકારા દેવાશ્ચ ચરન્તિ ભિક્ષુકા યથા ॥ ૪૪॥

તે સર્વેઽતિવિષણ્ણાશ્ચ પ્રજગ્મુર્બ્રહ્મણઃ સભામ્ ।
વૃત્તાન્તં કથયામાસૂ રુરુદુશ્ચ ભૃશં મુહુઃ ॥ ૪૫॥

તદા બ્રહ્મા સુરૈઃ સાર્ધં જગામ શઙ્કરાલયમ્ ।
સર્વેશં કથયામાસ વિધાતા ચન્દ્રશેખરમ્ ॥ ૪૬॥

બ્રહ્મા શિવશ્ચ તૈઃ સાર્ધં વૈકુણ્ઠં ચ જગામ હ ।
દુર્લભં પરમં ધામ જરામૃત્યુહરં પરમ્ ॥ ૪૭॥

સમ્પ્રાપ ચ વરં દ્વારમાશ્રમાણાં હરેરહો ।
દદર્શ દ્વારપાલાંશ્ચ રત્નસિંહાસનસ્થિતાન્ ॥ ૪૮॥

શોભિતાન્પીતવસ્ત્રૈશ્ચ રત્નભૂષણભૂષિતાન્ ।
વનમાલાન્વિતાન્સર્વાન્ શ્યામસુન્દરવિગ્રહાન્ ॥ ૪૯॥

શઙ્ખચક્રગદાપદ્મધરાંશ્ચૈવ ચતુર્ભુજાન્ ।
સસ્મિતાન્સ્મેરવક્ત્રાસ્યાન્પદ્મનેત્રાન્મનોહરાન્ ॥ ૫૦॥

બ્રહ્મા તાન્કથયામાસ વૃત્તાન્તં ગમનાર્થકમ્ ।
તેઽનુજ્ઞાં ચ દદુસ્તસ્મૈ પ્રવિવેશ તદાજ્ઞયા ॥ ૫૧॥

એવં ષોડશ દ્વારાણિ નિરીક્ષ્ય કમલોદ્ભવઃ ।
દેવૈઃ સાર્ધં તાનતીત્ય પ્રવિવેશ હરેઃ સભામ્ ॥ ૫૨॥

દેવર્ષિભિઃ પરિવૃતાં પાર્ષદૈશ્ચ ચતુર્ભુજૈઃ ।
નારાયણસ્વરૂપૈશ્ચ સર્વૈઃ કૌસ્તુભભૂષિતૈઃ ॥ ૫૩॥

નવેન્દુમણ્ડલાકારાં ચતુરસ્રાં મનોહરામ્ ।
મણીન્દ્રહારનિર્માણાં હીરાસારસુશોભિતામ્ ॥ ૫૪॥

અમૂલ્યરત્નખચિતાં રચિતાં સ્વેચ્છયા હરેઃ ।
માણિક્યમાલાજાલાભાં મુક્તાપઙ્ક્તિવિભૂષિતામ્ ॥ ૫૫॥

મણ્ડિતાં મણ્ડલાકારૈ રત્નદર્પણકોટિભિઃ ।
વિચિત્રૈશ્ચિત્રરેખાભિર્નાનાચિત્રવિચિત્રિતામ્ ॥ ૫૬॥

પદ્મરાગેન્દ્રરચિતાં રુચિરાં મણિપઙ્કજૈઃ ।
સોપાનશતકૈર્યુક્તાં સ્યમન્તકવિનિર્મિતૈઃ ॥ ૫૭॥

પટ્ટસૂત્રગ્રન્થિયુક્તૈશ્ચારુચન્દનપલ્લવૈઃ ।
ઇન્દ્રનીલસ્તમ્ભવર્યૈર્વેષ્ટિતાં સુમનોહરામ્ ॥ ૫૮॥

સદ્રત્નપૂર્ણકુમ્ભાનાં સમૂહૈશ્ચ સમન્વિતામ્ ।
પારિજાતપ્રસૂનાનાં માલાજાલૈર્વિરાજિતામ્ ॥ ૫૯॥

કસ્તૂરીકુઙ્કુમારક્તૈઃ સુગન્ધિચન્દનદ્રુમૈઃ ।
સુસંસ્કૃતાં તુ સર્વત્ર વાસિતાં ગન્ધવાયુના ॥ ૬૦॥

વિદ્યાધરીસમૂહાનાં નૃત્યજાલૈર્વિરાજિતામ્ ।
સહસ્રયોજનાયામાં પરિપૂર્ણાં ચ કિઙ્કરૈઃ ॥ ૬૧॥

દદર્શ શ્રીહરિં બ્રહ્મા શઙ્કરશ્ચ સુરૈઃ સહ ।
વસન્તં તન્મધ્યદેશે યથેન્દું તારકાવૃતમ્ ॥ ૬૨॥

અમૂલ્યરત્નનિર્માણચિત્રસિંહાસને સ્થિતમ્ ।
કિરીટિનં કુણ્ડલિનં વનમાલાવિભૂષિતમ્ ॥ ૬૩॥

ચન્દનોક્ષિતસર્વાઙ્ગં બિભ્રતં કેલિપઙ્કજમ્ ।
પુરતો નૃત્યગીતં ચ પશ્યન્તં સસ્મિતં મુદા ॥ ૬૪॥

શાન્તં સરસ્વતીકાન્તં લક્ષ્મીધૃતપદામ્બુજમ્ ।
લક્ષ્મ્યા પ્રદત્તં તામ્બૂલં ભુક્તવન્તં સુવાસિતમ્ ॥ ૬૫॥

ગઙ્ગયા પરયા ભક્ત્યા સેવિતં શ્વેતચામરૈઃ ।
સર્વૈશ્ચ સ્તૂયમાનં ચ ભક્તિનમ્રાત્મકન્ધરૈઃ ॥ ૬૬॥

એવં વિશિષ્ટં તં દૃષ્ટ્વા પરિપૂર્ણતમં પ્રભુમ્ ।
બ્રહ્માદયઃ સુરાઃ સર્વે પ્રણમ્ય તુષ્ટુવુસ્તદા ॥ ૬૭॥

પુલકાઞ્ચિતસર્વાઙ્ગાઃ સાશ્રુનેત્રાશ્ચ ગદ્ગદાઃ ।
ભક્તાશ્ચ પરયા ભક્ત્યા ભીતા નમ્રાત્મકન્ધરાઃ ॥ ૬૮॥

કૃતાઞ્જલિપુટો ભૂત્વા વિધાતા જગતામપિ ।
વૃત્તાન્તં કથયામાસ વિનયેન હરેઃ પુરઃ ॥ ૬૯॥

હરિસ્તદ્વચનં શ્રુત્વા સર્વજ્ઞઃ સર્વભાવવિત્ ।
પ્રહસ્યોવાચ બ્રહ્માણં રહસ્યં ચ મનોહરમ્ ॥ ૭૦॥

શ્રીભગવાનુવાચ ।
શઙ્ખચૂડસ્ય વૃત્તાન્તં સર્વં જાનામિ પદ્મજ ।
મદ્ભક્તસ્ય ચ ગોપસ્ય મહાતેજસ્વિનઃ પુરા ॥ ૭૧॥

શ ૃણુ તત્સર્વવૃત્તાન્તમિતિહાસં પુરાતનમ્ ।
ગોલોકસ્યૈવ ચરિતં પાપઘ્નં પુણ્યકારકમ્ ॥ ૭૨॥

સુદામા નામ ગોપશ્ચ પાર્ષદપ્રવરો મમ ।
સ પ્રાપ દાનવીં યોનિં રાધાશાપાત્સુદારુણાત્ ॥ ૭૩॥

તત્રૈકદાહમગમં સ્વાલયાદ્રાસમણ્ડલમ્ ।
વિરજામપિ નીત્વા ચ મમ પ્રાણાધિકા પરા ॥ ૭૪॥

સા માં વિરજયા સાર્ધં વિજ્ઞાય કિઙ્કરીમુખાત્ ।
પશ્ચાત્ક્રુધ્દા સાજગામ ન દદર્શ ચ તત્ર મામ્ ॥ ૭૫॥

વિરજાં ચ નદીરૂપાં માં જ્ઞાત્વા ચ તિરોહિતમ્ ।
પુનર્જગામ સા દૃષ્ટ્વા સ્વાલયં સખિભિઃ સહ ॥ ૭૬॥

માં દૃષ્ટ્વા મન્દિરે દેવી સુદામ્ના સહિતં પુરા ।
ભૃશં સા ભર્ત્સયામાસ મૌનીભૂતં ચ સુસ્થિરમ્ ॥ ૭૭॥

તચ્છ્રુત્વાસહમાનશ્ચ સુદામા તાં ચુકોપ હ ।
સ ચ તાં ભર્ત્સયામાસ કોપેન મમ સન્નિધૌ ॥ ૭૮॥

તચ્છ્રુત્વા કોપયુક્તા સા રક્તપઙ્કજલોચના ।
બહિષ્કર્તું ચકારાજ્ઞાં સન્ત્રસ્તં મમ સંસદિ ॥ ૭૯॥

સખીલક્ષં સમુત્તસ્થૌ દુર્વારં તેજસોલ્બણમ્ ।
બહિશ્ચકાર તં તૂર્ણં જલ્પન્તં ચ પુનઃ પુનઃ ॥ ૮૦॥

સા ચ તત્તાડનં તાસાં શ્રુત્વા રુષ્ટા શશાપ હ ।
યાહિ રે દાનવીં યોનિમિત્યેવં દારુણં વચઃ ॥ ૮૧॥

તં ગચ્છન્તં શપન્તં ચ રુદન્તં માં પ્રણમ્ય ચ ।
વારયામાસ તુષ્ટા સા રુદતી કૃપયા પુનઃ ॥ ૮૨॥

હે વત્સ તિષ્ઠ મા ગચ્છ ક્વ યાસીતિ પુનઃ પુનઃ ।
સમુચ્ચાર્ય ચ તત્પશ્ચાજ્જગામ સા ચ વિક્લવમ્ ॥ ૮૩॥

ગોપ્યશ્ચ રુરુદુઃ સર્વા ગોપાશ્ચાપિ સુદુઃખિતાઃ ।
તે સર્વે રાધિકા ચાપિ તત્પશ્ચાદ્ બોધિતા મયા ॥ ૮૪॥

આયાસ્યતિ ક્ષણાર્ધેન કૃત્વા શાપસ્ય પાલનમ્ ।
સુદામંસ્ત્વમિહાગચ્છેત્યુક્ત્વા સા ચ નિવારિતા ॥ ૮૫॥

ગોલોકસ્ય ક્ષણાર્ધેન ચૈકં મન્વન્તરં ભવેત્ ।
પૃથિવ્યાં જગતાં ધાતરિત્યેવ વચનં ધ્રુવમ્ ॥ ૮૬॥

ઇત્યેવં શઙ્ખચૂડશ્ચ પુનસ્તત્રૈવ યાસ્યતિ ।
મહાબલિષ્ઠો યોગેશઃ સર્વમાયાવિશારદઃ ॥ ૮૭॥

મમ શૂલં ગૃહીત્વા ચ શીઘ્રં ગચ્છત ભારતમ્ ।
શિવઃ કરોતુ સંહારં મમ શૂલેન રક્ષસઃ ॥ ૮૮॥

મમૈવ કવચં કણ્ઠે સર્વમઙ્ગલકારકમ્ ।
બિભર્તિ દાનવઃ શશ્વત્સંસારે વિજયી તતઃ ॥ ૮૯॥

તસ્મિન્ બ્રહ્મન્ સ્થિતે ચૈવ ન કોઽપિ હિંસિતું ક્ષમઃ ।
તદ્યાચનાં કરિષ્યામિ વિપ્રરૂપોઽહમેવ ચ ॥ ૯૦॥

સતીત્વહાનિસ્તત્પત્ન્યા યત્ર કાલે ભવિષ્યતિ ।
તત્રૈવ કાલે તન્મૃત્યુરિતિ દત્તો વરસ્ત્વયા ॥ ૯૧॥

તત્પત્ન્યાશ્ચોદરે વીર્યમર્પયિષ્યામિ નિશ્ચિતમ્ ।
તત્ક્ષણે ચૈવ તન્મૃત્યુર્ભવિષ્યતિ ન સંશયઃ ॥ ૯૨॥

પશ્ચાત્સા દેહમુત્સૃજ્ય ભવિષ્યતિ મમ પ્રિયા ।
ઇત્યુક્ત્વા જગતાં નાથો દદૌ શૂલં હરાય ચ ॥ ૯૩॥

શૂલં દત્ત્વા યયૌ શીઘ્રં હરિરભ્યન્તરે મુદા ।
ભારતં ચ યયુર્દેવા બ્રહ્મરુદ્રપુરોગમાઃ ॥ ૯૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે શઙ્ખચૂડેન સહ
તુલસીસઙ્ગમવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૯.૧૯॥

## ૯.૨૦ વિંશોઽધ્યાયઃ । શઙ્ખચૂડેન સહ દેવાનાં સઙ્ગ્રામોદ્યોગવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
બ્રહ્મા શિવં સન્નિયોજ્ય સંહારે દાનવસ્ય ચ ।
જગામ સ્વાલયં તૂર્ણં યથાસ્થાનં સુરોત્તમાઃ ॥ ૧॥

ચન્દ્રભાગાનદીતીરે વટમૂલે મનોહરે ।
તત્ર તસ્થૌ મહાદેવો દેવવિસ્તારહેતવે ॥ ૨॥

દૂતં કૃત્વા ચિત્રરથં ગન્ધર્વેશ્વરમીપ્સિતમ્ ।
શીઘ્રં પ્રસ્થાપયામાસ શઙ્ખચૂડાન્તિકં મુદા ॥ ૩॥

સર્વેશ્વરાજ્ઞયા શીઘ્રં યયૌ તન્નગરં પરમ્ ।
મહેન્દ્રનગરોત્કૃષ્ટં કુબેરભવનાધિકમ્ ॥ ૪॥

પઞ્ચયોજનવિસ્તીર્ણં દૈર્ઘ્યે તદ્ દ્વિગુણં ભવેત્ ।
સ્ફટિકાકારમણિભિર્નિર્મિતં યાનવેષ્ટિતમ્ ॥ ૫॥

સપ્તભિઃ પરિખાભિશ્ચ દુર્ગમાભિઃ સમન્વિતમ્ ।
જ્વલદગ્નિનિભૈઃ શશ્વત્કલ્પિતં રત્નકોટિભિઃ ॥ ૬॥

યુક્તં ચ વીથીશતકૈર્મણિવેદિવિચિત્રિતૈઃ ।
પરિતો વણિજાં સૌધૈર્નાનાવસ્તુવિરાજિતૈઃ ॥ ૭॥

સિન્દૂરાકારમણિભિર્નિર્મિતૈશ્ચ વિચિત્રિતૈઃ ।
ભૂષિતં ભૂષિતૈર્દિવ્યૈરાશ્રમૈઃ શતકોટિભિઃ ॥ ૮॥

ગત્વા દદર્શ તન્મધ્યે શઙ્ખચૂડાલયં પરમ્ ।
અતીવ વલયાકારં યથા પૂર્ણેન્દુમણ્ડલમ્ ॥ ૯॥

જ્વલદગ્નિશિખાક્તાભિઃ પરિખાભિશ્ચતસૃભિઃ ।
તદ્દુર્ગમં ચ શત્રૂણામન્યેષાં સુગમં સુખમ્ ॥ ૧૦॥

અત્યુચ્ચૈર્ગગનસ્પર્શિમણિશ‍ૃઙ્ગવિરાજિતમ્ ।
રાજિતં દ્વાદશદ્વારૈર્દ્વારપાલસમન્વિતમ્ ॥ ૧૧॥

મણીન્દ્રસારનિર્માણૈઃ શોભિતં લક્ષમન્દિરૈઃ ।
શોભિતં રત્નસોપાનૈ રત્નસ્તમ્ભવિરાજિતમ્ ॥ ૧૨॥

તદ્ દૃષ્ટ્વા પુષ્પદન્તોઽપિ વરં દ્વારં દદર્શ સઃ ।
દ્વારે નિયુક્તં પુરુષં શૂલહસ્તં ચ સસ્મિતમ્ ॥ ૧૩॥

તિષ્ઠન્તં પિઙ્ગલાક્ષં ચ તામ્રવર્ણં ભયઙ્કરમ્ ।
કથયામાસ વૃત્તાન્તં જગામ તદનુજ્ઞયા ॥ ૧૪॥

અતિક્રમ્ય ચ તદ્દ્વારં જગામાભ્યન્તરં પુનઃ ।
ન કોઽપિ રક્ષતિ શ્રુત્વા દૂતરૂપં રણસ્ય ચ ॥ ૧૫॥

ગત્વા સોઽભ્યન્તરદ્વારં દ્વારપાલમુવાચ હ ।
રણસ્ય સર્વવૃત્તાન્તં વિજ્ઞાપયત માચિરમ્ ॥ ૧૬॥

સ ચ તં કથયિત્વા ચ દૂતો ગન્તુમુવાચ હ ।
સ ગત્વા શઙ્ખચૂડં તં દદર્શ સુમનોહરમ્ ॥ ૧૭॥

રાજમણ્ડલમધ્યસ્થં સ્વર્ણસિંહાસને સ્થિતમ્ ।
મણીન્દ્રરચિતં દિવ્યં રત્નદણ્ડસમન્વિતમ્ ॥ ૧૮॥

રત્નકૃત્રિમપુષ્પૈશ્ચ પ્રશસ્તૈઃ શોભિતં સદા ।
ભૃત્યેન મસ્તકન્યસ્તં સ્વર્ણચ્છત્રં મનોહરમ્ ॥ ૧૯॥

સેવિતં પાર્ષદગણૈ રુચિરૈઃ શ્વેતચામરૈઃ ।
સુવેષં સુન્દરં રમ્યં રત્નભૂષણભૂષિતમ્ ॥ ૨૦॥

માલ્યેન લેપનં સૂક્ષ્મં સુવસ્ત્રં દધતં મુને ।
દાનવેન્દ્રૈઃ પરિવૃતં સુવેષૈશ્ચ ત્રિકોટિભિઃ ॥ ૨૧॥

શતકોટિભિરન્યૈશ્ચ ભ્રમદ્ભિરસ્ત્રપાણિભિઃ ।
એવમ્ભૂતઞ્ચ તં દૃષ્ટ્વા પુષ્પદન્તઃ સવિસ્મયઃ ॥ ૨૨॥

ઉવાચ સ ચ વૃત્તાન્તં યદુક્તં શઙ્કરેણ ચ ।
પુષ્પદન્ત ઉવાચ ।
રાજેન્દ્ર શિવભૃત્યોઽહં પુષ્પદન્તાભિધઃ પ્રભો ॥ ૨૩॥

યદુક્તં શઙ્કરેણૈવ તદ્ બ્રવીમિ નિશામય ।
રાજ્યં દેહિ ચ દેવાનામધિકારં ચ સામ્પ્રતમ્ ॥ ૨૪॥

દેવાશ્ચ શરણાપન્ના દેવેશં શ્રીહરિં પરમ્ ।
હરિર્દત્ત્વાસ્ય શૂલં ચ તેન પ્રસ્થાપિતઃ શિવઃ ॥ ૨૫॥

પુષ્પભદ્રાનદીતીરે વટમૂલે ત્રિલોચનઃ ।
વિષયં દેહિ તેષાં ચ યુદ્ધં વા કુરુ નિશ્ચિતમ્ ॥ ૨૬॥

ગત્વા વક્ષ્યામિ કિં શમ્ભુમથ તદ્વદ મામપિ ।
દૂતસ્ય વચનં શ્રુત્વા શઙ્ખચૂડઃ પ્રહસ્ય ચ ॥ ૨૭॥

પ્રભાતેઽહં ગમિષ્યામિ ત્વં ચ ગચ્છેત્યુવાચ હ ।
સ ગત્વોવાચ તં તૂર્ણં વટમૂલસ્થમીશ્વરમ્ ॥ ૨૮॥

શઙ્ખચૂડસ્ય વચનં તદીયં તન્મુખોદિતમ્ ।
એતસ્મિન્નન્તરે સ્કન્દ આજગામ શિવાન્તિકમ્ ॥ ૨૯॥

વીરભદ્રશ્ચ નન્દી ચ મહાકાલઃ સુભદ્રકઃ ।
વિશાલાક્ષશ્ચ બાણશ્ચ પિઙ્ગલાક્ષો વિકમ્પનઃ ॥ ૩૦॥

વિરૂપો વિકૃતિશ્ચૈવ મણિભદ્રશ્ચ બાષ્કલઃ ।
કપિલાખ્યો દીર્ઘદંષ્ટ્રો વિકટસ્તામ્રલોચનઃ ॥ ૩૧॥

કાલકણ્ઠો બલીભદ્રઃ કાલજિહ્વઃ કુટીચરઃ ।
બલોન્મત્તો રણશ્લાઘી દુર્જયો દુર્ગમસ્તથા ॥ ૩૨॥

અષ્ટૌ ચ ભૈરવા રૌદ્રા રુદ્રાશ્ચૈકાદશ સ્મૃતાઃ ।
વસવોઽષ્ટૌ વાસવશ્ચ આદિત્યા દ્વાદશ સ્મૃતાઃ ॥ ૩૩॥

હુતાશનશ્ચ ચન્દ્રશ્ચ વિશ્વકર્માશ્વિનૌ ચ તૌ ।
કુબેરશ્ચ યમશ્ચૈવ જયન્તો નલકૂબરઃ ॥ ૩૪॥

વાયુશ્ચ વરુણશ્ચૈવ બુધશ્ચ મઙ્ગલસ્તથા ।
ધર્મશ્ચ શનિરીશાનઃ કામદેવશ્ચ વીર્યવાન્ ॥ ૩૫॥

ઉગ્રદંષ્ટ્રા ચોગ્રદણ્ડા કોટરા કૈટભી તથા ।
સ્વયં ચાષ્ટભુજા દેવી ભદ્રકાલી ભયઙ્કરી ॥ ૩૬॥

રત્નેન્દ્રસારનિર્માણવિમાનોપરિ સંસ્થિતા ।
રક્તવસ્ત્રપરીધાના રક્તમાલ્યાનુલેપના ॥ ૩૭॥

નૃત્યન્તી ચ હસન્તી ચ ગાયન્તી સુસ્વરં મુદા ।
અભયં દદાતિ ભક્તેભ્યોઽભયા સા ચ ભયં રિપુમ્ ॥ ૩૮॥

બિભ્રતી વિકટાં જિહ્વાં સુલોલાં યોજનાયતામ્ ।
શઙ્ખચક્રગદાપદ્મખડ્ગચર્મધનુઃશરાન્ ॥ ૩૯॥

ખર્પરં વર્તુલાકારં ગમ્ભીરં યોજનાયતમ્ ।
ત્રિશૂલં ગગનસ્પર્શિ શક્તિં ચ યોજનાયતામ્ ॥ ૪૦॥

મુદ્ગરં મુસલં વજ્રં ખેટં ફલકમુજ્જ્વલમ્ ।
વૈષ્ણવાસ્ત્રં વારુણાસ્ત્રં વાહ્નેયં નાગપાશકમ્ ॥ ૪૧॥

નારાયણાસ્ત્રં ગાન્ધર્વં બ્રહ્માસ્ત્રં ગારુડં તથા ।
પર્જન્યાસ્ત્રં પાશુપતં જૃમ્ભણાસ્ત્રં ચ પાર્વતમ્ ॥ ૪૨॥

માહેશ્વરાસ્ત્રં વાયવ્યં દણ્ડં સમ્મોહનં તથા ।
અવ્યર્થમસ્ત્રકં દિવ્યં દિવ્યાસ્ત્રશતકં પરમ્ ॥ ૪૩॥

આગત્ય તત્ર તસ્થૌ ચ યોગિનીનાં ત્રિકોટિભિઃ ।
સાર્ધં ચ ડાકિનીનાં ચ વિકટાનાં ત્રિકોટિભિઃ ॥ ૪૪॥

ભૂતપ્રેતપિશાચાશ્ચ કૂષ્માણ્ડા બ્રહ્મરાક્ષસાઃ ।
વેતાલા રાક્ષસાશ્ચૈવ યક્ષાશ્ચૈવ તુ કિન્નરાઃ ॥ ૪૫॥

તાભિશ્ચૈવ સહ સ્કન્દઃ પ્રણમ્ય ચન્દ્રશેખરમ્ ।
પિતુઃ પાર્શ્વે સહાયાર્થં સમુવાસ તદાજ્ઞયા ॥ ૪૬॥

અથ દૂતે ગતે તત્ર શઙ્ખચૂડઃ પ્રતાપવાન્ ।
ઉવાચ તુલસીં વાર્તાં ગત્વાભ્યન્તરમેવ ચ ॥ ૪૭॥

રણવાર્તાં ચ સા શ્રુત્વા શુષ્કકણ્ઠોષ્ઠતાલુકા ।
ઉવાચ મધુરં સાધ્વી હૃદયેન વિદૂયતા ॥ ૪૮॥

તુલસ્યુવાચ ।
હે પ્રાણબન્ધો હે નાથ તિષ્ઠ મે વક્ષસિ ક્ષણમ્ ।
હે પ્રાણાધિષ્ઠાતૃદેવ રક્ષ મે જીવિતં ક્ષણમ્ ॥ ૪૯॥

ભુઙ્ક્ષ્વ જન્મ સમાસાદ્ય યન્મે મનસિ વાઞ્છિતમ્ ।
પશ્યામિ ત્વાં ક્ષણં કિઞ્ચિલ્લોચનાભ્યાં ચ સાદરમ્ ॥ ૫૦॥

આન્દોલયન્તે પ્રાણા મે મનો દગ્ધં ચ સન્તતમ્ ।
દુઃસ્વપ્નશ્ચ મયા દૃષ્ટશ્ચાદ્યૈવ ચરમે નિશિ ॥ ૫૧॥

તુલસીવચનં શ્રુત્વા ભુક્ત્વા પીત્વા નૃપેશ્વર ।
ઉવાચ વચનં પ્રાજ્ઞો હિતં સત્યં યથોચિતમ્ ॥ ૫૨॥

શઙ્ખચૂડ ઉવાચ ।
કાલેન યોજિતં સર્વં કર્મભોગનિબન્ધનમ્ ।

શુભં હર્ષઃ સુખં દુઃખં ભયં શોકશ્ચ મઙ્ગલમ્ ॥ ૫૩॥

કાલે ભવન્તિ વૃક્ષાશ્ચ સ્કન્ધવન્તશ્ચ કાલતઃ ।
ક્રમેણ પુષ્પવન્તશ્ચ ફલવન્તશ્ચ કાલતઃ ॥ ૫૪॥

તેષાં ફલાનિ પક્વાનિ પ્રભવન્ત્યેવ કાલતઃ ।
તે સર્વે ફલિતાઃ કાલે પાતં યાન્તિ ચ કાલતઃ ॥ ૫૫॥

કાલે ભવન્તિ વિશ્વાનિ કાલે નશ્યન્તિ સુન્દરિ ।
કાલાત્સ્રષ્ટા ચ સૃજતિ પાતા પાતિ ચ કાલતઃ ॥ ૫૬॥

સંહર્તા સંહરેત્કાલે ક્રમેણ સઞ્ચરન્તિ તે ।
બ્રહ્મવિષ્ણુશિવાદીનામીશ્વરઃ પ્રકૃતિઃ પરા ॥ ૫૭॥

સ્રષ્ટા પાતા ચ સંહર્તા સ ચાત્મા કાલનર્તકઃ ।
કાલે સ એવ પ્રકૃતિં સ્વાભિન્નાં સ્વેચ્છયા પ્રભુઃ ॥ ૫૮॥

નિર્માય કૃતવાન્સર્વાન્વિશ્વસ્થાંશ્ચ ચરાચરાન્ ।
સર્વેશઃ સર્વરૂપશ્ચ સર્વાત્મા પરમેશ્વરઃ ॥ ૫૯॥

જનં જનેન જનિતા જનં પાતિ જનેન યઃ ।
જનં જનેન હરતે તં દેવં ભજ સામ્પ્રતમ્ ॥ ૬૦॥

યસ્યાજ્ઞયા વાતિ વાતઃ શીઘ્રગામી ચ સામ્પ્રતમ્ ।
યસ્યાજ્ઞયા ચ તપનસ્તપત્યેવ યથાક્ષણમ્ ॥ ૬૧॥

યથાક્ષણં વર્ષતીન્દ્રો મૃત્યુશ્ચરતિ જન્તુષુ ।
યથાક્ષણં દહત્યગ્નિશ્ચન્દ્રો ભ્રમતિ શીતવાન્ ॥ ૬૨॥

મૃત્યોર્મૃત્યું કાલકાલં યમસ્ય ચ યમં પરમ્ ।
વિભું સ્રષ્ટુશ્ચ સ્રષ્ટારં માતુશ્ચ માતૃકં ભવે ॥ ૬૩॥

સંહર્તારં ચ સંહર્તુસ્તં દેવં શરણં વ્રજ ।
કો વા બન્ધુશ્ચ કેષાં વા સર્વબન્ધું ભજ પ્રિયે ॥ ૬૪॥

અહં કો વા ચ ત્વં કા વા વિધિના યોજિતઃ પુરા ।
ત્વયા સાર્ધં કર્મણા ચ પુનસ્તેન વિયોજિતઃ ॥ ૬૫॥

અજ્ઞાની કાતરઃ શોકે વિપત્તૌ ન ચ પણ્ડિતઃ ।
સુખે દુઃખે ભ્રમત્યેવ કાલનેમિક્રમેણ ચ ॥ ૬૬॥

નારાયણં તં સર્વેશં કાન્તં યાસ્યસિ નિશ્ચિતમ્ ।
તપઃ કૃતં યદર્થં ચ પુરા બદરિકાશ્રમે ॥ ૬૭॥

મયા ત્વં તપસા લબ્ધા બ્રહ્મણસ્તુ વરેણ ચ ।
હર્યર્થે યત્તવ તપો હરિં પ્રાપ્સ્યસિ કામિનિ ॥ ૬૮॥

વૃન્દાવને ચ ગોવિન્દં ગોલોકે ત્વં લભિષ્યસિ ।
અહં યાસ્યામિ તલ્લોકં તનું ત્યક્ત્વા ચ દાનવીમ્ ॥ ૬૯॥

તત્ર દ્રક્ષ્યસિ માં ત્વં ચ દ્રક્ષ્યામિ ત્વાં ચ સામ્પ્રતમ્ ।
અગમં રાધિકાશાપાદ્ભારતં ચ સુદુર્લભમ્ ॥ ૭૦॥

પુનર્યાસ્યામિ તત્રૈવ કઃ શોકો મે શૃણુ પ્રિયે ।
ત્વં ચ દેહં પરિત્યજ્ય દિવ્યરૂપં વિધાય ચ ॥ ૭૧॥

તત્કાલં પ્રાપ્સ્યસિ હરિં મા કાન્તે કાતરા ભવ ।
ઇત્યુક્ત્વા ચ દિનાન્તે ચ તયા સાર્ધં મનોહરમ્ ॥ ૭૨॥

સુષ્વાપ શોભને તલ્પે પુષ્પચન્દનચર્ચિતે ।
નાનાપ્રકારવિભવં ચકાર રત્નમન્દિરે ॥ ૭૩॥

રત્નપ્રદીપસંયુક્તે સ્ત્રીરત્નં પ્રાપ્ય સુન્દરીમ્ ।
નિનાય રજનીં રાજા ક્રીડાકૌતુકમઙ્ગલૈઃ ॥ ૭૪॥

કૃત્વા વક્ષસિ તાં કાન્તાં રુદતીમતિદુઃખિતામ્ ।
કૃશોદરીં નિરાહારાં નિમગ્નાં શોકસાગરે ॥ ૭૫॥

પુનસ્તાં બોધયામાસ દિવ્યજ્ઞાનેન જ્ઞાનવિત્ ।
પુરા કૃષ્ણેન યદ્દત્તં ભાણ્ડીરે તત્ત્વમુત્તમમ્ ॥ ૭૬॥

સ ચ તસ્યૈ દદૌ સર્વં સર્વશોકહરં પરમ્ ।
જ્ઞાનં સમ્પ્રાપ્ય સા દેવી પ્રસન્નવદનેક્ષણા ॥ ૭૭॥

ક્રીડાં ચકાર હર્ષેણ સર્વં મત્વેતિ નશ્વરમ્ ।
તૌ દમ્પતી ચ ક્રીડન્તૌ નિમગ્નૌ સુખસાગરે ॥ ૭૮॥

પુલકાઞ્ચિતસર્વાઙ્ગૌ મૂર્ચ્છિતૌ નિર્જને મુને ।
અઙ્ગપ્રત્યઙ્ગસંયુક્તૌ સુપ્રીતૌ સુરતોત્સુકો ॥ ૭૯॥

એકાઙ્ગૌ ચ તથા તૌ દ્વૌ ચાર્ધનારીશ્વરો યથા ।
પ્રાણેશ્વરં ચ તુલસી મેને પ્રાણાધિકં પરમ્ ॥ ૮૦॥

પ્રાણાધિકાં ચ તાં મેને રાજા પ્રાણેશ્વરીં સતીમ્ ।
તૌ સ્થિતૌ સુખસુપ્તૌ ચ તન્દ્રિતૌ સુન્દરૌ સમૌ ॥ ૮૧॥

સુવેષૌ સુખસમ્ભોગાદચેષ્ટૌ સુમનોહરૌ ।
ક્ષણં સુચેતનૌ તૌ ચ કથયન્તૌ રસાશ્રયાત્ ॥ ૮૨॥

કથાં મનોરમાં દિવ્યાં હસન્તૌ ચ ક્ષણં પુનઃ ।
ક્ષણં ચ કેલિસંયુક્તૌ રસભાવસમન્વિતૌ ॥ ૮૩॥

સુરતે વિરતિર્નાસ્તિ તૌ તદ્વિષયપણ્ડિતૌ ।
સતતં જયયુક્તૌ દ્વૌ ક્ષણં નૈવ પરાજિતૌ ॥ ૮૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે શઙ્ખચૂડેન સહ
દેવાનાં સઙ્ગ્રામોદ્યોગવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૯.૨૦॥

## ૯.૨૧ એકવિંશોઽધ્યાયઃ । શઙ્ખચૂડકૃતે પ્રબોધવાક્યવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
શ્રીકૃષ્ણં મનસા ધ્યાત્વા રક્ષઃ કૃષ્ણપરાયણઃ ।
બ્રાહ્મે મુહૂર્તે ચોત્થાય પુષ્પતલ્પાન્મનોહરાત્ ॥ ૧॥

રાત્રિવાસઃ પરિત્યજ્ય સ્નાત્વા મઙ્ગલવારિણા ।
ધૌતે ચ વાસસી ધૃત્વા કૃત્વા તિલકમુજ્જ્વલમ્ ॥ ૨॥

ચકારાહ્નિકમાવશ્યમભીષ્ટદેવવન્દનમ્ ।
દધ્યાજ્યમધુલાજાંશ્ચ દદર્શ વસ્તુ મઙ્ગલમ્ ॥ ૩॥

રત્નશ્રેષ્ઠં મણિશ્રેષ્ઠં વસ્ત્રશ્રેષ્ઠં ચ કાઞ્ચનમ્ ।
બ્રાહ્મણેભ્યો દદૌ ભક્ત્યા યથા નિત્યં ચ નારદ ॥ ૪॥

અમૂલ્યરત્નં યત્કિઞ્ચિન્મુક્તામાણિક્યહીરકમ્ ।
દદૌ વિપ્રાય ગુરવે યાત્રામઙ્ગલહેતવે ॥ ૫॥

ગજરત્નમશ્વરત્નં ધનરત્નં મનોહરમ્ ।
દદૌ સર્વં દરિદ્રાય વિપ્રાય મઙ્ગલાય ચ ॥ ૬॥

ભાણ્ડારાણાં સહસ્રાણિ નગરાણાં દ્વિલક્ષકમ્ ।

ગ્રામાણાં શતકોટિં ચ બ્રાહ્મણાય દદૌ મુદા ॥ ૭॥

પુત્રં કૃત્વા તુ રાજેન્દ્રં સર્વેષુ દાનવેષુ ચ ।
પુત્રં સમર્પ્ય ભાર્યાં તાં રાજ્યં ચ સર્વસમ્પદમ્ ॥ ૮॥

પ્રજાનુચરસઙ્ઘં ચ ભાણ્ડારં વાહનાદિકમ્ ।
સ્વયં સન્નાહયુક્તશ્ચ ધનુષ્પાણિર્બભૂવ હ ॥ ૯॥

ભૃત્યદ્વારા ક્રમેણૈવ ચકાર સૈન્યસઞ્ચયમ્ ।
અશ્વાનાં ચ ત્રિલક્ષેણ લક્ષેણ વરહસ્તિનામ્ ॥ ૧૦॥

રથાનામયુતેનૈવ ધાનુષ્કાણાં ત્રિકોટિભિઃ ।
ત્રિકોટિભિર્વર્મિણાં ચ શૂલિનાં ચ ત્રિકોટિભિઃ ॥ ૧૧॥

કૃતા સેનાપરિમિતા દાનવેન્દ્રેણ નારદ ।
તસ્યાં સેનાપતિશ્ચૈવ યુદ્ધશાસ્ત્રવિશારદઃ ॥ ૧૨॥

મહારથઃ સ વિજ્ઞેયો રથિનાં પ્રવરો રણે ।
ત્રિલક્ષાક્ષૌહિણીસેનાપતિં કૃત્વા નરાધિપઃ ॥ ૧૩॥

ત્રિંશદક્ષૌહિણીબાધં ભાણ્ડૌઘં ચ ચકાર હ ।
બહિર્બભૂવ શિવિરાન્મનસા શ્રીહરિં સ્મરન્ ॥ ૧૪॥

રત્નેન્દ્રસારનિર્માણવિમાનમારુરોહ સઃ ।
ગુરુવર્ગાન્પુરસ્કૃત્ય પ્રયયૌ શઙ્કરાન્તિકમ્ ॥ ૧૫॥

પુષ્પભદ્રાનદીતીરે યત્રાક્ષયવટઃ શુભઃ ।
સિદ્ધાશ્રમં ચ સિદ્ધાનાં સિદ્ધિક્ષેત્રં ચ નારદ ॥ ૧૬॥

કપિલસ્ય તપઃસ્થાનં પુણ્યક્ષેત્રે ચ ભારતે ।
પશ્ચિમોદધિપૂર્વે ચ મલયસ્ય ચ પશ્ચિમે ॥ ૧૭॥

શ્રીશૈલોત્તરભાગે ચ ગન્ધમાદનદક્ષિણે ।
પઞ્ચયોજનવિસ્તીર્ણા દૈર્ઘ્યે શતગુણા તથા ॥ ૧૮॥

શુદ્ધસ્ફટિકસઙ્કાશા ભારતે ચ સુપુણ્યદા ।
શાશ્વતી જલપૂર્ણા ચ પુષ્પભદ્રા નદી શુભા ॥ ૧૯॥

લવણાબ્ધિપ્રિયા ભાર્યા શશ્વત્સૌભાગ્યસંયુતા ।
શરાવતીમિશ્રિતા ચ નિર્ગતા સા હિમાલયાત્ ॥ ૨૦॥

ગોમતીં વામતઃ કૃત્વા પ્રવિષ્ટા પશ્ચિમોદધૌ ।
તત્ર ગત્વા શઙ્ખચૂડો દદર્શ ચન્દ્રશેખરમ્ ॥ ૨૧॥

વટમૂલે સમાસીનં સૂર્યકોટિસમપ્રભમ્ ।
કૃત્વા યોગાસનં દૃષ્ટ્વા મુદ્રાયુક્તં ચ સસ્મિતમ્ ॥ ૨૨॥

શુદ્ધસ્ફટિકસઙ્કાશં જ્વલન્તં બ્રહ્મતેજસા ।
ત્રિશલપટ્ટિશધરં વ્યાઘ્રચર્મામ્બરં વરમ્ ॥ ૨૩॥

ભક્તમૃત્યુહરં શાન્તં ગૌરીકાન્તં મનોહરમ્ ।
તપસાં ફલદાતારં દાતારં સર્વસમ્પદામ્ ॥ ૨૪॥

આશુતોષં પ્રસન્નાસ્યં ભક્તાનુગ્રહકાતરમ્ ।
વિશ્વનાથં વિશ્વબીજં વિશ્વરૂપં ચ વિશ્વજમ્ ॥ ૨૫॥

વિશ્વમ્ભરં વિશ્વવરં વિશ્વસંહારકારકમ્ ।
કારણં કારણાનાં ચ નરકાર્ણવતારણમ્ ॥ ૨૬॥

જ્ઞાનપ્રદં જ્ઞાનબીજં જ્ઞાનાનન્દં સનાતનમ્ ।
અવરુહ્ય વિમાનાચ્ચ તં દૃષ્ટ્વા દાનવેશ્વરઃ ॥ ૨૭॥

સર્વૈઃ સાર્ધં ભક્તિયુક્તઃ શિરસા પ્રણનામ સઃ ।
વામતો ભદ્રકાલીં ચ સ્કન્દં ચ તત્પુરઃ સ્થિતમ્ ॥ ૨૮॥

આશિષં ચ દદૌ તસ્મૈ કાલી સ્કન્દશ્ચ શઙ્કરઃ ।
ઉત્તસ્થુરાગતં દૃષ્ટ્વા સર્વે નન્દીશ્વરાદયઃ ॥ ૨૯॥

પરસ્પરં ચ ભાષન્તે ચક્રુસ્તત્ર ચ સામ્પ્રતમ્ ।
રાજા કૃત્વા ચ સમ્ભાષામુવાસ શિવસન્નિધૌ ॥ ૩૦॥

પ્રસન્નાત્મા મહાદેવો ભગવાંસ્તમુવાચ હ ।
મહાદેવ ઉવાચ ।
વિધાતા જગતાં બ્રહ્મા પિતા ધર્મસ્ય ધર્મવિત્ ॥ ૩૧॥

મરીચિસ્તસ્ય પુત્રશ્ચ વૈષ્ણવાશ્ચાપિ ધાર્મિકઃ ।
કશ્યપશ્ચાપિ તત્પુત્રો ધર્મિષ્ઠશ્ચ પ્રજાપતિઃ ॥ ૩૨॥

દક્ષઃ પ્રીત્યા દદૌ તસ્મૈ ભક્ત્યા કન્યાસ્ત્રયોદશ ।
તાસ્વેકા ચ દનુઃ સાધ્વી તત્સૌભાગ્યવિવર્ધિતા ॥ ૩૩॥

ચત્વારિંશદ્દનોઃ પુત્રા દાનવાસ્તેજસોલ્બણાઃ ।

તેષ્વેકો વિપ્રચિત્તિશ્ચ મહાબલપરાક્રમઃ ॥ ૩૪॥

તત્પુત્રો ધાર્મિકો દમ્ભો વિષ્ણુભક્તો જિતેન્દ્રિયઃ ।
જજાપ પરમં મન્ત્રં પુષ્કરે લક્ષવત્સરમ્ ॥ ૩૫॥

શુક્રાચાર્યં ગુરું કૃત્વા કૃષ્ણસ્ય પરમાત્મનઃ ।
તદા ત્વાં તનયં પ્રાપ પરં કૃષ્ણપરાયણમ્ ॥ ૩૬॥

પુરા ત્વં પાર્ષદો ગોપો ગોપેષ્વપિ સુધાર્મિકઃ ।
અધુના રાધિકાશાપાદ્ભારતે દાનવેશ્વરઃ ॥ ૩૭॥

આબ્રહ્મસ્તમ્બપર્યન્તં તુચ્છં મેને ચ વૈષ્ણવઃ ।
સાલોક્યસાર્ષ્ટિસાયુજ્યસામીપ્યં ચ હરેરપિ ॥ ૩૮॥

દીયમાનં ન ગૃહ્ણન્તિ વૈષ્ણવાઃ સેવનં વિના ।
બ્રહ્મત્વમમરત્વં વા તુચ્છં મેને ચ વૈષ્ણવઃ ॥ ૩૯॥

ઇન્દ્રત્વં વા મનુત્વં વા ન મેને ગણનાસુ ચ ।
કૃષ્ણભક્તસ્ય તે કિં વા દેવાનાં વિષયે ભ્રમે ॥ ૪૦॥

દેહિ રાજ્યં ચ દેવાનાં મત્પ્રીતિં રક્ષ ભૂમિપ ।
સુખં સ્વરાજ્યે ત્વં તિષ્ઠ દેવાસ્તિષ્ઠન્તુ વૈ પદે ॥ ૪૧॥

અલં ભૂતવિરોધેન સર્વે કશ્યપવંશજાઃ ।
યાનિ કાનિ ચ પાપાનિ બ્રહ્મહત્યાદિકાનિ ચ ॥ ૪૨॥

જ્ઞાતિદ્રોહસ્ય પાપાનિ કલાં નાર્હન્તિ ષોડશીમ્ ।
સ્વસમ્પદાં ચ હાનિં ચ યદિ રાજેન્દ્ર મન્યસે ॥ ૪૩॥

સર્વાવસ્થા ચ સમતાં કેષાં યાતિ ચ સર્વદા ।
બ્રહ્મણશ્ચ તિરોભાવો લયે પ્રાકૃતિકે સદા ॥ ૪૪॥

આવિર્ભાવઃ પુનસ્તસ્ય પ્રભાવાદીશ્વરેચ્છયા ।
જ્ઞાનવૃદ્ધિશ્ચ તપસા સ્મૃતિલોપશ્ચ નિશ્ચિતમ્ ॥ ૪૫॥

કરોતિ સૃષ્ટિં જ્ઞાનેન સ્રષ્ટા સોઽપિ ક્રમેણ ચ ।
પરિપૂર્ણતમો ધર્મઃ સત્યે સત્યાશ્રયે સદા ॥ ૪૬॥

ત્રિભાગઃ સોઽપિ ત્રેતાયાં દ્વિભાગો દ્વાપરે સ્મૃતઃ ।
એકભાગઃ કલૌ પૂર્વં તદંશશ્ચ કમેણ ચ ॥ ૪૭॥

કલામાત્રં કલેઃ શેષે કુહ્વાં ચન્દ્રકલા યથા ।
યાદૃક્ તેજો રવેર્ગ્રીષ્મે ન તાદૃક્ શિશિરે પુનઃ ॥ ૪૮॥

દિનેષુ યાદૃઙ્મધ્યાહ્ને સાયં પ્રાતર્ન તત્સમમ્ ।
ઉદયં યાતિ કાલેન બાલતાં ચ ક્રમેણ ચ ॥ ૪૯॥

પ્રકાણ્ડતાં ચ તત્પશ્ચાત્કાલેઽસ્તં પુનરેતિ સઃ ।
દિને પ્રચ્છન્નતાં યાતિ કાલેન દુર્દિને ઘને ॥ ૫૦॥

રાહુગ્રસ્તે કમ્પિતશ્ચ પુનરેવ પ્રસન્નતામ્ ।
પરિપૂર્ણતમશ્ચન્દ્રઃ પૂર્ણિમાયાં ચ જાયતે ॥ ૫૧॥

તાદૃશો ન ભવેન્નિત્યં ક્ષયં યાતિ દિને દિને ।
પુનશ્ચ પુષ્ટિમાયાતિ પરં કુહ્વા દિને દિને ॥ ૫૨॥

સમ્પદ્યુક્તઃ શુક્લપક્ષે કૃષ્ણે મ્લાનશ્ચ યક્ષ્મણા ।
રાહુગ્રસ્તે દિને મ્લાનો દુર્દિને ન વિરોચતે ॥ ૫૩॥

કાલે ચન્દ્રો ભવેચ્છુક્લો ભ્રષ્ટશ્રીઃ કાલભેદતઃ ।
ભવિષ્યતિ બલિશ્ચેન્દ્રો ભ્રષ્ટશ્રીઃ સુતલેઽધુના ॥ ૫૪॥

કાલેન પૃથ્વી સસ્યાઢ્યા સર્વાધારા વસુન્ધરા ।
કાલે જલે નિમગ્ના સા તિરોભૂતામ્બુવિપ્લુતા ॥ ૫૫॥

કાલે નશ્યન્તિ વિશ્વાનિ પ્રભવન્ત્યેવ કાલતઃ ।
ચરાચરાશ્ચ કાલેન નશ્યન્તિ પ્રભવન્તિ ચ ॥ ૫૬॥

ઈશ્વરસ્યૈવ સમતા બ્રહ્મણઃ પરમાત્મનઃ ।
અહં મૃત્યુઞ્જયો યસ્માદસઙ્ખ્યં પ્રાકૃતં લયમ્ ॥ ૫૭॥

આદર્શં ચાપિ દ્રક્ષ્યામિ વારં વારં પુનઃ પુનઃ ।
સ ચ પ્રકૃતિરૂપશ્ચ સ એવ પુરુષઃ સ્મૃતઃ ॥ ૫૮॥

સ ચાત્મા સ ચ જીવશ્ચ નાનારૂપધરઃ પરઃ ।
કરોતિ સતતં યો હિ તન્નામગુણકીર્તનમ્ ॥ ૫૯॥

કાલે મૃત્યું સ જયતિ જન્મરોગભયં જરામ્ ।
સ્રષ્ટા કૃતો વિધિસ્તેન પાતા વિષ્ણુઃ કૃતો ભવેત્ ॥ ૬૦॥

અહં કૃતશ્ચ સંહર્તા વયં વિષયિણઃ કૃતાઃ ।
કાલાગ્નિરુદ્રં સંહારે નિયોજ્ય વિષયે નૃપ ॥ ૬૧॥

અહં કરોમિ સતતં તન્નામગુણકીર્તનમ્ ।
તેન મૃત્યુઞ્જયોઽહં ચ જ્ઞાનેનાનેન નિર્ભયઃ ॥ ૬૨॥

મૃત્યુર્મૃત્યુભયાદ્યાતિ વૈનતેયાદિવોરગાઃ ।
ઇત્યુક્ત્વા સ ચ સર્વેશઃ સર્વભાવેન તત્પરઃ ॥ ૬૩॥

વિરરામ ચ શમ્ભુશ્ચ સભામધ્યે ચ નારદ ।
રાજા તદ્વચનં શ્રુત્વા પ્રશશંસ પુનઃ પુનઃ ॥ ૬૪॥

ઉવાચ મધુરં દેવં પરં વિનયપૂર્વકમ્ ।
શઙ્ખચૂડ ઉવાચ ।
ત્વયા યત્કથિતં દેવ નાન્યથા વચનં સ્મૃતમ્ ॥ ૬૫॥

તથાપિ કિઞ્ચિદ્યથાર્થં શ્રૂયતાં મન્નિવેદનમ્ ।
જ્ઞાતિદ્રોહે મહત્પાપં ત્વયોક્તમધુના ચ યત્ ॥ ૬૬॥

ગૃહીત્વા તસ્ય સર્વસ્વં કુતઃ પ્રસ્થાપિતો બલિઃ ।
મયા સમુદ્ધૃતં સર્વમૂર્ધ્વમૈશ્વર્યમીશ્વર ॥ ૬૭॥

સુતલાચ્ચ સમુદ્ધર્તું નાલં તત્ર ગદાધરઃ ।
સભ્રાતૃકો હિરણ્યાક્ષઃ કથં દેવૈશ્ચ હિંસિતઃ ॥ ૬૮॥

શુમ્ભાદયશ્ચાસુરાશ્ચ કથં દેવૈર્નિપાતિતાઃ ।
પુરા સમુદ્રમથને પીયૂષં ભક્ષિતં સુરૈઃ ॥ ૬૯॥

ક્લેશભાજો વયં તત્ર તે સર્વે ફલભોગિનઃ ।
ક્રીડાભાણ્ડમિદં વિશ્વં પ્રકૃતેઃ પરમાત્મનઃ ॥ ૭૦॥

યસ્મૈ યત્ર સ દદાતિ તસ્યૈશ્વર્યં ભવેત્તદા ।
દેવદાનવયોર્વાદઃ શશ્વન્નૈમિત્તિકઃ સદા ॥ ૭૧॥

પરાજયો જયસ્તેષાં કાલેઽસ્માકં ક્રમેણ ચ ।
તદાવયોર્વિરોધે વાઽઽગમનં નિષ્ફલં પરમ્ ॥ ૭૨॥

સમસમ્બન્ધિનો બન્ધોરીશ્વરસ્ય મહાત્મનઃ ।
ઇયં તે મહતી લજ્જા યુદ્ધેઽસ્માભિઃ સહાધુના ॥ ૭૩॥

જયે તતોઽધિકા કીર્તિર્હાનિશ્ચૈવ પરાજયે ।
ઇત્યેતદ્વચનં શ્રુત્વા પ્રહસ્ય ચ ત્રિલોચનઃ ॥ ૭૪॥

યથોચિતમુત્તરં તમુવાચ દાનવેશ્વરમ્ ।
મહાદેવ ઉવાચ ।
યુષ્માભિઃ સહ યુદ્ધે મે બ્રહ્મવંશસમુદ્ભવૈઃ ॥ ૭૫॥

કા લજ્જા મહતી રાજન્નકીર્તિર્વા પરાજયે ।
યુદ્ધમાદૌ હરેરેવ મધુના કૈટભેન ચ ॥ ૭૬॥

હિરણ્યકશિપોશ્ચૈવ સહ તેનાત્મના નૃપ ।
હિરણ્યાક્ષસ્ય યુદ્ધં ચ પુનસ્તેન ગદાભૃતા ॥ ૭૭॥

ત્રિપુરૈઃ સહ યુદ્ધં ચ મયાપિ ચ પુરા કૃતમ્ ।
સર્વેશ્વર્યાઃ સર્વમાતુઃ પ્રકૃત્યાશ્ચ બભૂવ હ ॥ ૭૮॥

સહ શુમ્ભાદિભિઃ પૂર્વં સમરઃ પરમાદ્ભુતઃ ।
પાર્ષદપ્રવરસ્ત્વં ચ કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૭૯॥

યે યે હતાશ્ચ દૈતેયા નહિ કેઽપિ ત્વયા સમાઃ ।
કા લજ્જા મહતી રાજન્ મમ યુદ્ધે ત્વયા સહ ॥ ૮૦॥

સુરાણાં શરણસ્યૈવ પ્રેષિતશ્ચ હરેરહો ।
દેહિ રાજ્યં ચ દેવાનામિતિ મે નિશ્ચિતં વચઃ ॥ ૮૧॥

યુદ્ધં વા કુરુ મત્સાર્ધં વાગ્વ્યયે કિં પ્રયોજનમ્ ।
ઇત્યુક્ત્વા શઙ્કરસ્તત્ર વિરરામ ચ નારદ ।
ઉત્તસ્થૌ શઙ્ખચૂડશ્ચ હ્યમાત્યૈઃ સહ સત્વરમ્ ॥ ૮૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે શઙ્ખચૂડકૃતે
પ્રબોધવાક્યવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૯.૨૧॥

## ૯.૨૨ દ્વાવિંશોઽધ્યાયઃ । કાલીશઙ્ખચૂડયુદ્ધવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
શિવં પ્રણમ્ય શિરસા દાનવેન્દ્રઃ પ્રતાપવાન્ ।
સમારુરોહ યાનં ચ સહામાત્યૈઃ સ સત્વરઃ ॥ ૧॥

શિવઃ સ્વસૈન્યં દેવાંશ્ચ પ્રેરયામાસ સત્વરમ્ ।
દાનવેન્દ્રઃ સસૈન્યશ્ચ યુદ્ધારમ્ભે બભૂવ હ ॥ ૨॥

સ્વયં મહેન્દ્રો યુયુધે સાર્ધં ચ વૃષપર્વણા ।
ભાસ્કરો યુયુધે વિપ્રચિત્તિના સહ સત્વરઃ ॥ ૩॥

દમ્ભેન સહ ચન્દ્રશ્ચ ચકાર પરમં રણમ્ ।
કાલસ્વરેણ કાલશ્ચ ગોકર્ણેન હુતાશનઃ ॥ ૪॥

કુબેરઃ કાલકેયેન વિશ્વકર્મા મયેન ચ ।
ભયઙ્કરેણ મૃત્યુશ્ચ સંહારેણ યમસ્તથા ॥ ૫॥

વિકઙ્કણેન વરુણશ્ચઞ્ચલેન સમીરણઃ ।
બુધશ્ચ ઘૃતપૃષ્ઠેન રક્તાક્ષેણ શનૈશ્ચરઃ ॥ ૬॥

જયન્તો રત્નસારેણ વસવો વર્ચસાં ગણૈઃ ।
અશ્વિનૌ ચ દીપ્તિમતા ધૂમ્રેણ નલકૂબરઃ ॥ ૭॥

ધુરન્ધરેણ ધર્મશ્ચ ઉષાક્ષેણ ચ મઙ્ગલઃ ।
શોભાકરેણ વૈ ભાનુઃ પિઠરેણ ચ મન્મથઃ ॥ ૮॥

ગોધામુખેન ચૂર્ણેન ખડ્ગેન ચ ધ્વજેન ચ ।
કાઞ્ચીમુખેન પિણ્ડેન ધૂમેણ સહ નન્દિના ॥ ૯॥

વિશ્વેન ચ પલાશેનાદિત્યાદ્યા યુયુધુઃ પરે ।
એકાદશ ચ રુદ્રા વૈ એકાદશભયઙ્કરૈઃ ॥ ૧૦॥

મહામારી ચ યુયુધે ચોગ્રચણ્ડાદિભિઃ સહ ।
નન્દીશ્વરાદયઃ સર્વે દાનવાનાં ગણૈઃ સહ ॥ ૧૧॥

યુયુધુશ્ચ મહાયુદ્ધે પ્રલયેઽપિ ભયઙ્કરે ।
વટમૂલે ચ શમ્ભુશ્ચ તસ્થૌ કાલ્યા સુતેન ચ ॥ ૧૨॥

સર્વે ચ યુયુધુઃ સૈન્યસમૂહાઃ સતતં મુને ।
રત્નસિંહાસને રમ્યે કોટિભિર્દાનવૈઃ સહ ॥ ૧૩॥

ઉવાસ શઙ્ખચૂડશ્ચ રત્નભૂષણભૂષિતઃ ।
શઙ્કરસ્ય ચ યે યોધા દાનવૈશ્ચ પરાજિતાઃ ॥ ૧૪॥

દેવાશ્ચ દુદ્રુવુઃ સર્વે ભીતાશ્ચ ક્ષતવિગ્રહાઃ ।
ચકાર કોપં સ્કન્દશ્ચ દેવેભ્યશ્ચાભયં દદૌ ॥ ૧૫॥

બલં ચ સ્વર્ગણાનાં ચ વર્ધયામાસ તેજસા ।
સોઽયમેકશ્ચ યુયુધે દાનવાનાં ગણૈઃ સહ ॥ ૧૬॥

અક્ષૌહિણીનાં શતકં સમરે ચ જઘાન સઃ ।
અસુરાન્પાતયામાસ કાલી કમલલોચના ॥ ૧૭॥

પપૌ રક્તં દાનવાનામતિક્રુદ્ધા તતઃ પરમ્ ।
દશલક્ષગજેન્દ્રાણાં શતલક્ષં ચ કોટિશઃ ॥ ૧૮॥

સમાદાયૈકહસ્તેન મુખે ચિક્ષેપ લીલયા ।
કબન્ધાનાં સહસ્રં ચ નનર્ત સમરે મુને ॥ ૧૯॥

સ્કન્દસ્ય શરજાલેન દાનવાઃ ક્ષતવિગ્રહાઃ ।
ભીતાશ્ચ દુદ્રુવુઃ સર્વે મહારણપરાક્રમાઃ ॥ ૨૦॥

વૃષપર્વા વિપ્રચિત્તિર્દમ્ભશ્ચાપિ વિકઙ્કણઃ ।
સ્કન્દેન સાર્ધં યુયુધુસ્તે સર્વે વિક્રમેણ ચ ॥ ૨૧॥

મહામારી ચ યુયુધે ન બભૂવ પરાઙ્મુખી ।
બભૂવુસ્તે ચ સઙ્ક્ષુબ્ધાઃ સ્કન્દસ્ય શક્તિપીડિતાઃ ॥ ૨૨॥

ન દુદ્રુવુર્ભયાત્સ્વર્ગે પુષ્પવૃષ્ટિર્બભૂવ હ ।
સ્કન્દસ્ય સમરં દૃષ્ટ્વા મહારૌદ્રં સમુલ્બણમ્ ॥ ૨૩॥

દાનવાનાં ક્ષયકરં યથા પ્રાકૃતિકો લયઃ ।
રાજા વિમાનમારુહ્ય ચકાર બાણવર્ષણમ્ ॥ ૨૪॥

નૃપસ્ય શરવૃષ્ટિશ્ચ ઘનસ્ય વર્ષણં યથા ।
મહાઘોરાન્ધકારશ્ચ વહ્ન્યુત્થાનં બભૂવ ચ ॥ ૨૫॥

દેવાઃ પ્રદુદ્રુવુઃ સર્વેઽપ્યન્યે નન્દીશ્વરાદયઃ ।
એક એવ કાર્તિકેયસ્તસ્થૌ સમરમૂર્ધનિ ॥ ૨૬॥

પર્વતાનાં ચ સર્પાણાં શિલાનાં શાખિનાં તથા ।
નૃપશ્ચકાર વૃષ્ટિં ચ દુર્વારાં ચ ભયઙ્કરીમ્ ॥ ૨૭॥

નૃપસ્ય શરવૃષ્ટ્યા ચ પ્રહિતઃ શિવનન્દનઃ ।
નીહારેણ ચ સાન્દ્રેણ પ્રહિતો ભાસ્કરો યથા ॥ ૨૮॥

ધનુશ્ચિચ્છેદ સ્કન્દસ્ય દુર્વહં ચ ભયઙ્કરઃ ।
બભઞ્જ ચ રથં દિવ્યં ચિચ્છેદ રથપીઠકાન્ ॥ ૨૯॥

મયૂરં જર્જરીભૂતં દિવ્યાસ્ત્રેણ ચકાર સઃ ।

શક્તિં ચિક્ષેપ સૂર્યાભાં તસ્ય વક્ષસ્ય ઘાતિનીમ્ ॥ ૩૦॥

ક્ષણં મૂર્ચ્છાં ચ સમ્પ્રાપ બભૂવ ચેતનઃ પુનઃ ।
ગૃહીત્વા તદ્ધનુર્દિવ્યં યદ્દત્તં વિષ્ણુના પુરા ॥ ૩૧॥

રત્નેન્દ્રસારનિર્માણયાનમારુહ્ય કાર્તિકઃ ।
શસ્ત્રાસ્ત્રં ચ ગૃહીત્વા ચ ચકાર રણમુલ્બણમ્ ॥ ૩૨॥

સર્પાંશ્ચ પર્વતાંશ્ચૈવ વૃક્ષાંશ્ચ પ્રસ્તરાંસ્તથા ।
સર્વાંશ્ચિચ્છેદ કોપેન દિવ્યાસ્ત્રેણ શિવાત્મજઃ ॥ ૩૩॥

વહ્નિં નિર્વાપયામાસ પાર્જન્યેન પ્રતાપવાન્ ।
રથં ધનુશ્ચ ચિચ્છેદ શઙ્ખચૂડસ્ય લીલયા ॥ ૩૪॥

સન્નાહં સારથિં ચૈવ કિરીટં મુકુટોજ્જ્વલમ્ ।
ચિક્ષેપ શક્તિં શુક્લાભાં દાનવેન્દ્રસ્ય વક્ષસિ ॥ ૩૫॥

મૂર્ચ્છાં સમ્પ્રાપ્ય રાજા ચ ચેતનશ્ચ બભૂવ હ ।
આરુરોહ યાનમન્યદ્ધનુર્જગ્રાહ સત્વરઃ ॥ ૩૬॥

ચકાર શરજાલં ચ માયયા માયિનાં વરઃ ।
ગુહં ચચ્છાદ સમરે શરજાલેન નારદ ॥ ૩૭॥

જગ્રાહ શક્તિમવ્યગ્રાં શતસૂર્યસમપ્રભામ્ ।
પ્રલયાગ્નિશિખારૂપાં વિષ્ણોશ્ચ તેજસાઽઽવૃતામ્ ॥ ૩૮॥

ચિક્ષેપ તાં ચ કોપેન મહાવેગેન કાર્તિકે ।
પપાત શક્તિસ્તદ્ગાત્રે વહ્નિરાશિરિવોજ્જ્વલા ॥ ૩૯॥

મૂર્ચ્છાં સમ્પ્રાપ શક્ત્યા ચ કાર્તિકેયો મહાબલઃ ।
કાલી ગૃહીત્વા તં ક્રોડે નિનાય શિવસન્નિધૌ ॥ ૪૦॥

શિવસ્તં ચાપિ જ્ઞાનેન જીવયામાસ લીલયા ।
દદૌ બલમનન્તં ચ સમુત્તસ્થૌ પ્રતાપવાન્ ॥ ૪૧॥

કાલી જગામ સમરં રક્ષિતું કાર્તિકસ્ય યા ।
વીરાસ્તામનુજગ્મુશ્ચ તે ચ નન્દીશ્વરાદયઃ ॥ ૪૨॥

સર્વે દેવાશ્ચ ગન્ધર્વા યક્ષરાક્ષસકિન્નરાઃ ।
વાદ્યભાણ્ડાશ્ચ બહુશઃ શતશો મધુવાહકાઃ ॥ ૪૩॥

સા ચ ગત્વાથ સઙ્ગ્રામં સિંહનાદં ચકાર ચ ।
દેવ્યાશ્ચ સિંહનાદેન પ્રાપુર્મૂર્ચ્છાં ચ દાનવાઃ ॥ ૪૪॥

અટ્ટાટ્ટહાસમશિવં ચકાર ચ પુનઃ પુનઃ ।
દૃષ્ટ્વા પપૌ ચ માધ્વીકં નનર્ત રણમૂર્ધનિ ॥ ૪૫॥

ઉગ્રદંષ્ટ્રા ચોગ્રદણ્ડા કોટવી ચ પપૌ મધુ ।
યોગિનીડાકિનીનાં ચ ગણાઃ સુરગણાદયઃ ॥ ૪૬॥

દૃષ્ટ્વા કાલીં શઙ્ખચૂડઃ શીઘ્રમાજૌ સમાયયૌ ।
દાનવાશ્ચ ભયં પ્રાપૂ રાજા તેભ્યોઽભયં દદૌ ॥ ૪૭॥

કાલી ચિક્ષેપ વહ્નિં ચ પ્રલયાગ્નિશિખોપમમ્ ।
રાજા નિર્વાપયામાસ પાર્જન્યેન ચ લીલયા ॥ ૪૮॥

ચિક્ષેપ વારુણં સા ચ તીવ્રં ચ મહદદ્ભુતમ્ ।
ગાન્ધર્વેણ ચ ચિચ્છેદ દાનવેન્દ્રશ્ચ લીલયા ॥ ૪૯॥

માહેશ્વરં પ્રચિક્ષેપ કાલી વહ્નિશિખોપમમ્ ।
રાજા જઘાન તં શીઘ્રં વૈષ્ણવેન ચ લીલયા ॥ ૫૦॥

નારાયણાસ્ત્રં સા દેવી ચિક્ષેપ મન્ત્રપૂર્વકમ્ ।
રાજા નનામ તદ્ દૃષ્ટ્વા ચાવરુહ્ય રથાદસૌ ॥ ૫૧॥

ઊર્ધ્વં જગામ તચ્ચાસ્ત્રં પ્રલયાગ્નિશિખોપમમ્ ।
પપાત શઙ્ખચૂડશ્ચ ભક્ત્યા તં દણ્ડવદ્ભુવિ ॥ ૫૨॥

બ્રહ્માસ્ત્રં સા ચ ચિક્ષેપ યત્નતો મન્ત્રપૂર્વકમ્ ।
બ્રહ્માસ્ત્રેણ મહારાજો નિર્વાપં ચ ચકાર સઃ ॥ ૫૩॥

તદા ચિક્ષેપ દિવ્યાસ્ત્રં સા દેવી મન્ત્રપૂર્વકમ્ ।
રાજા દિવ્યાસ્ત્રજાલેન તન્નિર્વાણં ચકાર ચ ॥ ૫૪॥

તદા ચિક્ષેપ શક્તિં ચ યત્નતો યોજનાયતામ્ ।
રાજા દિવ્યાસ્ત્રજાલેન શતખણ્ડાં ચકાર હ ॥ ૫૫॥

જગ્રાહ મન્ત્રપૂતં ચ દેવી પાશુપતં રુષા ।
નિક્ષેપણં નિરોદ્ધું ચ વાગ્બભૂવાશરીરિણી ॥ ૫૬॥

મૃત્યુઃ પાશુપતે નાસ્તિ નૃપસ્ય ચ મહાત્મનઃ ।
યાવદસ્તિ ચ મન્ત્રસ્ય કવચં ચ હરેરિતિ ॥ ૫૭॥

યાવત્સતીત્વમસ્ત્યેવ સત્યાશ્ચ નૃપયોષિતઃ ।
તાવદસ્ય જરામૃત્યુર્નાસ્તીતિ બ્રહ્મણો વચઃ ॥ ૫૮॥

ઇત્યાકર્ણ્ય ભદ્રકાલી ન તચ્ચિક્ષેપ શસ્ત્રકમ્ ।
શતલક્ષં દાનવાનાં જગ્રાસ લીલયા ક્ષુધા ॥ ૫૯॥

ગ્રસ્તું જગામ વેગેન શઙ્ખચૂડં ભયઙ્કરી ।
દિવ્યાસ્ત્રેણ સુતીક્ષ્ણેન વારયામાસ દાનવઃ ॥ ૬૦॥

ખડ્ગં ચિક્ષેપ સા દેવી ગ્રીષ્મસૂર્યોપમં યથા ।
દિવ્યાસ્ત્રેણ દાનવેન્દ્રઃ શતખણ્ડં ચકાર સઃ ॥ ૬૧॥

પુનર્ગ્રસ્તું મહાદેવી વેગેન ચ જગામ તમ્ ।
સર્વસિદ્ધેશ્વરઃ શ્રીમાન્વવૃધે દાનવેશ્વરઃ ॥ ૬૨॥

વેગેન મુષ્ટિના કાલી કોપયુક્તા ભયઙ્કરી ।
બભઞ્જ ચ રથં તસ્ય જઘાન સારથિં સતી ॥ ૬૩॥

સા ચ શૂલં પ્રચિક્ષેપ પ્રલયાગ્નિશિખોપમમ્ ।
વામહસ્તેન જગ્રાહ શઙ્ખચૂડઃ સ્વલીલયા ॥ ૬૪॥

મુષ્ટ્યા જઘાન તં દેવી મહાકોપેન વેગતઃ ।
બભ્રામ ચ તયા દૈત્યઃ ક્ષણં મૂર્ચ્છામવાપ ચ ॥ ૬૫॥

ક્ષણેન ચેતનાં પ્રાપ્ય સમુત્તસ્થૌ પ્રતાપવાન્ ।
ન ચકાર બાહુયુદ્ધં દેવ્યા સહ નનામ તામ્ ॥ ૬૬॥

દેવ્યાશ્ચાસ્ત્રં સ ચિચ્છેદ જગ્રાહ ચ સ્વતેજસા ।
નાસ્ત્રં ચિક્ષેપ તાં ભક્તો માતૃભક્ત્યા તુ વૈષ્ણવઃ ॥ ૬૭॥

ગૃહીત્વા દાનવં દેવી ભ્રામયિત્વા પુનઃ પુનઃ ।
ઊર્ધ્વં ચ પ્રાપયામાસ મહાવેગેન કોપિતા ॥ ૬૮॥

ઊર્ધ્વાત્પપાત વેગેન શઙ્ખચૂડઃ પ્રતાપવાન્ ।
નિપત્ય ચ સમુત્તસ્થૌ પ્રણમ્ય ભદ્રકાલિકામ્ ॥ ૬૯॥

રત્નેન્દ્રસારનિર્માણં વિમાનં સુમનોહરમ્ ।
આરુરોહ હર્ષયુક્તો ન વિશ્રાન્તો મહારણે ॥ ૭૦॥

દાનવાનાં ચ ક્ષતજં સા દેવી ચ પપૌ ક્ષુધા ।

પીત્વા ભુક્ત્વા ભદ્રકાલી જગામ શઙ્કરાન્તિકમ્ ॥ ૭૧॥

ઉવાચ રણવૃત્તાન્તં પૌર્વાપર્યં યથાક્રમમ્ ।
શ્રુત્વા જહાસ શમ્ભુશ્ચ દાનવાનાં વિનાશનમ્ ॥ ૭૨॥

લક્ષં ચ દાનવેન્દ્રાણામવશિષ્ટં રણેઽધુના ।
ભુઞ્જન્ત્યા નિર્ગતં વક્ત્રાત્તદન્યં ભુક્તમીશ્વર ॥ ૭૩॥

સઙ્ગ્રામે દાનવેન્દ્રં ચ હન્તું પાશુપતેન વૈ ।
અવધ્યસ્તવ રાજેતિ વાગ્બભૂવાશરીરિણી ॥ ૭૪॥

રાજેન્દ્રશ્ચ મહાજ્ઞાની મહાબલપરાક્રમઃ ।
ન ચ ચિક્ષેપ મય્યસ્ત્રં ચિચ્છેદ મમ સાયકમ્ ॥ ૭૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસવાદે
કાલીશઙ્ખચૂડયુદ્ધવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૯.૨૨॥

## ૯.૨૩ ત્રયોવિંશોઽધ્યાયઃ । શઙ્ખચૂડવધવર્ણનમ્ ।

શિવસ્તત્ત્વં સમાકર્ણ્ય તત્ત્વજ્ઞાનવિશારદઃ ।
યયૌ સ્વયં ચ સમરે સ્વગણૈઃ સહ નારદ ॥ ૧॥

શઙ્ખચૂડઃ શિવં દૃષ્ટ્વા વિમાનાદવરુહ્ય ચ ।
નનામ પરયા ભક્ત્યા શિરસા દણ્ડવદ્ભુવિ ॥ ૨॥

તં પ્રણમ્ય ચ વેગેન વિમાનમારુરોહ સઃ ।
તૂર્ણં ચકાર સન્નાહં ધનુર્જગ્રાહ દુર્વહમ્ ॥ ૩॥

શિવદાનવયોર્યુદ્ધં પૂર્ણમબ્દશતં પુરા ।
ન બભૂવતુરન્યોન્યં બ્રહ્મઞ્જયપરાજયૌ ॥ ૪॥

ન્યસ્તશસ્ત્રશ્ચ ભગવાન્ ન્યસ્તશસ્ત્રશ્ચ દાનવઃ ।
રથસ્થઃ શઙ્ખચૂડશ્ચ વૃષસ્થો વૃષભધ્વજઃ ॥ ૫॥

દાનવાનાં ચ શતકમુદ્ધૃતં ચ બભૂવ હ ।
રણે યે યે મૃતાઃ શમ્ભુર્જીવયામાસ તાન્વિભુઃ ॥ ૬॥

એતસ્મિન્નન્તરે વૃદ્ધબ્રાહ્મણઃ પરમાતુરઃ ।
આગત્ય ચ રણસ્થાનમુવાચ દાનવેશ્વરમ્ ॥ ૭॥

વૃદ્ધબ્રાહ્મણ ઉવાચ ।
દેહિ ભિક્ષાં ચ રાજેન્દ્ર મહ્યં વિપ્રાય સામ્પ્રતમ્ ।
ત્વં સર્વસમ્પદાં દાતા યન્મે મનસિ વાઞ્છિતમ્ ॥ ૮॥

નિરીહાય ચ વૃદ્ધાય તૃષિતાય ચ સામ્પ્રતમ્ ।
પશ્ચાત્ત્વાં કથયિષ્યામિ પુરઃ સત્યં ચ કુર્વિતિ ॥ ૯॥

ઓમિત્યુવાચ રાજેન્દ્રઃ પ્રસન્નવદનેક્ષણઃ ।
કવચાર્થી જનશ્ચાહમિત્યુવાચાતિમાયયા ॥ ૧૦॥

તચ્છ્રુત્વા કવચં દિવ્યં જગ્રાહ હરિરેવ ચ ।
શઙ્ખચૂડસ્ય રૂપેણ જગામ તુલસીં પ્રતિ ॥ ૧૧॥

ગત્વા તસ્યાં માયયા ચ વીર્યાધાનં ચકાર હ ।
અથ શમ્ભુર્હરેઃ શૂલં જગ્રાહ દાનવં પ્રતિ ॥ ૧૨॥

ગ્રીષ્મમધ્યાહ્નમાર્તણ્ડપ્રલયાગ્નિશિખોપમમ્ ।
દુર્નિવાર્યં ચ દુર્ધર્ષમવ્યર્થં વૈરિઘાતકમ્ ॥ ૧૩॥

તેજસા ચક્રતુલ્યં ચ સર્વશસ્ત્રાસ્ત્રસારકમ્ ।
શિવકેશવયોરન્યૈર્દુર્વહં ચ ભયઙ્કરમ્ ॥ ૧૪॥

ધનુઃસહસ્રં દૈર્ઘ્યેણ પ્રસ્થેન શતહસ્તકમ્ ।
સજીવં બ્રહ્મરૂપં ચ નિત્યરૂપમનિર્દિશમ્ ॥ ૧૫॥

સંહર્તું સર્વબ્રહ્માણ્ડમલં યત્સ્વીયલીલયા ।
ચિક્ષેપ તોલનં કૃત્વા શઙ્ખચૂડે ચ નારદ ॥ ૧૬॥

રાજા ચાપં પરિત્યજ્ય શ્રીકૃષ્ણચરણામ્બુજમ્ ।
ધ્યાનં ચકાર ભક્ત્યા ચ કૃત્વા યોગાસનં ધિયા ॥ ૧૭॥

શૂલં ચ ભ્રમણં કૃત્વા પપાત દાનવોપરિ ।
ચકાર ભસ્મસાત્તં ચ સરથં ચાથ લીલયા ॥ ૧૮॥

રાજા ધૃત્વા દિવ્યરૂપં કિશોરં ગોપવેષકમ્ ।
દ્વિભુજં મુરલીહસ્તં રત્નભૂષણભૂષિતમ્ ॥ ૧૯॥

રત્નેન્દ્રસારનિર્માણં વેષ્ટિતં ગોપકોટિભિઃ ।
ગોલોકાદાગતં યાનમારુરોહ પુરં યયૌ ॥ ૨૦॥

ગત્વા નનામ શિરસા સ રાધાકૃષ્ણયોર્મુને ।
ભક્ત્યા ચ ચરણામ્ભોજં રાસે વૃન્દાવને વને ॥ ૨૧॥

સુદામાનં ચ તૌ દૃષ્ટ્વા પ્રસન્નવદનેક્ષણૌ ।
ક્રોડે ચક્રતુરત્યન્તં પ્રેમ્ણાતિપરિસંયુતૌ ॥ ૨૨॥

અથ શલં ચ વેગેન પ્રયયૌ તં ચ સાદરમ્ ।
અસ્થિભિઃ શઙ્ખચૂડસ્ય શઙ્ખજાતિર્બભૂવ હ ॥ ૨૩॥

નાનાપ્રકારરૂપેણ શશ્વત્પૂતા સુરાર્ચને ।
પ્રશસ્તં શઙ્ખતોયં ચ દેવાનાં પ્રીતિદં પરમ્ ॥ ૨૪॥

તીર્થતોયસ્વરૂપં ચ પવિત્રં શમ્ભુના વિના ।
શઙ્ખશબ્દો ભવેદ્યત્ર તત્ર લક્ષ્મીઃ સુસંસ્થિરા ॥ ૨૫॥

સ સ્નાતઃ સર્વતીર્થેષુ યઃ સ્નાતઃ શઙ્ખવારિણા ।
શઙ્ખો હરેરધિષ્ઠાનં યત્ર શઙ્ખસ્તતો હરિઃ ॥ ૨૬॥

તત્રૈવ વસતે લક્ષ્મીર્દૂરીભૂતમમઙ્ગલમ્ ।
સ્ત્રીણાં ચ શઙ્ખધ્વનિભિઃ શૂદ્રાણાં ચ વિશેષતઃ ॥ ૨૭॥

ભીતા રુષ્ટા યાતિ લક્ષ્મીસ્તત્સ્થલાદન્યદેશતઃ ।
શિવોઽપિ દાનવં હત્વા શિવલોકં જગામ હ ॥ ૨૮॥

પ્રહૃષ્ટો વૃષભારૂઢઃ સ્વગણૈશ્ચ સમાવૃતઃ ।
સુરાઃ સ્વવિષયં પ્રાપુઃ પરમાનન્દસંયુતાઃ ॥ ૨૯॥

નેદુર્દુન્દુભયઃ સ્વર્ગે જગુર્ગન્ધર્વકિન્નરાઃ ।
બભૂવ પુષ્પવૃષ્ટિશ્ચ શિવસ્યોપરિ સન્તતમ્ ।
પ્રશશંસુઃ સુરાસ્તં ચ મુનીન્દ્રપ્રવરાદયઃ ॥ ૩૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
શઙ્ખચૂડવધવર્ણનં નામ ત્રયોવિશોઽધ્યાયઃ ॥ ૯.૨૩॥

## ૯.૨૪ ચતુર્વિંશોઽધ્યાયઃ । તુલસીમાહાત્મ્યેન સહ શાલગ્રામમહત્ત્વવર્ણનમ્ ।

નારદ ઉવાચ ।
નારાયણશ્ચ ભગવાન્વીર્યાધાનં ચકાર હ ।

તુલસ્યાં કેન રૂપેણ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
નારાયણશ્ચ ભગવાન્દેવાનાં સાધનેષુ ચ ।
શઙ્ખચૂડસ્ય કવચં ગહીત્વા વિષ્ણુમાયયા ॥ ૨॥

પુનર્વિધાય તદ્રૂપં જગામ તત્સતીગૃહમ્ ।
પાતિવ્રતસ્ય નાશેન શઙ્ખચૂડજિઘાંસયા ॥ ૩॥

દુન્દુભિં વાદયામાસ તુલસીદ્વારસન્નિધૌ ।
જયશબ્દં ચ તદ્દ્વારે બોધયામાસ સુન્દરીમ્ ॥ ૪॥

તચ્છ્રુત્વા ચ રવં સાધ્વી પરમાનન્દસંયુતા ।
રાજમાર્ગે ગવાક્ષેણ દદર્શ પરમાદરાત્ ॥ ૫॥

બ્રાહ્મણેભ્યો ધનં દત્ત્વા કારયામાસ મઙ્ગલમ્ ।
વન્દિભ્યો ભિક્ષુકેભ્યશ્ચ વાચિભ્યશ્ચ ધનં દદૌ ॥ ૬॥

અવરુહ્ય રથાદ્દેવો દેવ્યાશ્ચ ભવનં યયૌ ।
અમૂલ્યરત્નનિર્માણં સુન્દરં સુમનોહરમ્ ॥ ૭॥

દૃષ્ટ્વા ચ પુરતઃ કાન્તં સા તં કાન્તં મુદાન્વિતા ।
તત્પાદં ક્ષાલયામાસ નનામ ચ રુરોદ ચ ॥ ૮॥

રત્નસિંહાસને રમ્યે વાસયામાસ કામુકી ।
તામ્બૂલં ચ દદૌ તસ્મૈ કર્પૂરાદિસુવાસિતમ્ ॥ ૯॥

અદ્ય મે સફલં જન્મ જીવનં ચ બભૂવ હ ।
રણે ગતં ચ પ્રાણેશં પશ્યન્ત્યાશ્ચ પુનર્ગૃહે ॥ ૧૦॥

સસ્મિતા સકટાક્ષં ચ સકામા પુલકાઙ્કિતા ।
પપ્રચ્છ રણવૃત્તાન્તં કાન્તં મધુરયા ગિરા ॥ ૧૧॥

તુલસ્યુવાચ ।
અસઙ્ખ્યવિશ્વસંહર્ત્રા સાર્ધમાજૌ તવ પ્રભો ।
કથં બભૂવ વિજયસ્તન્મે બ્રૂહિ કૃપાનિધે ॥ ૧૨॥

તુલસીવચનં શ્રુત્વા પ્રહસ્ય કમલાપતિઃ ।
શઙ્ખચૂડસ્ય રૂપેણ તામુવાચામૃતં વચઃ ॥ ૧૩॥

શ્રીભગવાનુવાચ ।

આવયોઃ સમરઃ કાન્તે પૂર્ણમબ્દં બભૂવ હ ।
નાશો બભૂવ સર્વેષાં દાનવાનાં ચ કામિનિ ॥ ૧૪॥

પ્રીતિઞ્ચ કારયામાસ બ્રહ્મા ચ સ્વયમાવયોઃ ।
દેવાનામધિકારશ્ચ પ્રદત્તસ્તસ્ય ચાજ્ઞયા ॥ ૧૫॥

મયાગતં સ્વભવનં શિવલોકં શિવો ગતઃ ।
ઇત્યુક્ત્વા જગતાં નાથઃ શયનં ચ ચકાર હ ॥ ૧૬॥

રેમે રમાપતિસ્તત્ર રામયા સહ નારદ ।
સા સાધ્વી સુખસમ્ભોગાદાકર્ષણવ્યતિક્રમાત્ ॥ ૧૭॥

સર્વં વિતર્કયામાસ કસ્ત્વમેવેત્યુવાચ સા ।
તુલસ્યુવાચ ।
કો વા ત્વં વદ માયેશ ભુક્તાહં માયયા ત્વયા ॥ ૧૮॥

દૂરીકૃતં મત્સતીત્વં યદતસ્ત્વાં શપામિ હે ।
તુલસીવચનં શ્રુત્વા હરિઃ શાપભયેન ચ ॥ ૧૯॥

દધાર લીલયા બ્રહ્મન્ સુમૂર્તિં સુમનોહરામ્ ।
દદર્શ પુરતો દેવી દેવદેવં સનાતનમ્ ॥ ૨૦॥

નવીનનીરદશ્યામં શરત્પઙ્કજલોચનમ્ ।
કોટિકન્દર્પલીલાભં રત્નભૂષણભૂષિતમ્ ॥ ૨૧॥

ઈષદ્ધાસ્યં પ્રસન્નાસ્યં શોભિતં પીતવાસસમ્ ।
તં દૃષ્ટ્વા કામિની કામં મૂર્ચ્છાં સમ્પ્રાપ લીલયા ॥ ૨૨॥

પુનશ્ચ ચેતનાં પ્રાપ્ય પુનઃ સા તમુવાચ હ ।
તુલસ્યુવાચ ।
હે નાથ તે દયા નાસ્તિ પાષાણસદૃશસ્ય ચ ॥ ૨૩॥

છલેન ધર્મભઙ્ગેન મમ સ્વામી ત્વયા હતઃ ।
પાષાણહૃદયસ્ત્વં હિ દયાહીનો યતઃ પ્રભો ॥ ૨૪॥

તસ્માત્પાષાણરૂપસ્ત્વં ભવે દેવ ભવાધુના ।
યે વદન્તિ ચ સાધું ત્વાં તે ભ્રાન્તા હિ ન સંશયઃ ॥ ૨૫॥

ભક્તો વિનાપરાધેન પરાર્થે ચ કથં હતઃ ।
ભૃશં રુરોદ શોકાર્તા વિલલાપ મુહુર્મુહુઃ ॥ ૨૬॥

તતશ્ચ કરુણાં દૃષ્ટ્વા કરુણારસસાગરઃ ।
નયેન તાં બોધયિતુમુવાચ કમલાપતિઃ ॥ ૨૭॥

શ્રીભગવાનુવાચ ।
તપસ્ત્વયા કૃતં ભદ્રે મદર્થે ભારતે ચિરમ્ ।
ત્વદર્થે શઙ્ખચૂડશ્ચ ચકાર સુચિરં તપઃ ॥ ૨૮॥

કૃત્વા ત્વાં કામિનીં સોઽપિ વિજહાર ચ તત્ક્ષણાત્ ।
અધુના દાતુમુચિતં તવૈવ તપસઃ ફલમ્ ॥ ૨૯॥

ઇદં શરીરં ત્યક્ત્વા ચ દિવ્યદેહં વિધાય ચ ।
રામે રમ મયા સાર્ધં ત્વં રમાસદૃશી ભવ ॥ ૩૦॥

ઇયં તનુર્નદીરૂપા ગણ્ડકીતિ ચ વિશ્રુતા ।
પૂતા સુપુણ્યદા નૃણાં પુણ્યે ભવતુ ભારતે ॥ ૩૧॥

તવ કેશસમૂહશ્ચ પુણ્યવૃક્ષો ભવિષ્યતિ ।
તુલસીકેશસમ્ભૂતા તુલસીતિ ચ વિશ્રુતા ॥ ૩૨॥

ત્રિષુ લોકેષુ પુષ્પાણાં પત્રાણાં દેવપૂજને ।
પ્રધાનરૂપા તુલસી ભવિષ્યતિ વરાનને ॥ ૩૩॥

સ્વર્ગે મર્ત્યે ચ પાતાલે ગોલોકે મમ સન્નિધૌ ।
ભવ ત્વં તુલસી વૃક્ષવરા પુષ્પેષુ સુન્દરી ॥ ૩૪॥

ગોલોકે વિરજાતીરે રાસે વૃન્દાવને વને ।
ભાણ્ડીરે ચમ્પકવને રમ્યે ચન્દનકાનને ॥ ૩૫॥

માધવીકેતકીકુન્દમાલિકામાલતીવને ।
વાસસ્તેઽત્રૈવ ભવતુ પુણ્યસ્થાનેષુ પુણ્યદઃ ॥ ૩૬॥

તુલસીતરુમૂલેષુ પુણ્યદેશેષુ પુણ્યદમ્ ।
અધિષ્ઠાનં ચ તીર્થાનાં સર્વેષાં ચ ભવિષ્યતિ ॥ ૩૭॥

તત્રૈવ સર્વદેવાનાં મમાધિષ્ઠાનમેવ ચ ।
તુલસીપત્રપતનપ્રાપ્તયે ચ વરાનને ॥ ૩૮॥

સ સ્નાતઃ સર્વતીર્થેષુ સર્વયજ્ઞેષુ દીક્ષિતઃ ।
તુલસીપત્રતોયેન યોઽભિષેકં સમાચરેત્ ॥ ૩૯॥

સુધાઘટસહસ્રાણાં યા તુષ્ટિસ્તુ ભવેદ્ધરેઃ ।

સા ચ તુષ્ટિર્ભવેન્નૂનં તુલસીપત્રદાનતઃ ॥ ૪૦॥

ગવામયુતદાનેન યત્ફલં તત્ફલં ભવેત્ ।
તુલસીપત્રદાનેન તત્ફલં કાર્તિકે સતિ ॥ ૪૧॥

તુલસીપત્રતોયં ચ મૃત્યુકાલે ચ યો લભેત્ ।
મુચ્યતે સર્વપાપેભ્યો વિષ્ણુલોકે મહીયતે ॥ ૪૨॥

નિત્યં યસ્તુલસીતોયં ભુઙ્ક્તે ભક્ત્યા ચ માનવઃ ।
લક્ષાશ્વમેધજં પુણ્યં સમ્પ્રાપ્નોતિ સ માનવઃ ॥ ૪૩॥

તુલસીં સ્વકરે કૃત્વા ધૃત્વા દેહે ચ માનવઃ ।
પ્રાણાંસ્ત્યજતિ તીર્થેષુ વિષ્ણુલોકં સ ગચ્છતિ ॥ ૪૪॥

તુલસીકાષ્ઠનિર્માણમાલાં ગૃહ્ણાતિ યો નરઃ ।
પદે પદેઽશ્વમેધસ્ય લભતે નિશ્ચિતં ફલમ્ ॥ ૪૫॥

તુલસીં સ્વકરે કૃત્વા સ્વીકારં યો ન રક્ષતિ ।
સ યાતિ કાલસૂત્રં ચ યાવચ્ચન્દ્રદિવાકરૌ ॥ ૪૬॥

કરોતિ મિથ્યાશપથં તુલસ્યા યોઽત્ર માનવઃ ।
સ યાતિ કુમ્ભીપાકં ચ યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૪૭॥

તુલસીતોયકણિકાં મૃત્યુકાલે ચ યો લભેત્ ।
રત્નયાનં સમારુહ્ય વૈકુણ્ઠે પ્રાપ્યતે ધ્રુવમ્ ॥ ૪૮॥

પૂર્ણિમાયામમાયાં ચ દ્વાદશ્યાં રવિસઙ્ક્રમે ।
તૈલાભ્યઙ્ગં ચ કૃત્વા ચ મધ્યાહ્ને નિશિ સન્ધ્યયોઃ ॥ ૪૯॥

અશૌચેઽશુચિકાલે યે રાત્રિવાસોઽન્વિતા નરાઃ ।
તુલસીં યે વિચિન્વન્તિ તે છિન્દન્તિ હરેઃ શિરઃ ॥ ૫૦॥

ત્રિરાત્રં તુલસીપત્રં શુદ્ધં પર્યુષિતં સતિ ।
શ્રાદ્ધે વ્રતે ચ દાને ચ પ્રતિષ્ઠાયાં સુરાર્ચને ॥ ૫૧॥

ભૂગતં તોયપતિતં યદ્દત્તં વિષ્ણવે સતિ ।
શુદ્ધં ચ તુલસીપત્રં ક્ષાલનાદન્યકર્મણિ ॥ ૫૨॥

વૃક્ષાધિષ્ઠાતૃદેવી યા ગોલોકે ચ નિરામયે ।
કૃષ્ણેન સાર્ધં નિત્યં ચ નિત્યક્રીડાં કરિષ્યસિ ॥ ૫૩॥

નદ્યધિષ્ઠાતૃદેવી યા ભારતે ચ સુપુણ્યદા ।
લવણોદસ્ય સા પત્ની મદંશસ્ય ભવિષ્યતિ ॥ ૫૪॥

ત્વં ચ સ્વયં મહાસાધ્વી વૈકુણ્ઠે મમ સન્નિધૌ ।
રમાસમા ચ રામા ચ ભવિષ્યસિ ન સંશયઃ ॥ ૫૫॥

અહં ચ શૈલરૂપેણ ગણ્ડકીતીરસન્નિધૌ ।
અધિષ્ઠાનં કરિષ્યામિ ભારતે તવ શાપતઃ ॥ ૫૬॥

કોટિસઙ્ખ્યાસ્તત્ર કીટાસ્તીક્ષ્ણદંષ્ટ્રાવરાયુધૈઃ ।
તચ્છિલાકુહરે ચક્રં કરિષ્યન્તિ મદીયકમ્ ॥ ૫૭॥

એકદ્વારં ચતુશ્ચક્રં વનમાલાવિભૂષિતમ્ ।
નવીનનીરદાકારં લક્ષ્મીનારાયણાભિધમ્ ॥ ૫૮॥

એકદ્વારં ચતુશ્ચક્રં નવીનનીરદોપમમ્ ।
લક્ષ્મીજનાર્દનો જ્ઞેયો રહિતો વનમાલયા ॥ ૫૯॥

દ્વારદ્વયે ચતુશ્ચક્રં ગોષ્પદેન વિરાજિતમ્ ।
રઘુનાથાભિધં જ્ઞેયં રહિતં વનમાલયા ॥ ૬૦॥

અતિક્ષુદ્રં દ્વિચક્રં ચ નવીનજલદપ્રભમ્ ।
તદ્વામનાભિધં જ્ઞેયં રહિતં વનમાલયા ॥ ૬૧॥

અતિક્ષુદ્રં દ્વિચક્રં ચ વનમાલાવિભૂષિતમ્ ।
વિજ્ઞેયં શ્રીધરં રૂપં શ્રીપ્રદં ગૃહિણા સદા ॥ ૬૨॥

સ્થૂલં ચ વર્તુલાકારં રહિતં વનમાલયા ।
દ્વિચક્રં સ્ફુટમત્યન્તં જ્ઞેયં દામોદરાભિધમ્ ॥ ૬૩॥

મધ્યમં વર્તુલાકારં દ્વિચક્રં બાણવિક્ષતમ્ ।
રણરામાભિધં જ્ઞેયં શરતૂણસમન્વિતમ્ ॥ ૬૪॥

મધ્યમં સપ્તચક્રઞ્ચ છત્રભૂષણભૂષિતમ્ ।
રાજરાજેશ્વરં જ્ઞેયં રાજસમ્પત્પ્રદં નૃણામ્ ॥ ૬૫॥

દ્વિસપ્તચક્રં સ્થૂલં ચ નવનીરદસુપ્રભમ્ ।
અનન્તાખ્યં ચ વિજ્ઞેયં ચતુર્વર્ગફલપ્રદમ્ ॥ ૬૬॥

ચક્રાકારં દ્વિચક્રં ચ સશ્રીકં જલદપ્રભમ્ ।
સગોષ્પદં મધ્યમં ચ વિજ્ઞેયં મધુસૂદનમ્ ॥ ૬૭॥

સુદર્શનં ચૈકચક્રં ગુપ્તચક્રં ગદાધરમ્ ।
દ્વિચક્રં હયવક્ત્રાભં હયગ્રીવં પ્રકીર્તિતમ્ ॥ ૬૮॥

અતીવ વિસ્તૃતાસ્યં ચ દ્વિચક્રં વિકટં સતિ ।
નરસિંહં સુવિજ્ઞેયં સદ્યો વૈરાગ્યદં નૃણામ્ ॥ ૬૯॥

દ્વિચક્રં વિસ્તૃતાસ્યં ચ વનમાલાસમન્વિતમ્ ।
લક્ષ્મીનૃસિંહં વિજ્ઞેયં ગૃહિણાં ચ સુખપ્રદમ્ ॥ ૭૦॥

દ્વારદેશે દ્વિચક્રં ચ સશ્રીકં ચ સમં સ્ફુટમ્ ।
વાસુદેવં તુ વિજ્ઞેયં સર્વકામફલપ્રદમ્ ॥ ૭૧॥

પ્રદ્યુમ્નં સૂક્ષ્મચક્રં ચ નવીનનીરદપ્રભમ્ ।
સુષિરચ્છિદ્રબહુલં ગૃહિણા ચ સુખપ્રદમ્ ॥ ૭૨॥

દ્વે ચક્રે ચૈકલગ્ને ચ પૃષ્ઠં યત્ર તુ પુષ્કલમ્ ।
સઙ્કર્ષણં સુવિજ્ઞેયં સુખદં ગૃહિણાં સદા ॥ ૭૩॥

અનિરુદ્ધં તુ પીતાભં વર્તુલં ચાતિશોભનમ્ ।
સુખપ્રદં ગૃહસ્થાનાં પ્રવદન્તિ મનીષિણઃ ॥ ૭૪॥

શાલગ્રામશિલા યત્ર તત્ર સન્નિહિતો હરિઃ ।
તત્રૈવ લક્ષ્મીર્વસતિ સર્વતીર્થસમન્વિતા ॥ ૭૫॥

યાનિ કાનિ ચ પાપાનિ બ્રહ્મહત્યાદિકાનિ ચ ।
તાનિ સર્વાણિ નશ્યન્તિ શાલગ્રામશિલાર્ચનાત્ ॥ ૭૬॥

છત્રાકારે ભવેદ્રાજ્યં વર્તુલે ચ મહાશ્રિયઃ ।
દુઃખઞ્ચ શકટાકારે શૂલાગ્રે મરણં ધ્રુવમ્ ॥ ૭૭॥

વિકૃતાસ્યે ચ દારિદ્ર્યં પિઙ્ગલે હાનિરેવ ચ ।
ભગ્નચક્રે ભવેદ્વ્યાધિર્વિદીર્ણે મરણં ધ્રુવમ્ ॥ ૭૮॥

વ્રતં દાનં પ્રતિષ્ઠા ચ શ્રાદ્ધં ચ દેવપૂજનમ્ ।
શાલગ્રામસ્ય સાન્નિધ્યાત્પ્રશસ્તં તદ્ભવેદિતિ ॥ ૭૯॥

સ સ્નાતઃ સર્વતીર્થેષુ સર્વયજ્ઞેષુ દીક્ષિતઃ ।
સર્વયજ્ઞેષુ તીર્થેષુ વ્રતેષુ ચ તપઃસુ ચ ॥ ૮૦॥

પાઠે ચતુર્ણાં વેદાનાં તપસાં કરણે સતિ ।

તત્પુણ્યં લભતે નૂનં શાલગ્રામશિલાર્ચનાત્ ॥ ૮૧॥

(શાલગ્રામશિલાતોયૈર્યોઽભિષેકં સદા ચરેત્ ।
સર્વદાનેષુ યત્પુણ્યં પ્રદક્ષિણં ભુવો યથા ॥)॥

શાલગ્રામશિલાતોયં નિત્યં ભુઙ્ક્તે ચ યો નરઃ ।
સુરેપ્સિતં પ્રસાદં ચ લભતે નાત્ર સંશયઃ ॥ ૮૨॥

તસ્ય સ્પર્શં ચ વાઞ્છન્તિ તીર્થાનિ નિખિલાનિ ચ ।
જીવન્મુક્તો મહાપૂતોઽપ્યન્તે યાતિ હરેઃ પદમ્ ॥ ૮૩॥

તત્રૈવ હરિણા સાર્ધમસઙ્ખ્યં પ્રાકૃતં લયમ્ ।
યાસ્યત્યેવ હિ દાસ્યે ચ નિયુક્તો દાસ્યકર્મણિ ॥ ૮૪॥

યાનિ કાનિ ચ પાપાનિ બ્રહ્મહત્યાસમાનિ ચ ।
તં દૃષ્ટ્વા ચ પલાયન્તે વૈનતેયાદિવોરગાઃ ॥ ૮૫॥

તત્પાદરજસા દેવી સદ્યઃપૂતા વસુન્ધરા ।
પુંસાં લક્ષં તત્પિતૄણાં નિસ્તરેત્તસ્ય જન્મતઃ ॥ ૮૬॥

શાલગ્રામશિલાતોયં મૃત્યુકાલે ચ યો લભેત્ ।
સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૮૭॥

નિર્વાણમુક્તિં લભતે કર્મભોગાત્પ્રમુચ્યતે ।
વિષ્ણોઃ પદે પ્રલીનશ્ચ ભવિષ્યતિ ન સંશયઃ ॥ ૮૮॥

શાલગ્રામશિલાં ધૃત્વા મિથ્યાવાક્યં વદેત્તુ યઃ ।
સ યાતિ કુમ્ભીપાકે ચ યાવદ્વૈ બ્રહ્મણો વયઃ ॥ ૮૯॥

શાલગ્રામશિલાં ધૃત્વા સ્વીકારં યો ન પાલયેત્ ।
સ પ્રયાત્યસિપત્રં ચ લક્ષમન્વન્તરાવધિ ॥ ૯૦॥

તુલસીપત્રવિચ્છેદં શાલગ્રામે કરોતિ યઃ ।
તસ્ય જન્માન્તરે કાન્તે સ્ત્રીવિચ્છેદો ભવિષ્યતિ ॥ ૯૧॥

તુલસીપત્રવિચ્છેદં શઙ્ખે યો હિ કરોતિ ચ ।
ભાર્યાહીનો ભવેત્સોઽપિ રોગી ચ સપ્તજન્મસુ ॥ ૯૨॥

શાલગ્રામં ચ તુલસીં શઙ્ખં ચૈકત્ર એવ ચ ।
યો રક્ષતિ મહાજ્ઞાની સ ભવેચ્છ્રીહરેઃ પ્રિયઃ ॥ ૯૩॥

સકૃદેવ હિ યો યસ્યાં વીર્યાધાનં કરોતિ ચ ।
તદ્વિચ્છેદે તસ્ય દુઃખં ભવેદેવ પરસ્પરમ્ ॥ ૯૪॥

ત્વં પ્રિયા શઙ્ખચૂડસ્ય ચૈકમન્વન્તરાવધિ ।
શઙ્ખેન સાર્ધં ત્વદ્ભેદઃ કેવલં દુઃખદસ્તથા ॥ ૯૫॥

ઇત્યુક્ત્વા શ્રીહરિસ્તાં ચ વિરરામ ચ નારદ ।
સા ચ દેહં પરિત્યજ્ય દિવ્યરૂપં વિધાય ચ ॥ ૯૬॥

યથા શ્રીશ્ચ તથા સા ચાપ્યુવાસ હરિવક્ષસિ ।
સ જગામ તયા સાર્ધં વૈકુણ્ઠં કમલાપતિઃ ॥ ૯૭॥

લક્ષ્મીઃ સરસ્વતી ગઙ્ગા તુલસી ચાપિ નારદ ।
હરેઃ પ્રિયાશ્ચતસ્રશ્ચ બભૂવુરીશ્વરસ્ય ચ ॥ ૯૮॥

સદ્યસ્તદ્દેહજાતા ચ બભૂવ ગણ્ડકી નદી ।
ઈશ્વરઃ સોઽપિ શૈલશ્ચ તત્તીરે પુણ્યદો નૃણામ્ ॥ ૯૯॥

કુર્વન્તિ તત્ર કીટાશ્ચ શિલાં બહુવિધાં મુને ।
જલે પતન્તિ યા યાશ્ચ ફલદાસ્તાશ્ચ નિશ્ચિતમ્ ॥ ૧૦૦॥

સ્થલસ્થાઃ પિઙ્ગલા જ્ઞેયાશ્ચોપતાપાદ્રવેરિતિ ।
ઇત્યેવં કથિતં સર્વં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૦૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે તુલસીમાહાત્મ્યેન
સહ શાલગ્રામમહત્ત્વવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૯.૨૪॥

## ૯.૨૫ પઞ્ચવિંશોઽધ્યાયઃ । તુલસીપૂજાવિધિવર્ણનમ્ ।

નારદ ઉવાચ ।
તુલસી ચ યદા પૂજ્યા કૃતા નારાયણપ્રિયા ।
અસ્યાઃ પૂજાવિધાનં ચ સ્તોત્રં ચ વદ સામ્પ્રતમ્ ॥ ૧॥

કેન પૂજા કૃતા કેન સ્તુતા પ્રથમતો મુને ।
તત્ર પૂજ્યા સા બભૂવ કેન વા વદ મામહો ॥ ૨॥

સૂત ઉવાચ ।
નારદસ્ય વચઃ શ્રુત્વા પ્રહસ્ય મુનિપુઙ્ગવઃ ।

કથાં કથિતુમારેભે પુણ્યાં પાપહરાં પરામ્ ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
હરિઃ સમ્પૂજ્ય તુલસીં રેમે ચ રમયા સહ ।
રમાસમાનસૌભાગ્યાં ચકાર ગૌરવેણ ચ ॥ ૪॥

સેહે ચ લક્ષ્મીર્ગઙ્ગા ચ તસ્યાશ્ચ નવસઙ્ગમમ્ ।
સૌભાગ્યગૌરવં કોપાત્તે ન સેહે સરસ્વતી ॥ ૫॥

સા તાં જઘાન કલહે માનિની હરિસન્નિધૌ ।
વ્રીડયા ચાપમાનેન સાન્તર્ધાનં ચકાર હ ॥ ૬॥

સર્વસિદ્ધેશ્વરી દેવી જ્ઞાનિનાં સિદ્ધિયોગિની ।
જગામાદર્શનં કોપાત્સર્વત્ર ચ હરેરહો ॥ ૭॥

હરિર્ન દૃષ્ટ્વા તુલસીં બોધયિત્વા સરસ્વતીમ્ ।
તદનુજ્ઞાં ગહીત્વા ચ જગામ તુલસીવનમ્ ॥ ૮॥

તત્ર ગત્વા ચ સુસ્નાતો હરિઃ સ તુલસીં સતીમ્ ।
પૂજયામાસ તાં ધ્યાત્વા સ્તોત્રં ભક્ત્યા ચકાર હ ॥ ૯॥

લક્ષ્મીમાયાકામવાણીબીજપૂર્વં દશાક્ષરમ્ ।
વૃન્દાવનીતિ ઙેઽન્તં ચ વહ્નિજાયાન્તમેવ ચ ॥ ૧૦॥

અનેન કલ્પતરુણા મન્ત્રરાજેન નારદ ।
પૂજયેદ્યો વિધાનેન સર્વસિદ્ધિં લભેદ્ ધ્રુવમ્ ॥ ૧૧॥

ઘૃતદીપેન ધૂપેન સિન્દૂરચન્દનેન ચ ।
નૈવેદ્યેન ચ પુષ્પેણ ચોપચારેણ નારદ ॥ ૧૨॥

હરિસ્તોત્રેણ તુષ્ટા સા ચાવિર્ભૂતા મહીરુહાત્ ।
પ્રસન્ના ચરણામ્ભોજે જગામ શરણં શુભા ॥ ૧૩॥

વરં તસ્યૈ દદૌ વિષ્ણુઃ સર્વપૂજ્યા ભવેરિતિ ।
અહં ત્વાં ધારયિષ્યામિ સુરૂપાં મૂર્ધ્નિ વક્ષસિ ॥ ૧૪॥

સર્વે ત્વાં ધારયિષ્યન્તિ સ્વમૂર્ધ્નિ ચ સુરાદયઃ ।
ઇત્યુક્ત્વા તાં ગૃહીત્વા ચ પ્રયયૌ સ્વાલયં વિભુઃ ॥ ૧૫॥

નારદ ઉવાચ ।
કિં ધ્યાનં સ્તવનં કિં વા કિં વા પૂજાવિધાનકમ્ ।

તુલસ્યાશ્ચ મહાભાગ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૧૬॥

શ્રીનારાયણ ઉવાચ ।
અન્તર્હિતાયાં તસ્યાં ચ હરિર્વૃન્દાવને તદા ।
તસ્યાશ્ચક્રે સ્તુતિં ગત્વા તુલસીં વિરહાતુરઃ ॥ ૧૭॥

શ્રીભગવાનુવાચ ।
વૃન્દરૂપાશ્ચ વૃક્ષાશ્ચ યદૈકત્ર ભવન્તિ ચ ।
વિદુર્બુધાસ્તેન વૃન્દાં મત્પ્રિયાં તાં ભજામ્યહમ્ ॥ ૧૮॥

પુરા બભૂવ યા દેવી ત્વાદૌ વૃન્દાવને વને ।
તેન વૃન્દાવની ખ્યાતા સૌભાગ્યા તાં ભજામ્યહમ્ ॥ ૧૯॥

અસઙ્ખ્યેષુ ચ વિશ્વેષુ પૂજિતા યા નિરન્તરમ્ ।
તેન વિશ્વપૂજિતાઽઽખ્યાં પૂજિતાં ચ ભજામ્યહમ્ ॥ ૨૦॥

અસઙ્ખ્યાનિ ચ વિશ્વાનિ પવિત્રાણિ ત્વયા સદા ।
તાં વિશ્વપાવનીં દેવીં વિરહેણ સ્મરામ્યહમ્ ॥ ૨૧॥

દેવા ન તુષ્ટાઃ પુષ્પાણાં સમૂહેન યયા વિના ।
તાં પુષ્પસારાં શુદ્ધાં ચ દ્રષ્ટુમિચ્છામિ શોકતઃ ॥ ૨૨॥

વિશ્વે યત્પ્રાપ્તિમાત્રેણ ભક્તાનન્દો ભવેદ્ ધ્રુવમ્ ।
નન્દિની તેન વિખ્યાતા સા પ્રીતા ભવતાદિહ ॥ ૨૩॥

યસ્યા દેવ્યાસ્તુલા નાસ્તિ વિશ્વેષુ નિખિલેષુ ચ ।
તુલસી તેન વિખ્યાતા તાં યામિ શરણં પ્રિયામ્ ॥ ૨૪॥

કૃષ્ણજીવનરૂપા સા શશ્વત્પ્રિયતમા સતી ।
તેન કૃષ્ણજીવની સા સા મે રક્ષતુ જીવનમ્ ॥ ૨૫॥

ઇત્યેવં સ્તવનં કૃત્વા તસ્થૌ તત્ર રમાપતિઃ ।
દદર્શ તુલસીં સાક્ષાત્પાદપદ્મનતાં સતીમ્ ॥ ૨૬॥

રુદતીમવમાનેન માનિનીં માનપૂજિતામ્ ।
પ્રિયાં દૃષ્ટ્વા પ્રિયઃ શીઘ્રં વાસયામાસ વક્ષસિ ॥ ૨૭॥

ભારત્યાજ્ઞાં ગહીત્વા ચ સ્વાલયં ચ યયૌ હરિઃ ।
ભારત્યા સહ તત્પ્રીતિં કારયામાસ સત્વરમ્ ॥ ૨૮॥

વરં વિષ્ણુર્દદૌ તસ્યૈ સર્વપૂજ્યા ભવેરિતિ ।

શિરોધાર્યા ચ સર્વેષાં વન્દ્યા માન્યા મમેતિ ચ ॥ ૨૯॥

વિષ્ણોર્વરેણ સા દેવી પરિતુષ્ટા બભૂવ ચ ।
સરસ્વતી તામાકૃષ્ય વાસયામાસ સન્નિધૌ ॥ ૩૦॥

લક્ષ્મીર્ગઙ્ગા સસ્મિતા ચ તાં સમાકૃષ્ય નારદ ।
ગૃહં પ્રવેશયામાસ વિનયેન સતીં તદા ॥ ૩૧॥

વૃન્દા વૃન્દાવની વિશ્વપૂજિતા વિશ્વપાવની ।
પુષ્પસારા નન્દની ચ તુલસી કૃષ્ણજીવની ॥ ૩૨॥

એતન્નામાષ્ટકઞ્ચૈવ સ્તોત્રં નામાર્થસંયુતમ્ ।
યઃ પઠેત્તાં ચ સમ્પૂજ્ય સોઽશ્વમેધફલં લભેત્ ॥ ૩૩॥

કાર્તિક્યાં પૂર્ણિમાયાં ચ તુલસ્યા જન્મ મઙ્ગલમ્ ।
તત્ર તસ્યાશ્ચ પૂજા ચ વિહિતા હરિણા પુરા ॥ ૩૪॥

તસ્યાં યઃ પૂજયેત્તાં ચ ભક્ત્યા વૈ વિશ્વપાવનીમ્ ।
સર્વપાપાદ્વિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૩૫॥

કાર્તિકે તુલસીપત્રં યો દદાતિ ચ વિષ્ણવે ।
ગવામયુતદાનસ્ય ફલં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૩૬॥

અપુત્રો લભતે પુત્રં પ્રિયાહીનો લભેત્પ્રિયામ્ ।
બન્ધુહીનો લભેદ્ બન્ધૂન્ સ્તોત્રશ્રવણમાત્રતઃ ॥ ૩૭॥

રોગી પ્રમુચ્યતે રોગાદ્ બદ્ધો મુચ્યેત બન્ધનાત્ ।
ભયાન્મુચ્યેત ભીતસ્તુ પાપાન્મુચ્યેત પાતકી ॥ ૩૮॥

ઇત્યેવં કથિતં સ્તોત્રં ધ્યાનં પૂજાવિધિં શૃણુ ।
ત્વમેવ વેદે જાનાસિ કણ્વશાખોક્તમેવ ચ ॥ ૩૯॥

તદ્વૃક્ષે પૂજયેત્તાં ચ ભક્ત્યા ચાવાહનં વિના ।
તાં ધ્યાત્વા ચોપચારેણ ધ્યાનં પાતકનાશનમ્ ॥ ૪૦॥

તુલસીં પુષ્પસારાં ચ સતીં પૂતાં મનોહરામ્ ।
કૃતપાપેધ્મદાહાય જ્વલદગ્નિશિખોપમામ્ ॥ ૪૧॥

પુષ્પેષુ તુલના યસ્યા નાસ્તિ વેદેષુ ભાષિતમ્ ।
પવિત્રરૂપા સર્વાસુ તુલસી સા ચ કીર્તિતા ॥ ૪૨॥

શિરોધાર્યા ચ સર્વેષામીપ્સિતા વિશ્વપાવની ।
જીવન્મુક્તાં મુક્તિદાં ચ ભજે તાં હરિભક્તિદામ્ ॥ ૪૩॥

ઇતિ ધ્યાત્વા ચ સમ્પૂજ્ય સ્તુત્વા ચ પ્રણમેત્સુધીઃ ।
ઉક્તં તુલસ્યુપાખ્યાનં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૪૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
તુલસીપૂજાવિધિવર્ણનં નામ પઞ્ચવિશોઽધ્યાયઃ ॥ ૯.૨૫॥

## ૯.૨૬ ષડ્વિંશોઽધ્યાયઃ । સાવિત્રીપૂજાવિધિકથનમ્ ।

નારદ ઉવાચ ।
તુલસ્યુપાખ્યાનમિદં શ્રુતં ચાતિસુધોપમમ્ ।
તતઃ સાવિત્ર્યુપાખ્યાનં તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૧॥

પુરા કેન સમુદ્ભૂતા સા શ્રુતા ચ શ્રુતેઃ પ્રસૂઃ ।
કેન વા પૂજિતા લોકે પ્રથમે કૈશ્ચ વા પરે ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
બ્રહ્મણા વેદજનની પ્રથમે પૂજિતા મુને ।
દ્વિતીયે ચ વેદગણૈસ્તત્પશ્ચાદ્વિદુષાં ગણૈઃ ॥ ૩॥

તદા ચાશ્વપતિર્ભૂપઃ પૂજયામાસ ભારતે ।
તત્પશ્ચાત્પૂજયામાસુર્વર્ણાશ્ચત્વાર એવ ચ ॥ ૪॥

નારદ ઉવાચ ।
કો વા સોઽશ્વપતિર્બ્રહ્મન્ કેન વા તેન પૂજિતા ।
સર્વપૂજ્યા ચ સા દેવી પ્રથમે કૈશ્ચ વા પરે ॥ ૫॥

શ્રીનારાયણ ઉવાચ ।
મદ્રદેશે મહારાજો બભૂવાશ્વપતિર્મુને ।
વૈરિણાં બલહર્તા ચ મિત્રાણાં દુઃખનાશનઃ ॥ ૬॥

આસીત્તસ્ય મહારાજ્ઞી મહિષી ધર્મચારિણી ।
માલતીતિ સમાખ્યાતા યથા લક્ષ્મીર્ગદાભૃતઃ ॥ ૭॥

સા ચ રાજ્ઞી ચ વન્ધ્યા ચ વસિષ્ઠસ્યોપદેશતઃ ।

ચકારારાધનં ભક્ત્યા સાવિત્ર્યાશ્ચૈવ નારદ ॥ ૮॥

પ્રત્યાદેશં ન સા પ્રાપ્તા મહિષી ન દદર્શ તામ્ ।
ગૃહં જગામ દુઃખાર્તા હૃદયેન વિદૂયતા ॥ ૯॥

રાજા તાં દુઃખિતાં દૃષ્ટ્વા બોધયિત્વા નયેન વૈ ।
સાવિત્ર્યાસ્તપસે ભક્ત્યા જગામ પુષ્કરં તદા ॥ ૧૦॥

તપશ્ચકાર તત્રૈવ સંયતઃ શતવત્સરમ્ ।
ન દદર્શ ચ સાવિત્ર્યા પ્રત્યાદેશો બભૂવ ચ ॥ ૧૧॥

શુશ્રાવાકાશવાણીં ચ નૃપેન્દ્રશ્ચાશરીરિણીમ્ ।
ગાયત્ર્યા દશલક્ષં ચ જપં ત્વં કુરુ નારદ ॥ ૧૨॥

એતસ્મિન્નન્તરે તત્ર આજગામ પરાશરઃ ।
પ્રણનામ તતસ્તં ચ મુનિર્નૃપમુવાચ ચ ॥ ૧૩॥

મુનિરુવાચ ।
સકૃજ્જપશ્ચ ગાયત્ર્યાઃ પાપં દિનભવં હરેત્ ।
દશવારં જપેનૈવ નશ્યેત્પાપં દિવાનિશમ્ ॥ ૧૪॥

શતવારં જપશ્ચૈવ પાપં માસાર્જિતં હરેત્ ।
સહસ્રધા જપશ્ચૈવ કલ્મષં વત્સરાર્જિતમ્ ॥ ૧૫॥

લક્ષો જન્મકૃતં પાપં દશલક્ષોઽન્યજન્મજમ્ ।
સર્વજન્મકૃતં પાપં શતલક્ષાદ્વિનશ્યતિ ॥ ૧૬॥

કરોતિ મુક્તિં વિપ્રાણાં જપો દશગુણસ્તતઃ ।
કરં સર્પફણાકારં કૃત્વા તદ્રન્ધ્રમુદ્રિતમ્ ॥ ૧૭॥

આનમ્રમૂર્ધમચલં પ્રજપેત્પ્રાઙ્મુખો દ્વિજઃ ।
અનામિકામધ્યદેશાદધોઽવામક્રમેણ ચ ॥ ૧૮॥

તર્જનીમૂલપર્યન્તં જપસ્યૈવં ક્રમઃ કરે ।
શ્વેતપઙ્કજબીજાનાં સ્ફટિકાનાં ચ સંસ્કૃતામ્ ॥ ૧૯॥

કૃત્વા વૈ માલિકાં રાજન્ જપેત્તીર્થે સુરાલયે ।
સંસ્થાપ્ય માલામશ્વત્થપત્રે પદ્મે ચ સંયતઃ ॥ ૨૦॥

કૃત્વા ગોરોચનાક્તાં ચ ગાયત્ર્યા સ્નાપયેત્સુધીઃ ।
ગાયત્રીશતકં તસ્યાં જપેચ્ચ વિધિપૂર્વકમ્ ॥ ૨૧॥

અથવા પઞ્ચગવ્યેન સ્નાત્વા માલાં સુસંસ્કૃતામ્ ।
અથ ગઙ્ગોદકેનૈવ સ્નાત્વા વાતિસુસંસ્કૃતામ્ ॥ ૨૨॥

એવં ક્રમેણ રાજર્ષે દશલક્ષં જપં કુરુ ।
સાક્ષાદ્દ્રક્ષ્યસિ સાવિત્રીં ત્રિજન્મપાતકક્ષયાત્ ॥ ૨૩॥

નિત્યં સન્ધ્યાં ચ હે રાજન્ કરિષ્યસિ દિને દિને ।
મધ્યાહ્ને ચાપિ સાયાહ્ને પ્રાતરેવ શુચિઃ સદા ॥ ૨૪॥

સન્ધ્યાહીનોઽશુચિર્નિત્યમનર્હઃ સર્વકર્મસુ ।
યદહ્ના કુરુતે કર્મ ન તસ્ય ફલભાગ્ભવેત્ ॥ ૨૫॥

નોપતિષ્ઠતિ યઃ પૂર્વાં નોપાસ્તે યસ્તુ પશ્ચિમામ્ ।
સ શૂદ્રવદ્બહિષ્કાર્યઃ સર્વસ્માદ્ દ્વિજકર્મણઃ ॥ ૨૬॥

યાવજ્જીવનપર્યન્તં ત્રિઃસન્ધ્યાં યઃ કરોતિ ચ ।
સ ચ સૂર્યસમો વિપ્રસ્તેજસા તપસા સદા ॥ ૨૭॥

તત્પાદપદ્મરજસા સદ્યઃપૂતા વસુન્ધરા ।
જીવન્મુક્તઃ સ તેજસ્વી સન્ધ્યાપૂતો હિ યો દ્વિજઃ ॥ ૨૮॥

તીર્થાનિ ચ પવિત્રાણિ તસ્ય સંસ્પર્શમાત્રતઃ ।
તતઃ પાપાનિ યાન્ત્યેવ વૈનતેયાદિવોરગાઃ ॥ ૨૯॥

ન ગૃહ્ણન્તિ સુરાઃ પૂજાં પિતરઃ પિણ્ડતર્પણમ્ ।
સ્વેચ્છયા ચ દ્વિજાતેશ્ચ ત્રિસન્ધ્યારહિતસ્ય ચ ॥ ૩૦॥

મૂલપ્રકૃત્યભક્તો યસ્તન્મન્ત્રસ્યાપ્યનર્ચકઃ ।
તદુત્સવવિહીનશ્ચ વિષહીનો યથોરગઃ ॥ ૩૧॥

વિષ્ણુમન્ત્રવિહીનશ્ચ ત્રિસન્ધ્યારહિતો દ્વિજઃ ।
એકાદશીવિહીનશ્ચ વિષહીનો યથોરગઃ ॥ ૩૨॥

હરેરનૈવેદ્યભોજી ધાવકો વૃષવાહકઃ ।
શૂદ્રાન્નભોજી યો વિપ્રો વિષહીનો યથોરગઃ ॥ ૩૩॥

શૂદ્રાણાં શવદાહી યઃ સ વિપ્રો વૃષલીપતિઃ ।
શૂદ્રાણાં સૂપકારશ્ચ વિષહીનો યથોરગઃ ॥ ૩૪॥

શૂદ્રાણાં ચ પ્રતિગ્રાહી શૂદ્રયાજી ચ યો દ્વિજઃ ।

મસિજીવી અસિજીવી વિષહીનો યથોરગઃ ॥ ૩૫॥

યઃ કન્યાવિક્રયી વિપ્રો યો હરેર્નામવિક્રયી ।
યો વિપ્રોઽવીરાન્નભોજી ઋતુસ્નાતાન્નભોજકઃ ॥ ૩૬॥

ભગજીવી બાર્ધુષિકો વિષહીનો યથોરગઃ ।
યો વિદ્યાવિકયી વિપ્રો વિષહીનો યથોરગઃ ॥ ૩૭॥

સૂર્યોદયે સ્વપેદ્યો હિ મત્સ્યભોજી ચ યો દ્વિજઃ ।
શિવાપૂજાદિરહિતો વિષહીનો યથોરગઃ ॥ ૩૮॥

ઇત્યુક્ત્વા ચ મુનિશ્રેષ્ઠઃ સર્વપૂજાવિધિક્રમમ્ ।
તમુવાચ ચ સાવિત્ર્યા ધ્યાનાદિકમભીપ્સિતમ્ ॥ ૩૯॥

દત્ત્વા સર્વં નૃપેન્દ્રાય યયૌ ચ સ્વાશ્રમે મુને ।
રાજા સમ્પૂજ્ય સાવિત્રીં દદર્શ વરમાપ ચ ॥ ૪૦॥

નારદ ઉવાચ ।
કિં વા ધ્યાનં ચ સાવિત્ર્યાઃ કિં વા પૂજાવિધાનકમ્ ।
સ્તોત્રં મન્ત્રં ચ કિં દત્ત્વા પ્રયયૌ સ પરાશરઃ ॥ ૪૧॥

નૃપઃ કેન વિધાનેન સમ્પૂજ્ય શ્રુતિમાતરમ્ ।
વરં ચ કં વા સમ્પ્રાપ સમ્પૂજ્ય તુ વિધાનતઃ ॥ ૪૨॥

તત્સર્વં શ્રોતુમિચ્છામિ સાવિત્ર્યાઃ પરમં મહત્ ।
રહસ્યાતિરહસ્યં ચ શ્રુતિસિદ્ધં સમાસતઃ ॥ ૪૩॥

શ્રીનારાયણ ઉવાચ ।
જ્યેષ્ઠકૃષ્ણત્રયોદશ્યાં શુદ્ધકાલે ચ યત્નતઃ ।
વ્રતમેવ ચતુર્દશ્યાં વ્રતી ભક્ત્યા સમાચરેત્ ॥ ૪૪॥

વ્રતં ચતુર્દશાબ્દં ચ દ્વિસપ્તફલસંયુતમ્ ।
દત્ત્વા દ્વિસપ્તનૈવેદ્યં પુષ્પધૂપાદિકં ચરેત્ ॥ ૪૫॥

વસ્ત્રં યજ્ઞોપવીતં ચ ભોજનં વિધિપૂર્વકમ્ ।
સંસ્થાપ્ય મઙ્ગલઘટં ફલશાખાસમન્વિતમ્ ॥ ૪૬॥

ગણેશં ચ દિનેશં ચ વહ્નિં વિષ્ણું શિવં શિવામ્ ।
સમ્પૂજ્ય પૂજયેદિષ્ટં ઘટે આવાહિતે દ્વિજઃ ॥ ૪૭॥

શ઼ૃણુ ધ્યાનં ચ સાવિત્ર્યાશ્ચોક્તં માધ્યન્દિને ચ યત્ ।

સ્તોત્રં પૂજાવિધાનં ચ મન્ત્રં ચ સર્વકામદમ્ ॥ ૪૮॥

તપ્તકાઞ્ચનવર્ણાભાં જ્વલન્તીં બ્રહ્મતેજસા ।
ગ્રીષ્મમધ્યાહ્નમાર્તણ્ડસહસ્રસમ્મિતપ્રભામ્ ॥ ૪૯॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યાં રત્નભૂષણભૂષિતામ્ ।
વહ્નિશુદ્ધાંશુકાધાનાં ભક્તાનુગ્રહવિગ્રહામ્ ॥ ૫૦॥

સુખદાં મુક્તિદાં શાન્તાં કાન્તાં ચ જગતાં વિધેઃ ।
સર્વસમ્પત્સ્વરૂપાં ચ પ્રદાત્રીં સર્વસમ્પદામ્ ॥ ૫૧॥

વેદાધિષ્ઠાતૃદેવીં ચ વેદશાસ્ત્રસ્વરૂપિણીમ્ ।
વેદબીજસ્વરૂપાં ચ ભજે તાં વેદમાતરમ્ ॥ ૫૨॥

ધ્યાત્વા ધ્યાનેન નૈવેદ્યં દત્ત્વા પાણિં સ્વમૂર્ધનિ ।
પુનર્ધ્યાત્વા ઘટે ભક્ત્યા દેવીમાવાહયેદ્ વ્રતી ॥ ૫૩॥

દત્ત્વા ષોડશોપચારં વેદોક્તં મન્ત્રપૂર્વકમ્ ।
સમ્પૂજ્ય સ્તુત્વા પ્રણમેદ્દેવદેવીં વિધાનતઃ ॥ ૫૪॥

આસનં પાદ્યમર્ઘ્યં ચ સ્નાનીયં ચાનુલેપનમ્ ।
ધૂપં દીપં ચ નૈવેદ્યં તામ્બૂલં શીતલં જલમ્ ॥ ૫૫॥

વસનં ભૂષણં માલ્યં ગન્ધમાચમનીયકમ્ ।
મનોહરં સુતલ્પં ચ દેયાન્યેતાનિ ષોડશ ॥ ૫૬॥

દારુસારવિકારં ચ હેમાદિનિર્મિતં ચ વા ।
દેવાધારં પુણ્યદં ચ મયા તુભ્યં નિવેદિતમ્ ॥ ૫૭॥

તીર્થોદકં ચ પાદ્યં ચ પુણ્યદં પ્રીતિદં મહત્ ।
પૂજાઙ્ગભૂતં શુદ્ધં ચ મયા તુભ્યં નિવેદિતમ્ ॥ ૫૮॥

પવિત્રરૂપમર્ઘ્યં ચ દૂર્વાપુષ્પદલાન્વિતમ્ ।
પુણ્યદં શઙ્ખતોયાક્તં મયા તુભ્યં નિવેદિતમ્ ॥ ૫૯॥

સુગન્ધં ગન્ધતોયં ચ સ્નેહં સૌગન્ધકારકમ્ ।
મયા નિવેદિતં ભક્ત્યા સ્નાનીયં પ્રતિગૃહ્યતામ્ ॥ ૬૦॥

ગન્ધદ્રવ્યોદ્ભવં પુણ્યં પ્રીતિદં દિવ્યગન્ધદમ્ ।
મયા નિવેદિતં ભક્ત્યા ગન્ધતોયં તવામ્બિકે ॥ ૬૧॥

સર્વમઙ્ગલરૂપં ચ સર્વં ચ મઙ્ગલપ્રદમ્ ।
પુણ્યદં ચ સુધૂપં તં ગૃહાણ પરમેશ્વરિ ॥ ૬૨॥

સુગન્ધયુક્તં સુખદં મયા તુભ્યં નિવેદિતમ્ ।
જગતાં દર્શનાર્થાય પ્રદીપં દીપ્તિકારકમ્ ॥ ૬૩॥

અન્ધકારધ્વંસબીજં મયા તુભ્યં નિવેદિતમ્ ।
તુષ્ટિદં પુષ્ટિદં ચૈવ પ્રીતિદં ક્ષુદ્વિનાશનમ્ ॥ ૬૪॥

પુણ્યદં સ્વાદુરૂપં ચ નૈવેદ્યં પ્રતિગૃહ્યતામ્ ।
તામ્બૂલપ્રવરં રમ્યં કર્પૂરાદિસુવાસિતમ્ ॥ ૬૫॥

તુષ્ટિદં પુષ્ટિદં ચૈવ મયા તુભ્યં નિવેદિતમ્ ।
સુશીતલં વારિ શીતં પિપાસાનાશકારણમ્ ॥ ૬૬॥

જગતાં જીવનરૂપં ચ જીવનં પ્રતિગૃહ્યતામ્ ।
દેહશોભાસ્વરૂપં ચ સભાશોભાવિવર્ધનમ્ ॥ ૬૭॥

કાર્પાસજં ચ કૃમિજં વસનં પ્રતિગૃહ્યતામ્ ।
કાઞ્ચનાદિવિનિર્માણં શ્રીકરં શ્રીયુતં સદા ॥ ૬૮॥

સુખદં પુણ્યદં રત્નભૂષણં પ્રતિગૃહ્યતામ્ ।
નાનાવૃક્ષસમુદ્ભૂતં નાનારૂપસમન્વિતમ્ ॥ ૬૯॥

ફલસ્વરૂપં ફલદં ફલં ચ પ્રતિગૃહ્યતામ્ ।
સર્વમઙ્ગલરૂપં ચ સર્વમઙ્ગલમઙ્ગલમ્ ॥ ૭૦॥

નાનાપુષ્પવિનિર્માણં બહુશોભાસમન્વિતમ્ ।
પ્રીતિદં પુણ્યદં ચૈવ માલ્યં ચ પ્રતિગૃહ્યતામ્ ॥ ૭૧॥

પુણ્યદં ચ સુગન્ધાઢ્યં ગન્ધં ચ દેવિ ગૃહ્યતામ્ ।
સિન્દૂરં ચ વરં રમ્યં ભાલશોભાવિવર્ધનમ્ ॥ ૭૨॥

ભૂષણાનાં ચ પ્રવરં સિન્દૂરં પ્રતિગૃહ્યતામ્ ।
વિશુદ્ધં ગ્રન્થિસંયુક્તં પુણ્યસૂત્રવિનિર્મિતમ્ ॥ ૭૩॥

પવિત્રં વેદમન્ત્રેણ યજ્ઞસૂત્રં ચ ગૃહ્યતામ્ ।
દ્રવ્યાણ્યેતાનિ મૂલેન દત્ત્વા સ્તોત્રં પઠેત્સુધીઃ ॥ ૭૪॥

તતો વિપ્રાય ભક્ત્યા ચ વ્રતી દદ્યાચ્ચ દક્ષિણામ્ ।
સાવિત્રીતિ ચતુર્થ્યન્તં વહ્નિજાયાન્તમેવ ચ ॥ ૭૫॥

લક્ષ્મીમાયાકામપૂર્વં મન્ત્રમષ્ટાક્ષરં વિદુઃ ।
માધ્યન્દિનોક્તં સ્તોત્રં ચ સર્વકામફલપ્રદમ્ ॥ ૭૬॥

વિપ્રજીવનરૂપં ચ નિબોધ કથયામિ તે ।
કૃષ્ણેન દત્તાં સાવિત્રીં ગોલોકે બ્રહ્મણે પુરા ॥ ૭૭॥

નાયાતિ સા તેન સાર્ધં બ્રહ્મલોકે ચ નારદ ।
બ્રહ્મા કૃષ્ણાજ્ઞયા ભક્ત્યા તુષ્ટાવ વેદમાતરમ્ ॥ ૭૮॥

તદા સા પરિતુષ્ટા ચ બ્રહ્માણં ચકમે પતિમ્ ।
બ્રહ્મોવાવ
સચ્ચિદાનન્દરૂપે ત્વં મૂલપ્રકૃતિરૂપિણિ ॥ ૭૯॥

હિરણ્યગર્ભરૂપે ત્વં પ્રસન્ના ભવ સુન્દરિ ।
તેજઃસ્વરૂપે પરમે પરમાનન્દરૂપિણિ ॥ ૮૦॥

દ્વિજાતીનાં જાતિરૂપે પ્રસન્ના ભવ સુન્દરિ ।
નિત્યે નિત્યપ્રિયે દેવિ નિત્યાનન્દસ્વરૂપિણિ ॥ ૮૧॥

સર્વમઙ્ગલરૂપે ચ પ્રસન્ના ભવ સુન્દરિ ।
સર્વસ્વરૂપે વિપ્રાણાં મન્ત્રસારે પરાત્પરે ॥ ૮૨॥

સુખદે મોક્ષદે દેવિ પ્રસન્ના ભવ સુન્દરિ ।
વિપ્રપાપેધ્મદાહાય જ્વલદગ્નિશિખોપમે ॥ ૮૩॥

બહ્મતેજઃપ્રદે દેવિ પ્રસન્ના ભવ સુન્દરિ ।
કાયેન મનસા વાચા યત્પાપં કુરુતે નરઃ ॥ ૮૪॥

તત્ત્વત્સ્મરણમાત્રેણ ભસ્મીભૂતં ભવિષ્યતિ ।
ઇત્યુક્ત્વા જગતાં ધાતા તસ્થૌ તત્રૈવ સંસદિ ॥ ૮૫॥

સાવિત્રી બ્રહ્મણા સાર્ધં બ્રહ્મલોકં જગામ સા ।
અનેન સ્તવરાજેન સંસ્તૂયાશ્વપતિર્નૃપઃ ॥ ૮૬॥

દદર્શ તાં ચ સાવિત્રીં વરં પ્રાપ મનોગતમ્ ।
સ્તવરાજમિમં પુણ્યં સન્ધ્યાં કૃત્વા ચ યઃ પઠેત્ ।
પાઠે ચતુર્ણાં વેદાનાં યત્ફલં લભતે ચ તત્ ॥ ૮૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં

સંહિતાયાં નવમસ્કન્ધે
સાવિત્રીપૂજાવિધિકથનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૯.૨૬॥

## ૯.૨૭ સપ્તવિંશોઽધ્યાયઃ । સાવિત્ર્યુપાખ્યાને યમસાવિત્રીસંવાદવર્ણનમ્ ।

શ્રીનારાયણ ઉવાવ
સ્તુત્વાનેન સોઽશ્વપતિઃ સમ્પૂજ્ય વિધિપૂર્વકમ્ ।
દદર્શ તત્ર તાં દેવીં સહસ્રાર્કસમપ્રભામ્ ॥ ૧॥

ઉવાચ સા ચ રાજાનં પ્રસન્ના સસ્મિતા સતી ।
યથા માતા સ્વપુત્રં ચ દ્યોતયન્તી દિશસ્ત્વિષા ॥ ૨॥

સાવિત્ર્યુવાચ ।
જાનામ્યહં મહારાજ યત્તે મનસિ વાઞ્છિતમ્ ।
વાઞ્છિતં તવ પત્ન્યાશ્ચ સર્વં દાસ્યામિ નિશ્ચિતમ્ ॥ ૩॥

સાધ્વી કન્યાભિલાષં ચ કરોતિ તવ કામિની ।
ત્વં પ્રાર્થયસિ પુત્રં ચ ભવિષ્યતિ ક્રમેણ ચ ॥ ૪॥

ઇત્યુક્ત્વા સા તદા દેવી બ્રહ્મલોકં જગામ હ ।
રાજા જગામ સ્વગૃહં તત્કન્યાઽઽદૌ બભૂવ હ ॥ ૫॥

આરાધનાચ્ચ સાવિત્ર્યા બભૂવ કમલા પરા ।
સાવિત્રીતિ ચ તન્નામ ચકારાશ્વપતિર્નૃપઃ ॥ ૬॥

કાલેન સા વર્ધમાના બભૂવ ચ દિને દિને ।
રૂપયૌવનસમ્પન્ના શુક્લે ચન્દ્રકલા યથા ॥ ૭॥

સા વરં વરયામાસ દ્યુમત્સેનાત્મજં તદા ।
સત્યવન્તં સત્યશીલં નાનાગુણસમન્વિતમ્ ॥ ૮॥

રાજા તસ્મૈ દદૌ તાં ચ રત્નભૂષણભૂષિતામ્ ।
સોઽપિ સાર્ધં કૌતુકેન તાં ગૃહીત્વા ગૃહં યયૌ ॥ ૯॥

સ ચ સંવત્સરેઽતીતે સત્યવાન્ સત્યવિક્રમઃ ।
જગામ ફલકાષ્ઠાર્થં પ્રહર્ષં પિતુરાજ્ઞયા ॥ ૧૦॥

જગામ સાધ્વી તત્પશ્ચાત્સાવિત્રી દૈવયોગતઃ ।
નિપત્ય વૃક્ષાદ્દૈવેન પ્રાણાંસ્તત્યાજ સત્યવાન્ ॥ ૧૧॥

યમસ્તં પુરુષં દૃષ્ટ્વા બદ્ધ્વાઙ્ગુષ્ઠસમં મુને ।
ગૃહીત્વા ગમનં ચક્રે તત્પશ્ચાત્પ્રયયૌ સતી ॥ ૧૨॥

પશ્ચાત્તાં સુદતીં દૃષ્ટ્વા યમઃ સંયમનીપતિઃ ।
ઉવાચ મધુરં સાધ્વીં સાધૂનાં પ્રવરો મહાન્ ॥ ૧૩॥

ધર્મરાજ ઉવાચ ।
અહો ક્વ યાસિ સાવિત્રિ ગૃહીત્વા માનુષીં તનુમ્ ।
યદિ યાસ્યસિ કાન્તેન સાર્ધં દેહં તદા ત્યજ ॥ ૧૪॥

ગન્તું મર્ત્યો ન શક્નોતિ ગૃહીત્વા પાઞ્ચભૌતિકમ્ ।
દેહં ચ મમ લોકં ચ નશ્વરં નશ્વરઃ સદા ॥ ૧૫॥

ભર્તુસ્તે પૂર્ણકાલો વૈ બભૂવ ભારતે સતિ ।
સ્વકર્મફલભોગાર્થં સત્યવાન્ યાતિ મદ્ગૃહમ્ ॥ ૧૬॥

કર્મણા જાયતે જન્તુઃ કર્મણૈવ પ્રલીયતે ।
સુખં દુઃખં ભયં શોકઃ કર્મણૈવ પ્રણીયતે ॥ ૧૭॥

કર્મણેન્દ્રો ભવેજ્જીવો બ્રહ્મપુત્રઃ સ્વકર્મણા ।
સ્વકર્મણા હરેર્દાસો જન્માદિરહિતો ભવેત્ ॥ ૧૮॥

સ્વકર્મણા સર્વસિદ્ધિમમરત્વં લભેદ્ ધ્રુવમ્ ।
લભેત્સ્વકર્મણા વિષ્ણોઃ સાલોક્યાદિચતુષ્ટયમ્ ॥ ૧૯॥

સુરત્વં ચ મનુત્વં ચ રાજેન્દ્રત્વં લભેન્નરઃ ।
કર્મણા ચ શિવત્વં ચ ગણેશત્વં તથૈવ ચ ॥ ૨૦॥

કર્મણા ચ મુનીન્દ્રત્વં તપસ્વિત્વં સ્વકર્મણા ।
સ્વકર્મણા ક્ષત્રિયત્વં વૈશ્યત્વં ચ સ્વકર્મણા ॥ ૨૧॥

કર્મણૈવ ચ મ્લેચ્છત્વં લભતે નાત્ર સંશયઃ ।
સ્વકર્મણા જઙ્ગમત્વં શૈલત્વં ચ સ્વકર્મણા ॥ ૨૨॥

કર્મણા રાક્ષસત્વં ચ કિન્નરત્વં સ્વકર્મણા ।
કર્મણૈવાધિપત્યં ચ વૃક્ષત્વં ચ સ્વકર્મણા ॥ ૨૩॥

કર્મણૈવ પશુત્વં ચ વનજીવી સ્વકર્મણા ।
કર્મણા ક્ષુદ્રજન્તુત્વં કૃમિત્વં ચ સ્વકર્મણા ॥ ૨૪॥

દૈતેયત્વં દાનવત્વમસુરત્વં સ્વકર્મણા ।

ઇત્યેતદુક્ત્વા સાવિત્રીં વિરરામ સ વૈ યમઃ ॥ ૨૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે સાવિત્ર્યુપાખ્યાને
યમસાવિત્રીસંવાદવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૯.૨૭॥

## ૯.૨૮ અષ્ટાવિંશોઽધ્યાયઃ । સાવિત્ર્યુપાખ્યાને યમસાવિત્રીસંવાદવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
યમસ્ય વચનં શ્રુત્વા સાવિત્રી ચ પતિવ્રતા ।
તુષ્ટાવ પરયા ભક્ત્યા તમુવાચ મનસ્વિની ॥ ૧॥

સાવિત્ર્યુવાચ ।
કિં કર્મ તદ્ભવેત્કેન કો વા તદ્ધેતુરેવ ચ ।
કો વા દેહી ચ દેહઃ કઃ કો વાત્ર કર્મકારકઃ ॥ ૨॥

કિં વા જ્ઞાનં ચ બુદ્ધિઃ કા કો વા પ્રાણઃ શરીરિણામ્ ।
કાનીન્દ્રિયાણિ કિં તેષાં લક્ષણં દેવતાશ્ચ કાઃ ॥ ૩॥

ભોક્તા ભોજયિતા કો વા કો વા ભોગશ્ચ નિષ્કૃતિઃ ।
કો જીવઃ પરમાત્મા કસ્તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૪॥

ધર્મ ઉવાચ ।
વેદપ્રણિહિતો ધર્મઃ કર્મ યન્મઙ્ગલં પરમ્ ।
અવૈદિકં તુ યત્કર્મ તદેવાશુભમેવ ચ ॥ ૫॥

અહૈતુકી દેવસેવા સઙ્કલ્પરહિતા સતી ।
કર્મનિર્મૂલરૂપા ચ સા એવ પરભક્તિદા ॥ ૬॥

કો વા કર્મફલં ભુઙ્ક્તે કો વા નિર્લિપ્ત એવ ચ ।
બ્રહ્મભક્તો યો નરશ્ચ સ ચ મુક્તઃ શ્રુતઃ શ્રુતૌ ॥ ૭॥

જન્મમૃત્યુજરાવ્યાધિશોકભીતિવિવર્જિતઃ ।
ભક્તિશ્ચ દ્વિવિધા સાધ્વિ શ્રુત્યુક્તા સર્વસમ્મતા ॥ ૮॥

નિર્વાણપદદાત્રી ચ હરિરૂપપ્રદા નૃણામ્ ।
હરિરૂપસ્વરૂપાં ચ ભક્તિં વાઞ્છન્તિ વૈષ્ણવાઃ ॥ ૯॥

અન્યે નિર્વાણમિચ્છન્તિ યોગિનો બ્રહ્મવિત્તમાઃ ।

કર્મણો બીજરૂપશ્ચ સતતં તત્ફલપ્રદઃ ॥ ૧૦॥

કર્મરૂપશ્ચ ભગવાન્પરાત્મા પ્રકૃતિઃ પરા ।
સોઽપિ તદ્ધેતુરૂપશ્ચ દેહો નશ્વર એવ ચ ॥ ૧૧॥

પૃથિવી વાયુરાકાશો જલં તેજસ્તથૈવ ચ ।
એતાનિ સૂત્રરૂપાણિ સૃષ્ટિરૂપવિધૌ સતઃ ॥ ૧૨॥

કર્મકર્તા ચ દેહી ચ આત્મા ભોજયિતા સદા ।
ભોગો વિભવભેદશ્ચ નિષ્કૃતિર્મુક્તિરેવ ચ ॥ ૧૩॥

સદસદ્ભેદબીજં ચ જ્ઞાનં નાનાવિધં ભવેત્ ।
વિષયાણાં વિભાગાનાં ભેદિ બીજં ચ કીર્તિતમ્ ॥ ૧૪॥

બુદ્ધિર્વિવેચના સા ચ જ્ઞાનબીજં શ્રુતૌ શ્રુતમ્ ।
વાયુભેદાશ્ચ પ્રાણાશ્ચ બલરૂપાશ્ચ દેહિનામ્ ॥ ૧૫॥

ઇન્દ્રિયાણાં ચ પ્રવરમીશ્વરાંશમનૂહકમ્ ।
પ્રેરકં કર્મણાં ચૈવ દુર્નિવાર્યં ચ દેહિનામ્ ॥ ૧૬॥

અનિરૂપ્યમદૃશ્યં ચ જ્ઞાનભેદો મનઃ સ્મૃતમ્ ।
લોચનં શ્રવણં ઘ્રાણં ત્વક્ચ રસનમિન્દ્રિયમ્ ॥ ૧૭॥

અઙ્ગિનામઙ્ગરૂપં ચ પ્રેરકં સર્વકર્મણામ્ ।
રિપુરૂપં મિત્રરૂપં સુખરૂપં ચ દુઃખદમ્ ॥ ૧૮॥

સૂર્યો વાયુશ્ચ પૃથિવી બ્રહ્માદ્યા દેવતાઃ સ્મૃતાઃ ।
પ્રાણદેહાદિભૃદ્યો હિ સ જીવઃ પરિકીર્તિતઃ ॥ ૧૯॥

પરમં વ્યાપકં બ્રહ્મ નિર્ગુણઃ પ્રકૃતેઃ પરઃ ।
કારણં કારણાનાં ચ પરમાત્મા સ ઉચ્યતે ॥ ૨૦॥

ઇત્યેવં કથિતં સર્વં ત્વયા પૃષ્ટં યથાગમમ્ ।
જ્ઞાનિનાં જ્ઞાનરૂપં ચ ગચ્છ વત્સે યથાસુખમ્ ॥ ૨૧॥

સાવિત્ર્યુવાચ ।
ત્યક્ત્વા ક્વ યામિ કાન્તં વા ત્વાં વા જ્ઞાનાર્ણવં ધ્રુવમ્ ।
યદ્યત્કરોમિ પ્રશ્નં ચ તદ્ભવાન્વક્તુમર્હતિ ॥ ૨૨॥

કાં કાં યોનિં યાતિ જીવઃ કર્મણા કેન વા પુનઃ ।
કેન વા કર્મણા સ્વર્ગં કેન વા નરકં પિતઃ ॥ ૨૩॥

કેન વા કર્મણા મુક્તિઃ કેન ભક્તિર્ભવેદ્ ગુરૌ ।
કેન વા કર્મણા યોગી રોગી વા કેન કર્મણા ॥ ૨૪॥

કેન વા દીર્ઘજીવી ચ કેનાલ્પાયુશ્ચ કર્મણા ।
કેન વા કર્મણા દુઃખી સુખી વા કેન કર્મણા ॥ ૨૫॥

અઙ્ગહીનશ્ચ કાણશ્ચ બધિરઃ કેન કર્મણા ।
અન્ધો વા પઙ્ગુરપિ વા પ્રમત્તઃ કેન કર્મણા ॥ ૨૬॥

ક્ષિપ્તોઽતિલુબ્ધકશ્ચૌરઃ કેન વા કર્મણા ભવેત્ ।
કેન સિદ્ધિમવાપ્નોતિ સાલોક્યાદિચતુષ્ટયમ્ ॥ ૨૭॥

કેન વા બ્રાહ્મણત્વં ચ તપસ્વિત્વં ચ કેન વા ।
સ્વર્ગભોગાદિકં કેન વૈકુણ્ઠં કેન કર્મણા ॥ ૨૮॥

ગોલોકં કેન વા બ્રહ્મન્ સર્વોત્કૃષ્ટં નિરામયમ્ ।
નરકો વા કતિવિધઃ કિંસઙ્ખ્યો નામ કિં ચ વા ॥ ૨૯॥

કો વા કં નરકં યાતિ કિયન્તં તેષુ તિષ્ઠતિ ।
પાપિનાં કર્મણા કેન કો વા વ્યાધિઃ પ્રજાયતે ।
યદ્યત્પ્રિયં મયા પૃષ્ટં તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૩૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસવાદે સાવિત્ર્યુપાખ્યાને
યમસાવિત્રીસંવાદવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૯.૨૮॥

## ૯.૨૯ એકોનત્રિંશોઽધ્યાયઃ । સાવિત્ર્યુપાખ્યાને કર્મવિપાકવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
સાવિત્રીવચનં શ્રુત્વા જગામ વિસ્મયં યમઃ ।
પ્રહસ્ય વક્તુમારેભે કર્મપાકં તુ જીવિનામ્ ॥ ૧॥

ધર્મ ઉવાચ ।
કન્યા દ્વાદશવર્ષીયા વત્સે ત્વં વયસાધુના ।
જ્ઞાનં તે પૂર્વવિદુષાં જ્ઞાનિનાં યોગિનાં પરમ્ ॥ ૨॥

સાવિત્રીવરદાનેન ત્વં સાવિત્રી કલા સતી ।

પ્રાપ્તા પુરા ભૂભૃતા ચ તપસા તત્સમા સુતે ॥ ૩॥

યથા શ્રીઃ શ્રીપતેઃ ક્રોડે ભવાની ચ ભવોરસિ ।
યથાદિતિઃ કશ્યપે ચ યથાહલ્યા ચ ગૌતમે ॥ ૪॥

યથા શચી મહેન્દ્રે ચ યથા ચન્દ્રે ચ રોહિણી ।
યથા રતિઃ કામદેવે યથા સ્વાહા હુતાશને ॥ ૫॥

યથા સ્વધા ચ પિતૃષુ યથા સન્ધ્યા દિવાકરે ।
વરુણાની ચ વરુણે યજ્ઞે ચ દક્ષિણા યથા ॥ ૬॥

યથા વરાહે પૃથિવી દેવસેના ચ કાર્તિકે ।
સૌભાગ્યા સુપ્રિયા ત્વં ચ તથા સત્યવતઃ પ્રિયે ॥ ૭॥

અયં તુભ્યં વરો દત્તોઽપ્યપરં ચ યથેપ્સિતમ્ ।
શ‍ૃણુ દેવિ મહાભાગે દદામિ સકલેપ્સિતમ્ ॥ ૮॥

સાવિત્ર્યુવાચ ।
સત્યવત ઔરસાનાં પુત્રાણાં શતકં મમ ।
ભવિષ્યતિ મહાભાગ વરમેતન્મદીપ્સિતમ્ ॥ ૯॥

મત્પિતુઃ પુત્રશતકં શ્વશુરસ્ય ચ ચક્ષુષી ।
રાજ્યલાભો ભવત્વેવં વરમેતન્મદીપ્સિતમ્ ॥ ૧૦॥

અન્તે સત્યવતા સાર્ધં યાસ્યામિ હરિમન્દિરમ્ ।
સમતીતે લક્ષવર્ષે દેહીદં મે જગત્પ્રભો ॥ ૧૧॥

જીવકર્મવિપાકં ચ શ્રોતું કૌતૂહલં મમ ।
વિશ્વનિસ્તારબીજં ચ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૧૨॥

ધર્મરાજ ઉવાચ ।
ભવિષ્યતિ મહાસાધ્વિ સર્વં માનસિકં તવ ।
જીવકર્મવિપાકં ચ કથયામિ નિશામય ॥ ૧૩॥

શુભાનામશુભાનાં ચ કર્મણાં જન્મ ભારતે ।
પુણ્યક્ષેત્રે ચ નાન્યત્ર સર્વં ચ ભુઞ્જતે જનાઃ ॥ ૧૪॥

સુરા દૈત્યા દાનવાશ્ચ ગન્ધર્વા રાક્ષસાદયઃ ।
નરાશ્ચ કર્મજનકા ન સર્વે જીવિનઃ સતિ ॥ ૧૫॥

વિશિષ્ટજીવિનઃ કર્મ ભુઞ્જતે સર્વયોનિષુ ।

શુભાશુભં ચ સર્વત્ર સ્વર્ગેષુ નરકેષુ ચ ॥ ૧૬॥

વિશેષતો જીવિનશ્ચ ભ્રમન્તે સર્વયોનિષુ ।
શુભાશુભં ભુઞ્જતે ચ કર્મ પૂર્વાર્જિતં પરમ્ ॥ ૧૭॥

શુભેન કર્મણા યાતિ સ્વર્લોકાદિકમેવ ચ ।
કર્મણા ચાશુભેનૈવ ભ્રમન્તિ નરકેષુ ચ ॥ ૧૮॥

કર્મનિર્મૂલને ભક્તિઃ સા ચોક્તા દ્વિવિધા સતિ ।
નિર્વાણરૂપા ભક્તિશ્ચ બ્રહ્મણઃ પ્રકૃતેરિહ ॥ ૧૯॥

રોગી કુકર્મણા જીવશ્ચારોગી શુભકર્મણા ।
દીર્ઘજીવી ચ ક્ષીણાયુઃ સુખી દુઃખી ચ કર્મણા ॥ ૨૦॥

અન્ધાદયશ્ચાઙ્ગહીનાઃ કર્મણા કુત્સિતેન ચ ।
સિદ્ધ્યાદિકમવાપ્નોતિ સર્વોત્કૃષ્ટેન કર્મણા ॥ ૨૧॥

સામાન્યં કથિતં દેવિ વિશેષં શ ૃણુ સુન્દરિ ।
સુદુર્લભં સુગોપ્યં ચ પુરાણેષુ સ્મૃતિષ્વપિ ॥ ૨૨॥

દુર્લભા માનુષી જાતિઃ સર્વજાતિષુ ભારતે ।
સર્વેભ્યો બ્રાહ્મણઃ શ્રેષ્ઠઃ પ્રશસ્તઃ સર્વકર્મસુ ॥ ૨૩॥

બ્રહ્મનિષ્ઠો દ્વિજશ્ચૈવ ગરીયાન્ ભારતે સતિ ।
નિષ્કામશ્ચ સકામશ્ચ બ્રાહ્મણો દ્વિવિધઃ સતિ ॥ ૨૪॥

સકામાજ્જ પ્રધાનશ્ચ નિષ્કામો ભક્ત એવ ચ ।
કર્મભોગી સકામશ્ચ નિષ્કામો નિરુપદ્રવઃ ॥ ૨૫॥

સ યાતિ દેહં ત્યક્ત્વા ચ પદં યત્તન્નિરામયમ્ ।
પુનરાગમનં નાસ્તિ તેષાં નિષ્કામિનાં સતિ ॥ ૨૬॥

સેવન્તે દ્વિભુજં કૃષ્ણં પરમાત્માનમીશ્વરમ્ ।
ગોલોકં પ્રતિ તે ભક્તા દિવ્યરૂપવિધારિણઃ ॥ ૨૭॥

સકામિનો વૈષ્ણવાશ્ચ ગત્વા વૈકુણ્ઠમેવ ચ ।
ભારતં પુનરાયાન્તિ તેષાં જન્મ દ્વિજાતિષુ ॥ ૨૮॥

કાલે ગતે ચ નિષ્કામા ભવન્ત્યેવ ક્રમેણ ચ ।
ભક્તિં ચ નિર્મલાં તેભ્યો દાસ્યામિ નિશ્ચિતં પુનઃ ॥ ૨૯॥

બ્રાહ્મણા વૈષ્ણવાશ્ચૈવ સકામાઃ સર્વજન્મસુ ।
ન તેષાં નિર્મલા બુદ્ધિર્વિષ્ણુભક્તિવિવર્જિતાઃ ॥ ૩૦॥

તીર્થાશ્રિતા દ્વિજા યે ચ તપસ્યાનિરતાઃ સતિ ।
તે યાન્તિ બ્રહ્મલોકં ચ પુનરાયાન્તિ ભારતે ॥ ૩૧॥

સ્વધર્મનિરતા યે ચ તીર્થાન્યત્રનિવાસિનઃ ।
વ્રજન્તિ તે સત્યલોકં પુનરાયાન્તિ ભારતે ॥ ૩૨॥

સ્વધર્મનિરતા વિપ્રાઃ સૂર્યભક્તાશ્ચ ભારતે ।
વ્રજન્તિ તે સૂર્યલોકં પુનરાયાન્તિ ભારતે ॥ ૩૩॥

મૂલપ્રકૃતિભક્તા યે નિષ્કામા ધર્મચારિણઃ ।
મણિદ્વીપં પ્રયાન્ત્યેવ પુનરાવૃત્તિવર્જિતમ્ ॥ ૩૪॥

સ્વધર્મે નિરતા ભક્તાઃ શૈવાઃ શાક્તાશ્ચ ગાણપાઃ ।
તે યાન્તિ શિવલોકં ચ પુનરાયાન્તિ ભારતે ॥ ૩૫॥

યે વિપ્રા અન્યદેવેજ્યાઃ સ્વધર્મનિરતાઃ સતિ ।
તે યાન્તિ સર્વલોકં ચ પુનરાયાન્તિ ભારતે ॥ ૩૬॥

હરિભક્તાશ્ચ નિષ્કામાઃ સ્વધર્મનિરતા દ્વિજાઃ ।
તે ચ યાન્તિ હરેર્લોકં ક્રમાદ્ભક્તિબલાદહો ॥ ૩૭॥

સ્વધર્મરહિતા વિપ્રા દેવાન્યસેવનાઃ સદા ।
ભ્રષ્ટાચારાશ્ચ કામાશ્ચ તે યાન્તિ નરકં ધ્રુવમ્ ॥ ૩૮॥

સ્વધર્મનિરતા એવ વર્ણાશ્ચત્વાર એવ ચ ।
ભવન્ત્યેવ શુભસ્યૈવ કર્મણઃ ફલભોગિનઃ ॥ ૩૯॥

સ્વકર્મરહિતા યે ચ નરકં યાન્તિ તે ધ્રુવમ્ ।
ભારતે ન ભવન્ત્યેવ કર્મણઃ ફલભોગિનઃ ॥ ૪૦॥

સ્વધર્મનિરતા એવ વર્ણાશ્ચત્વાર એવ ચ ।
સ્વધર્મનિરતા વિપ્રાઃ સ્વધર્મનિરતાય ચ ॥ ૪૧॥

કન્યાં દદતિ વિપ્રાય ચન્દ્રલોકં પ્રયાન્તિ તે ।
વસન્તિ તત્ર તે સાધ્વિ યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૪૨॥

સાલઙ્કૃતાયા દાનેન દ્વિગુણં ફલમુચ્યતે ।
સકામા યાન્તિ તલ્લોકં ન નિષ્કામાશ્ચ સાધવઃ ॥ ૪૩॥

તે પ્રયાન્તિ વિષ્ણુલોકં ફલસઙ્ઘાતવર્જિતાઃ ।
ગવ્યં ચ રજતં સ્વર્ણં વસ્ત્રં સર્પિઃ ફલં જલમ્ ॥ ૪૪॥

યે દદત્યેવ વિપ્રેભ્યશ્ચન્દ્રલોકં પ્રયાન્તિ તે ।
વસન્તિ તે ચ તલ્લોકે યાવન્મન્વન્તરં સતિ ॥ ૪૫॥

સુચિરાત્સુચિરં વાસં કુર્વન્તિ તેન તે જનાઃ ।
યે દદતિ સુવર્ણાંશ્ચ ગાશ્ચ તામ્રાદિકં સતિ ॥ ૪૬॥

તે યાન્તિ સૂર્યલોકં ચ શુચયે બ્રાહ્મણાય ચ ।
વસન્તિ તે તત્ર લોકે વર્ષાણામયુતં સતિ ॥ ૪૭॥

વિપુલે સુચિરં વાસં કુર્વન્તિ ચ નિરામયાઃ ।
દદાતિ ભૂમિં વિપ્રેભ્યો ધનાનિ વિપુલાનિ ચ ॥ ૪૮॥

સ યાતિ વિષ્ણુલોકં ચ શ્વેતદ્વીપં મનોહરમ્ ।
તત્રૈવ નિવસત્યેવ યાવચ્ચન્દ્રદિવાકરૌ ॥ ૪૯॥

વિપુલે વિપુલં વાસં કરોતિ પુણ્યવાન્મુને ।
ગૃહં દદતિ વિપ્રાય યે જના ભક્તિપૂર્વકમ્ ॥ ૫૦॥

તે યાન્તિ વિષ્ણુલોકં ચ સુચિરં સુખદાયકમ્ ।
ગૃહરેણુપ્રમાણં ચ વિષ્ણુલોકે મહત્તમે ॥ ૫૧॥

વિપુલે વિપુલં વાસં કુર્વન્તિ માનવાઃ સતિ ।
યસ્મૈ યસ્મૈ ચ દેવાય યો દદાતિ ગૃહં નરઃ ॥ ૫૨॥

સ યાતિ તસ્ય લોકં ચ રેણુમાનાબ્દમેવ ચ ।
સૌધે ચતુર્ગુણં પુણ્યં દેશે શતગુણં ફલમ્ ॥ ૫૩॥

પ્રકૃષ્ટે દ્વિગુણં તસ્માદિત્યાહ કમલોદ્ભવઃ ।
યો દદાતિ તડાગં ચ સર્વપાપાપનુત્તયે ॥ ૫૪॥

સ યાતિ જનલોકં ચ રેણુમાનાબ્દમેવ ચ ।
વાપ્યાં ફલં દશગુણં પ્રાપ્નોતિ માનવઃ સદા ॥ ૫૫॥

સ તુ વાપીપ્રદાનેન તડાગસ્ય ફલં લભેત્ ।
ધનુશ્ચતુઃસહસ્રેણ દર્શ્યમાનેન નિશ્ચિતમ્ ॥ ૫૬॥

ન્યૂના વા તાવતી પ્રસ્થે સા વાપી પરિકીર્તિતા ।

દશવાપીસમા કન્યા યદિ પાત્રે પ્રદીયતે ॥ ૫૭॥

ફલં દદાતિ દ્વિગુણં યદિ સાલઙ્કૃતા ભવેત્ ।
યત્ફલં ચ તડાગે ચ તદુદ્ધારે ચ તત્ફલમ્ ॥ ૫૮॥

વાપ્યાશ્ચ પઙ્કોદ્ધરણે વાપીતુલ્યફલં લભેત્ ।
અશ્વત્થવૃક્ષમારોપ્ય પ્રતિષ્ઠાં યઃ કરોતિ ચ ॥ ૫૯॥

સ પ્રયાતિ તપોલોકં વર્ષાણામયુતં સતિ ।
પુષ્પોદ્યાનં યો દદાતિ સાવિત્રિ સર્વભૂતયે ॥ ૬૦॥

સ વસેદ્ ધ્રુવલોકે ચ વર્ષાણામયુતં ધ્રુવમ્ ।
યો દદાતિ વિમાનં ચ વિષ્ણવે ભારતે સતિ ॥ ૬૧॥

વિષ્ણુલોકે વસેત્સોઽપિ યાવન્મન્વન્તરં પરમ્ ।
ચિત્રયુક્તે ચ વિપુલે ફલં તસ્ય ચતુર્ગુણમ્ ॥ ૬૨॥

તસ્યાર્ધં શિબિકાદાને ફલમેવ લભેદ્ ધ્રુવમ્ ।
યો દદાતિ ભક્તિયુક્તો હરયે દોલમન્દિરમ્ ॥ ૬૩॥

વિષ્ણુલોકે વસેત્સોઽપિ યાવન્મન્વન્તરં શતમ્ ।
રાજમાર્ગં સૌધયુક્તં યઃ કરોતિ પતિવ્રતે ॥ ૬૪॥

વર્ષાણામયુતં સોઽપિ શક્રલોકે મહીયતે ।
બ્રાહ્મણેભ્યોઽથ દેવેભ્યો દાને સમફલં લભેત્ ॥ ૬૫॥

યદ્ધિ દત્તં ચ તદ્ભુઙ્ક્તે ન દત્તં નોપતિષ્ઠતે ।
ભુક્ત્વા સ્વર્ગાદિજં સૌખ્યં પુણ્યવાઞ્જન્મ ભારતે ॥ ૬૬॥

લભેદ્વિપ્રકુલેષ્વેવ ક્રમેણૈવોત્તમાદિષુ ।
ભારતે પુણ્યવાન્વિપ્રો ભુક્ત્વા સ્વર્ગાદિકં ફલમ્ ॥ ૬૭॥

પુનઃ સોઽપિ ભવેદ્વિપ્રશ્ચૈવં ચ ક્ષત્રિયાદયઃ ।
ક્ષત્રિયો વાથ વૈશ્યો વા કલ્પકોટિશતેન ચ ॥ ૬૮॥

તપસા બ્રાહ્મણત્વં ચ ન પ્રાપ્નોતિ શ્રુતૌ શ્રુતમ્ ।
નાભુક્તં ક્ષીયતે કર્મ કલ્પકોટિશતૈરપિ ॥ ૬૯॥

અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ।
દેવતીર્થસહાયેન કાયવ્યૂહેન શુધ્યતિ ।
એતત્તે કથિતં કિઞ્ચિત્ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૭૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે સાવિત્ર્યુપાખ્યાને
કર્મવિપાકવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૯.૨૯॥

## ૯.૩૦ ત્રિંશોઽધ્યાયઃ । યમેન કર્મવિપાકકથનમ્ ।

સાવિત્ર્યુવાચ ।
પ્રયાન્તિ સ્વર્ગમન્યં ચ યેનૈવ કર્મણા યમ ।
માનવાઃ પુણ્યવન્તશ્ચ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૧॥

ધર્મરાજ ઉવાચ ।
અન્નદાનં ચ વિપ્રાય યઃ કરોતિ ચ ભારતે ।
અન્નપ્રમાણવર્ષં ચ શિવલોકે મહીયતે ॥ ૨॥

અન્નદાનં મહાદાનમન્યેભ્યોઽપિ કરોતિ યઃ ।
અન્નદાનપ્રમાણં ચ શિવલોકે મહીયતે ॥ ૩॥

અન્નદાનાત્પરં દાનં ન ભૂતં ન ભવિષ્યતિ ।
નાત્ર પાત્રપરીક્ષા સ્યાન્ન કાલનિયમઃ ક્વચિત્ ॥ ૪॥

દેવેભ્યો બ્રાહ્મણેભ્યો વા દદાતિ ચાસનં યદિ ।
મહીયતે વિષ્ણુલોકે વર્ષાણામયુતં સતિ ॥ ૫॥

યો દદાતિ ચ વિપ્રાય દિવ્યાં ધેનું પયસ્વિનીમ્ ।
તલ્લોમમાનવર્ષં ચ વિષ્ણુલોકે મહીયતે ॥ ૬॥

ચતુર્ગુણં પુણ્યદિને તીર્થે શતગુણં ફલમ્ ।
દાનં નારાયણક્ષેત્રે ફલં કોટિગુણં ભવેત્ ॥ ૭॥

ગાં યો દદાતિ વિપ્રાય ભારતે ભક્તિપૂર્વકમ્ ।
વર્ષાણામયુતં ચૈવ ચન્દ્રલોકે મહીયતે ॥ ૮॥

યશ્ચોભયમુખીદાનં કરોતિ બ્રાહ્મણાય ચ ।
તલ્લોમમાનવર્ષં ચ વિષ્ણુલોકે મહીયતે ॥ ૯॥

યો દદાતિ બ્રાહ્મણાય શ્વેતચ્છત્રં મનોહરમ્ ।
વર્ષાણામયુતં સોઽપિ મોદતે વરુણાલયે ॥ ૧૦॥

વિપ્રાય પીડિતાઙ્ગાય વસ્ત્રયુગ્મં દદાતિ ચ ।
મહીયતે વાયુલોકે વર્ષાણામયુતં સતિ ॥ ૧૧॥

યો દદાતિ બ્રાહ્મણાય શાલગ્રામં સવસ્ત્રકમ્ ।
મહીયતે સ વૈકુણ્ઠે યાવચ્ચન્દ્રદિવાકરૌ ॥ ૧૨॥

યો દદાતિ બ્રાહ્મણાય દિવ્યાં શય્યાં મનોહરામ્ ।
મહીયતે ચન્દ્રલોકે યાવચ્ચન્દ્રદિવાકરૌ ॥ ૧૩॥

યો દદાતિ પ્રદીપં ચ દેવેભ્યો બ્રાહ્મણાય ચ ।
યાવન્મન્વન્તરં સોઽપિ વહ્નિલોકે મહીયતે ॥ ૧૪॥

કરોતિ ગજદાનં ચ યદિ વિપ્રાય ભારતે ।
યાવદિન્દ્રો નરસ્તાવદિન્દ્રસ્યાર્ધાસને વસેત્ ॥ ૧૫॥

ભારતે યોઽશ્વદાનં ચ કરોતિ બ્રાહ્મણાય ચ ।
મોદતે વારુણે લોકે યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૧૬॥

પ્રકૃષ્ટાં શિબિકાં યો હિ દદાતિ બ્રાહ્મણાય ચ ।
મોદતે વારુણે લોકે યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૧૭॥

પ્રકૃષ્ટાં વાટિકા યો હિ દદાતિ બ્રાહ્મણાય ચ ।
મહીયતે વાયુલોકે યાવન્મન્વન્તરં સતિ ॥ ૧૮॥

યો દદાતિ ચ વિપ્રાય વ્યજનં શ્વેતચામરમ્ ।
મહીયતે વાયુલોકે વર્ષાણામયુતં ધ્રુવમ્ ॥ ૧૯॥

ધાન્યં રત્નં યો દદાતિ ચિરઞ્જીવી ભવેત્સુધીઃ ।
દાતા ગ્રહીતા તૌ દ્વૌ ચ ધ્રુવં વૈકુણ્ઠગામિનૌ ॥ ૨૦॥

સતતં શ્રીહરેર્નામ ભારતે યો જપેન્નરઃ ।
સ એવ ચિરજીવી ચ તતો મૃત્યુઃ પલાયતે ॥ ૨૧॥

યો નરો ભારતે વર્ષે દોલનં કારયેત્સુધીઃ ।
પૂર્ણિમારજનીશેષે જીવન્મુક્તો ભવેન્નરઃ ॥ ૨૨॥

ઇહલોકે સુખં ભુક્ત્વા યાત્યન્તે વિષ્ણુમન્દિરમ્ ।
નિશ્ચિતં નિવસેત્તત્ર શતમન્વન્તરાવધિ ॥ ૨૩॥

ફલમુત્તરફલ્ગુન્યાં તતોઽપિ દ્વિગુણં ભવેત્ ।
કલ્પાન્તજીવી સ ભવેદિત્યાહ કમલોદ્ભવઃ ॥ ૨૪॥

તિલદાનં બ્રાહ્મણાય યઃ કરોતિ ચ ભારતે ।
તિલપ્રમાણવર્ષં ચ મોદતે શિવમન્દિરે ॥ ૨૫॥

તતઃ સુયોનિં સમ્પ્રાપ્ય ચિરઞ્જીવી ભવેત્સુખી ।
તામ્રપાત્રસ્ય દાનેન દ્વિગુણં ચ ફલં લભેત્ ॥ ૨૬॥

સાલઙ્કૃતાં ચ ભોગ્યાં ચ સવસ્ત્રાં સુન્દરીં પ્રિયામ્ ।
યો દદાતિ બ્રાહ્મણાય ભારતે ચ પતિવ્રતામ્ ॥ ૨૭॥

મહીયતે ચન્દ્રલોકે યાવદિન્દ્રાશ્ચતુર્દશ ।
તત્ર સ્વર્વેશ્યયા સાર્ધં મોદતે ચ દિવાનિશમ્ ॥ ૨૮॥

તતો ગન્ધર્વલોકે ચ વર્ષાણામયુતં ધ્રુવમ્ ।
દિવાનિશં કૌતુકેન ચોર્વશ્યા સહ મોદતે ॥ ૨૯॥

તતો જન્મસહસ્રં ચ પ્રાપ્નોતિ સુન્દરીં પ્રિયામ્ ।
સતીં સૌભાગ્યયુક્તાં ચ કોમલાં પ્રિયવાદિનીમ્ ॥ ૩૦॥

પ્રદદાતિ ફલં ચારુ બ્રાહ્મણાય ચ યો નરઃ ।
ફલપ્રમાણવર્ષં ચ શક્રલોકે મહીયતે ॥ ૩૧॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય લભતે સુતમુત્તમમ્ ।
સફલાનાં ચ વૃક્ષાણાં સહસ્રં ચ પ્રશંસિતમ્ ॥ ૩૨॥

કેવલં ફલદાનં વા બ્રાહ્મણાય દદાતિ ચ ।
સુચિરં સ્વર્ગવાસં ચ કૃત્વા યાતિ ચ ભારતે ॥ ૩૩॥

નાનાદ્રવ્યસમાયુક્તં નાનાસસ્યસમન્વિતમ્ ।
દદાતિ યશ્ચ વિપ્રાય ભારતે વિપુલં ગૃહમ્ ॥ ૩૪॥

સુરલોકે વસેત્સોઽપિ યાવન્મન્વન્તરં શતમ્ ।
તતઃ સુયોનિં સમ્પ્રાપ્ય સ મહાધનવાન્ભવેત્ ॥ ૩૫॥

યો નરઃ સસ્યસંયુક્તાં ભૂમિં ચ રુચિરાં સતિ ।
દદાતિ ભક્ત્યા વિપ્રાય પુણ્યક્ષેત્રે ચ ભારતે ॥ ૩૬॥

મહીયતે ચ વૈકુણ્ઠે મન્વન્તરશતં ધ્રુવમ્ ।
પુનઃ સુયોનિં સમ્પ્રાપ્ય મહાંશ્ચ ભૂમિપો ભવેત્ ॥ ૩૭॥

તં ન ત્યજતિ ભૂમિશ્ચ જન્મનાં શતકં પરમ્ ।

શ્રીમાંશ્ચ ધનવાંશ્ચૈવ પુત્રવાંશ્ચ પ્રજેશ્વરઃ ॥ ૩૮॥

યો વ્રજં ચ પ્રકૃષ્ટં ચ ગ્રામં દદ્યાદ્ દ્વિજાય ચ ।
લક્ષમન્વન્તરં ચૈવ વૈકુણ્ઠે સ મહીયતે ॥ ૩૯॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય ગ્રામલક્ષસમન્વિતમ્ ।
ન જહાતિ ચ તં પૃથ્વી જન્મનાં લક્ષમેવ ચ ॥ ૪૦॥

સુપ્રજં ચ પ્રકૃષ્ટં ચ પક્વસસ્યસમન્વિતમ્ ।
નાનાપુષ્કરિણીવૃક્ષફલવલ્લીસમન્વિતમ્ ॥ ૪૧॥

નગરં યશ્ચ વિપ્રાય દદાતિ ભારતે ભુવિ ।
મહીયતે સ કૈલાસે દશલક્ષેન્દ્રકાલકમ્ ॥ ૪૨॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય રાજેન્દ્રો ભારતે ભવેત્ ।
નગરાણાં ચ નિયુતં સ લભેન્નાત્ર સંશયઃ ॥ ૪૩॥

ધરા તં ન જહાત્યેવ જન્મનામયુતં ધ્રુવમ્ ।
પરમૈશ્વર્યનિયુતો ભવેદેવ મહીતલે ॥ ૪૪॥

નગરાણાં ચ શતકં દેશં યો હિ દ્વિજાતયે ।
સુપ્રકૃષ્ટં મધ્યકૃષ્ટં પ્રજાયુક્તં દદાતિ ચ ॥ ૪૫॥

વાપીતડાગસંયુક્તં નાનાવૃક્ષસમન્વિતમ્ ।
મહીયતે સ વૈકુણ્ઠે કોટિમન્વન્તરાવધિ ॥ ૪૬॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય જમ્બુદ્વીપપતિર્ભવેત્ ।
પરમૈશ્વર્યસંયુક્તો યથા શક્રસ્તથા ભુવિ ॥ ૪૭॥

મહી તં ન જહાત્યેવ જન્મનાં કોટિમેવ ચ ।
કલ્પાન્તજીવી સ ભવેદ્રાજરાજેશ્વરો મહાન્ ॥ ૪૮॥

સ્વાધિકારં સમગ્રં ચ યો દદાતિ દ્વિજાતયે ।
ચતુર્ગુણં ફલં ચાન્તે ભવેત્તસ્ય ન સંશયઃ ॥ ૪૯॥

જમ્બુદ્વીપં યો દદાતિ બ્રાહ્મણાય તપસ્વિને ।
ફલં શતગુણં ચાન્તે ભવેત્તસ્ય ન સંશયઃ ॥ ૫૦॥

જમ્બુદ્વીપમહીદાતુઃ સર્વતીર્થાનિ સેવિતુઃ ।
સર્વેષાં તપસાં કર્તુઃ સર્વેષાં વાસકારિણઃ ॥ ૫૧॥

સર્વદાનપ્રદાતુશ્ચ સર્વસિદ્ધેશ્વરસ્ય ચ ।
અસ્ત્યેવ પુનરાવૃત્તિર્ન ભક્તસ્ય મહેશિતુઃ ॥ ૫૨॥

અસઙ્ખ્યબ્રહ્મણાં પાતં પશ્યન્તિ ભુવનેશિતુઃ ।
નિવસન્તિ મણિદ્વીપે શ્રીદેવ્યાઃ પરમે પદે ॥ ૫૩॥

દેવીમન્ત્રોપાસકાશ્ચ વિહાય માનવીં તનુમ્ ।
વિભૂતિં દિવ્યરૂપં ચ જન્મમૃત્યુજરાહરમ્ ॥ ૫૪॥

લબ્ધ્વા દેવ્યાશ્ચ સારૂપ્યં દેવીસેવાં ચ કુર્વતે ।
પશ્યન્તિ તે મણિદ્વીપે સખણ્ડં લોકસઙ્ક્ષયમ્ ॥ ૫૫॥

નશ્યન્તિ દેવાઃ સિદ્ધાશ્ચ વિશ્વાનિ નિખિલાનિ ચ ।
દેવીભક્તા ન નશ્યન્તિ જન્મમૃત્યુજરાહરાઃ ॥ ૫૬॥

કાર્તિકે તુલસીદાનં કરોતિ હરયે ચ યઃ ।
યુગત્રયપ્રમાણં ચ મોદતે હરિમન્દિરે ॥ ૫૭॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય હરિભક્તિં લભેદ્ ધ્રુવમ્ ।
જિતેન્દ્રિયાણાં પ્રવરઃ સ ભવેદ્ભારતે ભુવિ ॥ ૫૮॥

મધ્યે યઃ સ્નાતિ ગઙ્ગાયામરુણોદયકાલતઃ ।
યુગષષ્ટિસહસ્રાણિ મોદતે હરિમન્દિરે ॥ ૫૯॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય વિષ્ણુમન્ત્રં લભેદ્ ધ્રુવમ્ ।
ત્યક્ત્વા ચ માનુષં દેહં પુનર્યાતિ હરેઃ પદમ્ ॥ ૬૦॥

નાસ્તિ તત્પુનરાવૃત્તિર્વૈકુણ્ઠાચ્ચ મહીતલે ।
કરોતિ હરિદાસ્યં ચ તથા સારૂપ્યમેવ ચ ॥ ૬૧॥

નિત્યસ્નાયી ચ ગઙ્ગાયાં સ પૂતઃ સૂર્યવદ્ભુવિ ।
પદે પદેઽશ્વમેધસ્ય લભતે નિશ્ચિતં ફલમ્ ॥ ૬૨॥

તસ્યૈવ પાદરજસા સદ્યઃપૂતા વસુન્ધરા ।
મોદતે સ ચ વૈકુણ્ઠે યાવચ્ચન્દ્રદિવાકરૌ ॥ ૬૩॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય હરિભક્તિં લભેદ્ ધ્રુવમ્ ।
જીવન્મુક્તોઽતિતેજસ્વી તપસ્વિપ્રવરો ભવેત્ ॥ ૬૪॥

સ્વધર્મનિરતઃ શુદ્ધો વિદ્વાંશ્ચ સ જિતેન્દ્રિયઃ ।
મીનકર્કટયોર્મધ્યે ગાઢં તપતિ ભાસ્કરઃ ॥ ૬૫॥

ભારતે યો દદાત્યેવ જલમેવ સુવાસિતમ્ ।
સ મોદતે ચ કૈલાસે યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૬૬॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય રૂપવાંશ્ચ સુખી ભવેત્ ।
શિવભક્તશ્ચ તેજસ્વી વેદવેદાઙ્ગપારગઃ ॥ ૬૭॥

વૈશાખે સક્તુદાનં ચ યઃ કરોતિ દ્વિજાતયે ।
સક્તુરેણુપ્રમાણાબ્દં મોદતે શિવમન્દિરે ॥ ૬૮॥

કરોતિ ભારતે યો હિ કૃષ્ણજન્માષ્ટમીવ્રતમ્ ।
શતજન્મકૃતં પાપં મુચ્યતે નાત્ર સંશયઃ ॥ ૬૯॥

વૈકુણ્ઠે મોદતે સોઽપિ યાવદિન્દ્રાશ્ચતુર્દશ ।
પુનઃ સુયોનિં સમ્પ્રાપ્ય કૃષ્ણે ભક્તિંલભેદ્ ધ્રુવમ્ ॥ ૭૦॥

ઇહૈવ ભારતે વર્ષે શિવરાત્રિં કરોતિ યઃ ।
મોદતે શિવલોકે સ સપ્તમન્વન્તરાવધિ ॥ ૭૧॥

શિવાય શિવરાત્રૌ ચ બિલ્વપત્રં દદાતિ યઃ ।
પત્રમાનયુગં તત્ર મોદતે શિવમન્દિરે ॥ ૭૨॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય શિવભક્તિં લભેદ્ધ્રુવમ્ ।
વિદ્યાવાન્પુત્રવાઞ્છ્રીમાન્ પ્રજાવાન્ભૂમિમાન્ભવેત્ ॥ ૭૩॥

ચૈત્રમાસેઽથવા માઘે શઙ્કરં યોઽર્ચયેદ્વ્રતી ।
કરોતિ નર્તનં ભક્ત્યા વેત્રપાણિર્દિવાનિશમ્ ॥ ૭૪॥

માસં વાપ્યર્ધમાસં વા દશ સપ્ત દિનાનિ ચ ।
દિનમાનયુગં સોઽપિ શિવલોકે મહીયતે ॥ ૭૫॥

શ્રીરામનવમીં યો હિ કરોતિ ભારતે પુમાન્ ।
સપ્તમન્વન્તરં યાવન્મોદતે વિષ્ણુમન્દિરે ॥ ૭૬॥

પુનઃ સુયોનિં સમ્પ્રાપ્ય રામભક્તિં લભેદ્ધ્રુવમ્ ।
જિતેન્દ્રિયાણાં પ્રવરો મહાંશ્ચ ધનવાન્ભવેત્ ॥ ૭૭॥

શારદીયાં મહાપૂજાં પ્રકૃતેર્યઃ કરોતિ ચ ।
મહિષૈશ્છાગલૈર્મેષૈઃ ખડ્ગૈર્ભેકાદિભિઃ સતિ ॥ ૭૮॥

નૈવેદ્યૈરુપહારૈશ્ચ ધૂપદીપાદિભિસ્તથા ।

નૃત્યગીતાદિભિર્વાદ્યૈર્નાનાકૌતુકમઙ્ગલમ્ ॥ ૭૯॥

શિવલોકે વસેત્સોઽપિ સપ્તમન્વન્તરાવધિ ।
પુનઃ સુયોનિં સમ્પ્રાપ્ય નરો બુદ્ધિં ચ નિર્મલામ્ ॥ ૮૦॥

અતુલાં શ્રિયમાપ્નોતિ પુત્રપૌત્રવિવર્ધનીમ્ ।
મહાપ્રભાવયુક્તશ્ચ ગજવાજિસમન્વિતઃ ॥ ૮૧॥

રાજરાજેશ્વરઃ સોઽપિ ભવેદેવ ન સંશયઃ ।
તતઃ શુક્લાષ્ટમીં પ્રાપ્ય મહાલક્ષ્મીં ચ યોઽર્ચયેત્ ॥ ૮૨॥

નિત્યં ભક્ત્યા પક્ષમેકં પુણ્યક્ષેત્રે ચ ભારતે ।
દત્ત્વા તસ્યૈ પ્રકૃષ્ટાનિ ચોપચારાણિ ષોડશ ॥ ૮૩॥

ગોલોકે ચ વસેત્સોઽપિ યાવદિન્દ્રાશ્ચતુર્દશ ।
પુનઃ સુયોનિં સમ્પ્રાપ્ય રાજરાજેશ્વરો ભવેત્ ॥ ૮૪॥

કાર્તિકીપૂર્ણિમાયાં ચ કૃત્વા તુ રાસમણ્ડલમ્ ।
ગોપાનાં શતકં કૃત્વા ગોપીનાં શતકં તથા ॥ ૮૫॥

શિલાયાં પ્રતિમાયાં ચ શ્રીકૃષ્ણં રાધયા સહ ।
ભારતે પૂજયેદ્ભક્ત્યા ચોપચારાણિ ષોડશ ॥ ૮૬॥

ગોલોકે વસતે સોઽપિ યાવદ્વૈ બ્રહ્મણો વયઃ ।
ભારતં પુનરાગત્ય કૃષ્ણે ભક્તિં લભેદ્દૃઢામ્ ॥ ૮૭॥

ક્રમેણ સુદૃઢાં ભક્તિં લબ્ધ્વા મન્ત્રં હરેરહો ।
દેહં ત્યક્ત્વા ચ ગોલોકં પુનરેવ પ્રયાતિ સઃ ॥ ૮૮॥

તતઃ કૃષ્ણસ્ય સારૂપ્યં પાર્ષદપ્રવરો ભવેત્ ।
પુનસ્તત્પતનં નાસ્તિ જરામૃત્યુહરો ભવેત્ ॥ ૮૯॥

શુક્લાં વાપ્યથવા કૃષ્ણાં કરોત્યેકાદશીં ચ યઃ ।
વૈકુણ્ઠે મોદતે સોઽપિ યાવદ્વૈ બ્રહ્મણો વયઃ ॥ ૯૦॥

ભારતે પુનરાગત્ય કૃષ્ણભક્તિં લભેદ્ધ્રુવમ્ ।
ક્રમેણ ભક્તિં સુદૃઢાં કરોત્યેકાં હરેરહો ॥ ૯૧॥

દેહં ત્યક્ત્વા ચ ગોલોકં પુનરેવ પ્રયાતિ સઃ ।
તતઃ કૃષ્ણસ્ય સારૂપ્યં સમ્પ્રાપ્ય પાર્ષદો ભવેત્ ॥ ૯૨॥

પુનસ્તત્પતનં નાસ્તિ જરામૃત્યુહરો ભવેત્ ।
ભાદ્રે ચ શુક્લદ્વાદશ્યાં યઃ શક્રં પૂજયેન્નરઃ ॥ ૯૩॥

ષષ્ટિવર્ષસહસ્રાણિ શક્રલોકે મહીયતે ।
રવિવારે ચ સઙ્ક્રાન્ત્યાં સપ્તમ્યાં શુક્લપક્ષકે ॥ ૯૪॥

સમ્પૂજ્યાર્કં હવિષ્યાન્નં યઃ કરોતિ ચ ભારતે ।
મહીયતે સોઽર્કલોકે યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૯૫॥

ભારતં પુનરાગત્ય ચારોગી શ્રીયુતો ભવેત્ ।
જ્યેષ્ઠકૃષ્ણચતુર્દશ્યાં સાવિત્રીં યો હિ પૂજયેત્ ॥ ૯૬॥

મહીયતે બ્રહ્મલોકે સપ્તમન્વન્તરાવધિ ।
પુનર્મહીં સમાગત્ય શ્રીમાનતુલવિક્રમઃ ॥ ૯૭॥

ચિરજીવી ભવેત્સોઽપિ જ્ઞાનવાન્સમ્પદા યુતઃ ।
માઘસ્ય શુક્લપઞ્ચમ્યાં પૂજયેદ્યઃ સરસ્વતીમ્ ॥ ૯૮॥

સંયતો ભક્તિતો દત્ત્વા ચોપચારાણિ ષોડશ ।
મહીયતે મણિદ્વીપે યાવદ્બ્રહ્મ દિવાનિશમ્ ॥ ૯૯॥

સમ્પ્રાપ્ય ચ પુનર્જન્મ સ ભવેત્કવિપણ્ડિતઃ ।
ગાં સુવર્ણાદિકં યો હિ બ્રાહ્મણાય દદાતિ ચ ॥ ૧૦૦॥

નિત્યં જીવનપર્યન્તં ભક્તિયુક્તશ્ચ ભારતે ।
ગવાં લોમપ્રમાણાબ્દં દ્વિગુણં વિષ્ણુમન્દિરે ॥ ૧૦૧॥

મોદતે હરિણા સાર્ધં ક્રીડાકૌતુકમઙ્ગલૈઃ ।
તદન્તે પુનરાગત્ય રાજરાજેશ્વરો ભવેત્ ॥ ૧૦૨॥

શ્રીમાંશ્ચ પુત્રવાન્વિદ્વાંજ્ઞાનવાન્સર્વતઃ સુખી ।
ભોજયેદ્યોઽપિ મિષ્ટાન્નં બ્રાહ્મણેભ્યશ્ચ ભારતે ॥ ૧૦૩॥

વિપ્રલોમપ્રમાણાબ્દં મોદતે વિષ્ણુમન્દિરે ।
તતઃ પુનરિહાગત્ય સુખી ચ ધનવાન્ભવેત્ ॥ ૧૦૪॥

વિદ્વાન્સુચિરજીવી ચ શ્રીમાનતુલવિક્રમઃ ।
યો વક્તિ વા દદાત્યેવ હરેર્નામાનિ ભારતે ॥ ૧૦૫॥

યુગં નામ પ્રમાણં ચ વિષ્ણુલોકે મહીયતે ।
તતઃ પુનરિહાગત્ય સ સુખી ધનવાન્ભવેત્ ॥ ૧૦૬॥

યદિ નારાયણક્ષેત્રે ફલં કોટિગુણં ભવેત્ ।
નામ્ના કોટિં હરેર્યો હિ ક્ષેત્રે નારાયણે જપેત્ ॥ ૧૦૭॥

સર્વપાપવિનિર્મુક્તો જીવન્મુક્તો ભવેદ્ધ્રુવમ્ ।
ન લભેત્સ પુનર્જન્મ વૈકુણ્ઠે સ મહીયતે ॥ ૧૦૮॥

લભેદ્વિષ્ણોશ્ચ સારૂપ્યં ન તસ્ય પતનં ભવેત્ ।
વિષ્ણુભક્તિં લભેત્સોઽપિ વિષ્ણુસારૂપ્યમાપ્નુયાત્ ॥ ૧૦૯॥

શિવં યઃ પૂજયેન્નિત્યં કૃત્વા લિઙ્ગં ચ પાર્થિવમ્ ।
યાવજ્જીવનપર્યન્તં સ યાતિ શિવમન્દિરમ્ ॥ ૧૧૦॥

મૃદો રેણુપ્રમાણાબ્દં શિવલોકે મહીયતે ।
તતઃ પુનરિહાગત્ય રાજેન્દ્રો ભારતે ભવેત્ ॥ ૧૧૧॥

શિલાં ચ પૂજયેન્નિત્યં શિલાતોયં ચ ભક્ષતિ ।
મહીયતે ચ વૈકુણ્ઠે યાવદ્વૈ બ્રહ્મણઃ શતમ્ ॥ ૧૧૨॥

તતો લબ્ધ્વા પુનર્જન્મ હરિભક્તિં ચ દુર્લભામ્ ।
મહીયતે વિષ્ણુલોકે ન તસ્ય પતનં ભવેત્ ॥ ૧૧૩॥

તપાંસિ ચૈવ સર્વાણિ વ્રતાનિ નિખિલાનિ ચ ।
કૃત્વા તિષ્ઠતિ વૈકુણ્ઠે યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૧૧૪॥

તતો લબ્ધ્વા પુનર્જન્મ રાજેન્દ્રો ભારતે ભવેત્ ।
તતો મુક્તો ભવેત્પશ્ચાત્પુનર્જન્મ ન વિદ્યતે ॥ ૧૧૫॥

યઃ સ્નાત્વા સર્વતીર્થેષુ ભુવઃ કૃત્વા પ્રદક્ષિણામ્ ।
સ તુ નિર્વાણતાં યાતિ ન ચ જન્મ ભવેદ્ભુવિ ॥ ૧૧૬॥

પુણ્યક્ષેત્રે ભારતે ચ યોઽશ્વમેધં કરોતિ ચ ।
અશ્વલોમમિતાબ્દં ચ શક્રસ્યાર્ધાસનં ભજેત્ ॥ ૧૧૭॥

ચતુર્ગુણં રાજસૂયે ફલમાપ્નોતિ માનવઃ ।
સર્વેભ્યોઽપિ મખેભ્યો હિ પરો દેવીમખઃ સ્મૃતઃ ॥ ૧૧૮॥

વિષ્ણુના ચ કૃતઃ પૂર્વં બ્રહ્મણા ચ વરાનને ।
શઙ્કરેણ મહેશેન ત્રિપુરાસુરનાશને ॥ ૧૧૯॥

શક્તિયજ્ઞઃ પ્રધાનશ્ચ સર્વયજ્ઞેષુ સુન્દરિ ।

નાનેન સદૃશો યજ્ઞસ્ત્રિષુ લોકેષુ વિદ્યતે ॥ ૧૨૦॥

દક્ષેણ ચ કૃતઃ પૂર્વં મહાન્સંવાદસંયુતઃ ।
બભૂવ કલહો યત્ર દક્ષશઙ્કરયોઃ સતિ ॥ ૧૨૧॥

શેપુશ્ચ નન્દિનં વિપ્રા નન્દી વિપ્રાંશ્ચ કોપતઃ ।
યદ્ધેતોર્દક્ષયજ્ઞં ચ બભઞ્જ ચન્દ્રશેખરઃ ॥ ૧૨૨॥

ચકાર દેવીયજ્ઞં સ પુરા દક્ષઃ પ્રજાપતિઃ ।
ધર્મશ્ચ કશ્યપશ્ચૈવ શેષશ્ચાપિ ચ કર્દમઃ ॥ ૧૨૩॥

સ્વાયમ્ભુવો મનુશ્ચૈવ તત્પુત્રશ્ચ પ્રિયવ્રતઃ ।
શિવઃ સનત્કુમારશ્ચ કપિલશ્ચ ધ્રુવસ્તથા ॥ ૧૨૪॥

રાજસૂયસહસ્રાણાં ફલમાપ્નોતિ નિશ્ચિતમ્ ।
દેવીયજ્ઞાત્પરો યજ્ઞો નાસ્તિ વેદે ફલપ્રદઃ ॥ ૧૨૫॥

વર્ષાણાં શતજીવી ચ જીવન્મુક્તો ભવેદ્ધ્રુવમ્ ।
જ્ઞાનેન તેજસા ચૈવ વિષ્ણુતુલ્યો ભવેદિહ ॥ ૧૨૬॥

દેવાનાં ચ યથા વિષ્ણુર્વૈષ્ણવાનાં ચ નારદ ।
શાસ્ત્રાણાં ચ યથા વેદા વર્ણાનાં બ્રાહ્મણો યથા ॥ ૧૨૭॥

તીર્થાનાં ચ યથા ગઙ્ગા પવિત્રાણાં શિવો યથા ।
એકાદશી વ્રતાનાં ચ પુષ્પાણાં તુલસી યથા ॥ ૧૨૮॥

નક્ષત્રાણાં યથા ચન્દ્રઃ પક્ષિણાં ગરુડો યથા ।
યથા સ્ત્રીણાં ચ પ્રકૃતી રાધા વાણી વસુન્ધરા ॥ ૧૨૯॥

શીઘ્રાણાં ચેન્દ્રિયાણાં ચ ચઞ્ચલાનાં મનો યથા ।
પ્રજાપતીનાં બ્રહ્મા ચ પ્રજાનાં ચ પ્રજાપતિઃ ॥ ૧૩૦॥

વૃન્દાવનં વનાનાં ચ વર્ષાણાં ભારતં યથા ।
શ્રીમતાં ચ યથા શ્રીશ્ચ વિદુષાં ચ સરસ્વતી ॥ ૧૩૧॥

પતિવ્રતાનાં દુર્ગા ચ સૌભાગ્યાનાં ચ રાધિકા ।
દેવીયજ્ઞસ્તથા વત્સે સર્વયજ્ઞેષુ ભામિનિ ॥ ૧૩૨॥

અશ્વમેધશતેનૈવ શક્રત્વં ચ લભેદ્ધ્રુવમ્ ।
સહસ્રેણ વિષ્ણુપદં સમ્પ્રાપ્તઃ પૃથુરેવ ચ ॥ ૧૩૩॥

સ્નાનં ચ સર્વતીર્થાનાં સર્વયજ્ઞેષુ દીક્ષણમ્ ।
સર્વેષાં ચ વ્રતાનાં ચ તપસાં ફલમેવ ચ ॥ ૧૩૪॥

પાઠે ચતુર્ણાં વેદાનાં પ્રાદક્ષિણ્યં ભુવસ્તથા ।
ફલભૂતમિદં સર્વં મુક્તિદં શક્તિસેવનમ્ ॥ ૧૩૫॥

પુરાણેષુ ચ વેદેષુ ચેતિહાસેષુ સર્વતઃ ।
નિરૂપિતં સારભૂતં દેવીપાદામ્બુજાર્ચનમ્ ॥ ૧૩૬॥

તદ્વર્ણનં ચ તદ્ધ્યાનં તન્નામગુણકીર્તનમ્ ।
તત્સ્તોત્રસ્મરણં ચૈવ વન્દનં જપમેવ ચ ॥ ૧૩૭॥

તત્પાદોદકનૈવેદ્યં ભક્ષણં નિત્યમેવ ચ ।
સર્વસમ્મતમિત્યેવં સર્વેપ્સિતમિદં સતિ ॥ ૧૩૮॥

ભજ નિત્યં પરં બ્રહ્મ નિર્ગુણં પ્રકૃતિં પરામ્ ।
ગૃહાણ સ્વામિનં વત્સે સુખં વસ ચ મન્દિરે ॥ ૧૩૯॥

અયં તે કથિતઃ કર્મવિપાકો મઙ્ગલો નૃણામ્ ।
સર્વેપ્સિતઃ સર્વમતસ્તત્ત્વજ્ઞાનપ્રદઃ પરઃ ॥ ૧૪૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે યમેન
કર્મવિપાકકથનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૯.૩૦॥

## ૯.૩૧ એકત્રિંશોઽધ્યાયઃ । યમાષ્ટકવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
શક્તેરુત્કીર્તનં શ્રુત્વા સાવિત્રી યમવક્ત્રતઃ ।
સાશ્રુનેત્રા સપુલકા યમં પુનરુવાચ સા ॥ ૧॥

સાવિત્ર્યુવાચ ।
શક્તેરુત્કીર્તનં ધર્મ સકલોદ્ધારકારણમ્ ।
શ્રોતૃણાં ચૈવ વક્તૃણાં જન્મમૃત્યુજરાહરમ્ ॥ ૨॥

દાનવાનાં ચ સિદ્ધાનાં તપસાં ચ પરં પદમ્ ।
યોગાનાં ચૈવ વેદાનાં કીર્તનં સેવનં વિભો ॥ ૩॥

મુક્તિત્વમમરત્વં ચ સર્વસિદ્ધિત્વમેવ ચ ।

શ્રીશક્તિસેવકસ્યૈવ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૪॥

ભજામિ કેન વિધિના વદ વેદવિદાંવર ।
શુભકર્મવિપાકં ચ શ્રુતં નૃણાં મનોહરમ્ ॥ ૫॥

કર્માશુભવિપાકં ચ તન્મે વ્યાખ્યાતુમર્હસિ ।
ઇત્યુક્ત્વા ચ સતી બ્રહ્મન્ ભક્તિનમ્રાત્મકન્ધરા ॥ ૬॥

તુષ્ટાવ ધર્મરાજં ચ વેદોક્તેન સ્તવેન ચ ।
સાવિત્ર્યુવાચ ।
તપસા ધર્મમારાધ્ય પુષ્કરે ભાસ્કરઃ પુરા ॥ ૭॥

ધર્મં સૂર્યઃ સુતં પ્રાપ ધર્મરાજં નમામ્યહમ્ ।
સમતા સર્વભૂતેષુ યસ્ય સર્વસ્ય સાક્ષિણઃ ॥ ૮॥

અતો યન્નામ શમનમિતિ તં પ્રણમામ્યહમ્ ।
યેનાન્તશ્ચ કૃતો વિશ્વે સર્વેષાં જીવિનાં પરમ્ ॥ ૯॥

કામાનુરૂપં કાલેન તં કૃતાન્તં નમામ્યહમ્ ।
બિભર્તિ દણ્ડં દણ્ડાય પાપિનાં શુદ્ધિહેતવે ॥ ૧૦॥

નમામિ તં દણ્ડધરં યઃ શાસ્તા સર્વજીવિનામ્ ।
વિશ્વં ચ કલયત્યેવ યઃ સર્વેષુ ચ સન્તતમ્ ॥ ૧૧॥

અતીવ દુર્નિવાર્યં ચ તં કાલં પ્રણમામ્યહમ્ ।
તપસ્વી બ્રહ્મનિષ્ઠો યઃ સંયમી સઞ્જિતેન્દ્રિયઃ ॥ ૧૨॥

જીવાનાં કર્મફલદસ્તં યમં પ્રણમામ્યહમ્ ।
સ્વાત્મારામશ્ચ સર્વજ્ઞો મિત્રં પુણ્યકૃતાં ભવેત્ ॥ ૧૩॥

પાપિનાં ક્લેશદો યસ્તં પુણ્યમિત્રં નમામ્યહમ્ ।
યજ્જન્મ બ્રહ્મણોંઽશેન જ્વલન્તં બ્રહ્મતેજસા ॥ ૧૪॥

યો ધ્યાયતિ પરં બ્રહ્મ તમીશં પ્રણમામ્યહમ્ ।
ઇત્યુક્ત્વા સા ચ સાવિત્રી પ્રણનામ યમં મુને ॥ ૧૫॥

યમસ્તાં શક્તિભજનં કર્મપાકમુવાચ હ ।
ઇદં યમાષ્ટકં નિત્યં પ્રાતરુત્થાય યઃ પઠેત્ ॥ ૧૬॥

યમાત્તસ્ય ભયં નાસ્તિ સર્વપાપાત્પ્રમુચ્યતે ।
મહાપાપી યદિ પઠેન્નિત્યં ભક્તિસમન્વિતઃ ।

યમઃ કરોતિ સંશુદ્ધં કાયવ્યૂહેન નિશ્ચિતમ્ ॥ ૧૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
યમાષ્ટકવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૯.૩૧॥

## ૯.૩૨ દ્વાત્રિંશોઽધ્યાયઃ । સાવિત્ર્યુપાખ્યાને કુણ્ડસઙ્ખ્યાનિરૂપણમ્ ।

શ્રીનારાયણ ઉવાચ ।
માયાબીજં મહામન્ત્રં પ્રદત્ત્વા વિધિપૂર્વકમ્ ।
કર્માશુભવિપાકં ચ તામુવાચ રવેઃ સુતઃ ॥ ૧॥

ધર્મરાજ ઉવાચ ।
શુભકર્મવિપાકાન્ન નરકં યાતિ માનવઃ ।
કર્માશુભવિપાકં ચ કથયામિ નિશામય ॥ ૨॥

નાનાપુરાણભેદેન નામભેદેન ભામિનિ ।
નાનાપ્રકારં સ્વર્ગં ચ યાતિ જીવઃ સ્વકર્મભિઃ ॥ ૩॥

શુભકર્મવિપાકાન્ન નરકં યાતિ કર્મભિઃ ।
કુકર્મણા ચ નરકં યાતિ નાનાવિધં નરઃ ॥ ૪॥

નરકાણાં ચ કુણ્ડાનિ સન્તિ નાનાવિધાનિ ચ ।
નાનાશાસ્ત્રપ્રમાણેન કર્મભેદેન યાનિ ચ ॥ ૫॥

વિસ્તૃતાનિ ચ ગર્તાનિ ક્લેશદાનિ ચ દુઃખિનામ્ ।
ભયઙ્કરાણિ ઘોરાણિ હે વત્સે કુત્સિતાનિ ચ ॥ ૬॥

ષડશીતિ ચ કુણ્ડાનિ એવમન્યાનિ સન્તિ ચ ।
નિબોધ તેષાં નામાનિ પ્રસિદ્ધાનિ શ્રુતૌ સતિ ॥ ૭॥

વહ્નિકુણ્ડં તપ્તકુણ્ડં ક્ષારકુણ્ડં ભયાનકમ્ ।
વિટ્કુણ્ડં મૂત્રકુણ્ડં ચ શ્લેષ્મકુણ્ડં ચ દુઃસહમ્ ॥ ૮॥

ગરકુણ્ડં દૂષિકુણ્ડં વસાકુણ્ડં તથૈવ ચ ।
શુક્રકુણ્ડમસૃક્કુણ્ડમશ્રુકુણ્ડં ચ કુત્સિતમ્ ॥ ૯॥

કુણ્ડં ગાત્રમલાનાં ચ કર્ણવિટ્કુણ્ડમેવ ચ ।
મજ્જાકુણ્ડં માંસકુણ્ડં નક્રકુણ્ડં ચ દુસ્તરમ્ ॥ ૧૦॥

લોમકુણ્ડં કેશકુણ્ડમસ્થિકુણ્ડં ચ દુસ્તરમ્ ।
તામ્રકુણ્ડં લોહકુણ્ડં પ્રતપ્તં ક્લેશદં મહત્ ॥ ૧૧॥

ચર્મકુણ્ડં તપ્તસુરાકુણ્ડં ચ પરિકીર્તિતમ્ ।
તીક્ષ્ણકણ્ટકકુણ્ડં ચ વિષોદં વિષકુણ્ડકમ્ ॥ ૧૨॥

પ્રતપ્તકુણ્ડં તૈલસ્ય કુન્તકુણ્ડં ચ દુર્વહમ્ ।
કૃમિકુણ્ડં પૂયકુણ્ડં સર્પકુણ્ડં દુરન્તકમ્ ॥ ૧૩॥

મશકુણ્ડં દંશકુણ્ડં ભીમં ગરલકુણ્ડકમ્ ।
કુણ્ડં ચ વજ્રદંષ્ટ્રાણાં વૃશ્ચિકાનાં ચ સુવ્રતે ॥ ૧૪॥

શરકુણ્ડં શૂલકુણ્ડં ખડ્ગકુણ્ડં ચ ભીષણમ્ ।
ગોલકુણ્ડં નક્રકુણ્ડં કાકકુણ્ડં શુચાસ્પદમ્ ॥ ૧૫॥

મન્થાનકુણ્ડં બીજકુણ્ડં વજ્રકુણ્ડં ચ દુઃસહમ્ ।
તપ્તપાષાણકુણ્ડં ચ તીક્ષ્ણપાષાણકુણ્ડકમ્ ॥ ૧૬॥

લાલાકુણ્ડં મસીકુણ્ડં ચૂર્ણકુણ્ડં તથૈવ ચ ।
ચક્રકુણ્ડં વક્રકુણ્ડં કૂર્મકુણ્ડં મહોલ્બણમ્ ॥ ૧૭॥

જ્વાલાકુણ્ડં ભસ્મકુણ્ડં દગ્ધકુણ્ડં શુચિસ્મિતે ।
તપ્તસૂચીમસિપત્રં ક્ષુરધારં સૂચીમુખમ્ ॥ ૧૮॥

ગોકામુખ નક્રમુખં ગજદંશં ચ ગોમુખમ્ ।
કુમ્ભીપાકં કાલસૂત્રં મત્સ્યોદં કૃમિતન્તુકમ્ ॥ ૧૯॥

પાંસુભોજ્યં પાશવેષ્ટં શૂલપ્રોતં પ્રકમ્પનમ્ ।
ઉલ્કામુખમન્ધકૂપં વેધનં તાડનં તથા ॥ ૨૦॥

જાલરન્ધ્રં દેહચૂર્ણં દલનં શોષણં કષમ્ ।
શૂર્પં જ્વાલામુખં ચૈવ ધૂમાન્ધં નાગવેષ્ટનમ્ ॥ ૨૧॥

કુણ્ડાન્યેતાનિ સાવિત્રિ પાપિનાં ક્લેશદાનિ ચ ।
નિયુતૈઃ કિઙ્કરગણૈ રક્ષિતાનિ ચ સન્તતમ્ ॥ ૨૨॥

દણ્ડહસ્તૈઃ પાશહસ્તૈર્મદમત્તૈર્ભયઙ્કરૈઃ ।
શક્તિહસ્તૈર્ગદાહસ્તૈરસિહસ્તૈઃ સુદારુણૈઃ ॥ ૨૩॥

તમોયુક્તૈર્દયાહીનૈર્નિવાર્યૈશ્ચ ન સર્વતઃ ।
તેજસ્વિભિશ્ચ નિઃશઙ્કૈરાતામ્રપિઙ્ગલોચનૈઃ ॥ ૨૪॥

યોગયુક્તૈઃ સિદ્ધિયુક્તૈર્નાનારૂપધરૈર્ભટૈઃ ।
આસન્નમૃત્યુભિર્દૃષ્ટૈઃ પાપિભિઃ સર્વજીવિભિઃ ॥ ૨૫॥

સ્વકર્મનિરતૈઃ સર્વૈઃ શાક્તૈઃ સૌરૈશ્ચ ગાણપૈઃ ।
અદૃશ્યૈઃ પુણ્યકૃદ્ભિશ્ચ સિદ્ધૈર્યોગિભિરેવ ચ ॥ ૨૬॥

સ્વધર્મનિરતૈર્વાપિ વિતતૈર્વા સ્વતન્ત્રકૈઃ ।
બલવદ્ભિશ્ચ નિઃશઙ્કૈઃ સ્વપ્નદૃષ્ટૈશ્ચ વૈષ્ણવૈઃ ॥ ૨૭॥

એતત્તે કથિતં સાધ્વિ કુણ્ડસઙ્ખ્યાનિરૂપણમ્ ।
યેષાં નિવાસો યત્કુણ્ડે નિબોધ કથયામિ તે ॥ ૨૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે સાવિત્ર્યુપાખ્યાને
કુણ્ડસઙ્ખ્યાનિરૂપણં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૯.૩૨॥

## ૯.૩૩ ત્રયસ્ત્રિંશોઽધ્યાયઃ । નાનાકર્મવિપાકફલકથનમ્ ।

ધર્મરાજ ઉવાચ ।
હરિસેવારતઃ શુદ્ધો યોગસિદ્ધો વ્રતી સતિ ।
તપસ્વી બ્રહ્મચારી ચ ન યાતિ નરકં ધ્રુવમ્ ॥ ૧॥

કટુવાચા બાન્ધવાંશ્ચ બલલેપેન યો નરઃ ।
દગ્ધાન્કરોતિ બલવાન્ વહ્નિકુણ્ડં પ્રયાતિ સઃ ॥ ૨॥

સ્વગાત્રલોમમાનાબ્દં તત્ર સ્થિત્વા હુતાશને ।
પશુયોનિમવાપ્નોતિ રૌદ્રદગ્ધાં ત્રિજન્મનિ ॥ ૩॥

બ્રાહ્મણં તૃષિતં તપ્તં ક્ષુધિતં ગૃહમાગતમ્ ।
ન ભોજયતિ યો મૂઢસ્તપ્તકુણ્ડં પ્રયાતિ સઃ ॥ ૪॥

તત્ર તલ્લોમમાનં ચ વર્ષં સ્થિત્વા ચ દુઃખદે ।
તપ્તસ્થલે વહ્નિતલ્પે પક્ષી ચ સપ્તજન્મસુ ॥ ૫॥

રવિવારે ચ સઙ્ક્રાન્ત્યામમાયાં શ્રાદ્ધવાસરે ।
વસ્ત્રાણાં ક્ષારસંયોગં કરોતિ કેવલં નરઃ ॥ ૬॥

સ યાતિ ક્ષારકુણ્ડં ચ સૂત્રમાનાબ્દમેવ ચ ।

સ વ્રજેદ્રજકીં યોનિં સપ્તજન્મસુ ભારતે ॥ ૭॥

મૂલપ્રકૃતિનિન્દાં યઃ કુરુતે માનવાધમઃ ।
વેદનિન્દાં શાસ્ત્રનિન્દાં પુરાણાનાં તથૈવ ચ ॥ ૮॥

બ્રહ્મવિષ્ણુશિવાદીનાં તથા નિન્દાપરો જનઃ ।
ગૌરીવાણ્યાદિદેવીનાં તથા નિન્દાપરો જનઃ ॥ ૯॥

તે સર્વે નિરયે યાન્તિ તસ્મિન્કુણ્ડે ભયાનકે ।
નાતઃ પરતરં કુણ્ડં દુઃખદં તુ ભવિષ્યતિ ॥ ૧૦॥

તત્ર સ્થિત્વાનેકકલ્પં સર્પયોનિં વ્રજેત્પુનઃ ।
દેવીનિન્દાપરાધસ્ય પ્રાયશ્ચિત્તં ન વિદ્યતે ॥ ૧૧॥

સ્વદત્તાં પરદત્તાં વા વૃત્તિં ચ સુરવિપ્રયોઃ ।
ષષ્ટિવર્ષસહસ્રાણિ વિટ્કુણ્ડં ચ પ્રયાતિ સઃ ॥ ૧૨॥

તાવન્ત્યેવ ચ વર્ષાણિ વિડ્ભોજી તત્ર તિષ્ઠતિ ।
ષષ્ટિવર્ષસહસ્રાણિ વિટ્કૃમિશ્ચ પુનર્ભુવિ ॥ ૧૩॥

પરકીયતડાગે ચ તડાગં યઃ કરોતિ ચ ।
ઉત્સજેદ્દૈવદોષેણ મૂત્રકુણ્ડં પ્રયાતિ સઃ ॥ ૧૪॥

તદ્રેણુમાનવર્ષં ચ તદ્ભોજી તત્ર તિષ્ઠતિ ।
પુનઃ પૂર્ણશતાબ્દં ચ સ વૃષો ભારતે ભવેત્ ॥ ૧૫॥

એકાકી મિષ્ટમશ્નાતિ શ્લેષ્મકુણ્ડં પ્રયાતિ ચ ।
પૂર્ણમબ્દશતં ચૈવ તદ્ભોજી તત્ર તિષ્ઠતિ ॥ ૧૬॥

તતઃ પૂર્ણશતાબ્દં ચ સ પ્રેતો ભારતે ભવેત્ ।
શ્લેષ્મમૂત્રપરં ચૈવ પૂયં ભુઙ્ક્તે તતઃ શુચિઃ ॥ ૧૭॥

પિતરં માતરં ચૈવ ગુરું ભાર્યાં સુતં સુતામ્ ।
યો ન પુષ્ણાત્યનાથં ચ ગરકુણ્ડં પ્રયાતિ સઃ ॥ ૧૮॥

પૂર્ણમબ્દશતં ચૈવ તદ્ભોજી તત્ર તિષ્ઠતિ ।
તતો વ્રજેદ્ભૂતયોનિં શતવર્ષં તતઃ શુચિઃ ॥ ૧૯॥

દૃષ્ટ્વાતિથિં વક્રચક્ષુઃ કરોતિ યો હિ માનવઃ ।
પિતૃદેવાસ્તસ્ય જલં ન ગૃહ્ણન્તિ ચ પાપિનઃ ॥ ૨૦॥

યાનિ કાનિ ચ પાપાનિ બ્રહ્મહત્યાદિકાનિ ચ ।
ઇહૈવ લભતે ચાન્તે દૂષિકાકુણ્ડમાવ્રજેત્ ॥ ૨૧॥

પૂર્ણમબ્દશતં ચૈવ તદ્ભોજી તત્ર તિષ્ઠતિ ।
તતો વ્રજેદ્ભૂતયોનિં શતવર્ષં તતઃ શુચિઃ ॥ ૨૨॥

દત્ત્વા દ્રવ્યં ચ વિપ્રાય ચાન્યસ્મૈ દીયતે યદિ ।
સ તિષ્ઠતિ વસાકુણ્ડે તદ્ભોજી શતવત્સરમ્ ॥ ૨૩॥

કૃકલાસો ભવેત્સોઽપિ ભારતે સપ્તજન્મસુ ।
તતો ભવેન્મહારૌદ્રો દરિદ્રોઽલ્પાયુરેવ ચ ॥ ૨૪॥

પુમાંસં કામિની વાપિ કામિનીં વા પુમાનથ ।
યઃ શુક્રં પાયયત્યેવ શુક્રકુણ્ડં પ્રયાતિ સઃ ॥ ૨૫॥

પૂર્ણમબ્દશતં ચૈવ તદ્ભોજી તત્ર તિષ્ઠતિ ।
કૃમિયોનિં શતાબ્દં ચ વ્રજેદ્ભૂત્વા તતઃ શુચિઃ ॥ ૨૬॥

સન્તાડ્ય ચ ગુરું વિપ્રં રક્તપાતં ચ કારયેત્ ।
સ ચ તિષ્ઠત્યસૃક્કુણ્ડે તદ્ભોજી શતવત્સરમ્ ॥ ૨૭॥

તતો લભેદ્વ્યાઘ્રજન્મ સપ્તજન્મસુ ભારતે ।
તતઃ શુદ્ધિમવાપ્નોતિ માનવશ્ચ ક્રમેણ હ ॥ ૨૮॥

યોઽશ્રુ તત્યાજ ગાયન્તં ભક્તં દૃષ્ટ્વા સગદ્ગદમ્ ।
શ્રીકૃષ્ણગુણસઙ્ગીતે હસત્યેવ હિ યો નરઃ ॥ ૨૯॥

સ વસેદશ્રુકુણ્ડે ચ તદ્ભોજી શતવર્ષકમ્ ।
તતો ભવેચ્ચ ચાણ્ડાલસ્ત્રિજન્મનિ તતઃ શુચિઃ ॥ ૩૦॥

કરોતિ શઠતા તદ્વન્નિત્યં સુહૃદિ યો નરઃ ।
કુણ્ડં ગાત્રમલાનાં ચ સ પ્રયાતિ શતાબ્દકમ્ ॥ ૩૧॥

તતઃ સ ગાર્દભીં યોનિમવાપ્નોતિ ત્રિજન્મનિ ।
ત્રિજન્મનિ ચ શાર્ગાલીં તતઃ શુદ્ધો ભવેદ્ ધ્રુવમ્ ॥ ૩૨॥

બધિરં યો હસત્યેવ નિન્દત્યેવાભિમાનતઃ ।
સ વસેત્કર્ણવિટ્કુણ્ડે તદ્ભોજી શતવત્સરમ્ ॥ ૩૩॥

તતો ભવેત્સ બધિરો દરિદ્રઃ સપ્તજન્મસુ ।
સપ્તજન્મન્યઙ્ગહીનસ્તતઃ શુદ્ધિં લભેદ્ ધ્રુવમ્ ॥ ૩૪॥

લોભાત્સ્વભરણાર્થાય જીવિનં હન્તિ યો નરઃ ।
મજ્જાકુણ્ડે વસેત્સોઽપિ તદ્ભોજી લક્ષવત્સરમ્ ॥ ૩૫॥

તતો ભવેચ્ચ શશકો મીનશ્ચ સપ્તજન્મસુ ।
ત્રિજન્મનિ વરાહશ્ચ કુક્કુટઃ સપ્તજન્મસુ ॥ ૩૬॥

એણાદયશ્ચ કર્મભ્યસ્તતઃ શુદ્ધિં લભેદ્ ધ્રુવમ્ ।
સ્વકન્યાપાલનં કૃત્વા વિક્રીણાતિ ચ યો નરઃ ॥ ૩૭॥

અર્થલોભાન્મહામૂઢો માંસકુણ્ડં પ્રયાતિ સઃ ।
કન્યાલોમપ્રમાણાબ્દં તદ્ભોજી તત્ર તિષ્ઠતિ ॥ ૩૮॥

તસ્ય દણ્ડપ્રહારં ચ કુર્વન્તિ યમકિઙ્કરાઃ ।
માંસભારં મૂર્ધ્નિ કૃત્વા રક્તભારં લિહેત્ક્ષુધા ॥ ૩૯॥

તતો હિ ભારતે પાપી કન્યાવિટ્કૃમિગો ભવેત્ ।
ષષ્ટિવર્ષસહસ્રાણિ વ્યાધશ્ચ સપ્તજન્મસુ ॥ ૪૦॥

ત્રિજન્મનિ વરાહશ્ચ કુક્કુટઃ સપ્તજન્મસુ ।
મણ્ડૂકો હિ જલૌકાશ્ચ સપ્તજન્મસુ ભારતે ॥ ૪૧॥

સપ્તજન્મસુ કાકશ્ચ તતઃ શુદ્ધિં લભેદ્ ધ્રુવમ્ ।
વ્રતાનામુપવાસાનાં શ્રાદ્ધાદીનાં ચ સઙ્ગમે ॥ ૪૨॥

કરોતિ યઃ ક્ષૌરકર્મ સોઽશુચિઃ સર્વકર્મસુ ।
સ ચ તિષ્ઠતિ કુણ્ડે ચ નખાદીનાઞ્ચ સુન્દરિ ॥ ૪૩॥

તદ્દૈવદિનમાનાબ્દં તદ્ભોજી દણ્ડતાડિતઃ ।
સકેશં પાર્થિવં લિઙ્ગં યો વાર્ચયતિ ભારતે ॥ ૪૪॥

સ તિષ્ઠતિ કેશકુણ્ડે મૃદ્રેણુમાનવર્ષકમ્ ।
તદન્તે યાવનીં યોનિં પ્રયાતિ હરકોપતઃ ॥ ૪૫॥

શતાબ્દાચ્છુદ્ધિમાપ્નોતિ રાક્ષસઃ સ ભવેદ્ ધ્રુવમ્ ।
પિતૃણાં યો વિષ્ણુપદે પિણ્ડં નૈવ દદાતિ ચ ॥ ૪૬॥

સ ચ તિષ્ઠત્યસ્થિકુણ્ડે સ્વલોમાબ્દં મહોલ્બણે ।
તતઃ સુયોનિં સમ્પ્રાપ્ય કુબ્જઃ સપ્તજન્મસુ ॥ ૪૭॥

ભવેન્મહાદરિદ્રશ્ચ તતઃ શુદ્ધો હિ દેહતઃ ।

યઃ સેવતે મહામૂઢો ગુર્વિણીં ચ સ્વકામિનીમ્ ॥ ૪૮॥

પ્રતપ્તે તામ્રકુણ્ડે ચ શતવર્ષં સ તિષ્ઠતિ ।
અવીરાન્નં ચ યો ભુઙ્ક્તે ઋતુસ્નાતાન્નમેવ ચ ॥ ૪૯॥

લોહકુણ્ડે શતાબ્દં ચ સ ચ તિષ્ઠતિ તપ્તકે ।
સ વ્રજેદ્રજકીં યોનિં કાકાનાં સપ્તજન્મસુ ॥ ૫૦॥

મહાવ્રણી દરિદ્રશ્ચ તતઃ શુદ્ધો ભવેન્નરઃ ।
યો હિ ચર્માક્તહસ્તેન દેવદ્રવ્યમુપસ્પૃશેત્ ॥ ૫૧॥

શતવર્ષપ્રમાણં ચ ચર્મકુણ્ડે સ તિષ્ઠતિ ।
યઃ શૂદ્રેણાભ્યનુજ્ઞાતો ભુઙ્ક્તે શૂદ્રાન્નમેવ ચ ॥ ૫૨॥

સ ચ તપ્તસુરાકુણ્ડે શતાબ્દં તિષ્ઠતિ દ્વિજઃ ।
તતો ભવેચ્છૂદ્રયાજી બ્રાહ્મણઃ સપ્તજન્મસુ ॥ ૫૩॥

શૂદ્રશ્રાદ્ધાન્નભોજી ચ તતઃ શુદ્ધો ભવેદ્ધ્રુવમ્ ।
વાગ્દુષ્ટઃ કટુકો વાચા તાડયેત્સ્વામિનં સદા ॥ ૫૪॥

તીક્ષ્ણકણ્ટકકુણ્ડે સ તદ્ભોજી તત્ર તિષ્ઠતિ ।
તાડિતો યમદૂતેન દણ્ડેન ચ ચતુર્ગુણમ્ ॥ ૫૫॥

તતઃ ઉચ્ચૈઃશ્રવાઃ સપ્તજન્મસ્વેવ તતઃ શુચિ ।
વિષેણ જીવનં હન્તિ નિર્દયો યો હિ માનવઃ ॥ ૫૬॥

વિષકુણ્ડે ચ તદ્ભોજી સહસ્રાબ્દં ચ તિષ્ઠતિ ।
તતો ભવેન્નૃઘાતી ચ વ્રણી ચ શતજન્મસુ ॥ ૫૭॥

સપ્તજન્મસુ કુષ્ઠી ચ તતઃ શુદ્ધો ભવેદ્ ધ્રુવમ્ ।
દણ્ડેન તાડયેદ્ ગાં હિ વૃષઞ્ચ વૃષવાહકઃ ॥ ૫૮॥

ભૃત્યદ્વારા સ્વતન્ત્રો વા પુણ્યક્ષેત્રે ચ ભારતે ।
પ્રતપ્તે તૈલકુણ્ડેઽગ્નૌ તિષ્ઠતિ સ્મ ચતુર્યુગમ્ ॥ ૫૯॥

ગવાં લોમપ્રમાણાબ્દં વૃષો ભવતિ તત્પરમ્ ।
કુન્તેન હન્તિ યો જીવં વહ્નિલોહેન હેલયા ॥ ૬૦॥

કુન્તકુણ્ડે વસેત્સોઽપિ વર્ષાણામયુતં સતિ ।
તતઃ સુયોનિં સમ્પ્રાપ્ય ચોદરે વ્યાધિસંયુતઃ ॥ ૬૧॥

જન્મનૈકેન ક્લેશેન તતઃ શુધ્દો ભવેન્નરઃ ।
યો ભુઙ્ક્તે ચ વૃથા માંસં માંસલોભી દ્વિજાધમઃ ॥ ૬૨॥

હરેરનૈવેદ્યભોજી કૃમિકુણ્ડં પ્રયાતિ સઃ ।
સ્વલોમમાનવર્ષં ચ તદ્ભોજી તત્ર તિષ્ઠતિ ॥ ૬૩॥

તતો ભવેન્મ્લેચ્છજાતિસ્ત્રિજન્મનિ તતો દ્વિજઃ ।
બ્રાહ્મણઃ શૂદ્રયાજી ચ શૂદ્રશ્રાદ્ધાન્નભોજકઃ ॥ ૬૪॥

શૂદ્રાણાં શવદાહી ચ પૂયકુણ્ડે વસેદ્ ધ્રુવમ્ ।
યાવલ્લોમપ્રમાણાબ્દં યમદણ્ડેન સુવ્રતે ॥ ૬૫॥

તાડિતો યમદૂતેન તદ્ભોજી તત્ર તિષ્ઠતિ ।
તતો ભારતમાગત્ય સ શૂદ્રઃ સપ્તજન્મસુ ॥ ૬૬॥

મહારોગી દરિદ્રશ્ચ બધિરો મૂક એવ ચ ।
કૃષ્ણં પદ્મં ચ કે યસ્ય તં સર્પં હન્તિ યો નરઃ ॥ ૬૭॥

સ્વલોમમાનવર્ષં ચ સર્પકુણ્ડં પ્રયાતિ સઃ ।
સર્પેણ ભક્ષિતઃ સોઽથ યમદૂતેન તાડિતઃ ॥ ૬૮॥

વસેચ્ચ સર્પવિડ્ભોજી તતઃ સર્પો ભવેદ્ ધ્રુવમ્ ।
તતો ભવેન્માનવશ્ચ સ્વલ્પાયુર્દદ્રુસંયુતઃ ॥ ૬૯॥

મહાક્લેશેન તન્મૃત્યુઃ સર્પેણ ભક્ષિતાદ્ ધ્રુવમ્ ।
વિધિપ્રદત્તજીવ્યાંશ્ચ ક્ષુદ્રજન્તૂંશ્ચ હન્તિ યઃ ॥ ૭૦॥

સ દંશમશયોઃ કુણ્ડે જન્તુમાનાબ્દમેવ ચ ।
દિવાનિશં ભક્ષિતસ્તૈરનાહારશ્ચ શબ્દવાન્ ॥ ૭૧॥

હસ્તપાદાદિબધ્દશ્ચ યમદૂતેન તાડિતઃ ।
તતો ભવેત્ક્ષુદ્રજન્તુર્જાતિશ્ચ યાવની ભવેત્ ॥ ૭૨॥

તતો ભવેન્માનવશ્ચ સોઽઙ્ગહીનસ્તતઃ શુચિઃ ।
યો મૂઢો મધુમશ્નાતિ હત્વા ચ મધુમક્ષિકાઃ ॥ ૭૩॥

સ એવ ગારલે કુણ્ડે જીવમાનાબ્દકં વસેત્ ।
ભક્ષિતો ગરલૈર્દગ્ધો યમદૂતેન તાડિતઃ ॥ ૭૪॥

તતો હિ મક્ષિકાજાતિસ્તતઃ શુધ્દો ભવેન્નરઃ ।
દણ્ડં કરોત્યદણ્ડ્યે ચ વિપ્રે દણ્ડં કરોતિ ચ ॥ ૭૫॥

સ કુણ્ડં વજ્રદંષ્ટ્રાણાં કીટાનાં યાતિ સત્વરમ્ ।
સ તલ્લોમપ્રમાણાબ્દં તત્ર તિષ્ઠત્યહર્નિશમ્ ॥ ૭૬॥

શબ્દકૃદ્ભક્ષિતસ્તૈસ્તુ યમદૂતેન તાડિતઃ ।
કરોતિ રોદનં ભદ્રે હાહાકારં ક્ષણે ક્ષણે ॥ ૭૭॥

પુનઃ સૂકરયોનૌ ચ જાયતે સપ્તજન્મસુ ।
ત્રિજન્મનિ કાકયોનૌ તતઃ શુદ્ધો ભવેન્નરઃ ॥ ૭૮॥

અર્થલોભેન યો મૂઢઃ પ્રજાદણ્ડં કરોતિ સઃ ।
વૃશ્ચિકાનાં ચ કુણ્ડં ચ તલ્લોમાબ્દં વસેદ્ ધ્રુવમ્ ॥ ૭૯॥

તતો વૃશ્ચિકજાતિશ્ચ સપ્તજન્મસુ ભારતે ।
તતો નરશ્ચાઙ્ગહીનો વ્યાધિશુદ્ધો ભવેદ્ ધ્રુવમ્ ॥ ૮૦॥

બ્રાહ્મણઃ શસ્ત્રધારી યો હ્યન્યેષાં ધાવકો ભવેત્ ।
સન્ધ્યાહીનશ્ચ યો વિપ્રો હરિભક્તિવિહીનકઃ ॥ ૮૧॥

સ તિષ્ઠતિ સ્વલોમાબ્દં કુણ્ડેષુ ચ શરાદિષુ ।
વિદ્ધઃ શરાદિભિઃ શશ્વત્તતઃ શુદ્ધો ભવેન્નરઃ ॥ ૮૨॥

કારાગારે સાન્ધકારે પ્રણિહન્તિ પ્રજાશ્ચ યઃ ।
પ્રમત્તઃ સ્વસ્ય દોષેણ ગોલકુણ્ડં પ્રયાતિ સઃ ॥ ૮૩॥

સ પઙ્કુતપ્તતોયાક્તં સાન્ધકારં ભયઙ્કરમ્ ।
તીક્ષ્ણદંષ્ટ્રૈશ્ચ કીટૈશ્ચ સંયુક્તં ગોલકુણ્ડકમ્ ॥ ૮૪॥

કીટૈર્વિદ્ધો વસેત્તત્ર પ્રજાલોમાબ્દમેવ ચ ।
તતો ભવેત્પ્રજાભૃત્યસ્તતઃ શુદ્ધો ભવેત્ક્રમાત્ ॥ ૮૫॥

સરોવરાદુત્થિતાંશ્ચ નક્રાદીન્હન્તિ યો નરઃ ।
નક્રકણ્ટકમાનાબ્દં નક્રકુણ્ડં પ્રયાતિ સઃ ॥ ૮૬॥

તતો નક્રાદિજાતીયો ભવેન્નક્રાદિષુ ધ્રુવમ્ ।
તતઃ સદ્યો વિશુદ્ધો હિ દણ્ડેનૈવ પુનઃ પુનઃ ॥ ૮૭॥

વક્ષઃ શ્રોણીસ્તનાસ્યઞ્ચ યઃ પશ્યતિ પરસ્ત્રિયાઃ ।
કામેન કામુકો યો હિ પુણ્યક્ષેત્રે ચ ભારતે ॥ ૮૮॥

સ વસેત્કાકકુણ્ડે ચ કાકૈઃ સઞ્ચૂર્ણલોચનઃ ।

તતઃ સ્વલોમમાનાબ્દં ભવેદ્ગ્ધસ્ત્રિજન્મનિ ॥ ૮૯॥

સ્વર્ણસ્તેયી ચ યો મૂઢો ભારતે સુરવિપ્રયોઃ ।
સ ચ મન્થાનકુણ્ડે વૈ સ્વલોમાબ્દં વસેદ્ ધ્રુવમ્ ॥ ૯૦॥

તાડિતો યમદૂતેન મન્થાનૈશ્છન્નલોચનઃ ।
તદ્વિડ્ભોજી ચ તત્રૈવ તતશ્ચાન્ધસ્ત્રિજન્મનિ ॥ ૯૧॥

સપ્તજન્મ દરિદ્રશ્ચ મહાક્રૂરશ્ચ પાતકી ।
ભારતે સ્વર્ણકારશ્ચ સ ચ સ્વર્ણવણિક્ તતઃ ॥ ૯૨॥

યો ભારતે તામ્રચૌરો લોહચૌરશ્ચ સુન્દરિ ।
સ ચ સ્વલોમમાનાબ્દં બીજકુણ્ડં પ્રયાતિ સઃ ॥ ૯૩॥

તત્રૈવ બીજવિડ્ભોજી બીજૈશ્ચ છન્નલોચનઃ ।
તાડિતો યમદૂતેન તતઃ શુદ્ધો ભવેન્નરઃ ॥ ૯૪॥

ભારતે દેવચૌરશ્ચ દેવદ્રવ્યાપહારકઃ ।
સ દુસ્તરે વજ્રકુણ્ડે સ્વલોમાબ્દં વસેદ્ ધ્રુવમ્ ॥ ૯૫॥

દેહદગ્ધોઽપિ તદ્વજ્રૈરનાહારશ્ચ શબ્દકૃત્ ।
તાડિતો યમદૂતૈશ્ચ તતઃ શુદ્ધો ભવેન્નરઃ ॥ ૯૬॥

રૌપ્યગવ્યાંશુકાનાં ચ યશ્ચૌરઃ સુરવિપ્રયોઃ ।
તપ્તપાષાણકુણ્ડેચ સ્વલોમાબ્દં વસેદ્ ધ્રુવમ્ ॥ ૯૭॥

ત્રિજન્મનિ ચ કંસોઽપિ શ્વેતરૂપસ્ત્રિજન્મનિ ।
જન્મૈકં શ્વેતચિહ્નશ્ચ તતોઽન્યે શ્વેતપક્ષિણઃ ॥ ૯૮॥

તતો રક્તવિકારી ચ શૂલી વૈ માનવો ભવેત્ ।
સપ્તજન્મસુ ચાલ્પાયુસ્તતઃ શુદ્ધો ભવેન્નરઃ ॥ ૯૯॥

રૈતં કાંસ્યમયં પાત્રં યો હરેદ્દેવવિપ્રયોઃ ।
તીક્ષ્ણપાષાણકુણ્ડે ચ સ્વલોમાબ્દં વસેન્નરઃ ॥ ૧૦૦॥

સ ભવેદશ્વજાતિશ્ચ ભારતે સપ્તજન્મસુ ।
તતોઽધિકાઙ્ગજાતિશ્ચ પાદરોગી તતઃ શુચિઃ ॥ ૧૦૧॥

પુંશ્ચલ્યન્નં ચ યો ભદ્રે પુંશ્ચલીજીવ્યજીવિનઃ ।
સ્વલોમમાનવર્ષં ચ લાલાકુણ્ડે વસેદ્ ધ્રુવમ્ ॥ ૧૦૨॥

તાડિતો યમદૂતેન તદ્ભોજી તત્ર દુઃખિતઃ ।
તતશ્ચક્ષુઃશૂલરોગી તતઃ શુદ્ધઃ ક્રમેણ સઃ ॥ ૧૦૩॥

મ્લેચ્છસેવી મસીજીવી યો વિપ્રો ભારતે ભુવિ ।
વસેત્સ્વલોમમાનાબ્દં મસીકુણ્ડે સ દુઃખભાક્ ॥ ૧૦૪॥

તાડિતો યમદૂતેન તદ્ભોજી તત્ર તિષ્ઠતિ ।
તતસ્ત્રિજન્મનિ ભવેત્કૃષ્ણવર્ણઃ પશુઃ સતિ ॥ ૧૦૫॥

ત્રિજન્મનિ ભવેચ્છાગઃ કૃષ્ણવર્ણસ્ત્રિજન્મનિ ।
તતઃ સ તાલવૃક્ષશ્ચ તતઃ શુદ્ધો ભવેન્નરઃ ॥ ૧૦૬॥

ધાન્યાદિસસ્યં તામ્બૂલં યો હરેત્સુરવિપ્રયોઃ ।
આસનં ચ તથા તલ્પં ચૂર્ણકુણ્ડે પ્રયાતિ સઃ ॥ ૧૦૭॥

શતાબ્દં તત્ર નિવસેદ્યમદૂતેન તાડિતઃ ।
તતો ભવેન્મેષજાતિઃ કુક્કુટશ્ચ ત્રિજન્મનિ ॥ ૧૦૮॥

તતો ભવેદ્વાનરશ્ચ કાસવ્યાધિયુતો ભુવિ ।
વંશહીનો દરિદ્રશ્ચ સ્વલ્પાયુશ્ચ તતઃ શુચિઃ ॥ ૧૦૯॥

કરોતિ ચક્રં વિપ્રાણાં હૃત્વા દ્રવ્યં ચ યો જનઃ ।
સ વસેચ્ચક્રકુણ્ડે ચ શતાબ્દં દણ્ડતાડિતઃ ॥ ૧૧૦॥

તતો ભવેન્માનવશ્ચ તૈલકારસ્ત્રિજન્મનિ ।
વ્યાધિયુક્તો ભવેદ્રોગી વંશહીનસ્તતઃ શુચિઃ ॥ ૧૧૧॥

ગોધનેષુ ચ વિપ્રેષુ કરોતિ વક્રતાં પુમાન્ ।
પ્રયાતિ વક્રકુણ્ડં સ તિષ્ઠેદ્યુગશતં સતિ ॥ ૧૧૨॥

તતો ભવેત્સ વક્રાઙ્ગો હીનાઙ્ગઃ સપ્તજન્મનિ ।
દરિદ્રો વંશહીનશ્ચ ભાર્યાહીનસ્તતઃ શુચિઃ ॥ ૧૧૩॥

તતો ભવેદ્ ગૃધ્રજન્મા ત્રિજન્મનિ ચ સૂકરઃ ।
ત્રિજન્મનિ બિડાલશ્ચ મયૂરશ્ચ ત્રિજન્મનિ ॥ ૧૧૪॥

નિષિદ્ધં કૂર્મમાંસં ચ બ્રાહ્મણો યો હિ ભક્ષતિ ।
કૂર્મકુણ્ડે વસેત્સોઽપિ શતાબ્દં કૂર્મભક્ષિતઃ ॥ ૧૧૫॥

તતો ભવેત્કૂર્મજન્મા ત્રિજન્મનિ ચ સૂકરઃ ।
ત્રિજન્મનિ બિડાલશ્ચ મયૂરશ્ચ તતઃ શુચિઃ ॥ ૧૧૬॥

ઘૃતં તૈલાદિકં ચૈવ યો હરેત્સુરવિપ્રયોઃ ।
સ યાતિ જ્વાલાકુણ્ડં ચ ભસ્મકુણ્ડં ચ પાતકી ॥ ૧૧૭॥

તત્ર સ્થિત્વા શતાબ્દં ચ સ ભવેત્તૈલપાયિતઃ ।
સપ્તજન્મનિ મત્સ્યશ્ચ મૂષકશ્ચ તતઃ શુચિઃ ॥ ૧૧૮॥

સુગન્ધિતૈલં ધાત્રીં વા ગન્ધદ્રવ્યાન્યદેવ વા ।
ભારતે પુણ્યવર્ષે ચ યો હરેત્સુરવિપ્રયોઃ ॥ ૧૧૯॥

સ વસેદ્દગ્ધકુણ્ડે ચ ભવેદ્દગ્ધો દિવાનિશમ્ ।
સ્વલોમમાનવર્ષં ચ તતો દુર્ગન્ધિકો ભવેત્ ॥ ૧૨૦॥

દુર્ગન્ધિકઃ સપ્તજન્મ મૃગનાભિસ્ત્રિજન્મનિ ।
સપ્તજન્મસુ મન્થાનસ્તતો હિ માનવો ભવેત્ ॥ ૧૨૧॥

બલેનૈવ છલેનૈવ હિંસારૂપેણ વા સતિ ।
બલિષ્ઠશ્ચ હરેદ્ભૂમિં ભારતે પરપૈતૃકીમ્ ॥ ૧૨૨॥

સ વસેત્તપ્તસૂર્મિં ચ ભવેત્તાપી દિવાનિશમ્ ।
તપ્તતૈલે યથા જીવો દગ્ધો ભવતિ સન્તતમ્ ॥ ૧૨૩॥

ભસ્મસાન્ન ભવત્યેવ ભોગે દેહી ન નશ્યતિ ।
સપ્તમન્વન્તરં પાપી સન્તપ્તસ્તત્ર તિષ્ઠતિ ॥ ૧૨૪॥

શબ્દં કરોત્યનાહારો યમદૂતેન તાડિતઃ ।
ષષ્ટિવર્ષસહસ્રાણિ વિટ્કૃમિશ્ચ ભવેત્તતઃ ॥ ૧૨૫॥

તતો ભવેદ્ભૂમિહીનો દરિદ્રશ્ચ તતઃ શુચિઃ ।
તતઃ સ્વયોનિં સમ્પ્રાપ્ય શુભં કર્માચરેત્પુનઃ ॥ ૧૨૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નાનાકર્મ-
વિપાકફલકથનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૯.૩૩॥

## ૯.૩૪ ચતુસ્ત્રિંશોઽધ્યાયઃ । નાનાકર્મવિપાકફલવર્ણનમ્ ।

યમ ઉવાચ ।
છિનત્તિ જીવં ખડ્ગેન દયાહીનઃ સુદારુણઃ ।

નરઘાતી હન્તિ નરમર્થલોભેન ભારતે ॥ ૧॥

અસિપત્રે વસેત્સોઽપિ યાવદિન્દ્રાશ્ચતુર્દશ ।
તેષુ યો બ્રાહ્મણાન્ હન્તિ શતમન્વન્તરં વસેત્ ॥ ૨॥

છિન્નાઙ્ગઃ સંવસેત્ સોઽપિ ખઙ્ગધારેણ સન્તતમ્ ।
અનાહારઃ શબ્દમુચ્ચૈર્યમદૂતેન તાડિતઃ ॥ ૩॥

મન્થાનઃ શતજન્માનિ શતજન્માનિ સૂકરઃ ।
કુક્કુટઃ સપ્ત જન્માનિ શ‍ૃગાલઃ સપ્તજન્મસુ ॥ ૪॥

વ્યાઘ્રશ્ચ સપ્ત જન્માનિ વૃકશ્ચૈવ ત્રિજન્મસુ ।
સપ્તજન્મસુ મણ્ડૂકો યમદૂતેન તાડિતઃ ॥ ૫॥

સ ભવેદ્ભારતે વર્ષે મહિષશ્ચ તતઃ શુચિઃ ।
ગ્રામાણાં નગરાણાં વા દહનં યઃ કરોતિ ચ ॥ ૬॥

ક્ષુરધારે વસેત્સોઽપિ છિન્નાઙ્ગસ્ત્રિયુગં સતિ ।
તતઃ પ્રેતો ભવેત્સદ્યો વહ્નિવક્ત્રો ભ્રમન્મહીમ્ ॥ ૭॥

સપ્તજન્મામેધ્યભોજી કપોતઃ સપ્તજન્મસુ ।
તતો ભવેન્મહાશૂલી માનવઃ સપ્તજન્મનિ ॥ ૮॥

સપ્તજન્મ ગલત્કુષ્ઠી તતઃ શુદ્ધો ભવેન્નરઃ ।
પરકર્ણે મુખં દત્ત્વા પરનિન્દાં કરોતિ યઃ ॥ ૯॥

પરદોષે મહાશ્લાઘી દેવબ્રાહ્મણનિન્દકઃ ।
સૂચીમુખે વસેત્સોઽપિ સૂચીવિદ્ધો યુગત્રયમ્ ॥ ૧૦॥

તતો ભવેદ્ વૃશ્ચિકશ્ચ સર્પશ્ચ સપ્તજન્મસુ ।
વજ્રકીટઃ સપ્તજન્મ ભસ્મકીટસ્તતઃ પરમ્ ॥ ૧૧॥

તતો ભવેન્માનવશ્ચ મહાવ્યાધિસ્તતઃ શુચિઃ ।
ગૃહિણાં હિ ગૃહં ભિત્ત્વા વસ્તુસ્તેયં કરોતિ યઃ ॥ ૧૨॥

ગાશ્ચ છાગાંશ્ચ મેષાંશ્ચ યાતિ ગોકામુખે ચ સઃ ।
તાડિતો યમદૂતેન વસેત્તત્ર યુગત્રયમ્ ॥ ૧૩॥

તતો ભવેત્સપ્તજન્મ ગોજાતિર્વ્યાધિસંયુતઃ ।
ત્રિજન્મનિ મેષજાતિશ્છાગજાતિસ્ત્રિજન્મનિ ॥ ૧૪॥

તતો ભવેન્માનવશ્ચ નિત્યરોગી દરિદ્રકઃ ।
ભાર્યાહીનો બન્ધુહીનઃ સન્તાપી ચ તતઃ શુચિઃ ॥ ૧૫॥

સામાન્યદ્રવ્યચૌરશ્ચ યાતિ નક્રમુખં ચ સઃ ।
તાડિતો યમદૂતેન વસેત્તત્રાબ્દકત્રયમ્ ॥ ૧૬॥

તતો ભવેત્સપ્તજન્મ ગોપતિર્વ્યાધિસંયુતઃ ।
તતો ભવેન્માનવશ્ચ મહારોગી તતઃ શુચિઃ ॥ ૧૭॥

હન્તિ ગાશ્ચ ગજાંશ્ચૈવ તુરગાંશ્ચ નગાંસ્તથા ।
સ યાતિ ગજદંશં ચ મહાપાપી યુગત્રયમ્ ॥ ૧૮॥

તાડિતો યમદૂતેન નાગદન્તેન સન્તતમ્ ।
સ ભવેદ્ગજજાતિશ્ચ તુરગશ્ચ ત્રિજન્મનિ ॥ ૧૯॥

ગોજાતિર્મ્લેચ્છજાતિશ્ચ તતઃ શુદ્ધો ભવેન્નરઃ ।
જલં પિબન્તીં તૃષિતાં ગાં વારયતિ યઃ પુમાન્ ॥ ૨૦॥

નરકં ગોમુખાકારં કૃમિતપ્તોદકાન્વિતમ્ ।
તત્ર તિષ્ઠતિ સન્તપ્તો યાવન્મન્વન્તરાવધિ ॥ ૨૧॥

તતો નરોઽપિ ગોહીનો મહારોગી દરિદ્રકઃ ।
સપ્તજન્માન્ત્યજાતિશ્ચ તતઃ શુદ્ધો ભવેન્નરઃ ॥ ૨૨॥

ગોહત્યાં બ્રહ્મહત્યાં ચ કરોતિ હ્યતિદેશિકીમ્ ।
યો હિ ગચ્છત્યગમ્યાં ચ યઃ સ્ત્રીહત્યાં કરોતિ ચ ॥ ૨૩॥

ભિક્ષુહત્યાં મહાપાપી ભ્રૂણહત્યાં ચ ભારતે ।
કુમ્ભીપાકે વસેત્સોઽપિ યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૨૪॥

તાડિતો યમદૂતેન ચૂર્ણ્યમાનશ્ચ સન્તતમ્ ।
ક્ષણં પતતિ વહ્નૌ ચ ક્ષણં પતતિ કણ્ટકે ॥ ૨૫॥

ક્ષણં પતેત્તપ્તતૈલે તપ્તો યેન ક્ષણં ક્ષણમ્ ।
ક્ષણં ચ તપ્તલોહે ચ ક્ષણં ચ તપ્તતામ્રકે ॥ ૨૬॥

ગૃધ્રો જન્મસહસ્રાણિ શતજન્માનિ સૂકરઃ ।
કાકશ્ચ સપ્ત જન્માનિ સર્પશ્ચ સપ્તજન્મસુ ॥ ૨૭॥

ષષ્ટિવર્ષસહસ્રાણિ વિષ્ઠાયાં જાયતે કૃમિઃ ।
નાનાજન્મસુ સ વૃષસ્તતઃ કુષ્ઠી દરિદ્રકઃ ॥ ૨૮॥

સાવિત્ર્યુવાચ ।
વિપ્રહત્યા ચ ગોહત્યા કિંવિધા ચાતિદૈશિકી ।
કા વા નૃણામગમ્યા ચ કો વા સન્ધ્યાવિહીનકઃ ॥ ૨૯॥

અદીક્ષિતઃ પુમાન્કો વા કો વા તીર્થપ્રતિગ્રહી ।
દ્વિજઃ કો વા ગ્રામયાજી કો વા વિપ્રોઽથ દેવલઃ ॥ ૩૦॥

શૂદ્રાણાં સૂપકારશ્ચ પ્રમત્તો વૃષલીપતિઃ ।
એતેષાં લક્ષણં સર્વં વદ વેદવિદાં વર ॥ ૩૧॥

ધર્મરાજ ઉવાચ ।
શ્રીકૃષ્ણે ચ તદર્ચાયામન્યેષાં પ્રકૃતૌ સતિ ।
શિવે ચ શિવલિઙ્ગે ચ સૂર્યે સૂર્યમણૌ તથા ॥ ૩૨॥

ગણેશે વાથ દુર્ગાયામેવં સર્વત્ર સુન્દરિ ।
યઃ કરોતિ ભેદબુદ્ધિં બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૩૩॥

સ્વગુરૌ સ્વેષ્ટદેવે ચ જન્મદાતરિ માતરિ ।
કરોતિ ભેદબુદ્ધિં યો બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૩૪॥

વૈષ્ણવેષુ ચ ભક્તેષુ બ્રાહ્મણેષ્વિતરેષુ ચ ।
કરોતિ ભેદબુદ્ધિં યો બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૩૫॥

વિપ્રપાદોદકે ચૈવ શાલગ્રામોદકે તથા ।
કરોતિ ભેદબુદ્ધિં યો બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૩૬॥

શિવનૈવેદ્યકે ચૈવ હરિનૈવેદ્યકે તથા ।
કરોતિ ભેદબુદ્ધિં યો બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૩૭॥

સર્વેશ્વરેશ્વરે કૃષ્ણે સર્વકારણકારણે ।
સર્વાદ્યે સર્વદેવાનાં સેવ્યે સર્વાન્તરાત્મનિ ॥ ૩૮॥

માયયાનેકરૂપે વાપ્યેક એવ હિ નિર્ગુણે ।
કરોતીશેન ભેદં યો બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૩૯॥

શક્તિભક્તે દ્વેષબુદ્ધિં શક્તિશાસ્ત્રે તથૈવ ચ ।
દ્વેષં યઃ કુરુતે મર્ત્યો બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૪૦॥

પિતૃદેવાર્ચનં યો વા ત્યજેદ્વેદનિરૂપિતમ્ ।

યઃ કરોતિ નિષિદ્ધં ચ બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૪૧॥

યો નિન્દતિ હૃષીકેશં તન્મન્ત્રોપાસકં તથા ।
પવિત્રાણાં પવિત્રં ચ જ્ઞાનાનન્દં સનાતનમ્ ॥ ૪૨॥

પ્રધાનં વૈષ્ણવાનાં ચ દેવાનાં સેવ્યમીશ્વરમ્ ।
યે નાર્ચયન્તિ નિન્દન્તિ બ્રહ્મહત્યાં લભન્તિ તે ॥ ૪૩॥

યે નિન્દન્તિ મહાદેવીં કારણબ્રહ્મરૂપિણીમ્ ।
સર્વશક્તિસ્વરૂપાં ચ પ્રકૃતિં સર્વમાતરમ્ ॥ ૪૪॥

સર્વદેવસ્વરૂપાં ચ સર્વેષાં વન્દિતાં સદા ।
સર્વકારણરૂપાં ચ બ્રહ્મહત્યાં લભન્તિ તે ॥ ૪૫॥

કૃષ્ણજન્માષ્ટમીં રામનવમીં ચ સુપુણ્યદામ્ ।
શિવરાત્રિં તથા ચૈકાદશીં વારે રવેસ્તથા ॥ ૪૬॥

પઞ્ચ પર્વાણિ પુણ્યાનિ યે ન કુર્વન્તિ માનવાઃ ।
લભન્તિ બ્રહ્મહત્યાં તે ચાણ્ડાલાધિકપાપિનઃ ॥ ૪૭॥

અમ્બુવાચ્યાં ભૂખનનં જલશૌચાદિકં ચ યે ।
કુર્વન્તિ ભારતે વર્ષે બ્રહ્મહત્યાં લભન્તિ તે ॥ ૪૮॥

ગુરુઞ્ચ માતરં તાતં સાધ્વીં ભાર્યાં સુતં સુતામ્ ।
અનિન્દ્યાં યો ન પુષ્ણાતિ બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૪૯॥

વિવાહો યસ્ય ન ભવેન્ન પશ્યતિ સુતં તુ યઃ ।
હરિભક્તિવિહીનો યો બ્રહ્મહત્યાં લભેત્તુ સઃ ॥ ૫૦॥

હરેરનૈવેદ્યભોજી નિત્યં વિષ્ણું ન પૂજયેત્ ।
પુણ્યં પાર્થિવલિઙ્ગં ચ બ્રહ્મહાસૌ પ્રકીર્તિતઃ ॥ ૫૧॥

ગોપ્રહારં પ્રકુર્વન્તં દૃષ્ટ્વા યો ન નિવારયેત્ ।
યાતિ ગોવિપ્રયોર્મધ્યે ગોહત્યા તુ લભેત્તુ સઃ ॥ ૫૨॥

દણ્ડૈર્ગોસ્તાડયેન્મૂઢો યો વિપ્રો વૃષવાહનઃ ।
દિને દિને ગોવધં ચ લભતે નાત્ર સંશયઃ ॥ ૫૩॥

દદાતિ ગોભ્ય ઉચ્છિષ્ટં ભોજયેદ્ વૃષવાહકમ્ ।
ભુનક્તિ વૃષવાહાન્નં સ ગોહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૫૪॥

વૃષલીપતિં યાજયેદ્યો ભુઙ્ક્તેઽન્નં તસ્ય યો નરઃ ।
ગોહત્યાશતકં સોઽપિ લભતે નાત્ર સંશયઃ ॥ ૫૫॥

પાદં દદાતિ વહ્નૌ યો ગાશ્ચ પાદેન તાડયેત્ ।
ગેહં વિશેદધૌતાઙ્ઘ્રિઃ સ્નાત્વા ગોવધમાપ્નુયાત્ ॥ ૫૬॥

યો ભુઙ્ક્તે સ્નિગ્ધપાદેન શેતે સ્નિગ્ધાઙ્ઘ્રિરેવ ચ ।
સૂર્યોદયે ચ યો ભુઙ્ક્તે સ ગોહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૫૭॥

અવીરાન્નં ચ યો ભુઙ્ક્તે યોનિજીવ્યસ્ય ચ દ્વિજઃ ।
યસ્ત્રિસન્ધ્યાવિહીનશ્ચ ગોહત્યા લભતે ચ સઃ ॥ ૫૮॥

સ્વભર્તરિ ચ દેવે વા ભેદબુદ્ધિં કરોતિ યા ।
કટૂક્ત્યા તાડયેત્ કાન્તં સા ગોહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૫૯॥

ગોમાર્ગવર્જનં કૃત્વા દદાતિ સસ્યમેવ વા ।
તડાગે વા તુ દુર્ગે વા સ ગોહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૬૦॥

પ્રાયશ્ચિત્તે ગોવધસ્ય યઃ કરોતિ વ્યતિક્રમમ્ ।
પુત્રલોભાદથાજ્ઞાનાત્સ ગોહત્યા લભેદ્ ધ્રુવમ્ ॥ ૬૧॥

રાજકે દૈવકે યત્નાદ્ ગોસ્વામી ગાં ન રક્ષતિ ।
દુઃખં દદાતિ યો મૂઢો ગોહત્યાં સ લભેદ્ ધ્રુવમ્ ॥ ૬૨॥

પ્રાણિનો લઙ્ઘયેદ્યો હિ દેવાર્ચામનલં જલમ્ ।
નૈવેદ્યં પુષ્પમન્નં ચ સ ગોહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૬૩॥

શશ્વન્નાસ્તીતિ યો વાદી મિથ્યાવાદી પ્રતારકઃ ।
દેવદ્વેષી ગુરુદ્વેષી સ ગોહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૬૪॥

દેવતાપ્રતિમાં દૃષ્ટ્વા ગુરું વા બ્રાહ્મણં સતિ ।
સમ્ભ્રમાન્ન નમેદ્યો હિ સ ગોહત્યા લભેદ્ ધ્રુવમ્ ॥ ૬૫॥

ન દદાત્યાશિષં કોપાત્પ્રણતાય ચ યો દ્વિજઃ ।
વિદ્યાર્થિને ચ વિદ્યાં ચ સ ગોહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૬૬॥

ગોહત્યા વિપ્રહત્યા ચ કથિતા ચાતિદેશિકી ।
ગમ્યાં સ્ત્રિયં નૃણામેવ નિબોધ કથયામિ તે ॥ ૬૭॥

સ્વસ્ત્રી ગમ્યા ચ સર્વેષામિતિ વેદાનુશાસનમ્ ।
અગમ્યા ચ તદન્યા યા ચેતિ વેદવિદો વિદુઃ ॥ ૬૮॥

સામાન્યં કથિતં સર્વં વિશેષં શ઼ૃણુ સુન્દરિ ।
અત્યગમ્યા હિ યા યાશ્ચ નિબોધ કથયામિ તાઃ ॥ ૬૯॥

શૂદ્રાણાં વિપ્રપત્ની ચ વિપ્રાણાં શૂદ્રકામિની ।
અત્યગમ્યા ચ નિન્ધા ચ લોકે વેદે પતિવ્રતે ॥ ૭૦॥

શૂદ્રશ્ચ બ્રાહ્મણીં ગત્વા બ્રહ્મહત્યાશતં લભેત્ ।
તત્સમં બ્રાહ્મણી ચાપિ કુમ્ભીપાકં લભેદ્ ધ્રુવમ્ ॥ ૭૧॥

શૂદ્રાણાં વિપ્રપત્ની ચ વિપ્રાણાં શૂદ્રકામિની ।
યદિ શૂદ્રા વ્રજેદ્વિપ્રો વૃષલીપતિરેવ સઃ ॥ ૭૨॥

સ ભ્રષ્ટો વિપ્રજાતેશ્ચ ચાણ્ડાલાત્સોઽધમઃ સ્મૃતઃ ।
વિષ્ઠાસમશ્ચ તત્પિણ્ડો મૂત્રં તસ્ય ચ તર્પણમ્ ॥ ૭૩॥

ન પિતૃણાં સુરાણાં ચ તદ્દત્તમુપતિષ્ઠતિ ।
કોટિજન્માર્જિતં પુણ્યં તસ્યાર્ચાત્તપસાર્જિતમ્ ॥ ૭૪॥

દ્વિજસ્ય વૃષલીલોભાન્નશ્યત્યેવ ન સંશયઃ ।
બ્રાહ્મણશ્ચ સુરાપીતિર્વિડ્ભોજી વૃષલીપતિઃ ॥ ૭૫॥

તપ્તમુદ્રાદગ્ધદેહસ્તપ્તશૂલાઙ્કિતસ્તથા ।
હરિવાસરભોજી ચ કુમ્ભીપાકં વ્રજેદ્ દ્વિજઃ ॥ ૭૬॥

ગુરુપત્નીં રાજપત્નીં સપત્નીં માતરં ધ્રુવમ્ ।
સુતાં પુત્રવધૂં શ્વશ્રૂં સગર્ભાં ભગિનીં સતીમ્ ॥ ૭૭॥

સહોદરભ્રાતૃજાયાં માતુલાનીં પિતુઃ પ્રસૂમ્ ।
માતુઃ પ્રસૂં તત્સ્વસારં ભગિનીં ભ્રાતૃકન્યકામ્ ॥ ૭૮॥

શિષ્યાં શિષ્યસ્ય પત્નીં ચ ભાગિનેયસ્ય કામિનીમ્ ।
ભ્રાતુઃ પુત્રપ્રિયાં ચૈવાત્યગમ્યા આહ પદ્મજઃ ॥ ૭૯॥

એતાઃ કામેન કાન્તા યો વ્રજેદ્વૈ માનવાધમઃ ।
સ માતૃગામી વેદેષુ બ્રહ્મહત્યાશતં વ્રજેત્ ॥ ૮૦॥

અકર્માર્હોઽપ્યસંસ્પૃશ્યો લોકે વેદે ચ નિન્દિતઃ ।
સ યાતિ કુમ્ભીપાકે ચ મહાપાપી સુદુષ્કરે ॥ ૮૧॥

કરોત્યશુદ્ધાં સન્ધ્યાં વા ન સન્ધ્યાં વા કરોતિ ચ ।

ત્રિસન્ધ્યં વર્જયેદ્યો વા સન્ધ્યાહીનશ્ચ સ દ્વિજઃ ॥ ૮૨॥

વૈષ્ણવં ચ તથા શૈવં શાક્તં સૌરં ચ ગાણપમ્ ।
યોઽહઙ્કારાન્ન ગૃહ્ણાતિ મન્ત્રં સોઽદીક્ષિતઃ સ્મૃતઃ ॥ ૮૩॥

પ્રવાહમવધિં કૃત્વા યાવદ્ધસ્તચતુષ્ટયમ્ ।
તત્ર નારાયણઃ સ્વામી ગઙ્ગાગર્ભાન્તરે વસેત્ ॥ ૮૪॥

તત્ર નારાયણક્ષેત્રે મૃતો યાતિ હરેઃ પદમ્ ।
વારાણસ્યાં બદર્યાં ચ ગઙ્ગાસાગરસઙ્ગમે ॥ ૮૫॥

પુષ્કરે હરિહરક્ષેત્રે પ્રભાસે કામરૂસ્થલે ।
હરિદ્વારે ચ કેદારે તથા માતૃપુરેઽપિ ચ ॥ ૮૬॥

સરસ્વતીનદીતીરે પુણ્યે વૃન્દાવને વને ।
ગોદાવર્યાં ચ કૌશિક્યાં ત્રિવેણ્યાં ચ હિમાચલે ॥ ૮૭॥

એષુ તીર્થેષુ યો દાનં પ્રતિગૃહ્ણાતિ કામતઃ ।
સ ચ તીર્થપ્રતિગ્રાહી કુમ્ભીપાકે પ્રયાતિ સઃ ॥ ૮૮॥

શૂદ્રસેવી શૂદ્રયાજી ગ્રામયાજીતિ કીર્તિતઃ ।
તથા દેવોપજીવી ચ દેવલઃ પરિકીર્તિતઃ ॥ ૮૯॥

શૂદ્રપાકોપજીવી યઃ સૂપકાર ઇતિ સ્મૃતઃ ।
સન્ધ્યાપૂજનહીનશ્ચ પ્રમત્તઃ પતિતઃ સ્મૃતઃ ॥ ૯૦॥

ઉક્તં સર્વં મયા ભદ્રે લક્ષણં વૃષલીપતેઃ ।
એતે મહાપાતકિનઃ કુમ્ભીપાકં પ્રયાન્તિ તે ।
કુણ્ડાન્યન્યાનિ યે યાન્તિ નિબોધ કથયામિ તે ॥ ૯૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે સાવિત્ર્યુપાખ્યાને
નાનાકર્મવિપાકફલવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૯.૩૪॥

## ૯.૩૫ પઞ્ચત્રિંશોઽધ્યાયઃ । નાનાકર્મવિપાકફલકથનમ્ ।

ધર્મરાજ ઉવાચ ।
દેવસેવાં વિના સાધ્વિ ન ભવેત્કર્મકૃન્તનમ્ ।
શુદ્ધકર્મ શુદ્ધબીજં નરકશ્ચ કુકર્મણા ॥ ૧॥

પુંશ્ચલ્યન્નં ચ યો ભુઙ્ક્તે યોઽસ્યાં ગચ્છેત્પતિવ્રતે ।
સ દ્વિજઃ કાલસૂત્રં ચ મૃતો યાતિ સુદુર્ગમમ્ ॥ ૨॥

શતવર્ષં કાલસૂત્રે સ્થિરીભૂતો ભવેદ્ ધ્રુવમ્ ।
તત્ર જન્મનિ રોગી ચ તતઃ શુદ્ધો ભવેદ્ દ્વિજઃ ॥ ૩॥

પતિવ્રતા ચૈકપતૌ દ્વિતીયે કુલટા સ્મૃતા ।
તૃતીયે ધર્ષિણી જ્ઞેયા ચતુર્થે પુંશ્ચલીત્યપિ ॥ ૪॥

વેશ્યા ચ પઞ્ચમે ષષ્ઠે પુઙ્ગી ચ સપ્તમેઽષ્ટમે ।
તત ઊર્ધ્વં મહાવેશ્યા સાસ્પૃશ્યા સર્વજાતિષુ ॥ ૫॥

યો દ્વિજઃ કુલટાં ગચ્છેદ્ધર્ષિણીં પુંશ્ચલીમપિ ।
પુઙ્ગીં વેશ્યાં મહાવેશ્યાં મત્સ્યોદે યાતિ નિશ્ચિતમ્ ॥ ૬॥

શતાબ્દં કુલટાગામી ધૃષ્ટાગામી ચતુર્ગુણમ્ ।
ષડ્ગુણં પુંશ્ચલીગામી વેશ્યાગામી ગુણાષ્ટકમ્ ॥ ૭॥

પુઙ્ગીગામી દશગુણં વસેત્તત્ર ન સંશયઃ ।
મહાવેશ્યાકામુકશ્ચ તતો દશગુણં વસેત્ ॥ ૮॥

તત્રૈવ યાતનાં ભુઙ્ક્તે યમદૂતેન તાડિતઃ ।
તિત્તિરિઃ કુલટાગામી ધૃષ્ટાગામી ચ વાયસઃ ॥ ૯॥

કોકિલઃ પુંશ્ચલીગામી વેશ્યાગામી વૃકઃ સ્મૃતઃ ।
પુઙ્ગીગામી સૂકરશ્ચ સપ્તજન્મનિ ભારતે ॥ ૧૦॥

મહાવેશ્યાપ્રગામી ચ જાયતે શાલ્મલીતરુઃ ।
યો ભુઙ્ક્તે જ્ઞાનહીનશ્ચ ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૧૧॥

અરુન્તુદં સ યાત્યેવાપ્યન્નમાનાબ્દમેવ ચ ।
તતો ભવેન્માનવશ્ચાપ્યુદરે રોગપીડિતઃ ॥ ૧૨॥

ગુલ્મયુક્તશ્ચ કાણશ્ચ દન્તહીનસ્તતઃ શુચિઃ ।
વાક્પ્રદત્તાં સ્વકન્યાં ચ યોઽન્યસ્મૈ પ્રદદાતિ ચ ॥ ૧૩॥

સ વસેત્પાંસુકુણ્ડે ચ તદ્ભોજી શતવત્સરમ્ ।
તદ્દ્રવ્યહારી યઃ સાધ્વિ પાંસુવેષ્ટે શતાબ્દકમ્ ॥ ૧૪॥

નિવસેચ્છરશય્યાયાં મમ દૂતેન તાડિતઃ ।
ભક્ત્યા ન પૂજયેદ્વિપ્રઃ શિવલિઙ્ગં ચ પાર્થિવમ્ ॥ ૧૫॥

સ યાતિ શૂલિનઃ પાપાચ્છૂલપ્રોતં સુદારુણમ્ ।
સ્થિત્વા શતાબ્દં તત્રૈવ શ્વાપદઃ સપ્તજન્મસુ ॥ ૧૬॥

તતો ભવેદ્દેવલશ્ચ સપ્તજન્મ તતઃ શુચિઃ ।
કરોતિ કુણ્ઠિતં વિપ્રં યદ્ભિયા કમ્પતે દ્વિજઃ ॥ ૧૭॥

પ્રકમ્પને વસેત્સોઽપિ વિપ્રલોમાબ્દમેવ ચ ।
પ્રકોપવદના કોપાત્ સ્વામિનં યા ચ પશ્યતિ ॥ ૧૮॥

કટૂક્તિં તં પ્રવદતિ સોલ્મુકં સમ્પ્રયાતિ હિ ।
ઉલ્કાં દદાતિ તદ્વક્ત્રે સતતં મમ કિઙ્કરઃ ॥ ૧૯॥

દણ્ડેન તાડયેન્મૂર્ધ્નિ તલ્લોમાબ્દપ્રમાણકમ્ ।
તતો ભવેન્માનવી ચ વિધવા સપ્તજન્મસુ ॥ ૨૦॥

સા ભુક્ત્વા ચૈવ વૈધવ્યં વ્યાધિયુક્તા તતઃ શુચિઃ ।
યા બ્રાહ્મણી શૂદ્રભોગ્યા ચાન્ધકૂપે પ્રયાતિ સા ॥ ૨૧॥

તપ્તશૌચોદકે ધ્વાન્તે તદાહારી દિવાનિશમ્ ।
નિવસેદતિસન્તપ્તા મમ દૂતેન તાડિતા ॥ ૨૨॥

શૌચોદકે નિમગ્ના સા યાવદિન્દ્રાશ્ચતુર્દશ ।
કાકી જન્મસહસ્રાણિ શતજન્માનિ સૂકરી ॥ ૨૩॥

શ઼ૃગાલી શતજન્માનિ શતજન્માનિ કુક્કુટી ।
પારાવતી સપ્તજન્મ વાનરી સપ્તજન્મસુ ॥ ૨૪॥

તતો ભવેત્સા ચાણ્ડાલી સર્વભોગ્યા ચ ભારતે ।
તતો ભવેચ્ચ રજકી યક્ષ્મગ્રસ્તા ચ પુંશ્ચલી ॥ ૨૫॥

તતઃ કુષ્ઠયુતા તૈલકારી શુદ્ધા ભવેત્તતઃ ।
નિવસેદ્વેધને વેશ્યા પુઙ્ગી ચ દણ્ડતાડને ॥ ૨૬॥

જલરન્ધ્રે વસેદ્વેશ્યા કુલટા દેહચૂર્ણકે ।
સ્વૈરિણી દલને ચૈવ ધૃષ્ટા ચ શોષણે તથા ॥ ૨૭॥

નિવસેદ્યાતનાયુક્તા મમ દૂતેન તાડિતા ।
વિણ્મૂત્રભક્ષા સતતં યાવન્મન્વન્તરં સતિ ॥ ૨૮॥

તતો ભવેદ્વિટ્કૃમિશ્ચ લક્ષવર્ષં તતઃ શુચિઃ ।

બ્રાહ્મણો બ્રાહ્મણીં ગચ્છેત્ક્ષત્રિયાં વાપિ ક્ષત્રિયઃ ॥ ૨૯॥

વૈશ્યો વૈશ્યાં ચ શૂદ્રા વા શૂદ્રશ્ચાપિ વ્રજેદ્યદિ ।
સવર્ણપરદારૈશ્ચ કષાયં યાન્તિ તે જનાઃ ॥ ૩૦॥

ભુક્ત્વા કષાયતપ્તોદં નિવસેદ્વા શતાબ્દકમ્ ।
તતો વિપ્રો ભવેચ્છુદ્ધસ્તતો વૈ ક્ષત્રિયાદયઃ ॥ ૩૧॥

યોષિતશ્ચાપિ શુદ્ધ્યન્તીત્યેવમાહ પિતામહઃ ।
ક્ષત્રિયો બ્રાહ્મણીં ગચ્છેદ્વૈશ્યો વાપિ પતિવ્રતે ॥ ૩૨॥

માતૃગામી ભવેત્સોઽપિ શૂર્પે ચ નરકે વસેત્ ।
શૂર્પાકારૈશ્ચ કૃમિભિર્બ્રાહ્મણ્યા સહ ભક્ષિતઃ ॥ ૩૩॥

પ્રતપ્તમૂત્રભોજી ચ મમ દૂતેન તાડિતઃ ।
તત્રૈવ યાતનાં ભુઙ્ક્તે યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૩૪॥

સપ્તજન્મ વરાહશ્ચ છાગલશ્ચ તતઃ શુચિઃ ।
કરે ધૃત્વા તુ તુલસીં પ્રતિજ્ઞાં યો ન પાલયેત્ ॥ ૩૫॥

મિથ્યા વા શપથં કુર્યાત્સ ચ જ્વાલામુખં વ્રજેત્ ।
ગઙ્ગાતોયં કરે કૃત્વા પ્રતિજ્ઞાં યો ન પાલયેત્ ॥ ૩૬॥

શિલાં વા દેવપ્રતિમાં સ ચ જ્વાલામુખં વ્રજેત્ ।
દત્ત્વા દક્ષિણહસ્તં ચ પ્રતિજ્ઞાં યો ન પાલયેત્ ॥ ૩૭॥

સ્થિત્વા દેવગૃહે વાપિ સ ચ જ્વાલામુખં વ્રજેત્ ।
આસ્પૃશ્ય બ્રાહ્મણં ગાં ચ જ્વાલાવહ્નિં વ્રજેદ્ દ્વિજઃ ॥ ૩૮॥

ન પાલયેત્પ્રતિજ્ઞાં ચ સ ચ જ્વાલામુખં વ્રજેત્ ।
મિત્રદ્રોહી કૃતઘ્નશ્ચ યશ્ચ વિશ્વાસઘાતકઃ ॥ ૩૯॥

મિથ્યાસાક્ષ્યપ્રદશ્ચૈવ સ ચ જ્વાલામુખં વ્રજેત્ ।
એતે તત્ર વસન્ત્યેવ યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૪૦॥

તથાઙ્ગારપ્રદગ્ધાશ્ચ મમ દૂતેન તાડિતાઃ ।
ચાણ્ડાલસ્તુલસીં સ્પૃષ્ટ્વા સપ્તજન્મ તતઃ શુચિઃ ॥ ૪૧॥

મ્લેચ્છો ગઙ્ગાજલસ્પર્શી પઞ્ચજન્મ તતઃ શુચિઃ ।
શિલાસ્પર્શી વિટ્કૃમિશ્ચ સપ્તજન્મસુ સુન્દરિ ॥ ૪૨॥

અર્ચાસ્પર્શી બ્રહ્મકૃમિઃ સપ્તજન્મ તતઃ શુચિ ।
દક્ષહસ્તપ્રદાતા ચ સર્પશ્ચ સપ્તજન્મસુ ॥ ૪૩॥

તતો ભવેદ્ બ્રહ્મહીનો માનવશ્ચ તતઃ શુચિઃ ।
મિથ્યાવાદી દેવગૃહે દેવલઃ સપ્તજન્મસુ ॥ ૪૪॥

વિપ્રાદિસ્પર્શકારી ચ વ્યાઘ્રજાતિર્ભવેદ્ ધ્રુવમ્ ।
તતો ભવેચ્ચ મૂકઃ સ બધિરશ્ચ ત્રિજન્મનિ ॥ ૪૫॥

ભાર્યાહીનો બન્ધુહીનો વંશહીનસ્તતઃ શુચિઃ ।
મિત્રદ્રોહી ચ નકુલઃ કૃતઘ્નશ્ચાપિ ગણ્ડકઃ ॥ ૪૬॥

વિશ્વાસઘાતી વ્યાઘ્રશ્ચ સપ્તજન્મસુ ભારતે ।
મિથ્યાસાક્ષી ચ વક્તવ્યે મણ્ડૂકઃ સપ્તજન્મસુ ॥ ૪૭॥

પૂર્વાન્સપ્તાપરાન્સપ્ત પુરુષાન્હન્તિ ચાત્મનઃ ।
નિત્યક્રિયાવિહીનશ્ચ જડત્વેન યુતો દ્વિજઃ ॥ ૪૮॥

યસ્યાનાસ્થા વેદવાક્યે મન્દં હસતિ સન્તતમ્ ।
વ્રતોપવાસહીનશ્ચ સદ્વાક્યપરનિન્દકઃ ॥ ૪૯॥

ધૂમ્રાન્ધે ચ વસેત્સોઽપિ શતાબ્દં ધૂમ્રભક્ષકઃ ।
જલજન્તુર્ભવેત્સોઽપિ શતજન્મક્રમેણ ચ ॥ ૫૦॥

તતો નાનાપ્રકારશ્ચ મત્સ્યજાતિસ્તતઃ શુચિઃ ।
યઃ કરોત્યુપહાસં ચ દેવબ્રાહ્મણયોર્ધને ॥ ૫૧॥

પાતયિત્વા સ પુરુષાન્દશપૂર્વાન્દશાપરાન્ ।
સોઽયં યાતિ ચ ધૂમ્રાન્ધં ધૂમ્રધ્વાન્તસમન્વિતમ્ ॥ ૫૨॥

ધૂમ્રક્લિષ્ટો ધૂમ્રભોજી વસેત્તત્ર ચતુર્ગુણમ્ ।
તતો મૂષકજાતિશ્ચ સપ્તજન્મસુ ભારતે ॥ ૫૩॥

તતો નાનાવિધાઃ પક્ષિજાતયઃ કૃમિજાતિભિઃ ।
તતો નાનાવિધા વૃક્ષા પશવશ્ચ તતો નરઃ ॥ ૫૪॥

વિપ્રો દૈવજ્ઞજીવી ચ વૈદ્યજીવી ચિકિત્સકઃ ।
લાક્ષાલોહાદિવ્યાપારી રસાદિવિક્રયી ચ યઃ ॥ ૫૫॥

સ યાતિ નાગવેષ્ટં ચ નાગૈર્વેષ્ટિતમેવ ચ ।
વસેત્સ લોમમાનાબ્દં તત્રૈવ નાગપાશિતઃ ॥ ૫૬॥

તતો નાનાવિધાઃ પક્ષિજાતયશ્ચ તતો નરઃ ।
તતો ભવેત્સ ગણકો વૈદ્યશ્ચ સપ્તજન્મસુ ॥ ૫૭॥

ગોપશ્ચ કર્મકારશ્ચ રઙ્ગકારસ્તતઃ શુચિઃ ।
પ્રસિદ્ધાનિ ચ કુણ્ડાનિ કથિતાનિ પતિવ્રતે ॥ ૫૮॥

અન્યાનિ ચાપ્રસિદ્ધાનિ ક્ષુદ્રાણિ સન્તિ તત્ર વૈ ।
સન્તિ પાતકિનસ્તેષુ સ્વકર્મફલભોગિનઃ ।
ભ્રમન્તિ નાનાયોનિં ચ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
નાનાકર્મવિપાકફલકથનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૯.૩૫॥

## ૯.૩૬ ષટ્ત્રિંશોઽધ્યાયઃ । દેવપૂજનાત્ સર્વારિષ્ટનિવૃત્તિવર્ણનમ્ ।

સાવિત્ર્યુવાચ ।
ધર્મરાજ મહાભાગ વેદવેદાઙ્ગપારગ ।
નાનાપુરાણેતિહાસે યત્સારં તત્પ્રદર્શય ॥ ૧॥

સર્વેષુ સારભૂતં યત્સર્વેષ્ટં સર્વસમ્મતમ્ ।
કર્મચ્છેદબીજરૂપં પ્રશસ્તં સુખદં નૃણામ્ ॥ ૨॥

સર્વપ્રદં ચ સર્વેષાં સર્વમઙ્ગલકારણમ્ ।
ભયં દુઃખં ન પશ્યન્તિ યેન વૈ સર્વમાનવાઃ ॥ ૩॥

કુણ્ડાનિ તે ન પશ્યન્તિ તેષુ નૈવ પતન્તિ ચ ।
ન ભવેદ્યેન જન્માદિ તત્કર્મ વદ સામ્પ્રતમ્ ॥ ૪॥

કિમાકારાણિ કુણ્ડાનિ તાનિ વા નિર્મિતાનિ ચ ।
કે ચ કેનૈવ રૂપેણ તત્ર તિષ્ઠન્તિ પાપિનઃ ॥ ૫॥

સ્વદેહે ભસ્મસાદ્ભૂતે યાતિ લોકાન્તરં નરઃ ।
કેન દેહેન વા ભોગં કરોતિ ચ શુભાશુભમ્ ॥ ૬॥

સુચિરં ક્લેશભોગેન કથં દેહો ન નશ્યતિ ।
દેહો વા કિંવિધો બ્રહ્મંસ્તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૭॥

શ્રીનારાયણ ઉવાચ ।
સાવિત્રીવચનં શ્રુત્વા ધર્મરાજો હરિં સ્મરન્ ।
કથાં કથિતુમારેભે કર્મબન્ધનિકૃન્તનીમ્ ॥ ૮॥

ધર્મરાજ ઉવાચ ।
વત્સે ચતુર્ષુ વેદેષુ ધર્મેષુ સંહિતાસુ ચ ।
પુરાણેષ્વિતિહાસેષુ પાઞ્ચરાત્રાદિકેષુ ચ ॥ ૯॥

અન્યેષુ ધર્મશાસ્ત્રેષુ વેદાઙ્ગેષુ ચ સુવ્રતે ।
સર્વેષ્ટં સારભૂતં ચ પઞ્ચદેવાનુસેવનમ્ ॥ ૧૦॥

જન્મમૃત્યુજરાવ્યાધિશોકસન્તાપનાશનમ્ ।
સર્વમઙ્ગલરૂપં ચ પરમાનન્દકારણમ્ ॥ ૧૧॥

કારણં સર્વસિદ્ધીનાં નરકાર્ણવતારણમ્ ।
ભક્તિવૃક્ષાઙ્કુરકરં કર્મવૃક્ષનિકૃન્તનમ્ ॥ ૧૨॥

વિમોક્ષસોપાનમિદમવિનાશપદં સ્મૃતમ્ ।
સાલોક્યસાર્ષ્ટિસારૂપ્યસામીપ્યાદિપ્રદં શુભમ્ ॥ ૧૩॥

કુણ્ડાનિ યમદૂતૈશ્ચ રક્ષિતાનિ સદા શુભે ।
ન હિ પશ્યન્તિ સ્વપ્ને ચ પઞ્ચદેવાર્ચકા નરાઃ ॥ ૧૪॥

દેવીભક્તિવિહીના યે તે પશ્યન્તિ મમાલયમ્ ।
યાન્તિ યે હરિતીર્થં વા શ્રયન્તિ હરિવાસરમ્ ॥ ૧૫॥

પ્રણમન્તિ હરિં નિત્યં હર્યર્ચાં કલ્પયન્તિ ચ ।
ન યાન્તિ તેઽપિ ઘોરાં ચ મમ સંયમિનીં પુરીમ્ ॥ ૧૬॥

ત્રિસન્ધિપૂતા વિપ્રાશ્ચ શુદ્ધાચારસમન્વિતાઃ ।
નિવૃત્તિં નૈવ લપ્સ્યન્તિ દેવીસેવાં વિના નરાઃ ॥ ૧૭॥

સ્વધર્મનિરતાચારાઃ સ્વધર્મનિરતાસ્તથા ।
ગચ્છન્તો મૃત્યુલોકં ચ દુર્દૃશા મમ કિઙ્કરાઃ ॥ ૧૮॥

ભીતાઃ શિવોપાસકેભ્યો વૈનતેયાદિવોરગાઃ ।
સ્વદૂતં પાશહસ્તં ચ ગચ્છન્તં વારયામ્યહમ્ ॥ ૧૯॥

યાસ્યન્તિ તે ચ સર્વત્ર હરિદાસાશ્રમં વિના ।
કૃષ્ણમન્ત્રોપાસકાચ્ચ વૈનતેયાદિવોરગાઃ ॥ ૨૦॥

દેવીમન્ત્રોપાસકાનાં નામ્નાઞ્ચૈવ નિકૃન્તનમ્ ।
કરોતિ નખલેખન્યા ચિત્રગુપ્તશ્ચ ભીતવત્ ॥ ૨૧॥

મધુપર્કાદિકં તેષાં કુરુતે ચ પુનઃ પુનઃ ।
વિલઙ્ઘ્ય બ્રહ્મલોકં ચ લોકં ગચ્છન્તિ તે સતિ ॥ ૨૨॥

દુરિતાનિ ચ નશ્યન્તિ યેષાં સંસ્પર્શમાત્રતઃ ।
તે મહાભાગ્યવન્તો હિ સહસ્રકુલપાવનાઃ ॥ ૨૩॥

યથા ચ પ્રજ્વલદ્વહ્નૌ શુષ્કાનિ ચ તૃણાનિ ચ ।
પ્રાપ્નોતિ મોહઃ સમ્મોહં તાંશ્ચ દૃષ્ટ્વા ચ ભીતવત્ ॥ ૨૪॥

કામશ્ચ કામિનં યાતિ લોભક્રોધૌ તતઃ સતિ ।
મૃત્યુઃ પ્રલીયતે રોગો જરા શોકો ભયં તથા ॥ ૨૫॥

કાલઃ શુભાશુભં કર્મ હર્ષો ભોગસ્તથૈવ ચ ।
યે યે ન યાન્તિ તાં પીડાં કથિતાસ્તે મયા સતિ ॥ ૨૬॥

શ‍ૃણુ દેહવિવરણં કથયામિ યથાગમમ્ ।
પૃથિવી વાયુરાકાશસ્તેજસ્તોયમિતિ સ્ફુટમ્ ॥ ૨૭॥

દેહિનાં દેહબીજં ચ સ્રષ્ટૃસૃષ્ટિવિધૌ પરમ્ ।
પૃથિવ્યાદિપઞ્ચભૂતૈર્યો દેહો નિર્મિતો ભવેત્ ॥ ૨૮॥

સ કૃત્રિમો નશ્વરશ્ચ ભસ્મસાચ્ચ ભવેદિહ ।
બદ્ધોઽઙ્ગુષ્ઠપ્રમાણશ્ચ યો જીવઃ પુરુષઃ કૃતઃ ॥ ૨૯॥

બિભર્તિ સૂક્ષ્મં દેહં તં તદ્રૂપં ભોગહેતવે ।
સ દેહો ન ભવેદ્ભસ્મ જ્વલદગ્નૌ મમાલયે ॥ ૩૦॥

જલેન નષ્ટો દેહી વા પ્રહારે સુચિરં કૃતે ।
ન શસ્ત્રેણ ન વાસ્ત્રેણ સુતીક્ષ્ણકણ્ટકે તથા ॥ ૩૧॥

તપ્તદ્રવે તપ્તલોહે તપ્તપાષાણ એવ ચ ।
પ્રતપ્તપ્રતિમાશ્લેષે યત્પૂર્વપતનેઽપિ ચ ॥ ૩૨॥

ન દગ્ધો ન ચ ભગ્નઃ સ ભુઙ્ક્તે સન્તાપમેવ ચ ।
કથિતો દેહવૃત્તાન્તઃ કારણં ચ યથાગમમ્ ।
કુણ્ડાનાં લક્ષણં સર્વં બોધાય કથયામિ તે ॥ ૩૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં

સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
દેવપૂજનાત્ સર્વારિષ્ટનિવૃત્તિવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૯.૩૬॥

## ૯.૩૭ સપ્તત્રિંશોઽધ્યાયઃ । નાનાનરકકુણ્ડવર્ણનમ્ ।

ધર્મરાજ ઉવાચ ।
પૂર્ણેન્દુમણ્ડલાકારં સર્વં કુણ્ડં ચ વર્તુલમ્ ।
નિમ્નં પાષાણભેદૈશ્ચ પાચિતં બહુભિઃ સતિ ॥ ૧॥

ન નશ્વરં ચાપ્રલયં નિર્મિતં ચેશ્વરેચ્છયા ।
ક્લેશદં પાતકાનાં ચ નાનારૂપં તદાલયમ્ ॥ ૨॥

જ્વલદઙ્ગારરૂપં ચ શતહસ્તશિખાન્વિતમ્ ।
પરિતઃ ક્રોશમાનં ચ વહ્નિકુણ્ડં પ્રકીર્તિતમ્ ॥ ૩॥

મહાશબ્દં પ્રકુર્વદ્ભિઃ પાપિભિઃ પરિપૂરિતમ્ ।
રક્ષિતં મમ દૂતૈશ્ચ તાડિતૈશ્ચાપિ સન્તતમ્ ॥ ૪॥

પ્રતપ્તોદકપૂર્ણં ચ હિંસ્રજન્તુસમન્વિતમ્ ।
મહાઘોરં કાકુશબ્દં પ્રહારેણ દૃઢેન ચ ॥ ૫॥

ક્રોશાર્ધમાનં તદ્દૂતૈસ્તાડિતૈર્મમ પાર્ષદૈઃ ।
તપ્તક્ષારોદકૈઃ પૂર્ણં પુનઃ કાકૈશ્ચ સઙ્કુલમ્ ॥ ૬॥

સઙ્કુલં પાપિભિશ્ચૈવ ક્રોશમાનં ભયાનકમ્ ।
ત્રાહીતિ શબ્દં કુર્વદ્ભિર્મમ દૂતૈશ્ચ તાડિતૈઃ ॥ ૭॥

પ્રચલદ્ભિરનાહારૈઃ શુષ્કકણ્ઠોષ્ઠતાલુકૈઃ ।
વિડ્ભિરેવ કૃતં પૂર્ણં ક્રોશમાનં ચ કુત્સિતમ્ ॥ ૮॥

અતિદુર્ગન્ધિસંસક્તં વ્યાપ્તં પાપિભિરન્વહમ્ ।
તાડિતૈર્મમ દૂતૈશ્ચ તદાહારૈઃ સુદારુણૈઃ ॥ ૯॥

રક્ષેતિ શબ્દં કુર્વદ્ભિસ્તત્કીટૈરેવ ભક્ષિતૈઃ ।
તપ્તમૂત્રદ્રવૈઃ પૂર્ણં મૂત્રકીટૈશ્ચ સઙ્કુલમ્ ॥ ૧૦॥

યુક્તં મહાપાતકિભિસ્તત્કીટૈર્ભક્ષિતૈઃ સદા ।
ગવ્યૂતિમાનં ધ્વાન્તાક્તં શબ્દકૃદ્ભિશ્ચ સન્તતમ્ ॥ ૧૧॥

મદ્દૂતૈસ્તાડિતૈર્ઘોરૈઃ શુષ્કકણ્ઠોષ્ઠતાલુકૈઃ ।

શ્લેષ્મપૂર્ણં પ્રશમિતં તત્કીટૈઃ પૂરિતં સદા ॥ ૧૨॥

તદ્ભોજિભિઃ પાપિભિશ્ચ વેષ્ટિતં વેષ્ટિતૈઃ સદા ।
ક્રોશાર્ધં ગરકુણ્ડં ચ ગરભોજિભિરન્વિતમ્ ॥ ૧૩॥

ગરકીટૈર્ભક્ષિતૈશ્ચ પાપિભિઃ પૂર્ણમેવ ચ ।
તાડિતૈર્મમ દૂતૈશ્ચ શબ્દકૃદ્ભિશ્ચ કમ્પિતૈઃ ॥ ૧૪॥

સર્પાકારૈર્વજ્રદંષ્ટ્રૈ શુષ્કકણ્ઠૈઃ સુદારુણૈઃ ।
નેત્રયોર્મલપૂર્ણં ચ ક્રોશાર્ધં કીટસંયુતમ્ ॥ ૧૫॥

પાપિભિઃ સઙ્કુલં શશ્વદ્ભ્રમદ્ભિઃ કીટભક્ષિતૈઃ ।
વસારસેન સમ્પૂર્ણં ક્રોશતુર્યં સુદુઃસહમ્ ॥ ૧૬॥

તદ્ભોજિભિઃ પાતકિભિર્મમ દૂતૈશ્ચ તાડિતૈઃ ।
શુક્રકુણ્ડં ક્રોશમિતં શુક્રકીટૈશ્ચ સંયુતમ્ ॥ ૧૭॥

પાપિભિઃ સઙ્કુલં શશ્વદ્ દ્રવદ્ભિઃ કીટભક્ષિતૈઃ ।
દુર્ગન્ધિરક્તપૂર્ણં ચ વાપીમાનં ગભીરકમ્ ॥ ૧૮॥

તદ્ભોજિભિઃ પાપિભિશ્ચ સઙ્કુલં કીટભક્ષિતમ્ ।
પૂર્ણં નેત્રાશ્રુભિસ્તપ્તં બહુપાપિભિરન્વિતમ્ ॥ ૧૯॥

વાપીતુર્યપ્રમાણં ચ રુદદ્ભિઃ કીટભક્ષિતૈઃ ।
નૃણાં ગાત્રમલૈર્યુક્તં તદ્ભક્ષૈઃ પાપિભિર્યુતમ્ ॥ ૨૦॥

તાડિતૈર્મમ દૂતૈશ્ચ વ્યગ્રૈશ્ચ કીટભક્ષિતૈઃ ।
કર્ણવિટ્પરિપૂર્ણં ચ તદ્ભક્ષૈઃ પાપિભિર્વૃતમ્ ॥ ૨૧॥

વાપીતુર્યપ્રમાણં ચ બ્રુવદ્ભિઃ કીટભક્ષિતૈઃ ।
મજ્જાપૂર્ણં નરાણાં ચ મહાદુર્ગન્ધિસંયુતમ્ ॥ ૨૨॥

મહાપાતકિભિર્યુક્તં વાપીતુર્યપ્રમાણકમ્ ।
પરિપૂર્ણં સિગ્ધમાંસૈર્મમ દૂતૈશ્ચ તાડિતૈઃ ॥ ૨૩॥

પાપિભિઃ સઙ્કુલં ચૈવ વાપીમાનં ભયાનકમ્ ।
કન્યાવિક્રયિભિશ્ચૈવ તદ્ભક્ષ્યૈઃ કીટભક્ષિતૈઃ ॥ ૨૪॥

પાહીતિ શબ્દં કુર્વદ્ભિસ્ત્રાસિતૈશ્ચ ભયાનકૈઃ ।
વાપીતુર્યપ્રમાણં ચ નખાદિકચતુષ્ટયમ્ ॥ ૨૫॥

પાપિભિઃ સંયુતં શશ્વન્મમ દૂતૈશ્ચ તાડિતૈઃ ।
પ્રતપ્તતામ્રકુણ્ડં ચ તામ્રોપર્યુલ્મુકાન્વિતમ્ ॥ ૨૬॥

તામ્રાણાં પ્રતિમાલક્ષૈઃ પ્રતપ્તૈર્વ્યાપૃતં સદા ।
પ્રત્યેકં પ્રતિમાશ્લિષ્ટૈઃ રુદદ્ભિઃ પાપિભિર્યુતમ્ ॥ ૨૭॥

ગવ્યૂતિમાનં વિસ્તીર્ણં મમ દૂતૈશ્ચ તાડિતૈઃ ।
પ્રતપ્તલોહધારં ચ જ્વલદઙ્ગારસંયુતમ્ ॥ ૨૮॥

લોહાનાં પ્રતિમાશ્લિષ્ટૈઃ રુદદ્ભિઃ પાપિભિર્યુતમ્ ।
પ્રત્યેકં પ્રતિમાશ્લિષ્ટૈઃ શશ્વત્પ્રજ્વલિતૈર્ભિયા ॥ ૨૯॥

રક્ષ રક્ષેતિ શબ્દં ચ કુર્વદ્ભિર્દૂતતાડિતૈઃ ।
મહાપાતકિભિર્યુક્તં દ્વિગવ્યૂતિપ્રમાણકમ્ ॥ ૩૦॥

ભયાનકં ધ્વાન્તયુક્તં લોહકુણ્ડં પ્રકીર્તિતમ્ ।
ચર્મકુણ્ડં તપ્તસુરાકુણ્ડં વાપ્યર્ધમેવ ચ ॥ ૩૧॥

તદ્ભોજિપાપિભિર્વ્યાપ્તં મમ દૂતૈશ્ચ તાડિતૈઃ ।
અતઃ શાલ્મલિકુણ્ડં ચ વૃક્ષકણ્ટકશોભિતમ્ ॥ ૩૨॥

લક્ષપૌરુષમાનં ચ ક્રોશમાનં ચ દુઃખદમ્ ।
ધનુર્માનૈઃ કણ્ટકૈશ્ચ સુતીક્ષ્ણૈઃ પરિવેષ્ટિતમ્ ॥ ૩૩॥

પ્રત્યેકં વિદ્ધગાત્રૈશ્ચ મહાપાતકિભિર્યુતમ્ ।
વૃક્ષાગ્રાન્નિપતદ્ભિશ્ચ મમ દૂતૈશ્ચ પાતિતૈઃ ॥ ૩૪॥

જલં દેહીતિ શબ્દં ચ કુર્વદ્ભિઃ શુષ્કતાલુકૈઃ ।
મહાભિયાતિવ્યગ્રૈશ્ચ દણ્ડૈઃ સમ્ભગ્નમસ્તકૈઃ ॥ ૩૫॥

પ્રચલદ્ભિર્યથા તપ્તતૈલજીવિભિરેવ ચ ।
વિષોદૈસ્તક્ષકાણાં ચ પૂર્વં ચ ક્રોશમાનકમ્ ॥ ૩૬॥

તદ્ભક્ષૈઃ પાપિભિર્યુક્તં મમ દૂતૈશ્ચ તાડિતે ।
પ્રતપ્તતૈલપૂર્ણં ચ કીટાદિપરિવર્જિતમ્ ॥ ૩૭॥

મહાપાતકિભિર્યુક્તં દગ્ધાઙ્ગારૈશ્ચ વેષ્ટિતમ્ ।
કાકુશબ્દં પ્રકુર્વદ્ભિશ્ચલદ્ભિર્દૂતપીડિતૈઃ ॥ ૩૮॥

ધ્વાન્તયુક્તં ક્રોશમાનં ક્લેશદં ચ ભયાનકમ્ ।
શૂલાકારૈઃ સુતીક્ષ્ણાગ્રૈર્લોહશસ્ત્રૈશ્ચ વેષ્ટિતમ્ ॥ ૩૯॥

શસ્ત્રતલ્પસ્વરૂપઞ્ચ કોશતુર્યપ્રમાણકમ્ ।
વેષ્ટિતં તત્પાતકિભિઃ કુન્તવિદ્ધૈશ્ચ વેષ્ટિતૈઃ ॥ ૪૦॥

તાડિતૈર્મમ દૂતૈશ્ચ શુષ્કકણ્ઠોષ્ઠતાલુકૈઃ ।
કીટૈશ્ચ શઙ્કુપ્રમિતૈઃ સર્પમાનૈર્ભયઙ્કરૈઃ ॥ ૪૧॥

તીક્ષ્ણદન્તૈશ્ચ વિકૃતૈર્વ્યાપ્તં ધ્વાન્તયુતં સતિ ।
મહાપાતકિભિર્યુક્તં મમ દૂતૈશ્ચ તાડિતે ॥ ૪૨॥

દ્વિગવ્યૂતિપ્રમાણં ચ પૂયકુણ્ડં પ્રચક્ષતે ।
તદ્ભક્ષ્યૈઃ પ્રાણિભિર્યુક્તં મમ દૂતૈશ્ચ તાડિતૈઃ ॥ ૪૩॥

તાલવૃક્ષપ્રમાણૈશ્ચ સર્પકોટિભિરાવૃતમ્ ।
સર્પવેષ્ટિતગાત્રૈશ્ચ પાપિભિઃ સર્પભક્ષિતૈઃ ॥ ૪૪॥

સઙ્કુલં શબ્દકૃદ્ભિશ્ચ મમ દૂતૈશ્ચ તાડિતૈઃ ।
કુણ્ડત્રયં મશાદીનાં પૂર્ણં ચ મશકાદિભિઃ ॥ ૪૫॥

સર્વં કોશાર્ધમાનં ચ મહાપાતકિભિર્યુતમ્ ।
હસ્તપાદાદિબદ્ધૈશ્ચ ક્ષતજૌઘેન લોહિતૈઃ ॥ ૪૬॥

હાહેતિ શબ્દં કુર્વદ્ભિસ્તાડિતૈર્મમ પાર્ષદૈઃ ।
વજ્રવૃશ્ચિકયોઃ કુણ્ડં તાભ્યાં ચ પરિપૂરિતમ્ ॥ ૪૭॥

વાપ્યર્ધં પાપિભિર્યુક્તં વજ્રવૃશ્ચિકદંશિતૈઃ ।
કુણ્ડત્રયં શરાદીનાં તૈરેવ પરિપૂરિતમ્ ॥ ૪૮॥

તૈર્વિદ્ધૈઃ પાપિભિર્યુક્તં વાપ્યર્ધં રક્તલોહિતૈઃ ।
તપ્તતોયોદકૈઃ પૂર્ણં સધ્વાન્તં ગોલકુણ્ડકમ્ ॥ ૪૯॥

કીટૈઃ શઙ્કુસમાનૈશ્ચ ભક્ષિતૈઃ પાપિભિર્યુતમ્ ।
વાપ્યર્થમાનં ભીતૈશ્ચ પાપિભિઃ કીટભક્ષિતૈઃ ॥ ૫૦॥

રુદદ્ભિઃ ક્રોશમાનૈશ્ચ મમ દૂતૈશ્ચ તાડિતૈઃ ।
અતિદુર્ગન્ધિસંયુક્તં દુઃખદં પાપિનાં સદા ॥ ૫૧॥

દારુણૈર્વિકૃતાકારૈર્ભક્ષિતં પાપિભિર્યુતમ્ ।
વાપ્યર્ધં પરિપૂર્ણં ચ જલસ્થૈર્નક્રકોટિભિઃ ॥ ૫૨॥

વિણ્મૂત્રશ્લેષ્મભક્ષૈશ્ચ સંયુતં શતકોટિભિઃ ।

કાકૈશ્ચ વિકૃતાકારૈર્ભક્ષિતૈઃ પાપિભિર્યુતમ્ ॥ ૫૩॥

મન્થાનકુણ્ડં બીજકુણ્ડં તાભ્યાં પૂર્ણં ધનુઃશતમ્ ।
ભક્ષિતૈઃ પાપિભિર્યુક્તં શબ્દકૃદ્ભિશ્ચ સન્તતમ્ ॥ ૫૪॥

ધનુઃશતં જીવયુક્તં પાપિભિઃ સઙ્કુલં સદા ।
શબ્દકૃદ્ભિર્વજ્રદંષ્ટ્રૈઃ સાન્દ્રધ્વાન્તમયં પરમ્ ॥ ૫૫॥

વાપીદ્વિગુણમાનં ચ તપ્તપ્રસ્તરનિર્મિતમ્ ।
જ્વલદઙ્ગારસદૃશં ચલદ્ભિઃ પાપિભિર્યુતમ્ ॥ ૫૬॥

ક્ષુરધારોપમૈસ્તીક્ષ્ણૈઃ પાષાણૈર્નિર્મિતં પરમ્ ।
મહાપાતકિભિર્યુક્તં લાલાકુણ્ડં ચ લોહિતૈઃ ॥ ૫૭॥

ક્રોશમાત્રં ચ ગમ્ભીરં મમ દૂતૈશ્ચ તાડિતૈઃ ।
તપ્તાઞ્જનાચલાકારૈઃ પરિપૂર્ણં ધનુઃશતમ્ ॥ ૫૮॥

ચલદ્ભિઃ પાપિભિર્યુક્તં મમ દૂતૈશ્ચ તાડિતૈઃ ।
પૂર્ણં ચૂર્ણદ્રવૈઃ ક્રોશમાનં પાપિભિરન્વિતમ્ ॥ ૫૯॥

તદ્ભોજિભિઃ પ્રદગ્ધૈશ્ચ મમ દૂતૈશ્ચ તાડિતૈઃ ।
કુણ્ડં કુલાલચક્રં ચ ઘૂર્ણમાનઞ્ચ સન્તતમ્ ॥ ૬૦॥

સુતીક્ષ્ણં ષોડશારં ચ ચૂર્ણિતૈઃ પાપિભિર્યુતમ્ ।
અતીવ વક્રં નિમ્નં ચ દ્વિગવ્યૂતિપ્રમાણકમ્ ॥ ૬૧॥

કન્દરાકારનિર્માણં તપ્તોદૈશ્ચ સમન્વિતમ્ ।
મહાપાતકિભિર્યુક્તં ભક્ષિતૈર્જલજન્તુભિઃ ॥ ૬૨॥

જ્વલદ્ભિઃ શબ્દકૃદ્ભિશ્ચ ધ્વાન્તયુક્તં ભયાનકમ્ ।
કોટિભિર્વિકૃતાકારૈઃ કચ્છપૈશ્ચ સુદારુણૈઃ ॥ ૬૩॥

જલસ્થૈઃ સંયુતં તૈશ્ચ ભક્ષિતૈઃ પાપિભિર્યુતમ્ ।
જ્વાલાકલાપૈસ્તેજોભિર્નિર્મિતૈઃ ક્રોશમાનકમ્ ॥ ૬૪॥

શબ્દકૃદ્ભિઃ પાતકિભિઃ સંયુતં ક્લેશદં સદા ।
ક્રોશમાનઞ્ચ ગમ્ભીરં તપ્તભસ્મભિરન્વિતમ્ ॥ ૬૫॥

શશ્વજ્જ્વલદ્ભિઃ સંયુક્તં પાપિભિર્ભસ્મભક્ષિતૈઃ ।
તપ્તપાષાણલોહાનાં સમૂહૈઃ પરિપૂરિતૈઃ ॥ ૬૬॥

પાપિભિર્દગ્ધગાત્રૈશ્ચ યુક્તઞ્ચ શુષ્કતાલુકૈઃ ।
ક્રોશમાનં ધ્વાન્તયુક્તં ગમ્ભીરમતિદારુણમ્ ॥ ૬૭॥

તાડિતૈશ્ચ પ્રદગ્ધૈશ્ચ દગ્ધકુણ્ડં પ્રકીર્તિતમ્ ।
અતીવોર્મિયુતં તોયં પ્રતપ્તક્ષારસંયુતમ્ ॥ ૬૮॥

નાનાપ્રકારૈર્વિરુતૈર્જલજન્તુભિરન્વિતમ્ ।
દ્વિગવ્યૂતિપ્રમાણં ચ ગમ્ભીરં ધ્વાન્તસંયુતમ્ ॥ ૬૯॥

તદ્ભક્ષ્યૈઃ પાપિભિર્યુક્તં દંશિતૈર્જલજન્તુભિઃ ।
જ્વલદ્ભિઃ શબ્દકૃદ્ભિશ્ચ ન પશ્યદ્ભિઃ પરસ્પરમ્ ॥ ૭૦॥

પ્રતપ્તસૂચીકુણ્ડઞ્ચ કીર્તિતં ચ ભયાનકમ્ ।
અસીવ ધારાપત્રસ્યાઽપ્યુચ્ચૈસ્તાલતરોરધઃ ॥ ૭૧॥

ક્રોશાર્ધમાનં કુણ્ડં ચ પતત્પત્રસમન્વિતમ્ ।
પાપિનાં રક્તપૂર્ણં ચ વૃક્ષાગ્રાત્પતતાં ધ્રુવં । ૭૨
પરિત્રાહીતિ શબ્દં ચ કુર્વતામસતામપિ ।
ગમ્ભીરં ધ્વાન્તયુક્તં ચ રક્તકીટસમન્વિતમ્ ॥ ૭૩॥

તદસીપત્રકુણ્ડં ચ કીર્તિતં ચ ભયાનકમ્ ।
ધનુઃશતપ્રમાણં ચ ક્ષુરધારાસ્ત્રસંયુતમ્ ॥ ૭૪॥

પાપિનાં રક્તપૂર્ણં ચ ક્ષુરધારં ભયાનકમ્ ।
સૂચીમુખાસ્ત્રસંયુક્તં પાપિરક્તૌઘપૂરતમ્ ॥ ૭૫॥

પઞ્ચાશદ્ધનુરાયામં ક્લેશદં સૂચિકામુખમ્ ।
કસ્યચિજ્જન્તુભેદસ્ય ગોકાખ્યસ્ય મુખાકૃતિ ॥ ૭૬॥

કૂપરૂપં ગભીરં ચ ધનુર્વિંશત્પ્રમાણકમ્ ।
મહાપાતકિનાં ચૈવ મહત્ક્લેશપ્રદં પરમ્ ॥ ૭૭॥

તત્કીટભક્ષિતાનાં ચ નમ્રાસ્યાનાં ચ સન્તતમ્ ।
કુણ્ડં નક્રમુખાકારં ધનુઃષોડશમાનકમ્ ॥ ૭૮॥

ગમ્ભીરં કૂપરૂપં ચ પાપિનાં સઙ્કુલં સદા ।
ધનુઃશતપ્રમાણં ચ કીર્તિતં ગજદંશનમ્ ॥ ૭૯॥

ધનુસ્ત્રિંશત્પ્રમાણં ચ કુણ્ડં ચ ગોમુખાકૃતિ ।
પાપિનાં ક્લેશદં શશ્વદ્ ગોમુખં પરિકીર્તિતમ્ ॥ ૮૦॥

કાલચક્રેણ સંયુક્તં ભ્રમમાણં ભયાનકમ્ ।
કુમ્ભાકારં ધ્વાન્તયુક્તં દ્વિગવ્યૂતિપ્રમાણકમ્ ॥ ૮૧॥

લક્ષપૌરુષમાનં ચ ગમ્ભીરં વિસ્મૃતં સતિ ।
કુત્રચિત્તપ્તતૈલં ચ તામ્રાદિકુણ્ડમેવ ચ ॥ ૮૨॥

પાપિનાં ચ પ્રધાનૈશ્ચ મૂર્ચ્છિતૈઃ કૃમિભિર્યુતમ્ ।
પરસ્પરં ચ નશ્યદ્ભિઃ શબ્દકૃદ્ભિશ્ચ સન્તતમ્ ॥ ૮૩॥

તાડિતૈર્યમદૂતૈશ્ચ મુસલૈર્મુદ્ગરૈસ્તથા ।
ઘૂર્ણમાનૈઃ પતદ્ભિશ્ચ મૂર્ચ્છિતૈશ્ચ ક્ષણં ક્ષણમ્ ॥ ૮૪॥

પાતિતૈર્યમદૂતૈશ્ચ રુદન્ત્યસ્માત્ક્ષણં પુનઃ ।
યાવન્તઃ પાપિનઃ સન્તિ સર્વકુણ્ડેષુ સુન્દરિ ॥ ૮૫॥

તતશ્ચતુર્ગુણાઃ સન્તિ કુમ્ભીપાકે ચ દુઃખદે ।
સુચિરં વધ્યમાનાસ્તે ભોગદેહા ન નશ્વરાઃ ॥ ૮૬॥

સર્વકુણ્ડપ્રધાનં ચ કુમ્ભીપાકં પ્રકીર્તિતમ્ ।
કાલનિર્મિતસૂત્રેણ નિબદ્ધા યત્ર પાપિનઃ ॥ ૮૭॥

ઉત્થાપિતાશ્ચ દૂતૈશ્ચ ક્ષણમેવ નિમજ્જિતાઃ ।
નિઃશ્વાસબદ્ધાઃ સુચિરં તથા મોહં ગતાઃ પુનઃ ॥ ૮૮॥

અતીવ ક્લેશસંયુક્તા દેહભોગેન સુન્દરિ ।
પ્રતપ્તતોયયુક્તં ચ કાલસૂત્રં પ્રકીર્તિતમ્ ॥ ૮૯॥

અવટઃ કૂપભેદશ્ચ મત્સ્યોદઃ સ ઉદાહૃતઃ ।
પ્રતપ્તતોયપૂર્ણં ચ ચતુર્વિંશત્પ્રમાણકમ્ ॥ ૯૦॥

વ્યાપ્તં મહાપાતકિભિર્વ્યાદગ્ધાઙ્ગૈશ્ચ સન્તતમ્ ।
મદ્દૂતૈસ્તાડિતૈઃ શશ્વદવટોદં પ્રકીર્તિતમ્ ॥ ૯૧॥

યત્રોદસ્પર્શમાત્રેણ સર્વવ્યાધિશ્ચ પાપિનામ્ ।
ભવેદકસ્માત્પતતાં યસ્મિન્કુણ્ડે ધનુઃશતે ॥ ૯૨॥

અરુન્તુદૈર્ભક્ષિતૈસ્તુ પ્રાણિભિર્યચ્ચ સઙ્કુલમ્ ।
હાહેતિ શબ્દં કુર્વદ્ભિસ્તદેવારુન્તુદં વિદુઃ ॥ ૯૩॥

તપ્તપાંસુભિરાકીર્ણં જ્વલદ્ભિસ્તુષદગ્ધકૈઃ ।
તદ્ભક્ષૈઃ પાપિભિર્યુક્તં પાંસુભોજૈર્ધનુઃશતમ્ ॥ ૯૪॥

પાતમાત્રેણ પાપી ચ પાશેન વેષ્ટિતો ભવેત્ ।
ક્રોશમાત્રેણ કુણ્ડં ચ તત્પાશવેષ્ટનં વિદુઃ ॥ ૯૫॥

પાતમાત્રેણ પાપી ચ શૂલેન વેષ્ટિતો ભવેત્ ।
ધનુર્વિંશત્પ્રમાણં ચ શૂલપ્રોતં પ્રકીર્તિતમ્ ॥ ૯૬॥

પતતાં પાપિનાં યત્ર ભવેદેવ પ્રકમ્પનમ્ ।
અતીવ હિમતોયાક્તં ક્રોશાર્ધં ચ પ્રકમ્પનમ્ ॥ ૯૭॥

દદત્યેવ હિ મે દૂતા યત્રોલ્કાઃ પાપિનાં મુખે ।
ધનુર્વિંશત્પ્રમાણં તદુલ્કાભિશ્ચ સુસઙ્કુલમ્ ॥ ૯૮॥

લક્ષપૌરુષમાનં ચ ગમ્ભીરં ચ ધનુઃશતમ્ ।
નાનાપ્રકારકૃમિભિઃ સંયુક્તં ચ ભયાનકમ્ ॥ ૯૯॥

અત્યન્ધકારવ્યાપ્તં ચ કૂપાકારં ચ વર્તુલમ્ ।
તદ્ભક્ષ્યૈઃ પાપિભિર્યુક્તં પ્રણશ્યદ્ભિઃ પરસ્પરમ્ ॥ ૧૦૦॥

તપ્તતોયપ્રદગ્ધૈશ્ચ જ્વલદ્ભિઃ કીટભક્ષિતૈઃ ।
ધ્વાન્તેન ચક્ષુષા ચાન્ધૈરન્ધકૂપઃ પ્રકીર્તિતઃ ॥ ૧૦૧॥

નાનાપ્રકારશસ્ત્રૌઘૈર્યત્ર વિદ્ધાશ્ચ પાપિનઃ ।
ધનુર્વિંશત્પ્રમાણં ચ વેધનં તત્પ્રકીર્તિતમ્ ॥ ૧૦૨॥

દણ્ડેન તાડિતા યત્ર મમ દૂતૈશ્ચ પાપિનઃ ।
ધનુઃષોડશમાનં ચ તત્કુણ્ડં દણ્ડતાડનમ્ ॥ ૧૦૩॥

નિરુદ્ધાશ્ચ મહાજાલૈર્યથા મીનાશ્ચ પાપિનઃ ।
ધનુર્વિંશત્પ્રમાણં ચ જાલરન્ધ્રં પ્રકીર્તિતમ્ ॥ ૧૦૪॥

પતતાં પાપિનાં કુણ્ડે દેહશ્ચૂર્ણો ભવેદિહ ।
લોહબન્દીનિબદ્ધાનાં કોટિપૌરુષમાનકમ્ ॥ ૧૦૫॥

ગમ્ભીરં ધ્વાન્તસંયુક્તં ધનુર્વિંશત્પ્રમાણકમ્ ।
મૂર્ચ્છિતાનાં જડાનાં ચ દેહચૂર્ણં પ્રકીર્તિતમ્ ॥ ૧૦૬॥

દલિતાઃ પાપિનો યત્ર મમ દૂતૈશ્ચ તાડિતાઃ ।
ધનુઃષોડશમાનં ચ તત્કુણ્ડં દલનં સ્મૃતમ્ ॥ ૧૦૭॥

પતનેનૈવ પાપી ચ શુષ્કકણ્ઠોષ્ઠતાલુકઃ ।

બાલુકાસુ ચ તપ્તાસુ ધનુસ્ત્રિંશત્પ્રમાણકમ્ ॥ ૧૦૮॥

શતપૌરુષમાનં ચ ગમ્ભીરં ધ્વાન્તસંયુતમ્ ।
શોષણં કુણ્ડમેતદ્ધિ પાપિનાં પરદુઃખદમ્ ॥ ૧૦૯॥

નાનાચર્મકષાયોદપરિપૂર્ણં ધનુઃશતમ્ ।
દુર્ગન્ધિયુક્તતદ્ભક્ષ્યૈઃ પ્રાણિભિઃ સઙ્કુલં કષમ્ ॥ ૧૧૦॥

શૂર્પાકારમુખં કુણ્ડં ધનુર્દ્વાદશમાનકમ્ ।
તપ્તલોહબાલુકાભિઃ પૂર્ણં પાતકિસંયુતમ્ ॥ ૧૧૧॥

દુર્ગન્ધિયુક્તં તદ્ભક્ષ્યૈઃ પાપિભિઃ સઙ્કુલં સતિ ।
શૂર્પાકારમુખં કુણ્ડં ધનુર્દ્વાદશમાત્રકમ્ ॥ ૧૧૨॥

પ્રતપ્તબાલુકાપૂર્ણં મહાપાતકિભિર્યુતમ્ ।
અન્તરગ્નિશિખાનાં ચ જ્વાલાવ્યાપ્તમુખં સદા ॥ ૧૧૩॥

ધનુર્વિંશતિમાત્રં ચ પ્રમાણં યસ્ય સુન્દરિ ।
જ્વાલાભિર્દગ્ધગાત્રૈશ્ચ પાપિભિર્વ્યાપ્તમેવ ચ ॥ ૧૧૪॥

તન્મહાક્લેશદં શશ્વત્કુણ્ડં જ્વાલામુખં સ્મૃતમ્ ।
પાતમાત્રાદ્યત્ર પાપી મૂર્ચ્છિતો વૈ નરો ભવેત્ ॥ ૧૧૫॥

તપ્તેષ્ટકાભ્યન્તરિતં વાપ્યર્ધં જિહ્મકુણ્ડકમ્ ।
ધૂમાન્ધકારસંયુક્તં ધૂમ્રાન્ધૈઃ પાપિભિર્યુતમ્ ॥ ૧૧૬॥

ધનુઃશતં શ્વાસરન્ધ્રૈર્ધૂમ્રાન્ધં પરિકીર્તિતમ્ ।
પાતમાત્રાદ્યત્ર પાપી નાગૈશ્ચ વેષ્ટિતો ભવેત્ ॥ ૧૧૭॥

ધનુઃશતં નાગપૂર્ણં તન્નાગૈર્વેષ્ટિતં ભવેત્ ।
ષડશીતિ ચ કુણ્ડાનિ મયોક્તાનિ નિશામય ।
લક્ષણં ચાપિ તેષાં ચ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૧૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
નાનાનરકકુણ્ડવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૯.૩૭॥

## ૯.૩૮ અષ્ટત્રિંશોઽધ્યાયઃ । સાવિત્ર્યુપાખ્યાનવર્ણનમ્ ।

સાવિત્ર્યુવાચ ।
દેવીભક્તિં દેહિ મહ્યં સારાણાં ચૈવ સારકમ્ ।
પુંસાં મુક્તિદ્વારબીજં નરકાર્ણવતારકમ્ ॥ ૧॥

કારણં મુક્તિસારાણાં સર્વાશુભવિનાશનમ્ ।
દારકં કર્મવૃક્ષાણાં કૃતપાપૌઘહારણમ્ ॥ ૨॥

મુક્તિશ્ચ કતિથાપ્યસ્તિ કિં વા તાસાં ચ લક્ષણમ્ ।
દેવીભક્તિં ભક્તિભેદં નિષેકસ્યાપિ ખણ્ડનમ્ ॥ ૩॥

તત્ત્વજ્ઞાનવિહીના ચ સ્ત્રીજાતિર્વિધિનિર્મિતા ।
કિઞ્ચિજ્ઞાનં સારભૂતં વદ વેદવિદાં વર ॥ ૪॥

સર્વં દાનં ચ યજ્ઞશ્ચ તીર્થસ્નાનં વ્રતં તપઃ ।
અજ્ઞાનિજ્ઞાનદાનસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૫॥

પિતુઃ શતગુણા માતા ગૌરવે ચેતિ નિશ્ચિતમ્ ।
માતુઃ શતગુણઃ પૂજ્યો જ્ઞાનદાતા ગુરુઃ પ્રભો ॥ ૬॥

ધર્મરાજ ઉવાચ ।
પૂર્વં સર્વો વરો દત્તો યસ્તે મનસિ વાઞ્છિતઃ ।
અધુના શક્તિભક્તિસ્તે વત્સે ભવતુ મદ્વરાત્ ॥ ૭॥

શ્રોતુમિચ્છસિ કલ્યાણિ શ્રીદેવીગુણકીર્તનમ્ ।
વક્તૄણાં પૃચ્છકાનાં ચ શ્રોતૄણાં કુલતારણમ્ ॥ ૮॥

શેષો વક્ત્રસહસ્રેણ નહિ યદ્વક્તુમીશ્વરઃ ।
મૃત્યુઞ્જયો ન ક્ષમશ્ચ વક્તું પઞ્ચમુખેન ચ ॥ ૯॥

ધાતા ચતુર્ણાં વેદાનાં વિધાતા જગતામપિ ।
બ્રહ્મા ચતુર્મુખેનૈવ નાલં વિષ્ણુશ્ચ સર્વવિત્ ॥ ૧૦॥

કાર્તિકેયઃ ષણ્મુખેન નાપિ વક્તુમલં ધ્રુવમ્ ।
ન ગણેશઃ સમર્થશ્ચ યોગીન્દ્રાણાં ગુરોર્ગુરુઃ ॥ ૧૧॥

સારભૂતાશ્ચ શાસ્ત્રાણાં વેદાશ્ચત્વાર એવ ચ ।
કલામાત્રં યદ્ગુણાનાં ન વિદન્તિ બુધાશ્ચ યે ॥ ૧૨॥

સરસ્વતી જડીભૂતા નાલં તદ્ગુણવર્ણને ।

સનત્કુમારો ધર્મશ્ચ સનન્દનઃ સનાતનઃ ॥ ૧૩॥

સનકઃ કપિલઃ સૂર્યો યેઽન્યે ચ બ્રહ્મણઃ સુતાઃ ।
વિચક્ષણા ન યદ્વક્તું કિઞ્ચાન્યે જડબુદ્ધયઃ ॥ ૧૪॥

ન યદ્વક્તું ક્ષમાઃ સિદ્ધા મુનીન્દ્રા યોગિનસ્તથા ।
કે ચાન્યે ચ વયં કે વા શ્રીદેવ્યા ગુણવર્ણને ॥ ૧૫॥

ધ્યાયન્તે યત્પદામ્ભોજં બ્રહ્મવિષ્ણુશિવાદયઃ ।
અતિસાધ્યં સ્વભક્તાનાં તદન્યેષાં સુદુર્લભમ્ ॥ ૧૬॥

કશ્ચિત્કિઞ્ચિદ્વિજાનાતિ તદ્ગુણોત્કીર્તનં શુભમ્ ।
અતિરિક્તં વિજાનાતિ બ્રહ્મા બ્રહ્મવિશારદઃ ॥ ૧૭॥

તતોઽતિરિક્તં જાનાતિ ગણેશો જ્ઞાનિનાં ગુરુઃ ।
સર્વાતિરિક્તં જાનાતિ સર્વજ્ઞઃ શમ્ભુરેવ સઃ ॥ ૧૮॥

તસ્મૈ દત્તં પુરા જ્ઞાનં કૃષ્ણેન પરમાત્મના ।
અતીવ નિર્જનેઽરણ્યે ગોલોકે રાસમણ્ડલે ॥ ૧૯॥

તત્રૈવ કથિતં કિઞ્ચિત્તદ્ગુણોત્કીર્તનં શુભમ્ ।
ધર્મં ચ કથયામાસ શિવલોકે શિવઃ સ્વયમ્ ॥ ૨૦॥

ધર્મસ્તુ કથયામાસ ભાસ્વતે પૃચ્છતે તથા ।
યામારાધ્ય મત્પિતાપિ સમ્પ્રાપ તપસા સતિ ॥ ૨૧॥

પૂર્વં સ્વં વિષયં ચાહં ન ગૃહ્ણામિ પ્રયત્નતઃ ।
વૈરાગ્યયુક્તસ્તપસે ગન્તુમિચ્છામિ સુવ્રતે ॥ ૨૨॥

તદા માં કથયામાસ પિતા તદ્ગુણકીર્તનમ્ ।
યથાગમં તદ્વદામિ નિબોધાતીવ દુર્ગમમ્ ॥ ૨૩॥

તદ્ગુણં સા ન જાનાતિ તદન્યસ્ય ચ કા કથા ।
યથાકાશો ન જાનાતિ સ્વાન્તમેવ વરાનને ॥ ૨૪॥

સર્વાત્મા સર્વભગવાન્ સર્વકારણકારણઃ ।
સર્વેશ્વરશ્ચ સર્વાદ્યઃ સર્વવિત્પરિપાલકઃ । ૨૫
નિત્યરૂપી નિત્યદેહી નિત્યાનન્દો નિરાકૃતિઃ ।
નિરઙ્કુશો નિરાશઙ્કો નિર્ગુણશ્ચ નિરામયઃ ॥ ૨૬॥

નિર્લિપ્તઃ સર્વસાક્ષી ચ સર્વાધારઃ પરાત્પરઃ ।

માયાવિશિષ્ટઃ પ્રકૃતિસ્તદ્વિકારાશ્ચ પ્રાકૃતાઃ ॥ ૨૭॥

સ્વયં પુમાંશ્ચ પ્રકૃતિસ્તાવભિન્નૌ પરસ્પરમ્ ।
યથા વહ્નેસ્તસ્ય શક્તિર્ન ભિન્નાસ્ત્યેવ કુત્રચિત્ ॥ ૨૮॥

સેયં શક્તિર્મહામાયા સચ્ચિદાનન્દરૂપિણી ।
રૂપં બિભર્ત્યરૂપા ચ ભક્તાનુગ્રહહેતવે ॥ ૨૯॥

ગોપાલસુન્દરીરૂપં પ્રથમં સા સસર્જ હ ।
અતીવ કમનીયં ચ સુન્દરં સુમનોહરમ્ ॥ ૩૦॥

નવીનનીરદશ્યામં કિશોરં ગોપવેષકમ્ ।
કન્દર્પકોટિલાવણ્યં લીલાધામમનોહરમ્ ॥ ૩૧॥

શરન્મધ્યાહ્નપદ્માનાં શોભામોચનલોચનમ્ ।
શરત્પાર્વણકોટીન્દુશોભાપ્રચ્છાદનાનનમ્ ॥ ૩૨॥

અમૂલ્યરત્નનિર્માણનાનાભૂષણભૂષિતમ્ ।
સસ્મિતં શોભિતં શશ્વદમૂલ્યપીતવાસસા ॥ ૩૩॥

પરબ્રહ્મસ્વરૂપં ચ જ્વલન્તં બ્રહ્મતેજસા ।
સુખદૃશ્યં ચ શાન્તં ચ રાધાકાન્તમનન્તકમ્ ॥ ૩૪॥

ગોપીભિર્વીક્ષ્યમાણં ચ સસ્મિતાભિશ્ચ સન્તતમ્ ।
રાસમણ્ડલમધ્યસ્થં રત્નસિંહાસનસ્થિતમ્ ॥ ૩૫॥

વંશીં ક્વણન્તં દ્વિભુજં વનમાલાવિભૂષિતમ્ ।
કૌસ્તુભેન્દ્રમણીન્દ્રેણ શશ્વદ્વક્ષઃસ્થલોજ્જ્વલમ્ ॥ ૩૬॥

કુઙ્કુમાગુરુકસ્તુરીચન્દનાર્ચિતવિગ્રહમ્ ।
ચારુચમ્પકમાલાક્તં માલતીમાલ્યમણ્ડિતમ્ ॥ ૩૭॥

ચારુચન્દ્રકશોભાઢ્યં ચૂડાવઙ્કિમરાજિતમ્ ।
એવમ્ભૂતં ચ ધ્યાયન્તિ ભક્તા ભક્તિપરિપ્લુતાઃ ॥ ૩૮॥

યદ્ભયાજ્જગતા ધાતા વિધત્તે સૃષ્ટિમેવ ચ ।
કર્માનુસારાલ્લિખિતં કરોતિ સર્વકર્મણામ્ ॥ ૩૯॥

તપસાં ફલદાતા ચ કર્મણાં ચ યદાજ્ઞયા ।
વિષ્ણુઃ પાતા ચ સર્વેષાં યદ્ભયાત્પાતિ સન્તતમ્ ॥ ૪૦॥

કાલાગ્નિરુદ્રઃ સંહર્તા સર્વવિશ્વેષુ યદ્ભયાત્ ।
શિવો મૃત્યુઞ્જયશ્ચૈવ જ્ઞાનિનાં ચ ગુરોર્ગુરુઃ ॥ ૪૧॥

યજ્જ્ઞાનાજ્જ્ઞાનવાનસ્તિ યોગીશો જ્ઞાનવિત્પ્રભુઃ ।
પરમાનન્દયુક્તશ્ચ ભક્તિવૈરાગ્યસંયુતઃ ॥ ૪૨॥

યદ્ભયાદ્વાતિ પવનઃ પ્રવરઃ શીઘ્રગામિનામ્ ।
તપનશ્ચ પ્રતપતિ યદ્ભયાત્સન્તતં સતિ ॥ ૪૩॥

યદાજ્ઞયા વર્ષતીન્દ્રો મૃત્યુશ્ચરતિ જન્તુષુ ।
યદાજ્ઞયા દહેદ્વહ્નિર્જલમેવં સુશીતલમ્ ॥ ૪૪॥

દિશો રક્ષન્તિ દિક્પાલા મહાભીતા યદાજ્ઞયા ।
ભ્રમન્તિ રાશિચક્રાણિ ગ્રહાશ્ચ યદ્ભયેન ચ ॥ ૪૫॥

ભયાત્ફલન્તિ વૃક્ષાશ્ચ પુષ્યન્ત્યપિ ચ યદ્ભયાત્ ।
યદાજ્ઞાં તુ પુરસ્કૃત્ય કાલઃ કાલે હરેદ્ભયાત્ ॥ ૪૬॥

તથા જલસ્થલસ્થાશ્ચ ન જીવન્તિ યદાજ્ઞયા ।
અકાલે નાહરેદ્વિદ્ધં રણેષુ વિષમેષુ ચ ॥ ૪૭॥

ધત્તે વાયુસ્તોયરાશિં તોયં કૂર્મં તદાજ્ઞયા ।
કૂર્મોઽનન્તં સ ચ ક્ષોણીં સમુદ્રાન્ સા ચ પર્વતાન્ ॥ ૪૮॥

સર્વા ચૈવ ક્ષમારૂપા નાનારત્નં બિભર્તિ યા ।
યતઃ સર્વાણિ ભૂતાનિ સ્થીયન્તે હન્તિ તત્ર હિ ॥ ૪૯॥

ઇન્દ્રાયુશ્ચૈવ દિવ્યાનાં યુગાનામેકસપ્તતિઃ ।
અષ્ટાવિંશે શક્રપાતે બ્રહ્મણશ્ચ દિવાનિશમ્ ॥ ૫૦॥

એવં ત્રિંશદ્દિનૈર્માસો દ્વાભ્યામાભ્યામૃતુઃ સ્મૃતઃ ।
ઋતુભિઃ ષડ્ભિરેવાબ્દં બ્રહ્મણો વૈ વયઃ સ્મૃતમ્ ॥ ૫૧॥

બ્રહ્મણશ્ચ નિપાતે ચ ચક્ષુરુન્મીલનં હરેઃ ।
ચક્ષુરુન્મીલને તસ્ય લયં પ્રાકૃતિકં વિદુઃ ॥ ૫૨॥

પ્રલયે પ્રાકૃતે સર્વે દેવાદ્યાશ્ચ ચરાચરાઃ ।
લીના ધાતા વિધાતા ચ શ્રીકૃષ્ણનાભિપઙ્કજે ॥ ૫૩॥

વિષ્ણુઃ ક્ષીરોદશાયી ચ વૈકુણ્ઠે યશ્ચતુર્ભુજઃ ।
વિલીના વામપાર્શ્વે ચ કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૫૪॥

યસ્ય જ્ઞાને શિવો લીનો જ્ઞાનાધીશઃ સનાતનઃ ।
દુર્ગાયાં વિષ્ણુમાયાયાં વિલીનાઃ સર્વશક્તયઃ ॥ ૫૫॥

સા ચ કૃષ્ણસ્ય બુદ્ધૌ ચ બુદ્ધ્યધિષ્ઠાતૃદેવતા ।
નારાયણાંશઃ સ્કન્દશ્ચ લીનો વક્ષસિ તસ્ય ચ ॥ ૫૬॥

શ્રીકૃષ્ણાંશશ્ચ તદ્બાહૌ દેવાધીશો ગણેશ્વરઃ ।
પદ્માંશાશ્ચૈવ પદ્માયાં સા રાધાયાં ચ સુવ્રતે ॥ ૫૭॥

ગોપ્યશ્ચાપિ ચ તસ્યાં ચ સર્વાશ્ચ દેવયોષિતઃ ।
કૃષ્ણપ્રાણાધિદેવી સા તસ્ય પ્રાણેષુ સંસ્થિતા ॥ ૫૮॥

સાવિત્રી ચ સરસ્વત્યાં વેદાઃ શાસ્ત્રાણિ યાનિ ચ ।
સ્થિતા વાણી ચ જિહ્વાયાં યસ્ય ચ પરમાત્મનઃ ॥ ૫૯॥

ગોલોકસ્ય ચ ગોપાશ્ચ વિલીનાસ્તસ્ય લોમસુ ।
તત્પ્રાણેષુ ચ સર્વેષાં પ્રાણા વાતા હુતાશનાઃ ॥ ૬૦॥

જઠરાગ્નૌ વિલીનાશ્ચ જલં તદ્રસનાગ્રતઃ ।
વૈષ્ણવાશ્ચરણામ્ભોજે પરમાનન્દસંયુતાઃ ॥ ૬૧॥

સારાત્સારતરા ભક્તિરસપીયૂષપાયિનઃ ।
વિરાડંશાશ્ચ મહતિ લીનાઃ કૃષ્ણે મહાવિરાટ્ ॥ ૬૨॥

યસ્યૈવ લોમકૂપેષુ વિશ્વાનિ નિખિલાનિ ચ ।
યસ્ય ચક્ષુષ ઉન્મેષે પ્રાકૃતઃ પ્રલયો ભવેત્ ॥ ૬૩॥

ચક્ષુરુન્મીલને સૃષ્ટિર્યસ્યૈવ પુનરેવ સઃ ।
યાવત્કાલો નિમેષેણ તાવદુન્મીલનેન ચ ॥ ૬૪॥

બ્રહ્મણશ્ચ શતાબ્દે ચ સૃષ્ટેઃ સૂત્રલયઃ પુનઃ ।
બ્રહ્મસૃષ્ટિલયાનાં ચ સઙ્ખ્યા નાસ્ત્યેવ સુવ્રતે ॥ ૬૫॥

યથા ભૂરજસાં ચૈવ સઙ્ખ્યાનં નૈવ વિદ્યતે ।
ચક્ષુર્નિમેષે પ્રલયો યસ્ય સર્વાન્તરાત્મનઃ ॥ ૬૬॥

ઉન્મીલને પુનઃ સૃષ્ટિર્ભવેદેવેશ્વરેચ્છયા ।
સ કૃષ્ણઃ પ્રલયે તસ્યાં પ્રકૃતૌ લીન એવ હિ ॥ ૬૭॥

એકૈવ ચ પરા શક્તિર્નિર્ગુણઃ પરમઃ પુમાન્ ।

સદેવેદમગ્ર આસીદિતિ વેદવિદો વિદુઃ ॥ ૬૮॥

મૂલપ્રકૃતિરવ્યક્તાપ્યવ્યાકૃતપદાભિધા ।
ચિદભિન્નત્વમાપન્ના પ્રલયે સૈવ તિષ્ઠતિ ॥ ૬૯॥

તદ્ગુણોત્કીર્તનં વક્તું બ્રહ્માણ્ડેષુ ચ કઃ ક્ષમઃ ।
મુક્તયશ્ચ ચતુર્વેદૈર્નિરુક્તાશ્ચ ચતુર્વિધાઃ ॥ ૭૦॥

તત્પ્રધાના દેવભક્તિર્મુક્તેરપિ ગરીયસી ।
સાલોક્યદા ભવેદેકા તથા સારૂપ્યદા પરા ॥ ૭૧॥

સામીપ્યદાથ નિર્વાણપ્રદા મુક્તિશ્ચતુર્વિધા ।
ભક્તાસ્તા ન હિ વાઞ્છન્તિ વિના તત્સેવનં વિભોઃ ॥ ૭૨॥

શિવત્વમમરત્વં ચ બ્રહ્મત્વં ચાવહેલયા ।
જન્મમૃત્યુજરાવ્યાધિભયશોકાદિકં ધનમ્ ॥ ૭૩॥

દિવ્યરૂપધારણં ચ નિર્વાણં મોક્ષણં વિદુઃ ।
મુક્તિશ્ચ સેવારહિતા ભક્તિઃ સેવાવિવર્ધિની ॥ ૭૪॥

ભક્તિમુક્ત્યોરયં ભેદો નિષેકખણ્ડનં શૃણુ ।
વિદુર્બુધા નિષેકં ચ ભોગં ચ કૃતકર્મણામ્ ॥ ૭૫॥

તત્ખણ્ડનં ચ શુભદં શ્રીવિભોઃ સેવનં પરમ્ ।
તત્ત્વજ્ઞાનમિદં સાધ્વિ સ્થિરં ચ લોકવેદયોઃ ॥ ૭૬॥

નિર્વિઘ્નં શુભદં ચોક્તં ગચ્છ વત્સે યથાસુખમ્ ।
ઇત્યુક્ત્વા સૂર્યપુત્રશ્ચ જીવયિત્વા ચ તત્પતિમ્ ॥ ૭૭॥

તસ્યૈ શુભાશિષં દત્ત્વા ગમનં કર્તુમુદ્યતઃ ।
દૃષ્ટ્વા યમં ચ ગચ્છન્તં સા સાવિત્રી પ્રણમ્ય ચ ॥ ૭૮॥

રુરોદ ચરણૌ ધૃત્વા સાધુચ્છેદેન દુઃખિતા ।
સાવિત્રીરોદનં શ્રુત્વા યમશ્ચૈવ કૃપાનિધિઃ ॥ ૭૯॥

તામિત્યુવાચ સન્તુષ્ટઃ સ્વયં ચૈવ રુરોદ હ ।
ધર્મરાજ ઉવાવ
લક્ષવર્ષં સુખં ભુક્ત્વા પુણ્યક્ષેત્રે ચ ભારતે ॥ ૮૦॥

અન્તે યાસ્યસિ તલ્લોકં યત્ર દેવી વિરાજતે ।
ગત્વા ચ સ્વગૃહં ભદ્રે સાવિત્ર્યાશ્ચ વ્રતં કુરુ ॥ ૮૧॥

દ્વિસપ્તવર્ષપર્યન્તં નારીણાં મોક્ષકારણમ્ ।
જ્યેષ્ઠશુક્લચતુર્દશ્યાં સાવિત્ર્યાશ્ચ વ્રતં શુભમ્ ॥ ૮૨॥

શુક્લાષ્ટમ્યાં ભાદ્રપદે મહાલક્ષ્યા યથા વ્રતમ્ ।
દ્વ્યષ્ટવર્ષં વ્રતં ચૈવ પ્રત્યાદેયં શુચિસ્મિતે ॥ ૮૩॥

કરોતિ ભક્ત્યા યા નારી સા યાતિ ચ વિભોઃ પદમ્ ।
પ્રતિમઙ્ગલવારે ચ દેવીં મઙ્ગલદાયિનીમ્ ॥ ૮૪॥

પ્રતિમાસં શુક્લષષ્ઠ્યાં ષષ્ઠીં મઙ્ગલદાયિનીમ્ ।
તથા ચાષાઢસઙ્ક્રાન્ત્યાં મનસાં સર્વસિદ્ધિદામ્ ॥ ૮૫॥

રાધાં રાસે ચ કાર્તિક્યાં કૃષ્ણપ્રાણાધિકપ્રિયામ્ ।
ઉપોષ્ય શુક્લાષ્ટમ્યાં ચ પ્રતિમાસં વરપ્રદામ્ ॥ ૮૬॥

વિષ્ણુમાયાં ભગવતીં દુર્ગાં દુર્ગતિનાશિનીમ્ ।
પ્રકૃતિં જગદમ્બાં ચ પતિપુત્રવતીષુ ચ ॥ ૮૭॥

પતિવ્રતાસુ શુદ્ધાસુ યન્ત્રેષુ પ્રતિમાસુ ચ ।
યા નારી પૂજયેદ્ભક્ત્યા ધનસન્તાનહેતવે ॥ ૮૮॥

ઇહલોકે સુખં ભુક્ત્વા યાત્યન્તે શ્રીવિભોઃ પદમ્ ।
એવં દેવ્યા વિભૂતીશ્ચ પૂજયેત્સાધકોઽનિશમ્ ॥ ૮૯॥

સર્વકાલં સર્વરૂપા સંસેવ્યા પરમેશ્વરી ।
નાતઃ પરતરં કિઞ્ચિત્કૃતકૃત્યત્વદાયકમ્ ॥ ૯૦॥

ઇત્યુક્ત્વા તાં ધર્મરાજો જગામ નિજમન્દિરમ્ ।
ગૃહીત્વા સ્વામિનં સા ચ સાવિત્રી ચ નિજાલયમ્ ॥ ૯૧॥

સાવિત્રી સત્યવાંશ્ચૈવ પ્રયયૌ ચ યથાગમમ્ ।
અન્યાંશ્ચ કથયામાસ સ્વવૃત્તાન્તં હિ નારદ ॥ ૯૨॥

સાવિત્રીજનકઃ પુત્રાન્ સમ્પ્રાપ્તઃ પ્રક્રમેણ ચ ।
શ્વશુરશ્ચક્ષુષી રાજ્યં સા ચ પુત્રાન્ વરેણ ચ ॥ ૯૩॥

લક્ષવર્ષં સુખં ભુક્ત્વા પુણ્યક્ષેત્રે ચ ભારતે ।
જગામ સ્વામિના સાર્ધં દેવીલોકં પતિવ્રતા ॥ ૯૪॥

સવિતુશ્ચાધિદેવી યા મન્ત્રાધિષ્ઠાતૃદેવતા ।

સાવિત્રી હ્યપિ વેદાનાં સાવિત્રી તેન કીર્તિતા ॥ ૯૫॥

ઇત્યેવં કથિતં વત્સ સાવિત્ર્યાખ્યાનમુત્તમમ્ ।
જીવકર્મવિપાકં ચ કિં પુનઃ શ્રોતુમિચ્છસિ ॥ ૯૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
સાવિત્ર્યુપાખ્યાનવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૯.૩૮॥

## ૯.૩૯ એકોનચત્વારિંશોઽધ્યાયઃ । લક્ષ્મ્યુપાખ્યાનવર્ણનમ્ ।

નારદ ઉવાચ ।
શ્રીમૂલપ્રકૃતેર્દેવ્યા ગાયત્ર્યાસ્તુ નિરાકૃતેઃ ।
સાવિત્રીયમસંવાદે શ્રુતં વૈ નિર્મલં યશઃ ॥ ૧॥

તદ્ગુણોત્કીર્તનં સત્યં મઙ્ગલાનાં ચ મઙ્ગલમ્ ।
અધુના શ્રોતુમિચ્છામિ લક્ષ્મ્યુપાખ્યાનમીશ્વર ॥ ૨॥

કેનાદૌ પૂજિતા સાપિ કિમ્ભૂતા કેન વા પુરા ।
તદ્ગુણોત્કીર્તનં મહ્યં વદ વેદવિદાંવર ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
સૃષ્ટેરાદૌ પુરા બ્રહ્મન્ કૃષ્ણસ્ય પરમાત્મનઃ ।
દેવી વામાંસસમ્ભૂતા બભૂવ રાસમણ્ડલે ॥ ૪॥

અતીવ સુન્દરી શ્યામા ન્યગ્રોધપરિમણ્ડિતા ।
યથા દ્વાદશવર્ષીયા શશ્વત્સુસ્થિરયૌવના ॥ ૫॥

શ્વેતચમ્પકવર્ણાભા સુખદૃશ્યા મનોહરા ।
શરત્પાર્વણકોટીન્દુપ્રભાપ્રચ્છાદનાનના ॥ ૬॥

શરન્મધ્યાહ્નપદ્માનાં શોભામોચનલોચના ।
સા દેવી દ્વિવિધા ભૂતા સહ સર્વેશ્વરેચ્છયા ॥ ૭॥

સ્વીયરૂપેણ વર્ણેન તેજસા વયસા ત્વિષા ।
યશસા વાસસા કૃત્યા ભૂષણેન ગુણેન ચ ॥ ૮॥

સ્મિતેન વીક્ષણેનૈવ પ્રેમ્ણા વાનુનયેન ચ ।
તદ્વામાંસાન્મહાલક્ષ્મીર્દક્ષિણાંસાચ્ચ રાધિકા ॥ ૯॥

રાધાઽઽદૌ વરયામાસ દ્વિભુજઞ્ચ પરાત્પરમ્ ।
મહાલક્ષ્મીશ્ચ તત્પશ્ચાચ્ચકમે કમનીયકમ્ ॥ ૧૦॥

કૃષ્ણસ્તદ્ગૌરવેણૈવ દ્વિધારૂપો બભૂવ હ ।
દક્ષિણાંસશ્ચ દ્વિભુજો વામાંસશ્ચ ચતુર્ભુજઃ ॥ ૧૧॥

ચતુર્ભુજાય દ્વિભુજો મહાલક્ષ્મીં દદૌ પુરા ।
લક્ષ્યતે દૃશ્યતે વિશ્વં સ્નિગ્ધદૃષ્ટ્યા યયાનિશમ્ ॥ ૧૨॥

દેવીભૂતા ચ મહતી મહાલક્ષ્મીશ્ચ સા સ્મૃતા ।
રાધાકાન્તશ્ચ દ્વિભુજો લક્ષ્મીકાન્તશ્ચતુર્ભુજઃ ॥ ૧૩॥

શુદ્ધસત્ત્વસ્વરૂપા ચ ગોપૈર્ગોપીભિરાવૃતા ।
ચતુર્ભુજશ્ચ વૈકુણ્ઠં પ્રયયૌ પદ્મયા સહ ॥ ૧૪॥

સર્વાંશેન સમૌ તૌ દ્વૌ કૃષ્ણનારાયણૌ પરૌ ।
મહાલક્ષ્મીશ્ચ યોગેન નાનારૂપા બભૂવ સા ॥ ૧૫॥

વૈકુણ્ઠે ચ મહાલક્ષ્મીઃ પરિપૂર્ણતમા રમા ।
શુદ્ધસત્ત્વસ્વરૂપા ચ સર્વસૌભાગ્યસંયુતા ॥ ૧૬॥

પ્રેમ્ણા સા ચ પ્રધાના ચ સર્વાસુ રમણીષુ ચ ।
સ્વર્ગેષુ સ્વર્ગલક્ષ્મીશ્ચ શક્રસમ્પત્સ્વરૂપિણી ॥ ૧૭॥

પાતાલે નાગલક્ષ્મીશ્ચ રાજલક્ષ્મીશ્ચ રાજસુ ।
ગૃહલક્ષ્મીર્ગૃહેષ્વેવ ગૃહિણાં ચ કલાંશતઃ ॥ ૧૮॥

સમ્પત્સ્વરૂપા ગૃહિણાં સર્વમઙ્ગલમઙ્ગલા ।
ગવાં પ્રસૂતિઃ સુરભિર્દક્ષિણા યજ્ઞકામિની ॥ ૧૯॥

ક્ષીરોદસિન્ધુકન્યા સા શ્રીરૂપા પદ્મિનીષુ ચ ।
શોભાસ્વરૂપા ચન્દ્રે ચ સૂર્યમણ્ડલમણ્ડિતા ॥ ૨૦॥

વિભૂષણેષુ રત્નેષુ ફલેષુ ચ જલેષુ ચ ।
નૃપેષુ નૃપપત્નીષુ દિવ્યસ્ત્રીષુ ગૃહેષુ ચ ॥ ૨૧॥

સર્વસસ્યેષુ વસ્ત્રેષુ સ્થાનેષુ સંસ્કૃતેષુ ચ ।
પ્રતિમાસુ ચ દેવાનાં મઙ્ગલેષુ ઘટેષુ ચ ॥ ૨૨॥

માણિક્યેષુ ચ મુક્તાસુ માલ્યેષુ ચ મનોહરા ।
મણીન્દ્રેષુ ચ હીરેષુ ક્ષીરેષુ ચન્દનેષુ ચ ॥ ૨૩॥

વૃક્ષશાખાસુ રમ્યાસુ નવમેઘેષુ વસ્તુષુ ।
વૈકુણ્ઠે પૂજિતા સાઽઽદૌ દેવી નારાયણેન ચ ॥ ૨૪॥

દ્વિતીયે બ્રહ્મણા ભક્ત્યા તૃતીયે શઙ્કરેણ ચ ।
વિષ્ણુના પૂજિતા સા ચ ક્ષીરોદે ભારતે મુને ॥ ૨૫॥

સ્વાયમ્ભુવેન મનુના માનવેન્દ્રૈશ્ચ સર્વતઃ ।
ઋષીન્દ્રૈશ્ચ મુનીન્દ્રૈશ્ચ સદ્ભિશ્ચ ગૃહિભિર્ભવે ॥ ૨૬॥

ગન્ધર્વૈશ્ચૈવ નાગાદ્યૈઃ પાતાલેષુ ચ પૂજિતા ।
શુક્લાષ્ટમ્યાં ભાદ્રપદે કૃતા પૂજા ચ બ્રહ્મણા ॥ ૨૭॥

ભક્ત્યા ચ પક્ષપર્યન્તં ત્રિષુ લોકેષુ નારદ ।
ચૈત્રે પૌષે ચ ભાદ્રે ચ પુણ્યે મઙ્ગલવાસરે ॥ ૨૮॥

વિષ્ણુના પૂજિતા સા ચ ત્રિષુ લોકેષુ ભક્તિતઃ ।
વર્ષાન્તે પૌષસઙ્ક્રાન્ત્યાં માધ્યામાવાહ્ય મઙ્ગલે ॥ ૨૯॥

મનુસ્તાં પૂજયામાસ સા ભૂતા ભુવનત્રયે ।
પૂજિતા સા મહેન્દ્રેણ મઙ્ગલેનૈવ મઙ્ગલા ॥ ૩૦॥

કેદારેણૈવ નીલેન સુબલેન નલેન ચ ।
ધ્રુવેણોત્તાનપાદેન શક્રેણ બલિના તથા ॥ ૩૧॥

કશ્યપેન ચ દક્ષેણ કર્દમેન વિવસ્વતા ।
પ્રિયવ્રતેન ચન્દ્રેણ કુબેરેણૈવ વાયુના ॥ ૩૨॥

યમેન વહ્નિના ચૈવ વરુણેનૈવ પૂજિતા ।
એવં સર્વત્ર સર્વેષુ પૂજિતા વન્દિતા સદા ।
સર્વૈશ્વર્યાધિદેવી સા સર્વસમ્પત્સ્વરૂપિણી ॥ ૩૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે લક્ષ્મ્યુપાખ્યાનવર્ણનં
નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૯.૩૯॥

## ૯.૪૦ ચત્વારિંશોઽધ્યાયઃ । લક્ષ્મ્યુત્પત્તિવર્ણનમ્ ।

નારદ ઉવાચ ।
નારાયણપ્રિયા સા ચ પરા વૈકુણ્ઠવાસિની ।
વૈકુણ્ઠાધિષ્ઠાતૃદેવી મહાલક્ષ્મીઃ સનાતની ॥ ૧॥

કથં બભૂવ સા દેવી પૃથિવ્યાં સિન્ધુકન્યકા ।
પુરા કેન સ્તુતાઽઽદૌ સા તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
પુરા દુર્વાસસઃ શાપાદ્ ભ્રષ્ટશ્રીશ્ચ પુરન્દરઃ ।
બભૂવ દેવસઙ્ઘશ્ચ મર્ત્યલોકે હિ નારદ ॥ ૩॥

લક્ષ્મીઃ સ્વર્ગાદિકં ત્યક્ત્વા રુષ્ટા પરમદુઃખિતા ।
ગત્વા લીના તુ વૈકુણ્ઠે મહાલક્ષ્મીશ્ચ નારદ ॥ ૪॥

તદા શોકાદ્યયુઃ સર્વે દુઃખિતા બ્રહ્મણઃ સભામ્ ।
બ્રહ્માણં ચ પુરસ્કૃત્ય યયુર્વૈકુણ્ઠમેવ ચ ॥ ૫॥

વૈકુણ્ઠે શરણાપન્ના દેવા નારાયણે પરે ।
અતીવ દૈન્યયુક્તાશ્ચ શુષ્કકણ્ઠોષ્ઠતાલુકાઃ ॥ ૬॥

તદા લક્ષ્મીશ્ચ કલયા પુરાણપુરુષાજ્ઞયા ।
બભૂવ સિન્ધુકન્યા સા સર્વસમ્પત્સ્વરૂપિણી ॥ ૭॥

તથા મથિત્વા ક્ષીરોદં દેવા દૈત્યગણૈઃ સહ ।
સમ્પ્રાપ્તાશ્ચ મહાલક્ષ્મીં વિષ્ણુસ્તાં ચ દદર્શ હ ॥ ૮॥

સુરાદિભ્યો વરં દત્ત્વા વનમાલાં ચ વિષ્ણવે ।
દદૌ પ્રસન્નવદના તુષ્ટા ક્ષીરોદશાયિને ॥ ૯॥

દેવાશ્ચાપ્યસુરગ્રસ્તં રાજ્યં પ્રાપુશ્ચ નારદ ।
તાં સમ્પૂજ્ય ચ સમ્ભૂય સર્વત્ર ચ નિરાપદઃ ॥ ૧૦॥

નારદ ઉવાચ ।
કથં શશાપ દુર્વાસા મુનિશ્રેષ્ઠઃ કદાચન ।
કેન દોષેણ વા બ્રહ્મન્ બ્રહ્મિષ્ઠસ્તત્ત્વવિત્પુરા ॥ ૧૧॥

મમન્થુઃ કેનરૂપેણ જલધિં તે સુરાદયઃ ।
કેન સ્તોત્રેણ વા દેવી શક્રં સાક્ષાદ્બભૂવ સા ॥ ૧૨॥

કો વા તયોશ્ચ સંવાદો બભૂવ તદ્વદ પ્રભો ।
શ્રીનારાયણ ઉવાચ ।
મધુપાનપ્રમત્તશ્ચ ત્રૈલોક્યાધિપતિઃ પુરા ॥ ૧૩॥

ક્રીડાં ચકાર રહસિ રમ્ભયા સહ કામુકઃ ।
કૃત્વા ક્રીડાં તયા સાર્ધં કામુક્યા હૃતમાનસઃ ॥ ૧૪॥

તસ્થૌ તત્ર મહારણ્યે કામોન્મથિતમાનસઃ ।
કૈલાસશિખરે યાન્તં વૈકુણ્ઠાદૃષિસત્તમમ્ ॥ ૧૫॥

દુર્વાસસં દદર્શેન્દ્રો જ્વલન્તં બ્રહ્મતેજસા ।
ગ્રીષ્મમધ્યાહ્નમાર્તણ્ડસહસ્રપ્રભમીશ્વરમ્ ॥ ૧૬॥

પ્રતપ્તકાઞ્ચનાકારં જટાભારમહોજ્જ્વલમ્ ।
શુક્લયજ્ઞોપવીતં ચ ચીરદણ્ડૌ કમણ્ડલુમ્ ॥ ૧૭॥

મહોજ્જ્વલં ચ તિલકં બિભ્રન્તં ચેન્દુસન્નિભમ્ ।
સમન્વિતં શિષ્યલક્ષૈર્વેદવેદાઙ્ગપારગૈઃ ॥ ૧૮॥

દૃષ્ટ્વા નનામ શિરસા સમ્પ્રમત્તઃ પુરન્દરઃ ।
શિષ્યવર્ગં તદા ભક્ત્યા તુષ્ટાવ ચ મુદાન્વિતમ્ ॥ ૧૯॥

મુનિના ચ સશિષ્યેણ દત્તાસ્તસ્મૈ શુભાશિષઃ ।
વિષ્ણુદત્તં પારિજાતપુષ્પં ચ સુમનોહરમ્ ॥ ૨૦॥

તજ્જરારોગમૃત્યુઘ્નં શોકઘ્નં મોક્ષકારકમ્ ।
શક્રઃ પુષ્પં ગહીત્વા ચ પ્રમત્તો રાજ્યસમ્પદા ॥ ૨૧॥

પુષ્પં સ ન્યસ્તયામાસ તદૈવ કરિમસ્તકે ।
હસ્તી તત્સ્પર્શમાત્રેણ રૂપેણ ચ ગુણેન ચ ॥ ૨૨॥

તેજસા વયસાકસ્માદ્વિષ્ણુતુલ્યો બભૂવ હ ।
ત્યક્ત્વા શક્રં ગજેન્દ્રશ્ચ જગામ ઘોરકાનનમ્ ॥ ૨૩॥

ન શશાક મહેન્દ્રસ્તં રક્ષિતું તેજસા મુને ।
તત્પુણ્યં ત્યક્તવન્તં ચ દૃષ્ટ્વા શક્રં મુનીશ્વરઃ ॥ ૨૪॥

તમુવાચ મહારુષ્ટઃ શશાપ ચ રુષાન્વિતઃ ।
મુનિરુવાચ ।
અરે શ્રિયા પ્રમત્તસ્ત્વં કથં મામવમન્યસે ॥ ૨૫॥

મદ્દત્તપુષ્પં દત્તં ચ ગર્વેણ કરિમસ્તકે ।
વિષ્ણોર્નિવેદિતં ચૈવ નૈવેદ્યં વા ફલં જલમ્ ॥ ૨૬॥

પ્રાપ્તિમાત્રેણ ભોક્તવ્યં ત્યાગેન બ્રહ્મહા ભવેત્ ।
ભ્રષ્ટશ્રીર્ભ્રષ્ટબુદ્ધિશ્ચ પુરભ્રષ્ટો ભવેત્તુ સઃ ॥ ૨૭॥

યસ્ત્યજેદ્વિષ્ણુનૈવેદ્યં ભાગ્યેનોપસ્થિતં શુભમ્ ।
પ્રાપ્તિમાત્રેણ યો ભુઙ્ક્તે ભક્તો વિષ્ણુનિવેદિતમ્ ॥ ૨૮॥

પુંસાં શતં સમુદ્ધૃત્ય જીવન્મુક્તઃ સ્વયં ભવેત્ ।
નૈવેદ્યં ભોજનં કૃત્વા નિત્યં યઃ પ્રણમેદ્ધરિમ્ ॥ ૨૯॥

પૂજયેત્સ્તૌતિ વા ભક્ત્યા સ વિષ્ણુસદૃશો ભવેત્ ।
તત્સ્પર્શવાયુના સદ્યસ્તીર્થૌઘશ્ચ વિશુધ્યતિ ॥ ૩૦॥

તત્પાદરજસા મૂઢ સદ્યઃ પૂતા વસુન્ધરા ।
પુંશ્ચલ્યન્નમવીરાન્નં શૂદ્રશ્રાદ્ધાન્તમેવ ચ ॥ ૩૧॥

યદ્ધરેરનિવેદ્યં ચ વૃથા માંસસ્ય ભક્ષણમ્ ।
શિવલિઙ્ગપ્રદાનં ચ યદ્દત્તં શૂદ્રયાજિના ॥ ૩૨॥

ચિકિત્સકદ્વિજાન્નં ચ દેવલાન્નં તથૈવ ચ ।
કન્યાવિક્રયિણામન્નં યદન્નં યોનિજીવિનામ્ ॥ ૩૩॥

ઉચ્છિષ્ટાન્નં પર્યુષિતં સર્વભક્ષાવશેષિતમ્ ।
શૂદ્રાપતિદ્વિજાનાં ચ ભૂષવાહદ્વિજાન્નકમ્ ॥ ૩૪॥

અદીક્ષિતદ્વિજાનાં ચ યદન્નં શવદાહિનામ્ ।
અગમ્યાગામિનાં ચૈવ દ્વિજાનામન્નમેવ ચ ॥ ૩૫॥

મિત્રદ્રુહાં કૃતઘ્નાનામન્નં વિશ્વાસઘાતિનામ્ ।
મિથ્યાસાક્ષ્યપ્રદાન્નં ચ બ્રાહ્મણાન્નં તથૈવ ચ ॥ ૩૬॥

એતે સર્વે વિશુધ્યન્તિ વિષ્ણોર્નૈવેદ્યભક્ષણાત્ ।
શ્વપચશ્ચેદ્વિષ્ણુસેવી વંશાનાં કોટિમુદ્ધરેત્ ॥ ૩૭॥

હરેરભક્તો મનુજઃ સ્વં ચ રક્ષિતુમક્ષમઃ ।
અજ્ઞાનાદ્યદિ ગૃહ્ણાતિ વિષ્ણોર્નિર્માલ્યમેવ ચ ॥ ૩૮॥

સપ્તજન્માર્જિતાત્પાપાન્મુચ્યતે નાત્ર સંશયઃ ।
જ્ઞાત્વા ભક્ત્યા ચ ગૃહ્ણાતિ વિષ્ણોર્નૈવેદ્યમેવ ચ ॥ ૩૯॥

કોટિજન્માર્જિતાત્પાપાન્મુચ્યતે નિશ્ચિતં હરે ।
યસ્માત્સંસ્થાપિતં પુષ્પં ગર્વેણ કરિમસ્તકે ॥ ૪૦॥

તસ્માદ્યુષ્માન્પરિત્યજ્ય યાતુ લક્ષ્મીર્હરેઃ પદમ્ ।
નારાયણસ્ય ભક્તોઽહં ન બિભેમિ સુરાદ્વિધેઃ ॥ ૪૧॥

કાલાન્મૃત્યોર્જરાતશ્ચ કાનન્યાન્ ગણયામિ ચ ।
કિં કરિષ્યતિ તે તાતઃ કશ્યપશ્ચ પ્રજાપતિઃ ॥ ૪૨॥

બૃહસ્પતિર્ગુરુશ્ચૈવ નિઃશઙ્કસ્ય ચ મે હરે ।
ઇદં પુષ્પં યસ્ય મૂર્ધ્નિ તસ્યૈવ પૂજનં પરમ્ ॥ ૪૩॥

ઇતિ શ્રુત્વા મહેન્દ્રશ્ચ ધૃત્વા સ ચરણં મુનેઃ ।
ઉચ્ચૈ રુરોદ શોકાર્તસ્તમુવાચ ભયાકુલઃ ॥ ૪૪॥

મહેન્દ્ર ઉવાચ ।
દત્તઃ સમુચિતઃ શાપો મહ્યં માયાપહઃ પ્રભો ।
હૃતાં ન યાચે સમ્પત્તિં કિઞ્ચિજ્જ્ઞાનં ચ દેહિ મે ॥ ૪૫॥

ઐશ્વર્યં વિપદાં બીજં જ્ઞાનપ્રચ્છન્નકારણમ્ ।
મુક્તિમાર્ગકુઠારશ્ચ ભક્તેશ્ચ વ્યવધાયકમ્ ॥ ૪૬॥

મુનિરુવાચ ।
જન્મમૃત્યુજરાશોકરોગબીજાઙ્કુરં પરમ્ ।
સમ્પત્તિતિમિરાન્ધશ્ચ મુક્તિમાર્ગં ન પશ્યતિ ॥ ૪૭॥

સમ્પન્મત્તો વિમૂઢશ્ચ સુરામત્તઃ સ એવ ચ ।
બાન્ધવૈર્વેષ્ટિતઃ સોઽપિ બન્ધુત્વેનૈવ હે હરે ॥ ૪૮॥

સમ્પત્તિમદમત્તશ્ચ વિષયાન્ધશ્ચ વિહ્વલઃ ।
મહાકામી રાજસિકઃ સત્ત્વમાર્ગં ન પશ્યતિ ॥ ૪૯॥

દ્વિવિધો વિષયાન્ધશ્ચ રાજસસ્તામસઃ સ્મૃતઃ ।
અશાસ્ત્રજ્ઞસ્તામસશ્ચ શાસ્ત્રજ્ઞો રાજસઃ સ્મૃતઃ ॥ ૫૦॥

શાસ્ત્રં ચ દ્વિવિધં માર્ગં દર્શયેત્સુરપુઙ્ગવ ।
પ્રવૃત્તિબીજમેકં ચ નિવૃત્તેઃ કારણં પરમ્ ॥ ૫૧॥

ચરન્તિ જીવિનશ્ચાદૌ પ્રવૃત્તેર્દુઃખવર્ત્મનિ ।

સ્વચ્છન્દં ચ પ્રસન્નં ચ નિર્વિરોધં ચ સન્તતમ્ ॥ ૫૨॥

આયાતિ મધુનો લોભાત્ક્લેશેન સુખમાનિતઃ ।
પરિણામે નાશબીજે જન્મમૃત્યુજરાકરે ॥ ૫૩॥

અનેકજન્મપર્યન્તં કૃત્વા ચ ભ્રમણં મુદા ।
સ્વકર્મવિહિતાયાં ચ નાનાયોન્યાં ક્રમેણ ચ ॥ ૫૪॥

તતશ્ચેશાનુગ્રહાગ્રચ્ય સત્સઙ્ગં લભતે ચ સઃ ।
સહસ્રેષુ શતેષ્વેકો ભવાબ્ધિપારકારણમ્ ॥ ૫૫॥

સાધુસ્તત્ત્વપ્રદીપેન મુક્તિમાર્ગં પ્રદર્શયેત્ ।
તદા કરોતિ યત્નં ચ જીવો બન્ધનખણ્ડને ॥ ૫૬॥

અનેકજન્મયોગેન તપસાનશનેન ચ ।
તદા લભેન્મુક્તિમાર્ગં નિર્વિઘ્નં સુખદં પરમ્ ॥ ૫૭॥

ઇદં શ્રુતં ગુરોર્વક્ત્યાદ્યત્ પૃચ્છસિ પુરન્દર ।
મુનેસ્તદ્વચનં શ્રુત્વા વીતરાગો બભૂવ સઃ ॥ ૫૮॥

વૈરાગ્યં વર્ધયામાસ તસ્ય બ્રહ્મન્ દિને દિને ।
મુનેઃ સ્થાનાદ્ ગૃહં ગત્વા સ દદર્શામરાવતીમ્ ॥ ૫૯॥

દૈત્યૈરસુરસઙ્ઘૈશ્ચ સમાકીર્ણાં ભયાકુલામ્ ।
વિષમોપપ્લવાં પુત્રબન્ધુહીનાં ચ કુત્રચિત્ ॥ ૬૦॥

પિતૃમાતૃકલત્રાદિવિહીનામતિચઞ્ચલામ્ ।
શત્રુગ્રસ્તાં ચ તાં દૃષ્ટ્વા જગામ વાક્પતિં પ્રતિ ॥ ૬૧॥

શક્રો મન્દાકિનીતીરે દદર્શ ગુરુમીશ્વરમ્ ।
ધ્યાયમાનં પરં બ્રહ્મ ગઙ્ગાતોયે સ્થિતં પરમ્ ॥ ૬૨॥

સૂર્યાભિસમ્મુખં પૂર્વમુખં ચ વિશ્વતોમુખમ્ ।
સાશ્રુનેત્રં પુલકિનં પરમાનન્દસંયુતમ્ ॥ ૬૩॥

વરિષ્ઠં ચ ગરિષ્ઠં ચ ધર્મિષ્ઠં શ્રેષ્ઠસેવિતમ્ ।
પ્રેષ્ઠં ચ બન્ધુવર્ગાણામતિશ્રેષ્ઠં ચ જ્ઞાનિનામ્ ॥ ૬૪॥

જ્યેષ્ઠં ચ ભ્રાતૃવર્ગાણામનિષ્ટં સુરવૈરિણામ્ ।
દૃષ્ટ્વા ગુરું જપન્તં ચ તત્ર તસ્થૌ સુરેશ્વરઃ ॥ ૬૫॥

પ્રહરાન્તે ગુરું દૃષ્ટ્વા ચોત્થિતં પ્રણનામ સઃ ।
પ્રણમ્ય ચરણામ્ભોજે રુરોદોચ્ચૈર્મુહુર્મુહુઃ ॥ ૬૬॥

વૃત્તાન્તં કથયામાસ બ્રહ્મશાપાદિકં તથા ।
પુનર્વરોપલબ્ધિં ચ જ્ઞાનપ્રાપ્તિં સુદુર્લભામ્ ॥ ૬૭॥

વૈરિગ્રસ્તાં ચ સ્વપુરીં ક્રમેણૈવ સુરેશ્વરઃ ।
શિષ્યસ્ય વચનં શ્રુત્વા સુબુદ્ધિર્વદતાં વરઃ ॥ ૬૮॥

બૃહસ્પતિરુવાચેદં કોપસંરક્તલોચનઃ ।
ગુરુરુવાચ ।
શ્રુતં સર્વં સુરશ્રેષ્ઠ મા રોદીર્વચનં શ ૃણુ ॥ ૬૯॥

ન કાતરો હિ નીતિજ્ઞો વિપત્તૌ ચ કદાચન ।
સમ્પત્તિર્વા વિપત્તિર્વા નશ્વરા શ્રમરૂપિણી ॥ ૭૦॥

પૂર્વસ્ય કર્માયત્તા ચ સ્વયં કર્તા તયોરપિ ।
સર્વેષાં ચ ભવત્યેવ શશ્વજ્જન્મનિ જન્મનિ ॥ ૭૧॥

ચક્રનેમિક્રમેણૈવ તત્ર કા પરિદેવના ।
ઉક્તં હિ સ્વકૃતં કર્મ ભુજ્યતેઽખિલભારતે ॥ ૭૨॥

શુભાશુભં ચ યત્કિઞ્ચિત્સ્વકર્મફલભુક્ પુમાન્ ।
નાભુક્તં ક્ષીયતે કર્મ કલ્પકોટિશતૈરપિ ॥ ૭૩॥

અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ।
ઇત્યેવમુક્તં વેદે ચ કૃષ્ણેન પરમાત્મના ॥ ૭૪॥

સામવેદોક્તશાખાયાં સમ્બોધ્ય કમલોદ્ભવમ્ ।
જન્મભોગાવશેષે ચ સર્વેષાં કૃતકર્મણામ્ ॥ ૭૫॥

અનુરૂપં હિ તેષાં ચ ભારતેઽન્યત્ર ચૈવ હિ ।
કર્મણા બ્રહ્મશાપં ચ કર્મણા ચ શુભાશિષમ્ ॥ ૭૬॥

કર્મણા ચ મહાલક્ષ્મીં લભેદ્દૈન્યં ચ કર્મણા ।
કોટિજન્માર્જિતં કર્મ જીવિનામનુગચ્છતિ ॥ ૭૭॥

ન હિ ત્યજેદ્વિના ભોગં તચ્છાયેવ પુરન્દર ।
કાલભેદે દેશભેદે પાત્રભેદે ચ કર્મણામ્ ॥ ૭૮॥

ન્યૂનતાધિકભાવોઽપિ ભવેદેવ હિ કર્મણા ।

વસ્તુદાનેન વસ્તૂનાં સમં પુણ્યં દિને દિને ॥ ૭૯॥

દિનભેદે કોટિગુણમસઙ્ખ્યં વા તતોઽધિકમ્ ।
સમે દેશે ચ વસ્તૂનાં દાને પુણ્યં સમં સુર ॥ ૮૦॥

દેશભેદે કોટિગુણમસઙ્ખ્યં વા તતોઽધિકમ્ ।
સમે પાત્રે સમં પુણ્યં વસ્તૂનાં કર્તુરેવ ચ ॥ ૮૧॥

પાત્રભેદે શતગુણમસઙ્ખ્યં વા તતોઽધિકમ્ ।
યથા ફલન્તિ સસ્યાનિ ન્યૂનાન્યપ્યધિકાનિ ચ ॥ ૮૨॥

કર્ષકાણાં ક્ષેત્રભેદે પાત્રભેદે ફલં તથા ।
સામાન્યદિવસે વિપ્રદાનં સમફલં ભવેત્ ॥ ૮૩॥

અમાયાં રવિસઙ્ક્રાન્ત્યાં ફલં શતગુણં ભવેત્ ।
ચાતુર્માસ્યાં પૌર્ણમાસ્યામનન્તં ફલમેવ ચ ॥ ૮૪॥

ગ્રહણે શશિનઃ કોટિગુણં ચ ફલમેવ ચ ।
સૂર્યસ્ય ગ્રહણે વાપિ તતો દશગુણં ભવેત્ ॥ ૮૫॥

અક્ષયાયામક્ષયં તદસઙ્ખ્યં ફલમુચ્યતે ।
એવમન્યત્ર પુણ્યાહે ફલાધિક્યં ભવેદિતિ ॥ ૮૬॥

યથા દાને તથા સ્નાને જપેઽન્યપુણ્યકર્મસુ ।
એવં સર્વત્ર બોદ્ધવ્યં નરાણાં કર્મણાં ફલમ્ ॥ ૮૭॥

યથા દણ્ડેન ચક્રેણ શરાવેણ ભ્રમેણ ચ ।
કુમ્ભં નિર્માતિ નિર્માતા કુમ્ભકારો મૃદા ભુવિ ॥ ૮૮॥

તથૈવ કર્મસૂત્રેણ ફલં ધાતા દદાતિ ચ ।
યસ્યાજ્ઞયા સૃષ્ટમિદં તં ચ નારાયણં ભજ ॥ ૮૯॥

સ વિધાતા વિધાતુશ્ચ પાતુઃ પાતા જગત્ત્રયે ।
સ્રષ્ટુઃ સ્રષ્ટા ચ સંહર્તુઃ સંહર્તા કાલકાલકઃ ॥ ૯૦॥

મહાવિપત્તૌ સંસારે યઃ સ્મરેન્મધુસૂદનમ્ ।
વિપત્તૌ તસ્ય સમ્પત્તિર્ભવેદિત્યાહ શઙ્કરઃ ॥ ૯૧॥

ઇત્યેવમુક્ત્વા તત્ત્વજ્ઞઃ સમાલિઙ્ગ્ય સુરેશ્વરમ્ ।
દત્ત્વા શુભાશિષં ચેષ્ટં બોધયામાસ નારદ ॥ ૯૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
લક્ષ્મ્યુત્પત્તિવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૦॥

## ૯.૪૧ એકચત્વારિંશોઽધ્યાયઃ । શ્રીલક્ષ્મ્યુપાખ્યાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
હરિં ધ્યાત્વા હરિર્બ્રહ્મન્ જગામ બ્રહ્મણઃ સભામ્ ।
બૃહસ્પતિં પુરસ્કૃત્ય સર્વૈઃ સુરગણૈઃ સહ ॥ ૧॥

શીઘ્રં ગત્વા બ્રહ્મલોકં દૃષ્ટ્વા ચ કમલોદ્ભવમ્ ।
પ્રણેમુર્દેવતાઃ સર્વાઃ સહેન્દ્રા ગુરુણા સહ ॥ ૨॥

વૃત્તાન્તં કથયામાસ સુરાચાર્યો વિધિં પ્રતિ ।
પ્રહસ્યોવાચ તચ્છ્રુત્વા મહેન્દ્રં કમલાસનઃ ॥ ૩॥

બ્રહ્મોવાચ ।
વત્સ મદ્વંશજાતોઽસિ પ્રપૌત્રો મે વિચક્ષણઃ ।
બૃહસ્પતેશ્ચ શિષ્યસ્ત્વં સુરાણામધિપઃ સ્વયમ્ ॥ ૪॥

માતામહશ્ચ દક્ષસ્તે વિષ્ણુભક્તઃ પ્રતાપવાન્ ।
કુલત્રયં યસ્ય શુદ્ધં કથં સોઽહઙ્કૃતો ભવેત્ ॥ ૫॥

માતા પતિવ્રતા યસ્ય પિતા શુદ્ધો જિતેન્દ્રિયઃ ।
માતામહો માતુલશ્ચ કથં સોઽહઙ્કૃતો ભવેત્ ॥ ૬॥

જનઃ પૈતૃકદોષેણ દોષાન્માતામહસ્ય ચ ।
ગુરુદોષાત્ત્રિભિર્દોષૈર્હરિદોષી ભવેદ્ ધ્રુવમ્ ॥ ૭॥

સર્વાન્તરાત્મા ભગવાન્ સર્વદેહેષ્વવસ્થિતઃ ।
યસ્ય દેહાત્સ પ્રયાતિ સ શવસ્તત્ક્ષણં ભવેત્ ॥ ૮॥

મનોઽહમિન્દ્રિયેશં ચ જ્ઞાનરૂપો હિ શઙ્કરઃ ।
વિષ્ણુપ્રાણા ચ પ્રકૃતિર્બુદ્ધિર્ભગવતી સતી ॥ ૯॥

નિદ્રાદયઃ શક્તયશ્ચ તાઃ સર્વાઃ પ્રકૃતેઃ કલાઃ ।
આત્મનઃ પ્રતિબિમ્બશ્ચ જીવો ભોગશરીરભૃત્ ॥ ૧૦॥

આત્મનીશે ગતે દેહાત્સર્વે યાન્તિ સસમ્ભ્રમાઃ ।

યથા વર્ત્મનિ ગચ્છન્તં નરદેવમિવાનુગાઃ ॥ ૧૧॥

અહં શિવશ્ચ શેષશ્ચ વિષ્ણુર્ધર્મો મહાવિરાટ્ ।
યૂયં યદંશા ભક્તાશ્ચ તત્પુષ્પં ન્યક્કૃતં ત્વયા ॥ ૧૨॥

શિવેન પૂજિતં પાદપદ્મં પુષ્પેણ યેન ચ ।
તત્ર દુર્વાસસા દત્તં દૈવેન ન્યક્કૃતં ત્વયા ॥ ૧૩॥

તત્પુણ્યં મસ્તકે યસ્ય કૃષ્ણપાદાબ્જપ્રચ્યુતમ્ ।
સર્વેષાં ચ સુરાણાં ચ તત્પૂજાપુરતો ભવેત્ ॥ ૧૪॥

દૈવેન વઞ્ચિતસ્ત્વં હિ દૈવં ચ બલવત્તરમ્ ।
ભાગ્યહીનં જનં મૂઢ કો વા રક્ષિતુમીશ્વરઃ ॥ ૧૫॥

સા શ્રીર્ગતાધુના કોપાત્કૃષ્ણનિર્માલ્યવર્જનાત્ ।
અધુના ગચ્છ વૈકુણ્ઠં મયા ચ ગુરુણા સહ ॥ ૧૬॥

નિષેવ્ય તત્ર શ્રીનાથં શ્રિયં પ્રાપ્સ્યતિ મદ્વરાત્ ।
એવમુક્ત્વા ચ સ બ્રહ્મા સર્વૈઃ સુરગણૈઃ સહ ॥ ૧૭॥

તત્ર ગત્વા પરબ્રહ્મ ભગવન્તં સનાતનમ્ ।
દૃષ્ટ્વા તેજઃસ્વરૂપં તં પ્રજ્વલન્તં સ્વતેજસા ॥ ૧૮॥

ગ્રીષ્મમધ્યાહ્નમાર્તણ્ડશતકોટિસમપ્રભમ્ ।
શાન્તમનાદિમધ્યાન્તં લક્ષ્મીકાન્તમનન્તકમ્ ॥ ૧૯॥

ચતુર્ભુજૈઃ પાર્ષદૈશ્ચ સરસ્વત્યા યુતં પ્રભુમ્ ।
ભક્ત્યા ચતુર્ભિર્વેદૈશ્ચ ગઙ્ગયા પરિવેષ્ટિતમ્ ॥ ૨૦॥

તં પ્રણેમુઃ સુરાઃ સર્વે મૂર્ધ્ના બ્રહ્મપુરોગમાઃ ।
ભક્તિનમ્રાઃ સાશ્રુનેત્રાસ્તુષ્ટુવુઃ પરમેશ્વરમ્ ॥ ૨૧॥

વૃત્તાન્તં કથયામાસ સ્વયં બ્રહ્મા કૃતાઞ્જલિઃ ।
રુરુદુર્દેવતાઃ સર્વાઃ સ્વાધિકારાચ્યુતાશ્ચ તાઃ ॥ ૨૨॥

સ દદર્શ સુરગણં વિપદ્ગ્રસ્તં ભયાકુલમ્ ।
રત્નભૂષણશૂન્યં ચ વાહનાદિવિવર્જિતમ્ ॥ ૨૩॥

શોભાશૂન્યં હતશ્રીકં નિષ્પ્રભં સભયં પરમ્ ।
ઉવાચ કાતરં દૃષ્ટ્વા ભયભીતિવિભઞ્જનઃ ॥ ૨૪॥

શ્રીભગવાનુવાચ ।
મા ભૈર્બ્રહ્મન્ હે સુરાશ્ચ ભયં કિં વો મયિ સ્થિતે ।
દાસ્યામિ લક્ષ્મીમચલાં પરમૈશ્વર્યવર્ધિનીમ્ ॥ ૨૫॥

કિઞ્ચ મદ્વચનં કિઞ્ચિચ્છ્રૂયતાં સમયોચિતમ્ ।
હિતં સત્યં સારભૂતં પરિણામસુખાવહમ્ ॥ ૨૬॥

જનાશ્ચાસઙ્ખ્યવિશ્વસ્થા મદધીનાશ્ચ સન્તતમ્ ।
યથા તથાહં મદ્ભક્તપરાધીનોઽસ્વતન્ત્રકઃ ॥ ૨૭॥

યં યં રુષ્ટો હિ મદ્ભક્તો મત્પરો હિ નિરઙ્કુશઃ ।
તદ્ગૃહેઽહં ન તિષ્ઠામિ પદ્મયા સહ નિશ્ચિતમ્ ॥ ૨૮॥

દુર્વાસાઃ શઙ્કરાંશશ્ચ વૈષ્ણવો મત્પરાયણઃ ।
તચ્છાપાદાગતોઽહં ચ સલક્ષ્મીકો હિ વો ગૃહાત્ ॥ ૨૯॥

યત્ર શઙ્ખધ્વનિર્નાસ્તિ તુલસી ન શિવાર્ચનમ્ ।
ન ભોજનં ચ વિપ્રાણાં ન પદ્મા તત્ર તિષ્ઠતિ ॥ ૩૦॥

મદ્ભક્તાનાં ચ મે નિન્દા યત્ર બ્રહ્મન્ ભવેત્સુરાઃ ।
મહારુષ્ટા મહાલક્ષ્મીસ્તતો યાતિ પરાભવમ્ ॥ ૩૧॥

મદ્ભક્તિહીનો યો મૂઢો ભુઙ્ક્તે યો હરિવાસરે ।
મમ જન્મદિને વાપિ યાતિ શ્રીસ્તદ્ગૃહાદપિ ॥ ૩૨॥

મન્નામવિક્રયી યશ્ચ વિક્રીણાતિ સ્વકન્યકામ્ ।
યત્રાતિથિર્ન ભુઙ્ક્તે ચ મત્પ્રિયા યાતિ તદ્ગૃહાત્ ॥ ૩૩॥

યો વિપ્રઃ પુંશ્ચલીપુત્રો મહાપાપી ચ તત્પતિઃ ।
પાપિનો યો ગૃહં યાતિ શૂદ્રશ્રાદ્ધાન્નભોજકઃ ॥ ૩૪॥

મહારુષ્ટા તતો યાતિ મન્દિરાત્કમલાલયા ।
શૂદ્રાણાં શવદાહી ચ ભાગ્યહીનો દ્વિજાધમઃ ॥ ૩૫॥

યાતિ રુષ્ટા તદ્ગૃહાચ્ચ દેવાઃ કમલવાસિની ।
શૂદ્રાણાં સૂપકારી યો બ્રાહ્મણો વૃષવાહકઃ ॥ ૩૬॥

તત્તોયપાનભીતા ચ કમલા યાતિ તદ્ગૃહાત્ ।
અશુદ્ધહૃદયઃ ક્રૂરો હિંસકો નિન્દકો દ્વિજઃ ॥ ૩૭॥

બ્રાહ્મણઃ શૂદ્રયાજી ચ યાતિ દેવી ચ તદ્ગૃહાત્ ।

અવીરાન્નં ચ યો ભુઙ્ક્તે તસ્માદ્યાતિ જગત્પ્રસૂઃ ॥ ૩૮॥

તૃણં છિનત્તિ નખરૈસ્તૈર્વા યો વિલિખેન્મહીમ્ ।
નિરાશો બ્રાહ્મણો યત્ર તદ્ગૃહાદ્યાતિ મત્પ્રિયા ॥ ૩૯॥

સૂર્યોદયે દ્વિજો ભુઙ્ક્તે દિવાસ્વાપી ચ બ્રાહ્મણઃ ।
દિવા મૈથુનકારી ચ યસ્તસ્માદ્યાતિ મત્પ્રિયા ॥ ૪૦॥

આચારહીનો વિપ્રો યો યશ્ચ શૂદ્રપ્રતિગ્રહી ।
અદીક્ષિતો હિ યો મૂઢસ્તસ્માદ્વૈ યાતિ મત્પ્રિયા ॥ ૪૧॥

સ્નિગ્ધપાદશ્ચ નગ્નો હિ યઃ શેતે જ્ઞાનદુર્બલઃ ।
શશ્વદ્વદતિ વાચાલો યાતિ સા તદ્ગૃહાત્સતી ॥ ૪૨॥

શિરસ્નાતસ્તુ તૈલેન યોઽન્યાઙ્ગં સમુપસ્પૃશેત્ ।
સ્વાઙ્ગં ચ વાદયેદ્વાદ્યં રુષ્ટા સા યાતિ તદ્ગૃહાત્ ॥ ૪૩॥

વ્રતોપવાસહીનો યઃ સન્ધ્યાહીનોઽશુચિર્દ્વિજઃ ।
વિષ્ણુભક્તિવિહીનસ્તુ તસ્માદ્યાતિ ચ મત્પ્રિયા ॥ ૪૪॥

બ્રાહ્મણં નિન્દયેદ્યો હિ તં ચ યો દ્વેષ્ટિ સન્તતમ્ ।
જીવહિંસ્રો દયાહીનો યાતિ સર્વપ્રસૂસ્તતઃ ॥ ૪૫॥

યત્ર યત્ર હરેરર્ચા હરેરુત્કીર્તનં તથા ।
તત્ર તિષ્ઠતિ સા દેવી સર્વમઙ્ગલમઙ્ગલા ॥ ૪૬॥

યત્ર પ્રશંસા કૃષ્ણસ્ય તદ્ભક્તસ્ય પિતામહ ।
સા ચ કૃષ્ણપ્રિયા દેવી તત્ર તિષ્ઠતિ સન્તતમ્ ॥ ૪૭॥

યત્ર શઙ્ખધ્વનિઃ શઙ્ખઃ શિલા ચ તુલસીદલમ્ ।
તત્સેવા વન્દનં ધ્યાનં તત્ર સા પરિતિષ્ઠતિ ॥ ૪૮॥

શિવલિઙ્ગાર્ચનં યત્ર તસ્ય ચોત્કીર્તનં શુભમ્ ।
દુર્ગાર્ચનં તદ્ગુણાશ્ચ તત્ર પદ્મનિવાસિની ॥ ૪૯॥

વિપ્રાણાં સેવનં યત્ર તેષાં ચ ભોજનં શુભમ્ ।
અર્ચનં સર્વદેવાનાં તત્ર પદ્મમુખી સતી ॥ ૫૦॥

ઇત્યુક્ત્વા ચ સુરાન્સર્વાન્ રમામાહ રમાપતિઃ ।
ક્ષીરોદસાગરે જન્મ કલયાકલયેતિ ચ ॥ ૫૧॥

ઇત્યુક્ત્વા તાં જગન્નાથો બ્રહ્માણં પુનરાહ ચ ।
મથિત્વા સાગરં લક્ષ્મીં દેવેભ્યો દેહિ પદ્મજ ॥ ૫૨॥

ઇત્યુક્ત્વા કમલાકાન્તો જગામાન્તઃપુરં મુને ।
દેવાશ્ચિરેણ કાલેન યયુઃ ક્ષીરોદસાગરમ્ ॥ ૫૩॥

મન્થાનં મન્દરં કૃત્વા કૂર્મં કૃત્વા ચ ભાજનમ્ ।
કૃત્વા શેષં મન્થપાશં મમન્થુરસુરાઃ સુરાઃ ॥ ૫૪॥

ધન્વન્તરિં ચ પીયૂષમુચ્ચૈઃશ્રવસમીપ્સિતમ્ ।
નાનારત્નં હસ્તિરત્નં પ્રાપુર્લક્ષ્મીં સુદર્શનમ્ ॥ ૫૫॥

વનમાલાં દદૌ સા ચ ક્ષીરોદશાયિને મુને ।
સર્વેશ્વરાય રમ્યાય વિષ્ણવે વૈષ્ણવી સતી ॥ ૫૬॥

દેવૈઃ સ્તુતા પૂજિતા ચ બ્રહ્મણા શઙ્કરેણ ચ ।
દદૌ દૃષ્ટિં સુરગૃહે બ્રહ્મશાપવિમોચનાત્ ॥ ૫૭॥

પ્રાપુર્દેવાઃ સ્વવિષયં દૈત્યગ્રસ્તં ભયઙ્કરમ્ ।
મહાલક્ષ્મીપ્રસાદેન વરદાનેન નારદ ॥ ૫૮॥

ઇત્યેવં કથિતં સર્વં લક્ષ્મ્યુપાખ્યાનમુત્તમમ્ ।
સુખદં સારભૂતં ચ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
શ્રીલક્ષ્મ્યુપાખ્યાનવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૧॥

## ૯.૪૨ દ્વિચત્વારિંશોઽધ્યાયઃ । મહાલક્ષ્મ્યાઃ ધ્યાનસ્તોત્રવર્ણનમ્ ।

નારદ ઉવાચ ।
હરેરુત્કીર્તનં ભદ્રં શ્રુતં તજ્જ્ઞાનમુત્તમમ્ ।
ઈપ્સિતં લક્ષ્મ્યુપાખ્યાનં ધ્યાનં સ્તોત્રં વદ પ્રભો ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
સ્નાત્વા તીર્થે પુરા શક્રો ધૃત્વા ધૌતે ચ વાસસી ।
ઘટં સંસ્થાપ્ય ક્ષીરોદે ષડ્દેવાન્ પર્યપૂજયત્ ॥ ૨॥

ગણેશં ચ દિનેશં ચ વહ્નિં વિષ્ણું શિવં શિવામ્ ।

એતાન્ ભક્ત્યા સમભ્યર્ચ્ય પુષ્પગન્ધાદિભિસ્તદા ॥ ૩॥

આવાહ્ય ચ મહાલક્ષ્મીં પરમૈશ્વર્યરૂપિણીમ્ ।
પૂજાઞ્ચકાર દેવેશો બ્રહ્મણા ચ પુરોધસા ॥ ૪॥

પુરઃસ્થિતેષુ મુનિષુ બ્રાહ્મણેષુ ગુરૌ હરૌ ।
દેવાદિષુ સુદેશે ચ જ્ઞાનાનન્દં શિવે મુને ॥ ૫॥

પારિજાતસ્ય પુષ્પં ચ ગૃહીત્વા ચન્દનોક્ષિતમ્ ।
ધ્યાત્વા દેવીં મહાલક્ષ્મીં પૂજયામાસ નારદ ॥ ૬॥

ધ્યાનં ચ સામવેદોક્તં યદ્દત્તં બ્રહ્મણે પુરા ।
હરિણા તેન ધ્યાનેન તન્નિબોધ વદામિ તે ॥ ૭॥

સહસ્રદલપદ્મસ્થકર્ણિકાવાસિનીં પરામ્ ।
શરત્પાર્વણકોટીન્દુપ્રભામુષ્ટિકરાં પરામ્ ॥ ૮॥

સ્વતેજસા પ્રજ્વલન્તીં સુખદૃશ્યાં મનોહરામ્ ।
પ્રતપ્તકાઞ્ચનનિભશોભાં મૂર્તિમતીં સતીમ્ ॥ ૯॥

રત્નભૂષણભૂષાઢ્યાં શોભિતાં પીતવાસસા ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યાં શશ્વત્સુસ્થિરયૌવનામ્ ॥ ૧૦॥

સર્વસમ્પત્પ્રદાત્રીં ચ મહાલક્ષ્મીં ભજે શુભામ્ ।
ધ્યાનેનાનેન તાં ધ્યાત્વા નાનાગુણસમન્વિતામ્ ॥ ૧૧॥

સમ્પૂજ્ય બ્રહ્મવાક્યેન ચોપચારાણિ ષોડશ ।
દદૌ ભક્ત્યા વિધાનેન પ્રત્યેકં મન્ત્રપૂર્વકમ્ ॥ ૧૨॥

પ્રશસ્તાનિ પ્રકૃષ્ટાનિ વરાણિ વિવિધાનિ ચ ।
અમૂલ્યરત્નસારં ચ નિર્મિતં વિશ્વકર્મણા ॥ ૧૩॥

આસનં ચ વિચિત્રં ચ મહાલક્ષ્મિ પ્રગૃહ્યતામ્ ।
શુદ્ધં ગઙ્ગોદકમિદં સર્વવન્દિતમીપ્સિતમ્ ॥ ૧૪॥

પાપેધ્મવહ્નિરૂપં ચ ગૃહ્યતાં કમલાલયે ।
પુષ્પચન્દનદૂર્વાદિસંયુતં જાહ્નવીજલમ્ ॥ ૧૫॥

શઙ્ખગર્ભસ્થિતં સ્વર્ઘ્યં ગૃહ્યતાં પદ્મવાસિનિ ।
સુગન્ધિપુષ્પતૈલં ચ સુગન્ધામલકીફલમ્ ॥ ૧૬॥

દેહસૌન્દર્યબીજં ચ ગૃહ્યતાં શ્રીહરેઃ પ્રિયે ।
કાર્પાસજં ચ કૃમિજં વસનં દેવિ ગૃહ્યતામ્ ॥ ૧૭॥

રત્નસ્વર્ણવિકારં ચ દેહભૂષાવિવર્ધનમ્ ।
શોભાયૈ શ્રીકરં રત્નં ભૂષણં દેવિ ગૃહ્યતામ્ ॥ ૧૮॥

સર્વસૌન્દર્યબીજં ચ સદ્યઃ શોભાકરં પરમ્ ।
વૃક્ષનિર્યાસરૂપં ચ ગન્ધદ્રવ્યાદિસંયુતમ્ ॥ ૧૯॥

શ્રીકૃષ્ણકાન્તે ધૂપં ચ પવિત્રં પ્રતિગૃહ્યતામ્ ।
સુગન્ધિયુક્તં સુખદં ચન્દનં દેવિ ગૃહ્યતામ્ ॥ ૨૦॥

જગચ્ચક્ષુઃસ્વરૂપં ચ પવિત્રં તિમિરાપહમ્ ।
પ્રદીપં સુખરૂપં ચ ગૃહ્યતાં ચ સુરેશ્વરિ ॥ ૨૧॥

નાનોપહારરૂપં ચ નાનારસસમન્વિતમ્ ।
અતિસ્વાદુકરં ચૈવ નૈવેદ્યં પ્રતિગૃહ્યતામ્ ॥ ૨૨॥

અન્નં બ્રહ્મસ્વરૂપં ચ પ્રાણરક્ષણકારણમ્ ।
તુષ્ટિદં પુષ્ટિદં ચૈવ દેવ્યન્નં પ્રતિગૃહ્યતામ્ ॥ ૨૩॥

શાલ્યન્નજં સુપક્વં ચ શર્કરાગવ્યસંયુતમ્ ।
સ્વાદુયુક્તં મહાલક્ષ્મિ પરમાન્નં પ્રગૃહ્યતામ્ ॥ ૨૪॥

શર્કરાગવ્યપક્વં ચ સુસ્વાદુ સુમનોહરમ્ ।
સ્વસ્તિકં નામ નૈવેદ્યં ગૃહાણ પરમેશ્વરિ ॥ ૨૫॥

નાનાવિધાનિ રમ્યાણિ પક્વાન્નાનિ ફલાનિ ચ ।
સુરભિસ્તનસન્ત્યક્તં સુસ્વાદુ સુમનોહરમ્ ॥ ૨૬॥

મર્ત્યામૃતં સુગવ્યં ચ ગૃહ્યતામચ્યુતપ્રિયે ।
સુસ્વાદુ રસસંયુક્તમિક્ષુવૃક્ષસમુદ્ભવમ્ ॥ ૨૭॥

અગ્નિપક્વમતિસ્વાદુ ગુડં ચ પ્રતિગૃહ્યતામ્ ।
યવગોધૂમસસ્યાનાં ચૂર્ણરેણુસમુદ્ભવમ્ ॥ ૨૮॥

સુપક્વં ગુડગવ્યાક્તં મિષ્ટાન્નં દેવિ ગૃહ્યતામ્ ।
સસ્યચૂર્ણોદ્ભવં પક્વં સ્વસ્તિકાદિસમન્વિતમ્ ॥ ૨૯॥

મયા નિવેદિતં ભક્ત્યા નૈવેદ્યં પ્રતિગૃહ્યતામ્ ।
શીતવાયુપ્રદં ચૈવ દાહે ચ સુખદં પરમ્ ॥ ૩૦॥

કમલે ગૃહ્યતાં ચેદં વ્યજનં શ્વેતચામરમ્ ।
તામ્બૂલં ચ વરં રમ્યં કર્પૂરાદિસુવાસિતમ્ ॥ ૩૧॥

જિહ્વાજાડ્યચ્છેદકરં તામ્બૂલં પ્રતિગૃહ્યતામ્ ।
સુવાસિતં સુશીતં ચ પિપાસાનાશકારણમ્ ॥ ૩૨॥

જગજ્જીવનરૂપં ચ જીવનં દેવિ ગૃહ્યતામ્ ।
દેહસૌન્દર્યબીજં ચ સદા શોભાવિવર્ધનમ્ ॥ ૩૩॥

કાર્પાસજં ચ કૃમિજં વસનં દેવિ ગૃહ્યતામ્ ।
રક્તસ્વર્ણવિકારં ચ દેહભૂષાદિવર્ધનમ્ ॥ ૩૪॥

શોભાધારં શ્રીકરં ચ ભૂષણં દેવિ ગૃહ્યતામ્ ।
નાનાઋતુષુ નિર્માણં બહુશોભાશ્રયં પરમ્ ॥ ૩૫॥

સુરભૂપપ્રિયં શુદ્ધં માલ્યં દેવિ પ્રગૃહ્યતામ્ ।
શુદ્ધિદં શુદ્ધરૂપં ચ સર્વમઙ્ગલમઙ્ગલમ્ ॥ ૩૬॥

ગન્ધવસ્તૂદ્ભવં રમ્યં ગન્ધં દેવિ પ્રગૃહ્યતામ્ ।
પુણ્યતીર્થોદકં ચૈવ વિશુદ્ધં શુદ્ધિદં સદા ॥ ૩૭॥

ગૃહ્યતાં કૃષ્ણકાન્તે ત્વં રમ્યમાચમનીયકમ્ ।
રત્નસારાદિનિર્માણં પુષ્પચન્દનચર્ચિતમ્ ॥ ૩૮॥

રત્નભૂષણભૂષાઢ્યં સુતલ્પં દેવિ ગૃહ્યતામ્ ।
યદ્યદ્ દ્રવ્યમપૂર્વં ચ પૃથિવ્યામપિ દુર્લભમ્ ॥ ૩૯॥

દેવભૂષાર્હભોગ્યં ચ તદ્ દ્રવ્યં દેવિ ગૃહ્યતામ્ ।
દ્રવ્યાણ્યેતાનિ દત્ત્વા ચ મૂલેન દેવપુઙ્ગવઃ ॥ ૪૦॥

મૂલં જજાપ ભક્ત્યા ચ દશલક્ષં વિધાનતઃ ।
જપેન દશલક્ષેણ મન્ત્રસિદ્ધિર્બભૂવ હ ॥ ૪૧॥

મન્ત્રશ્ચ બ્રહ્મણા દત્તઃ કલ્પવૃક્ષશ્ચ સર્વતઃ ।
લક્ષ્મીર્માયા કામવાણી ઙેઽન્તા કમલવાસિની ॥ ૪૨॥

વૈદિકો મન્ત્રરાજોઽયં પ્રસિદ્ધઃ સ્વાહયાન્વિતઃ ।
કુબેરોઽનેન મન્ત્રેણ પરમૈશ્વર્યમાપ્તવાન્ ॥ ૪૩॥

રાજરાજેશ્વરો દક્ષઃ સાવર્ણિર્મનુરેવ ચ ।

મઙ્ગલોઽનેન મન્ત્રેણ સપ્તદ્વીપેઽવનીપતિઃ ॥ ૪૪॥

પ્રિયવ્રતોત્તાનપાદૌ કેદારો નૃપ એવ ચ ।
એતે સિદ્ધાશ્ચ રાજેન્દ્રા મન્ત્રેણાનેન નારદ ॥ ૪૫॥

સિદ્ધે મન્ત્રે મહાલક્ષ્મીઃ શક્રાય દર્શનં દદૌ ।
રત્નેન્દ્રસારનિર્માણવિમાનસ્થા વરપ્રદા ॥ ૪૬॥

સપ્તદ્વીપવતીં પૃથ્વીં છાદયન્તી ત્વિષા ચ સા ।
શ્વેતચમ્પકવર્ણાભા રત્નભૂષણભૂષિતા ॥ ૪૭॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યા ભક્તાનુગ્રહકાતરા ।
બિભ્રતી રત્નમાલાં ચ કોટિચન્દ્રસમપ્રભામ્ ॥ ૪૮॥

દૃષ્ટ્વા જગત્પ્રસૂં શાન્તાં તુષ્ટાવૈતાં પુરન્દરઃ ।
પુલકાઞ્ચિતસર્વાઙ્ગઃ સાશ્રુનેત્રઃ કૃતાઞ્જલિઃ ॥ ૪૯॥

બ્રહ્મણા ચ પ્રદત્તેન સ્તોત્રરાજેન સંયુતઃ ।
સર્વાભીષ્ટપ્રદેનૈવ વૈદિકેનૈવ તત્ર ચ ॥ ૫૦॥

પુરન્દર ઉવાચ ।
નમઃ કમલવાસિન્યૈ નારાયણ્યૈ નમો નમઃ ।
કૃષ્ણપ્રિયાયૈ સતતં મહાલક્ષ્મ્યૈ નમો નમઃ ॥ ૫૧॥

પદ્મપત્રેક્ષણાયૈ ચ પદ્માસ્યાયૈ નમો નમઃ ।
પદ્માસનાયૈ પદ્મિન્યૈ વૈષ્ણવ્યૈ ચ નમો નમઃ ॥ ૫૨॥

સર્વસમ્પત્સ્વરૂપિણ્યૈ સર્વારાધ્યૈ નમો નમઃ ।
હરિભક્તિપ્રદાત્ર્યૈ ચ હર્ષદાત્ર્યૈ નમો નમઃ ॥ ૫૩॥

કૃષ્ણવક્ષઃસ્થિતાયૈ ચ કૃષ્ણેશાયૈ નમો નમઃ ।
ચન્દ્રશોભાસ્વરૂપાયૈ રત્નપદ્મે ચ શોભને ॥ ૫૪॥

સમ્પત્ત્યધિષ્ઠાતૃદેવ્યૈ મહાદેવ્યૈ નમો નમઃ ।
નમો વૃદ્ધિસ્વરૂપાયૈ વૃદ્ધિદાયૈ નમો નમઃ ॥ ૫૫॥

વૈકુણ્ઠે યા મહાલક્ષ્મીર્યા લક્ષ્મીઃ ક્ષીરસાગરે ।
સ્વર્ગલક્ષ્મીરિન્દ્રગેહે રાજલક્ષ્મીર્નૃપાલયે ॥ ૫૬॥

ગૃહલક્ષ્મીશ્ચ ગૃહિણાં ગેહે ચ ગૃહદેવતા ।
સુરભિઃ સાગરે જાતા દક્ષિણા યજ્ઞકામિની ॥ ૫૭॥

અદિતિર્દેવમાતા ત્વં કમલા કમલાલયા ।
સ્વાહા ત્વં ચ હવિર્દાને કવ્યદાને સ્વધા સ્મૃતા ॥ ૫૮॥

ત્વં હિ વિષ્ણુસ્વરૂપા ચ સર્વાધારા વસુન્ધરા ।
શુદ્ધસત્ત્વસ્વરૂપા ત્વં નારાયણપરાયણા ॥ ૫૯॥

ક્રોધહિંસાવર્જિતા ચ વરદા શારદા શુભા ।
પરમાર્થપ્રદા ત્વં ચ હરિદાસ્યપ્રદા પરા ॥ ૬૦॥

યયા વિના જગત્સર્વં ભસ્મીભૂતમસારકમ્ ।
જીવન્મૃતં ચ વિશ્વં ચ શશ્વત્સર્વં યયા વિના ॥ ૬૧॥

સર્વેષાં ચ પરા માતા સર્વબાન્ધવરૂપિણી ।
ધર્માર્થકામમોક્ષાણાં ત્વં ચ કારણરૂપિણી ॥ ૬૨॥

યથા માતા સ્તનાન્ધાનાં શિશૂનાં શૈશવે સદા ।
તથા ત્વં સર્વદા માતા સર્વેષાં સર્વરૂપતઃ ॥ ૬૩॥

માતૃહીનઃ સ્તનાન્ધસ્તુ સ ચ જીવતિ દૈવતઃ ।
ત્વયા હીનો જનઃ કોઽપિ ન જીવત્યેવ નિશ્ચિતમ્ ॥ ૬૪॥

સુપ્રસન્નસ્વરૂપા ત્વં માં પ્રસન્ના ભવામ્બિકે ।
વૈરિગ્રસ્તં ચ વિષયં દેહિ મહ્યં સનાતનિ ॥ ૬૫॥

અહં યાવત્ત્વયા હીનો બન્ધુહીનશ્ચ ભિક્ષુકઃ ।
સર્વસમ્પદ્વિહીનશ્ચ તાવદેવ હરિપ્રિયે ॥ ૬૬॥

જ્ઞાનં દેહિ ચ ધર્મં ચ સર્વસૌભાગ્યમીપ્સિતમ્ ।
પ્રભાવઞ્ચ પ્રતાપં ચ સર્વાધિકારમેવ ચ ॥ ૬૭॥

જયં પરાક્રમં યુદ્ધે પરમૈશ્વર્યમેવ ચ ।
ઇત્યુક્ત્વા ચ મહેન્દ્રશ્ચ સર્વૈઃ સુરગણૈઃ સહ ॥ ૬૮॥

પ્રણનામ સાશ્રુનેત્રો મૂર્ધ્ના ચૈવ પુનઃ પુનઃ ।
બ્રહ્મા ચ શઙ્કરશ્ચૈવ શેષો ધર્મશ્ચ કેશવઃ ॥ ૬૯॥

સર્વે ચક્રુઃ પરીહારં સુરાર્થે ચ પુનઃ પુનઃ ।
દેવેભ્યશ્ચ વરં દત્ત્વા પુષ્પમાલાં મનોહરામ્ ॥ ૭૦॥

કેશવાય દદૌ લક્ષ્મીઃ સન્તુષ્ટા સુરસંસદિ ।

યયુર્દેવાશ્ચ સન્તુષ્ટાઃ સ્વં સ્વં સ્થાનં ચ નારદ ॥ ૭૧॥

દેવી યયૌ હરેઃ સ્થાનં હૃષ્ટા ક્ષીરોદશાયિનઃ ।
યયતુશ્ચૈવ સ્વગૃહં બ્રહ્મેશાનૌ ચ નારદ ॥ ૭૨॥

દત્ત્વા શુભાશિષં તૌ ચ દેવેભ્યઃ પ્રીતિપૂર્વકમ્ ।
ઇદં સ્તોત્રં મહાપુણ્યં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ॥ ૭૩॥

કુબેરતુલ્યઃ સ ભવેદ્રાજરાજેશ્વરો મહાન્ ।
પઞ્ચલક્ષજપેનૈવ સ્તોત્રસિદ્ધિર્ભવેન્નૃણામ્ ॥ ૭૪॥

સિદ્ધસ્તોત્રં યદિ પઠેન્માસમેકં તુ સન્તતમ્ ।
મહાસુખી ચ રાજેન્દ્રો ભવિષ્યતિ ન સંશયઃ ॥ ૭૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે મહાલક્ષ્મ્યાઃ
ધ્યાનસ્તોત્રવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૨॥

## ૯.૪૩ ત્રિચત્વારિંશોઽધ્યાયઃ । સ્વાહોપાખ્યાનવર્ણનમ્ ।

નારદ ઉવાચ ।
નારાયણ મહાભાગ નારાયણ મહાપ્રભો ।
રૂપેણૈવ ગુણેનૈવ યશસા તેજસા ત્વિષા ॥ ૧॥

ત્વમેવ જ્ઞાનિનાં શ્રેષ્ઠઃ સિદ્ધાનાં યોગિનાં મુને ।
તપસ્વિનાં મુનીનાં ચ પરો વેદવિદાંવર ॥ ૨॥

મહાલક્ષ્મ્યા ઉપાખ્યાનં વિજ્ઞાતં મહદદ્ભુતમ્ ।
અન્યત્કિઞ્ચિદુપાખ્યાનં નિગૂઢં વદ સામ્પ્રતમ્ ॥ ૩॥

અતીવ ગોપનીયં યદુપયુક્તં ચ સર્વતઃ ।
અપ્રકાશ્યં પુરાણેષુ વેદોક્તં ધર્મસંયુતમ્ ॥ ૪॥

શ્રીનારાયણ ઉવાચ ।
નાનાપ્રકારમાખ્યાનમપ્રકાશ્યં પુરાણતઃ ।
શ્રુતં કતિવિધં ગૂઢમાસ્તે બ્રહ્મન્ સુદુર્લભમ્ ॥ ૫॥

તેષુ યત્સારભૂતં ચ શ્રોતું કિં વા ત્વમિચ્છસિ ।
તન્મે બ્રૂહિ મહાભાગ પશ્ચાદ્વક્ષ્યામિ તત્પુનઃ ॥ ૬॥

નારદ ઉવાચ ।
સ્વાહા દેવી હવિર્દાને પ્રશસ્તા સર્વકર્મસુ ।
પિતૃદાને સ્વધા શસ્તા દક્ષિણા સર્વતો વરા ॥ ૭॥

એતાસાં ચરિતં જન્મફલં પ્રાધાન્યમેવ ચ ।
શ્રોતુમિચ્છામિ ત્વદ્વક્ત્રાદ્વદ વેદવિદાંવર ॥ ૮॥

સૂત ઉવાચ ।
નારદસ્ય વચઃ શ્રુત્વા પ્રહસ્ય મુનિસત્તમઃ ।
કથાં કથિતુમારેભે પુરાણોક્તાં પુરાતનીમ્ ॥ ૯॥

શ્રીનારાયણ ઉવાચ ।
સૃષ્ટેઃ પ્રથમતો દેવાઃ સ્વાહારાર્થં યયુઃ પુરા ।
બ્રહ્મલોકં બ્રહ્મસભામાજગ્મુઃ સુમનોહરામ્ ॥ ૧૦॥

ગત્વા નિવેદનં ચક્રુરાહારહેતુકં મુને ।
બ્રહ્મા શ્રુત્વા પ્રતિજ્ઞાય નિષેવે શ્રીહરિં પરમ્ ॥ ૧૧॥

નારદ ઉવાચ ।
યજ્ઞરૂપો હિ ભગવાન્ કલયા ચ બભૂવ હ ।
યજ્ઞે યદ્યદ્ધવિર્દાનં દત્તં તેભ્યશ્ચ બ્રાહ્મણૈઃ ॥ ૧૨॥

શ્રીનારાયણ ઉવાચ ।
હવિર્દદતિ વિપ્રાશ્ચ ભક્ત્યા ચ ક્ષત્રિયાદયઃ ।
સુરા નૈવ પ્રાપ્નુવન્તિ તદ્દાનં મુનિપુઙ્ગવ ॥ ૧૩॥

દેવા વિષણ્ણાસ્તે સર્વે તત્સભાં ચ યયુઃ પુનઃ ।
ગત્વા નિવેદનં ચક્રુરાહારાભાવહેતુકમ્ ॥ ૧૪॥

બ્રહ્મા શ્રુત્વા તુ ધ્યાનેન શ્રીકૃષ્ણં શરણં યયૌ ।
પૂજાઞ્ચકાર પ્રકૃતેર્ધ્યાનેનૈવ તદાજ્ઞયા ॥ ૧૫॥

પ્રકૃતેઃ કલયા ચૈવ સર્વશક્તિસ્વરૂપિણી ।
અતીવ સુન્દરી શ્યામા રમણીયા મનોહરા ॥ ૧૬॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યા ભક્તાનુગ્રહકાતરા ।
ઉવાચેતિ વિધેરગ્રે પદ્મયોને વરં વૃણુ ॥ ૧૭॥

વિધિસ્તદ્વચનં શ્રુત્વા સમ્ભ્રમાત્સમુવાચ તામ્ ।

પ્રજાપતિરુવાચ ।
ત્વમગ્નેર્દાહિકા શક્તિર્ભવ યાતીવ સુન્દરી ॥ ૧૮॥

દગ્ધું ન શક્તઃ પ્રકૃતીર્હુતાશશ્ચ ત્વયા વિના ।
ત્વન્નામોચ્ચાર્ય મન્ત્રાન્તે યો દાસ્યતિ હવિર્નરઃ ॥ ૧૯॥

સુરેભ્યસ્તત્પ્રાપ્નુવન્તિ સુરાઃ સાનન્દપૂર્વકમ્ ।
અગ્નેઃ સમ્પત્સ્વરૂપા ચ શ્રીરૂપા સા ગૃહેશ્વરી ॥ ૨૦॥

દેવાનાં પૂજિતા શશ્વન્નરાદીનાં ભવામ્બિકે ।
બ્રહ્મણશ્ચ વચઃ શ્રુત્વા સા વિષણ્ણા બભૂવ હ ॥ ૨૧॥

તમુવાચ તતો દેવી સ્વાભિપ્રાયં સ્વયમ્ભુવમ્ ।
સ્વાહોવાચ ।
અહં કૃષ્ણં ભજિષ્યામિ તપસા સુચિરેણ ચ ॥ ૨૨॥

બ્રહ્મંસ્તદન્યં યત્કિઞ્ચિત્સ્વપ્નવદ્ ભ્રમમેવ ચ ।
વિધાતા જગતસ્ત્વં ચ શમ્ભુર્મૃત્યુઞ્જયો વિભુઃ ॥ ૨૩॥

બિભર્તિ શેષો વિશ્વં ચ ધર્મઃ સાક્ષી ચ ધર્મિણામ્ ।
સર્વાદ્યપૂજ્યો દેવાનાં ગણેષુ ચ ગણેશ્વરઃ ॥ ૨૪॥

પ્રકૃતિઃ સર્વસમ્પૂજ્યા યત્પ્રસાદાત્પુરાભવત્ ।
ઋષયો મુનયશ્ચૈવ પૂજિતા યન્નિષેવયા ॥ ૨૫॥

તત્પાદપદ્મં નિયતં ભાવેન ચિન્તયામ્યહમ્ ।
પદ્માસ્યા પાદ્યમિત્યુક્ત્વા પદ્મનાભાનુસારતઃ ॥ ૨૬॥

જગામ તપસે દેવી ધ્યાત્વા કૃષ્ણં નિરામયમ્ ।
તપસ્તેપે વર્ષલક્ષમેકપાદેન પદ્મજા ॥ ૨૭॥

તદા દદર્શ શ્રીકૃષ્ણં નિર્ગુણં પ્રકૃતેઃ પરમ્ ।
અતીવ કમનીયં ચ રૂપં દૃષ્ટ્વા ચ રૂપિણી ॥ ૨૮॥

મૂર્ચ્છાં સમ્પ્રાપ કાલેન કામેશસ્ય ચ કામુકી ।
વિજ્ઞાય તદભિપ્રાયં સર્વજ્ઞસ્તામુવાચ હ ॥ ૨૯॥

સમુત્થાપ્ય ચ તાં ક્રોડે ક્ષીણાઙ્ગીં તપસા ચિરમ્ ।
શ્રીભગવાનુવાચ ।
વારાહે વૈ ત્વમંશેન મમ પત્ની ભવિષ્યસિ ॥ ૩૦॥

નામ્ના નાગ્નજિતી કન્યા કાન્તે નગ્નજિતસ્ય ચ ।
અધુનાગ્રેદાહિકા ત્વં ભવ પત્ની ચ ભામિની ॥ ૩૧॥

મન્ત્રાઙ્ગરૂપા પૂજ્યા ચ મત્પ્રસાદાદ્ ભવિષ્યસિ ।
વહ્નિસ્ત્વાં ભક્તિભાવેન સમ્પૂજ્ય ચ ગૃહેશ્વરીમ્ ॥ ૩૨॥

રમિષ્યતિ ત્વયા સાર્ધં રામયા રમણીયયા ।
ઇત્યુક્ત્વાન્તર્દધે દેવો દેવીં સમ્ભાષ્ય નારદ ॥ ૩૩॥

તત્રાજગામ સન્ત્રસ્તો વહ્નિર્બ્રહ્મનિદેશતઃ ।
સામવેદોક્તધ્યાનેન ધ્યાત્વા તાં જગદમ્બિકામ્ ॥ ૩૪॥

સમ્પૂજ્ય પરિતુષ્ટાવ પાણિં જગ્રાહ મન્ત્રતઃ ।
તદા દિવ્યં વર્ષશતં સ રેમે રામયા સહ ॥ ૩૫॥

અતીવ નિર્જને દેશે સમ્ભોગસુખદે સદા ।
બભૂવ ગર્ભસ્તસ્યાં ચ હુતાશસ્ય ચ તેજસા ॥ ૩૬॥

તં દધાર ચ સા દેવી દિવ્યં દ્વાદશવત્સરમ્ ।
તતઃ સુષાવ પુત્રાંશ્ચ રમણીયાન્મનોહરાન્ ॥ ૩૭॥

દક્ષિણાગ્નિગાર્હપત્યાહવનીયાન્ ક્રમેણ ચ ।
ઋષયો મુનયશ્ચૈવ બ્રાહ્મણાઃ ક્ષત્રિયાદયઃ ॥ ૩૮॥

સ્વાહાન્તં મન્ત્રમુચ્ચાર્ય હવિર્દાનં ચ ચક્રિરે ।
સ્વાહાયુક્તં ચ મન્ત્રં ચ યો ગૃહ્ણાતિ પ્રશસ્તકમ્ ॥ ૩૯॥

સર્વસિદ્ધિર્ભવેત્તસ્ય મન્ત્રગ્રહણમાત્રતઃ ।
વિષહીનો યથા સર્પો વેદહીનો યથા દ્વિજઃ ॥ ૪૦॥

પતિસેવાવિહીના સ્ત્રી વિદ્યાહીનો યથા પુમાન્ ।
ફલશાખાવિહીનશ્ચ યથા વૃક્ષો હિ નિન્દિતઃ ॥ ૪૧॥

સ્વાહાહીનસ્તથા મન્ત્રો ન હુતઃ ફલદાયકઃ ।
પરિતુષ્ટા દ્વિજાઃ સર્વે દેવાઃ સમ્પ્રાપુરાહુતીઃ ॥ ૪૨॥

સ્વાહાન્તેનૈવ મન્ત્રેણ સફલં સર્વમેવ ચ ।
ઇત્યેવં કથિતં સર્વં સ્વાહોપાખ્યાનમુત્તમમ્ ॥ ૪૩॥

સુખદં મોક્ષદં સારં કિં ભૂયઃ શ્રોતુમિચ્છસિ ।
નારદ ઉવાચ ।

સ્વાહાપૂજાવિધાનં ચ ધ્યાનં સ્તોત્રં મુનીશ્વર ॥ ૪૪॥

સમ્પૂજ્ય વહ્નિસ્તુષ્ટાવ યેન તદ્વદ મે પ્રભો ।
શ્રીનારાયણ ઉવાચ ।
ધ્યાનં ચ સામવેદોક્તં સ્તોત્રપૂજાવિધાનકમ્ ॥ ૪૫॥

વદામિ શ્રૂયતાં બ્રહ્મન્ સાવધાનો મુનીશ્વર ।
સર્વયજ્ઞારમ્ભકાલે શાલગ્રામે ઘટેઽથવા ॥ ૪૬॥

સ્વાહાં સમ્પૂજ્ય યત્નેન યજ્ઞં કુર્યાત્ફલાપ્તયે ।
સ્વાહાં મન્ત્રાઙ્ગયુક્તાં ચ મન્ત્રસિદ્ધિસ્વરૂપિણીમ્ ॥ ૪૭॥

સિદ્ધાં ચ સિદ્ધિદાં નૃણાં કર્મણાં ફલદાં શુભામ્ ।
ઇતિ ધ્યાત્વા ચ મૂલેન દત્ત્વા પાદ્યાદિકં નરઃ ॥ ૪૮॥

સર્વસિદ્ધિં લભેત્સ્તુત્વા મૂલમન્ત્રં મુને શ‍ૃણુ ।
ૐ હ્રીં શ્રીં વહ્નિજાયાયૈ દેવ્યૈ સ્વાહેત્યનેન ચ ॥ ૪૯॥

યઃ પૂજયેચ્ચ તાં ભક્ત્યા સર્વેષ્ટં સમ્ભવેદ્ ધ્રુવમ્ ।
વહ્નિરુવાચ ।
સ્વાહા વહ્નિપ્રિયા વહ્નિજાયા સન્તોષકારિણી ॥ ૫૦॥

શક્તિઃ ક્રિયા કાલદાત્રી પરિપાકકરી ધ્રુવા ।
ગતિઃ સદા નરાણાં ચ દાહિકા દહનક્ષમા ॥ ૫૧॥

સંસારસારરૂપા ચ ઘોરસંસારતારિણી ।
દેવજીવનરૂપા ચ દેવપોષણકારિણી ॥ ૫૨॥

ષોડશૈતાનિ નામાનિ યઃ પઠેદ્ભક્તિસંયુતઃ ।
સર્વસિદ્ધિર્ભવેત્તસ્ય ઇહ લોકે પરત્ર ચ ॥ ૫૩॥

નાઙ્ગહીનં ભવેત્તસ્ય સર્વં કર્મ સુશોભનમ્ ।
અપુત્રો લભતે પુત્રં ભાર્યાહીનો લભેત્પ્રિયામ્ ॥ ૫૪॥

રમ્ભોપમાં સ્વકાન્તાં ચ સમ્પ્રાપ્ય સુખમાપ્નુયાત્ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
સ્વાહોપાખ્યાનવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૩॥

# ૯.૪૪ ચતુશ્ચત્વારિંશોઽધ્યાયઃ । સ્વધોપાખ્યાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
શૃણુ નારદ વક્ષ્યામિ સ્વધોપાખ્યાનમુત્તમમ્ ।
પિતૄણાં ચ તૃપ્તિકરં શ્રાદ્ધાન્તફલવર્ધનમ્ ॥ ૧॥

સૃષ્ટેરાદૌ પિતૃગણાન્સસર્જ જગતાં વિધિઃ ।
ચતુરશ્ચ મૂર્તિમતસ્ત્રીંશ્ચ તેજઃસ્વરૂપિણઃ ॥ ૨॥

દૃષ્ટ્વા સપ્તપિતૃગણાન્ સુખરૂપાન્મનોહરાન્ ।
આહારં સસૃજે તેષાં શ્રાદ્ધં તર્પણપૂર્વકમ્ ॥ ૩॥

સ્નાનં તર્પણપર્યન્તં શ્રાદ્ધં તુ દેવપૂજનમ્ ।
આહ્નિકં ચ ત્રિસન્ધ્યાન્તં વિપ્રાણાં ચ શ્રુતૌ શ્રુતમ્ ॥ ૪॥

નિત્યં ન કુર્યાદ્યો વિપ્રસ્ત્રિસન્ધ્યં શ્રાદ્ધતર્પણમ્ ।
બલિં વેદધ્વનિં સોઽપિ વિષહીનો યથોરગઃ ॥ ૫॥

દેવીસેવાવિહીનશ્ચ શ્રીહરેરનિવેદ્યભુક્ ।
ભસ્માન્તં સૂતકં તસ્ય ન કર્માર્હશ્ચ નારદ ॥ ૬॥

બ્રહ્મા શ્રાદ્ધાદિકં સૃષ્ટ્વા જગામ પિતૃહેતવે ।
ન પ્રાપ્નુવન્તિ પિતરો દદતિ બ્રાહ્મણાદયઃ ॥ ૭॥

સર્વે ચ જગ્મુઃ ક્ષુધિતાઃ ખિન્નાસ્તુ બ્રહ્મણઃ સભામ્ ।
સર્વં નિવેદનં ચક્રુસ્તમેવ જગતાં વિધિમ્ ॥ ૮॥

બ્રહ્મા ચ માનસીં કન્યાં સસૃજે ચ મનોહરામ્ ।
રૂપયૌવનસમ્પન્નાં શતચન્દ્રનિભાનનામ્ ॥ ૯॥

વિદ્યાવતીં ગુણવતીમતિરૂપવતીં સતીમ્ ।
શ્વેતચમ્પકવર્ણાભાં રત્નભૂષણભૂષિતામ્ ॥ ૧૦॥

વિશુદ્ધાં પ્રકૃતેરંશાં સસ્મિતાં વરદાં શુભામ્ ।
સ્વધાભિધાં ચ સુદતીં લક્ષ્મીલક્ષણસંયુતામ્ ॥ ૧૧॥

શતપદ્મપદન્યસ્તપાદપદ્મં ચ બિભ્રતીમ્ ।
પત્નીં પિતૄણાં પદ્માસ્યાં પદ્મજાં પદ્મલોચનામ્ ॥ ૧૨॥

પિતૃભ્યશ્ચ દદૌ બ્રહ્મા તુષ્ટેભ્યસ્તુષ્ટિરૂપિણીમ્ ।
બ્રાહ્મણાનાં ચોપદેશં ચકાર ગોપનીયકમ્ ॥ ૧૩॥

સ્વધાન્તં મન્ત્રમુચ્ચાર્ય પિતૃભ્યો દેયમિત્યપિ ।
ક્રમેણ તેન વિપ્રાશ્ચ પિત્રે દાનં દદુઃ પુરા ॥ ૧૪॥

સ્વાહા શસ્તા દેવદાને પિતૃદાને સ્વધા સ્મૃતા ।
સર્વત્ર દક્ષિણા શસ્તા હતં યજ્ઞમદક્ષિણમ્ ॥ ૧૫॥

પિતરો દેવતા વિપ્રા મુનયો મનવસ્તથા ।
પૂજાં ચક્રુઃ સ્વધાં શાન્તાં તુષ્ટુવુઃ પરમાદરાત્ ॥ ૧૬॥

દેવાદયશ્ચ સન્તુષ્ટાઃ પરિપૂર્ણમનોરથાઃ ।
વિપ્રાદયશ્ચ પિતરઃ સ્વધાદેવીવરેણ ચ ॥ ૧૭॥

ઇત્યેવં કથિતં સર્વં સ્વધોપાખ્યાનમેવ ચ ।
સર્વેષાં ચ તુષ્ટિકરં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૮॥

નારદ ઉવાચ ।
સ્વધાપૂજાવિધાનં ચ ધ્યાનં સ્તોત્રં મહામુને ।
શ્રોતુમિચ્છામિ યત્નેન વદ વેદવિદાંવર ॥ ૧૯॥

શ્રીનારાયણ ઉવાચ ।
ધ્યાનં ચ સ્તવનં બ્રહ્મન્ વેદોક્તં સર્વમઙ્ગલમ્ ।
સર્વં જાનાસિ ચ કથં જ્ઞાતુમિચ્છસિ વૃદ્ધયે ॥ ૨૦॥

શરત્કૃષ્ણત્રયોદશ્યાં મઘાયાં શ્રાદ્ધવાસરે ।
સ્વધાં સમ્પૂજ્ય યત્નેન તતઃ શ્રાદ્ધં સમાચરેત્ ॥ ૨૧॥

સ્વધાં નાભ્યર્ચ્ય યો વિપ્રઃ શ્રાદ્ધં કુર્યાદહમ્મતિઃ ।
ન ભવેત્ફલભાક્સત્યં શ્રાદ્ધસ્ય તર્પણસ્ય ચ ॥ ૨૨॥

બ્રહ્મણો માનસીં કન્યાં શશ્વત્સુસ્થિરયૌવનામ્ ।
પૂજ્યાં વૈ પિતૃદેવાનાં શ્રાદ્ધાનાં ફલદાં ભજે ॥ ૨૩॥

ઇતિ ધ્યાત્વા શિલાયાં વા હ્યથવા મઙ્ગલે ઘટે ।
દદ્યાત્પાદ્યાદિકં તસ્યૈ મૂલેનેતિ શ્રુતૌ શ્રુતમ્ ॥ ૨૪॥

ૐ હ્રીં શ્રીં ક્લીં સ્વધાદેવ્યૈ સ્વાહેતિ ચ મહામુને ।
સમુચ્ચાર્ય તુ સમ્પૂજ્ય સ્તુત્વા તાં પ્રણમેદ્ દ્વિજઃ ॥ ૨૫॥

સ્તોત્રં શૃણુ મુનિશ્રેષ્ઠ બ્રહ્મપુત્ર વિશારદ ।

સર્વવાઞ્છાપ્રદં નૃણાં બ્રહ્મણા યત્કૃતં પુરા ॥ ૨૬॥

શ્રીનારાયણ ઉવાચ ।
સ્વધોચ્ચારણમાત્રેણ તીર્થસ્નાયી ભવેન્નરઃ ।
મુચ્યતે સર્વપાપેભ્યો વાજપેયફલં લભેત્ ॥ ૨૭॥

સ્વધા સ્વધા સ્વધેત્યેવં યદિ વારત્રયં સ્મરેત્ ।
શ્રાદ્ધસ્ય ફલમાપ્નોતિ બલેશ્ચ તર્પણસ્ય ચ ॥ ૨૮॥

શ્રાદ્ધકાલે સ્વધાસ્તોત્રં યઃ શ‍ૃણોતિ સમાહિતઃ ।
સ લભેચ્છ્રાદ્ધસમ્ભૂતં ફલમેવ ન સંશયઃ ॥ ૨૯॥

સ્વધા સ્વધા સ્વધેત્યેવં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
પ્રિયાં વિનીતાં સ લભેત્સાધ્વીં પુત્રગુણાન્વિતામ્ ॥ ૩૦॥

પિતૃણાં પ્રાણતુલ્યા ત્વં દ્વિજજીવનરૂપિણી ।
શ્રાદ્ધાધિષ્ઠાતૃદેવી ચ શ્રાદ્ધાદીનાં ફલપ્રદા ॥ ૩૧॥

નિત્યા ત્વં સત્યરૂપાસિ પુણ્યરૂપાસિ સુવ્રતે ।
આવિર્ભાવતિરોભાવૌ સૃષ્ટૌ ચ પ્રલયે તવ ॥ ૩૨॥

ૐ સ્વસ્તિશ્ચ નમઃ સ્વાહા સ્વધા ત્વં દક્ષિણા તથા ।
નિરૂપિતાશ્ચતુર્વેદૈઃ પ્રશસ્તાઃ કર્મિણાં પુનઃ ॥ ૩૩॥

કર્મપૂર્ત્યર્થમેવૈતા ઈશ્વરેણ વિનિર્મિતાઃ ।
ઇત્યેવમુક્ત્વા સ બ્રહ્મા બ્રહ્મલોકે સ્વસંસદિ ॥ ૩૪॥

તસ્થૌ ચ સહસા સદ્યઃ સ્વધા સાઽઽવિર્બભૂવ હ ।
તદા પિતૃભ્યઃ પ્રદદૌ તામેવ કમલાનનામ્ ॥ ૩૫॥

તાં સમ્પ્રાપ્ય યયુસ્તે ચ પિતરશ્ચ પ્રહર્ષિતાઃ ।
સ્વધાસ્તોત્રમિદં પુણ્યં યઃ શ‍ૃણોતિ સમાહિતઃ ।
સ સ્નાતઃ સર્વતીર્થેષુ વાઞ્છિતં ફલમાપ્નુયાત્ ॥ ૩૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
સ્વધોપાખ્યાનવર્ણનં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૪॥

## ૯.૪૫ પઞ્ચચત્વારિંશોઽધ્યાયઃ । દક્ષિણોપાખ્યાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
ઉક્તં સ્વાહાસ્વધાખ્યાનં પ્રશસ્તં મધુરં પરમ્ ।
વક્ષ્યામિ દક્ષિણાખ્યાનં સાવધાનો નિશામય ॥ ૧॥

ગોપી સુશીલા ગોલોકે પુરાઽઽસીત્પ્રેયસી હરેઃ ।
રાધા પ્રધાના સધ્રીચી ધન્યા માન્યા મનોહરા ॥ ૨॥

અતીવ સુન્દરી રામા સુભગા સુદતી સતી ।
વિદ્યાવતી ગુણવતી ચાતિરૂપવતી સતી ॥ ૩॥

કલાવતી કોમલાઙ્ગી કાન્તા કમલલોચના ।
સુશ્રોણી સુસ્તની શ્યામા ન્યગ્રોધપરિમણ્ડિતા ॥ ૪॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યા રત્નાલઙ્કારભૂષિતા ।
શ્વેતચમ્પકવર્ણાભા બિમ્બોષ્ઠી મૃગલોચના ॥ ૫॥

કામશાસ્ત્રેષુ નિપુણા કામિની હંસગામિની ।
ભાવાનુરક્તા ભાવજ્ઞા કૃષ્ણસ્ય પ્રિયભામિની ॥ ૬॥

રસજ્ઞા રસિકા રાસે રાસેશસ્ય રસોત્સુકા ।
ઉવાસાદક્ષિણે ક્રોડે રાધાયાઃ પુરતઃ પુરા ॥ ૭॥

સમ્બભૂવાનમ્રમુખો ભયેન મધુસૂદનઃ ।
દૃષ્ટ્વા રાધાં ચ પુરતો ગોપીનાં પ્રવરોત્તમામ્ ॥ ૮॥

કામિનીં રક્તવદનાં રક્તપઙ્કજલોચનામ્ ।
કોપેન કમ્પિતાઙ્ગીં ચ કોપેન સ્ફુરિતાધરામ્ ॥ ૯॥

વેગેન તાં તુ ગચ્છન્તીં વિજ્ઞાય તદનન્તરમ્ ।
વિરોધભીતો ભગવાનન્તર્ધાનં ચકાર સઃ ॥ ૧૦॥

પલાયન્તં ચ કાન્તં ચ શાન્તં સત્ત્વં સુવિગ્રહમ્ ।
વિલોક્ય કમ્પિતા ગોપ્યઃ સુશીલાદ્યાસ્તતો ભિયા ॥ ૧૧॥

વિલોક્ય લમ્પટં તત્ર ગોપીનાં લક્ષકોટયઃ ।
પુટાઞ્જલિયુતા ભીતા ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૧૨॥

રક્ષ રક્ષેત્યુક્તવન્ત્યો દેવીમિતિ પુનઃ પુનઃ ।
યયુર્ભયેન શરણં યસ્યાશ્ચરણપઙ્કજે ॥ ૧૩॥

ત્રિલક્ષકોટયો ગોપાઃ સુદામાદય એવ ચ ।
યયુર્ભયેન શરણં તત્પાદાબ્જે ચ નારદ ॥ ૧૪॥

પલાયન્તં ચ કાન્તં ચ વિજ્ઞાય પરમેશ્વરી ।
પલાયન્તીં સહચરીં સુશીલાં ચ શશાપ સા ॥ ૧૫॥

અદ્યપ્રભૃતિ ગોલોકં સા ચેદાયાતિ ગોપિકા ।
સદ્યો ગમનમાત્રેણ ભસ્મસાચ્ચ ભવિષ્યતિ ॥ ૧૬॥

ઇત્યેવમુક્ત્વા તત્રૈવ દેવદેવેશ્વરી રુષા ।
રાસેશ્વરી રાસમધ્યે રાસેશમાજુહાવ હ ॥ ૧૭॥

નાલોક્ય પુરતઃ કૃષ્ણં રાધા વિરહકાતરા ।
યુગકોટિસમં મેને ક્ષણભેદેન સુવ્રતા ॥ ૧૮॥

હે કૃષ્ણ પ્રાણનાથેશાગચ્છ પ્રાણાધિકપ્રિય ।
પ્રાણાધિષ્ઠાતૃદેવેશ પ્રાણા યાન્તિ ત્વયા વિના ॥ ૧૯॥

સ્ત્રીગર્વઃ પતિસૌભાગ્યાદ્વર્ધતે ચ દિને દિને ।
સુખં ચ વિપુલં યસ્માત્તં સેવેદ્ધર્મતઃ સદા ॥ ૨૦॥

પતિર્બન્ધુઃ કુલસ્ત્રીણામધિદેવઃ સદાગતિઃ ।
પરસમ્પત્સ્વરૂપશ્ચ મૂર્તિમાન્ ભોગદઃ સદા ॥ ૨૧॥

ધર્મદઃ સુખદઃ શશ્વત્પ્રીતિદઃ શાન્તિદઃ સદા ।
સમ્માનૈર્દીપ્યમાનશ્ચ માનદો માનખણ્ડનઃ ॥ ૨૨॥

સારાત્સારતરઃ સ્વામી બન્ધૂનાં બન્ધુવર્ધનઃ ।
ન ચ ભર્તુઃ સમો બન્ધુર્બન્ધોર્બન્ધુષુ દૃશ્યતે ॥ ૨૩॥

ભરણાદેવ ભર્તા ચ પાલનાત્પતિરુચ્યતે ।
શરીરેશાચ્ચ સ સ્વામી કામદઃ કાન્ત ઉચ્યતે ॥ ૨૪॥

બન્ધુશ્ચ સુખવૃદ્ધ્યા ચ પ્રીતિદાનાત્પ્રિયઃ સ્મૃતઃ ।
ઐશ્વર્યદાનાદીશશ્ચ પ્રાણેશાત્પ્રાણનાયકઃ ॥ ૨૫॥

રતિદાનાચ્ચ રમણઃ પ્રિયો નાસ્તિ પ્રિયાત્પરઃ ।
પુત્રસ્તુ સ્વામિનઃ શુક્રાજ્જાયતે તેન સ પ્રિયઃ ॥ ૨૬॥

શતપુત્રાત્પરઃ સ્વામી કુલજાનાં પ્રિયઃ સદા ।

અસત્કુલપ્રસૂતા યા કાન્તં વિજ્ઞાતુમક્ષમા ॥ ૨૭॥

સ્નાનં ચ સર્વતીર્થેષુ સર્વયજ્ઞેષુ દક્ષિણા ।
પ્રાદક્ષિણ્યં પૃથિવ્યાશ્ચ સર્વાણિ ચ તપાંસિ ચ ॥ ૨૮॥

સર્વાણ્યેવ વ્રતાદીનિ મહાદાનાનિ યાનિ ચ ।
ઉપોષણાનિ પુણ્યાનિ યાનિ યાનિ શ્રુતાનિ ચ ॥ ૨૯॥

ગુરુસેવા વિપ્રસેવા દેવસેવાદિકં ચ યત્ ।
સ્વામિનઃ પાદસેવાયાઃ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૩૦॥

ગુરુવિપ્રેન્દ્રદેવેષુ સર્વેભ્યશ્ચ પતિર્ગુરુઃ ।
વિદ્યાદાતા યથા પુંસાં કુલજાનાં તથા પ્રિયઃ ॥ ૩૧॥

ગોપીનાં લક્ષકોટીનાં ગોપાનાં ચ તથૈવ ચ ।
બ્રહ્માણ્ડાનામસઙ્ખ્યાનાં તત્રસ્થાનાં તથૈવ ચ ॥ ૩૨॥

વિશ્વાદિગોલકાન્તાનામીશ્વરી યત્પ્રસાદતઃ ।
અહં ન જાને તં કાન્તં સ્ત્રીસ્વભાવો દુરત્યયઃ ॥ ૩૩॥

ઇત્યુક્ત્વા રાધિકા કૃષ્ણં તત્ર દધ્યૌ સ્વભક્તિતઃ ।
રુરોદ પ્રેમ્ણા સા રાધા નાથ નાથેતિ ચાબ્રવીત્ ॥ ૩૪॥

દર્શનં દેહિ રમણ દીના વિરહદુઃખિતા ।
અથ સા દક્ષિણા દેવી ધ્વસ્તા ગોલોકતો મુને ॥ ૩૫॥

સુચિરં ચ તપસ્તપ્ત્વા વિવેશ કમલાતનૌ ।
અથ દેવાદયઃ સર્વે યજ્ઞં કૃત્વા સુદુષ્કરમ્ ॥ ૩૬॥

નાલભંસ્તે ફલં તેષાં વિષણ્ણાઃ પ્રયયુર્વિધિમ્ ।
વિધિર્નિવેદનં શ્રુત્વા દેવાદીનાં જગત્પતિમ્ ॥ ૩૭॥

દધ્યૌ ચ સુચિરં ભક્ત્યા પ્રત્યાદેશમવાપ સઃ ।
નારાયણશ્ચ ભગવાન્ મહાલક્ષ્યાશ્ચ દેહતઃ ॥ ૩૮॥

વિનિષ્કૃષ્ય મર્ત્યલક્ષ્મીં બ્રહ્મણે દક્ષિણાં દદૌ ।
બ્રહ્મા દદૌ તાં યજ્ઞાય પૂરણાર્થં ચ કર્મણામ્ ॥ ૩૯॥

યજ્ઞઃ સમ્પૂજ્ય વિધિવત્તાં તુષ્ટાવ તદા મુદા ।
તપ્તકાઞ્ચનવર્ણાભાં ચન્દ્રકોટિસમપ્રભામ્ ॥ ૪૦॥

અતીવ કમનીયાં ચ સુન્દરીં સુમનોહરામ્ ।
કમલાસ્યાં કોમલાઙ્ગીં કમલાયતલોચનામ્ ॥ ૪૧॥

કમલાસનપૂજ્યાં ચ કમલાઙ્ગસમુદ્ભવામ્ ।
વહ્નિશુદ્ધાંશુકાધાનાં બિમ્બોષ્ઠીં સુદતીં સતીમ્ ॥ ૪૨॥

બિભ્રતીં કબરીભારં માલતીમાલ્યસંયુતમ્ ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યાં રત્નભૂષણભૂષિતામ્ ॥ ૪૩॥

સુવેષાઢ્યાં ચ સુસ્નાતાં મુનિમાનસમોહિનીમ્ ।
કસ્તૂરીબિન્દુભિઃ સાર્ધં સુગન્ધિચન્દનેન્દુભિઃ ॥ ૪૪॥

સિન્દૂરબિન્દુનાલ્પેનાપ્યલકાધઃસ્થલોજ્જ્વલામ્ ।
સુપ્રશસ્તનિતમ્બાઢ્યાં બૃહચ્છ્રોણિપયોધરામ્ ॥ ૪૫॥

કામદેવાધારરૂપાં કામબાણપ્રપીડિતામ્ ।
તાં દૃષ્ટ્વા રમણીયાં ચ યજ્ઞો મૂર્ચ્છામવાપ હ ॥ ૪૬॥

પત્નીં તામેવ જગ્રાહ વિધિબોધિતપૂર્વકમ્ ।
દિવ્યં વર્ષશતં ચૈવ તાં ગૃહીત્વા તુ નિર્જને ॥ ૪૭॥

યજ્ઞો રેમે મુદા યુક્તો રામેશો રમયા સહ ।
ગર્ભં દધાર સા દેવી દિવ્યં દ્વાદશવર્ષકમ્ ॥ ૪૮॥

તતઃ સુષાવ પુત્રં ચ ફલં વૈ સર્વકર્મણામ્ ।
પરિપૂર્ણે કર્મણિ ચ તત્પુત્રઃ ફલદાયકઃ ॥ ૪૯॥

યજ્ઞો દક્ષિણયા સાર્ધં પુત્રેણ ચ ફલેન ચ ।
કર્મિણાં ફલદાતા ચેત્યેવં વેદવિદો વિદુઃ ॥ ૫૦॥

યજ્ઞશ્ચ દક્ષિણાં પ્રાપ્ય પુત્રં ચ ફલદાયકમ્ ।
ફલં દદૌ ચ સર્વેભ્યઃ કર્મણાં ચૈવ નારદ ॥ ૫૧॥

તદા દેવાદયસ્તુષ્ટાઃ પરિપૂર્ણમનોરથાઃ ।
સ્વસ્થાને તે યયુઃ સર્વે ધર્મવક્ત્રાદિદં શ્રુતમ્ ॥ ૫૨॥

કૃત્વા કર્મ ચ કર્તા ચ તૂર્ણં દદ્યાચ્ચ દક્ષિણામ્ ।
તત્ક્ષણં ફલમાપ્નોતિ વેદૈરુક્તમિદં મુને ॥ ૫૩॥

કર્મી કર્મણિ પૂર્ણે ચ તત્ક્ષણે યદિ દક્ષિણામ્ ।
ન દદ્યાદ્ બ્રાહ્મણેભ્યશ્ચ દૈવેનાજ્ઞાનતોઽથવા ॥ ૫૪॥

મુહૂર્તે સમતીતે તુ દ્વિગુણા સા ભવેદ્ ધ્રુવમ્ ।
એકરાત્રે વ્યતીતે તુ ભવેચ્છતગુણા ચ સા ॥ ૫૫॥

ત્રિરાત્રે તચ્છતગુણા સપ્તાહે દ્વિગુણા તતઃ ।
માસે લક્ષગુણા પ્રોક્તા બ્રાહ્મણાનાં ચ વર્ધતે ॥ ૫૬॥

સંવત્સરે વ્યતીતે તુ સા ત્રિકોટિગુણા ભવેત્ ।
કર્મ તદ્યજમાનાનાં સર્વં વૈ નિષ્ફલં ભવેત્ ॥ ૫૭॥

સ ચ બ્રહ્મસ્વહારી ચ ન કર્માર્હોઽશુચિર્નરઃ ।
દરિદ્રો વ્યાધિયુક્તશ્ચ તેન પાપેન પાતકી ॥ ૫૮॥

તદ્ગૃહાદ્યાતિ લક્ષ્મીશ્ચ શાપં દત્ત્વા સુદારુણમ્ ।
પિતરો નૈવ ગૃહ્ણન્તિ તદ્દત્તં શ્રાદ્ધતર્પણમ્ ॥ ૫૯॥

એવં સુરાશ્ચ તત્પૂજાં તદ્દત્તામગ્નિરાહુતિમ્ ।
દત્તં ન દીયતે દાનં ગ્રહીતા નૈવ યાચતે ॥ ૬૦॥

ઉભૌ તૌ નરકે યાતશ્છિન્નરજ્જૌ યથા ઘટઃ ।
નાર્પયેદ્યજમાનશ્ચેદ્યાચિતશ્ચાપિ દક્ષિણામ્ ॥ ૬૧॥

ભવેદ્બ્રહ્મસ્વાપહારી કુમ્ભીપાકં વ્રજેદ્ ધ્રુવમ્ ।
વર્ષલક્ષં વસેત્તત્ર યમદૂતેન તાડિતઃ ॥ ૬૨॥

તતો ભવેત્સ ચાણ્ડાલો વ્યાધિયુક્તો દરિદ્રકઃ ।
પાતયેત્પુરુષાન્સપ્ત પૂર્વાંશ્ચ સપ્ત જન્મતઃ ॥ ૬૩॥

ઇત્યેવં કથિતં વિપ્ર કિં ભૂયઃ શ્રોતુમિચ્છસિ ।
નારદ ઉવાચ ।
યત્કર્મ દક્ષિણાહીનં કો ભુઙ્ક્તે તત્ફલં મુને ॥ ૬૪॥

પૂજાવિધિં દક્ષિણાયાઃ પુરા યજ્ઞકૃતં વદ ।
શ્રીનારાયણ ઉવાચ ।
કર્મણોઽદક્ષિણસ્યૈવ કુત એવ ફલં મુને ॥ ૬૫॥

સદક્ષિણે કર્મણિ ચ ફલમેવ પ્રવર્તતે ।
અદક્ષિણં ચ યત્કર્મ તદ્ભુઙ્ક્તે ચ બલિર્મુને ॥ ૬૬॥

બલયે તત્પ્રદત્તં ચ વામનેન પુરા મુને ।

અશ્રોત્રિયઃ શ્રાદ્ધદ્રવ્યમશ્રદ્ધાદાનમેવ ચ ॥ ૬૭॥

વૃષલીપતિવિપ્રાણાં પૂજાદ્રવ્યાદિકં ચ યત્ ।
અસદ્દ્વિજૈઃ કૃતં યજ્ઞમશુચેઃ પૂજનં ચ યત્ ॥ ૬૮॥

ગુરાવભક્તસ્ય કર્મ બલિર્ભુઙ્ક્તે ન સંશયઃ ।
દક્ષિણાયાશ્ચ યદ્ધ્યાનં સ્તોત્રં પૂજાવિધિક્રમમ્ ॥ ૬૯॥

તત્સર્વં કણ્વશાખોક્તં પ્રવક્ષ્યામિ નિશામય ।
પુરા સમ્પ્રાપ્ય તાં યજ્ઞઃ કર્મદક્ષાં ચ દક્ષિણામ્ ॥ ૭૦॥

મુમોહાસ્યાઃ સ્વરૂપેણ તુષ્ટાવ કામકાતરઃ ।
યજ્ઞ ઉવાચ ।
પુરા ગોલોકગોપી ત્વં ગોપીનાં પ્રવરા વરા ॥ ૭૧॥

રાધાસમા તત્સખી ચ શ્રીકૃષ્ણપ્રેયસી પ્રિયા ।
કાર્તિકીપૂર્ણિમાયાં તુ રાસે રાધામહોત્સવે ॥ ૭૨॥

આવિર્ભૂતા દક્ષિણાંસાલ્લક્ષ્મ્યાશ્ચ તેન દક્ષિણા ।
પુરા ત્વં ચ સુશીલાખ્યા ખ્યાતા શીલેન શોભને ॥ ૭૩॥

લક્ષ્મીદક્ષાંસભાગાત્ત્વં રાધાશાપાચ્ચ દક્ષિણા ।
ગોલોકાત્ત્વં પરિભ્રષ્ટા મમ ભાગ્યાદુપસ્થિતા ॥ ૭૪॥

કૃપાં કુરુ મહાભાગે મામેવ સ્વામિનં કુરુ ।
કર્મિણાં કર્મણાં દેવી ત્વમેવ ફલદા સદા ॥ ૭૫॥

ત્વયા વિના ચ સર્વેષાં સર્વં કર્મ ચ નિષ્ફલમ્ ।
ત્વયા વિના તથા કર્મ કર્મિણાં ચ ન શોભતે ॥ ૭૬॥

બ્રહ્મવિષ્ણુમહેશાશ્ચ દિક્પાલાદય એવ ચ ।
કર્મણશ્ચ ફલં દાતું ન શક્તાશ્ચ ત્વયા વિના ॥ ૭૭॥

કર્મરૂપી સ્વયં બ્રહ્મા ફલરૂપી મહેશ્વરઃ ।
યજ્ઞરૂપી વિષ્ણુરહં ત્વમેષાં સારરૂપિણી ॥ ૭૮॥

ફલદાતૃપરં બ્રહ્મ નિર્ગુણા પ્રકૃતિઃ પરા ।
સ્વયં કૃષ્ણશ્ચ ભગવાન્ સ ચ શક્તસ્ત્વયા સહ ॥ ૭૯॥

ત્વમેવ શક્તિઃ કાન્તે મે શશ્વજ્જન્મનિ જન્મનિ ।
સર્વકર્મણિ શક્તોઽહં ત્વયા સહ વરાનને ॥ ૮૦॥

ઇત્યુક્ત્વા ચ પુરસ્તસ્થૌ યજ્ઞાધિષ્ઠાતૃદેવતા ।
તુષ્ટા બભૂવ સા દેવી ભેજે તં કમલાકલા ॥ ૮૧॥

ઇદં ચ દક્ષિણાસ્તોત્રં યજ્ઞકાલે ચ યઃ પઠેત્ ।
ફલં ચ સર્વયજ્ઞાનાં પ્રાપ્નોતિ નાત્ર સંશયઃ ॥ ૮૨॥

રાજસૂયે વાજપેયે ગોમેધે નરમેધકે ।
અશ્વમેધે લાઙ્ગલે ચ વિષ્ણુયજ્ઞે યશસ્કરે ॥ ૮૩॥

ધનદે ભૂમિદે પૂર્તે ફલદે ગજમેધકે ।
લોહયજ્ઞે સ્વર્ણયજ્ઞે રત્નયજ્ઞેઽથ તામ્રકે ॥ ૮૪॥

શિવયજ્ઞે રુદ્રયજ્ઞે શક્રયજ્ઞે ચ બન્ધુકે ।
વૃષ્ટૌ વરુણયાગે ચ કણ્ડકે વૈરિમર્દને ॥ ૮૫॥

શુચિયજ્ઞે ધર્મયજ્ઞેઽધ્વરે ચ પાપમોચને ।
બ્રહ્માણીકર્મયાગે ચ યોનિયાગે ચ ભદ્રકે ॥ ૮૬॥

એતેષાં ચ સમારમ્ભે ઇદં સ્તોત્રં ચ યઃ પઠેત્ ।
નિર્વિઘ્નેન ચ તત્કર્મ સર્વં ભવતિ નિશ્ચિતમ્ ॥ ૮૭॥

ઇદં સ્તોત્રં ચ કથિતં ધ્યાનં પૂજાવિધિં શ‍ૃણુ ।
શાલગ્રામે ઘટે વાપિ દક્ષિણાં પૂજયેત્સુધીઃ ॥ ૮૮॥

લક્ષ્મીદક્ષાંસસમ્ભૂતાં દક્ષિણાં કમલાકલામ્ ।
સર્વકર્મસુદક્ષાં ચ ફલદાં સર્વકર્મણામ્ ॥ ૮૯॥

વિષ્ણોઃ શક્તિસ્વરૂપાં ચ પૂજિતાં વન્દિતાં શુભામ્ ।
શુદ્ધિદાં શુદ્ધિરૂપાં ચ સુશીલાં શુભદાં ભજે ॥ ૯૦॥

ધ્યાત્વાનેનૈવ વરદાં મૂલેન પૂજયેત્સુધીઃ ।
દત્ત્વા પાદ્યાદિકં દેવ્યૈ વેદોક્તેનૈવ નારદ ॥ ૯૧॥

ૐ શ્રીં ક્લીં હ્રીં દક્ષિણાયૈ સ્વાહેતિ ચ વિચક્ષણઃ ।
પૂજયેદ્વિધિવદ્ ભક્ત્યા દક્ષિણાં સર્વપૂજિતામ્ ॥ ૯૨॥

ઇત્યેવં કથિતં બ્રહ્મન્ દક્ષિણાખ્યાનમેવ ચ ।
સુખદં પ્રીતિદં ચૈવ ફલદં સર્વકર્મણામ્ ॥ ૯૩॥

ઇદં ચ દક્ષિણાખ્યાનં યઃ શ‍ૃણોતિ સમાહિતઃ ।

અઙ્ગહીનં ચ તત્કર્મ ન ભવેદ્ભારતે ભુવિ ॥ ૯૪॥

અપુત્રો લભતે પુત્રં નિશ્ચિતં ચ ગુણાન્વિતમ્ ।
ભાર્યાહીનો લભેદ્ભાર્યાં સુશીલાં સુન્દરીં પરામ્ ॥ ૯૫॥

વરારોહાં પુત્રવતીં વિનીતાં પ્રિયવાદિનીમ્ ।
પતિવ્રતાં ચ શુદ્ધાં ચ કુલજાં ચ વધૂં વરામ્ ॥ ૯૬॥

વિદ્યાહીનો લભેદ્વિદ્યાં ધનહીનો લભેદ્ધનમ્ ।
ભૂમિહીનો લભેદ્ભૂમિં પ્રજાહીનો લભેત્પ્રજામ્ ॥ ૯૭॥

સઙ્કટે બન્ધુવિચ્છેદે વિપત્તૌ બન્ધને તથા ।
માસમેકમિદં શ્રુત્વા મુચ્યતે નાત્ર સંશયઃ ॥ ૯૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
દક્ષિણોપાખ્યાનવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૫॥

## ૯.૪૬ ષટ્ચત્વારિંશોઽધ્યાયઃ । ષષ્ઠ્યુપાખ્યાનવર્ણનમ્ ।

નારદ ઉવાચ ।
અનેકાનાં ચ દેવીનાં શ્રુતમાખ્યાનમુત્તમમ્ ।
અન્યાસાં ચરિતં બ્રહ્મન્ વદ વેદવિદાંવર ॥ ૧॥

શ્રીનારાયણ ઉવાચ ।
સર્વાસાં ચરિતં વિપ્ર વેદેષુ ચ પૃથક્પૃથક્ ।
પૂર્વોક્તાનાં ચ દેવીનાં કાસાં શ્રોતુમિહેચ્છસિ ॥ ૨॥

નારદ ઉવાચ ।
ષષ્ઠી મઙ્ગલચણ્ડી ચ મનસા પ્રકૃતેઃ કલા ।
ઉત્પત્તિમાસાં ચરિતં શ્રોતુમિચ્છામિ તત્ત્વતઃ ॥ ૩॥

શ્રીનારાયણ ઉવાચ ।
ષષ્ઠાંશા પ્રકૃતેર્યા ચ સા ચ ષષ્ઠી પ્રકીર્તિતા ।
બાલકાનામધિષ્ઠાત્રી વિષ્ણુમાયા ચ બાલદા ॥ ૪॥

માતૃકાસુ ચ વિખ્યાતા દેવસેનાભિધા ચ યા ।
પ્રાણાધિકપ્રિયા સાધ્વી સ્કન્દભાર્યા ચ સુવ્રતા ॥ ૫॥

આયુઃપ્રદા ચ બાલાનાં ધાત્રી રક્ષણકારિણી ।
સતતં શિશુપાર્શ્વસ્થા યોગેન સિદ્ધિયોગિની ॥ ૬॥

તસ્યાઃ પૂજાવિધિં બ્રહ્મનિતિહાસમિદં શ‍ૃણુ ।
યચ્છ્રુતં ધર્મવક્ત્રેણ સુખદં પુત્રદં પરમ્ ॥ ૭॥

રાજા પ્રિયવ્રતશ્ચાસીત્સ્વાયમ્ભુવમનોઃ સુતઃ ।
યોગીન્દ્રો નોદ્વહદ્ભાર્યાં તપસ્યાસુ રતઃ સદા ॥ ૮॥

બ્રહ્માજ્ઞયા ચ યત્નેન કૃતદારો બભૂવ હ ।
સુચિરં કૃતદારશ્ચ ન લેભે તનયં મુને ॥ ૯॥

પુત્રેષ્ટિયજ્ઞં તં ચાપિ કારયામાસ કશ્યપઃ ।
માલિન્યં તસ્ય કાન્તાયૈ મુનિર્યજ્ઞચરું દદૌ ॥ ૧૦॥

ભુક્ત્વા ચ તં ચરું તસ્યાઃ સદ્યો ગર્ભો બભૂવ હ ।
દધાર તં ચ સા દેવી દૈવં દ્વાદશવત્સરમ્ ॥ ૧૧॥

તતઃ સુષાવ સા બ્રહ્મન્ કુમારં કનકપ્રભમ્ ।
સર્વાવયવસમ્પન્નં મૃતમુત્તારલોચનમ્ ॥ ૧૨॥

તં દૃષ્ટ્વા રુરુદુઃ સર્વા નાર્યશ્ચ બાન્ધવસ્ત્રિયઃ ।
મૂર્ચ્છામવાપ તન્માતા પુત્રશોકેન ભૂયસા ॥ ૧૩॥

શ્મશાનં ચ યયૌ રાજા ગહીત્વા બાલકં મુને ।
રુરોદ તત્ર કાન્તારે પુત્રં કૃત્વા સ્વવક્ષસિ ॥ ૧૪॥

નોત્સૃજદ્ બાલકં રાજા પ્રાણાંસ્ત્યક્તું સમુદ્યતઃ ।
જ્ઞાનયોગં વિસસ્માર પુત્રશોકાત્સુદારુણાત્ ॥ ૧૫॥

એતસ્મિન્નન્તરે તત્ર વિમાનં ચ દદર્શ સઃ ।
શુદ્ધસ્ફટિકસઙ્કાશં મણિરાજવિનિર્મિતમ્ ॥ ૧૬॥

તેજસા જ્વલિતં શશ્વચ્છોભિતં ક્ષૌમવાસસા ।
નાનાચિત્રવિચિત્રાઢ્યં પુષ્પમાલાવિરાજિતમ્ ॥ ૧૭॥

દદર્શ તત્ર દેવીં ચ કમનીયાં મનોહરામ્ ।
શ્વેતચમ્પકવર્ણાભાં શશ્વત્સુસ્થિરયૌવનામ્ ॥ ૧૮॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યાં રત્નભૂષણભૂષિતામ્ ।
કૃપામયીં યોગસિદ્ધાં ભક્તાનુગ્રહકાતરામ્ ॥ ૧૯॥

દૃષ્ટ્વા તાં પુરતો રાજા તુષ્ટાવ પરમાદરાત્ ।
ચકાર પૂજનં તસ્યા વિહાય બાલકં ભુવિ ॥ ૨૦॥

પપ્રચ્છ રાજા તાં તુષ્ટાં ગ્રીષ્મસૂર્યસમપ્રભામ્ ।
તેજસા જ્વલિતાં શાન્તાં કાન્તાં સ્કન્દસ્ય નારદ ॥ ૨૧॥

રાજોવાચ ।
કા ત્વં સુશોભને કાન્તે કસ્ય કાન્તાસિ સુવ્રતે ।
કસ્ય કન્યા વરારોહે ધન્યા માન્યા ચ યોષિતામ્ ॥ ૨૨॥

નૃપેન્દ્રસ્ય વચઃ શ્રુત્વા જગન્મઙ્ગલચણ્ડિકા ।
ઉવાચ દેવસેના સા દેવાનાં રણકારિણી ॥ ૨૩॥

દેવાનાં દૈત્યગ્રસ્તાનાં પુરા સેના બભૂવ સા ।
જયં દદૌ સા તેભ્યશ્ચ દેવસેના ચ તેન સા ॥ ૨૪॥

શ્રીદેવસેનોવાચ ।
બ્રહ્મણો માનસી કન્યા દેવસેનાહમીશ્વરી ।
સૃષ્ટ્વા તાં મનસા ધાતા દદૌ સ્કન્દાય ભૂમિપ ॥ ૨૫॥

માતૃકાસુ ચ વિખ્યાતા સ્કન્દભાર્યા ચ સુવ્રતા ।
વિશ્વે ષષ્ઠીતિ વિખ્યાતા ષષ્ઠાંશા પ્રકૃતેઃ પરા ॥ ૨૬॥

અપુત્રાય પુત્રદાહં પ્રિયાદાત્રી પ્રિયાય ચ ।
ધનદાહં દરિદ્રેભ્યઃ કર્મિભ્યશ્ચ સ્વકર્મદા ॥ ૨૭॥

સુખં દુઃખં ભયં શોકો હર્ષો મઙ્ગલમેવ ચ ।
સમ્પત્તિશ્ચ વિપત્તિશ્ચ સર્વં ભવતિ કર્મણા ॥ ૨૮॥

કર્મણા બહુપુત્રશ્ચ વંશહીનઃ સ્વકર્મણા ।
કર્મણા મૃતપુત્રશ્ચ કર્મણા ચિરજીવનઃ ॥ ૨૯॥

કર્મણા ગુણવાંશ્ચૈવ કર્મણા ચાઙ્ગહીનકઃ ।
કર્મણા બહુભાર્યશ્ચ ભાર્યાહીનશ્ચ કર્મણા ॥ ૩૦॥

કર્મણા રૂપવાન્ધર્મી રોગી શશ્વત્સ્વકર્મણા ।
કર્મણા ચ ભવેદ્વ્યાધિઃ કર્મણાઽઽરોગ્યમેવ ચ ॥ ૩૧॥

તસ્માત્કર્મ પરં રાજન્ સર્વેભ્યશ્ચ શ્રુતૌ શ્રુતમ્ ।

ઇત્યેવમુક્ત્વા સા દેવી ગૃહીત્વા બાલકં મુને ॥ ૩૨॥

મહાજ્ઞાનેન સા દેવી જીવયામાસ લીલયા ।
રાજા દદર્શ તં બાલં સસ્મિતં કનકપ્રભમ્ ॥ ૩૩॥

દેવસેના ચ પશ્યન્તં નૃપમાપૃચ્છ્ય સા તદા ।
ગૃહીત્વા બાલકં દેવી ગગનં ગન્તુમુદ્યતા ॥ ૩૪॥

પુનસ્તુષ્ટાવ તાં રાજા શુષ્કકણ્ઠોષ્ઠતાલુકઃ ।
નૃપસ્તોત્રેણ સા દેવી પરિતુષ્ટા બભૂવ હ ॥ ૩૫॥

ઉવાચ તં નૃપં બ્રહ્મન્ વેદોક્તં કર્મનિર્મિતમ્ ।
દેવ્યુવાચ ।
ત્રિષુ લોકેષુ ત્વં રાજા સ્વાયમ્ભુવમનોઃ સુતઃ ॥ ૩૬॥

મમ પૂજાં ચ સર્વત્ર કારયિત્વા સ્વયં કુરુ ।
તદા દાસ્યામિ પુત્રં તે કુલપદ્મં મનોહરમ્ ॥ ૩૭॥

સુવ્રતં નામ વિખ્યાતં ગુણવન્તં સુપણ્ડિતમ્ ।
જાતિસ્મરં ચ યોગીન્દ્રં નારાયણકલાત્મકમ્ ॥ ૩૮॥

શતક્રતુકરં શ્રેષ્ઠં ક્ષત્રિયાણાં ચ વન્દિતમ્ ।
મત્તમાતઙ્ગલક્ષાણાં ધૃતવન્તં બલં શુભમ્ ॥ ૩૯॥

ધનિનં ગુણિનં શુદ્ધં વિદુષાં પ્રિયમેવ ચ ।
યોગિનાં જ્ઞાનિનાં ચૈવ સિદ્ધિરૂપં તપસ્વિનામ્ ॥ ૪૦॥

યશસ્વિનં ચ લોકેષુ દાતારં સર્વસમ્પદામ્ ।
ઇત્યેવમુક્ત્વા સા દેવી તસ્મૈ તદ્બાલકં દદૌ ॥ ૪૧॥

રાજા ચકાર સ્વીકારં પૂજાર્થં ચ પ્રિયવ્રતઃ ।
જગામ દેવી સ્વર્ગં ચ દત્ત્વા તસ્મૈ શુભં વરમ્ ॥ ૪૨॥

આજગામ સહામાત્યઃ સ્વગૃહં હૃષ્ટમાનસઃ ।
આગત્ય કથયામાસ વૃત્તાન્તં પુત્રહેતુકમ્ ॥ ૪૩॥

શ્રુત્વા બભૂવુઃ સન્તુષ્ટા નરા નાર્યશ્ચ નારદ ।
મઙ્ગલં કારયામાસ સર્વત્ર પુત્રહેતુકમ્ ॥ ૪૪॥

દેવીં ચ પૂજયામાસ બ્રાહ્મણેભ્યો ધનં દદૌ ।
રાજા ચ પ્રતિમાસેષુ શુક્લષષ્ઠ્યાં મહોત્સવમ્ ॥ ૪૫॥

ષષ્ઠ્યા દેવ્યાશ્ચ યત્નેન કારયામાસ સર્વતઃ ।
બાલાનાં સૂતિકાગારે ષષ્ઠાહે યત્નપૂર્વકમ્ ॥ ૪૬॥

તત્પૂજાં કારયામાસ ચૈકવિંશતિવાસરે ।
બાલાનાં શુભકાર્યે ચ શુભાન્નપ્રાશને તથા ॥ ૪૭॥

સર્વત્ર વર્ધયામાસ સ્વયમેવ ચકાર હ ।
ધ્યાનં પૂજાવિધાનં ચ સ્તોત્રં મત્તો નિશામય ॥ ૪૮॥

યચ્છ્રુતં ધર્મવક્ત્રેણ કૌથુમોક્તં ચ સુવ્રત ।
શાલગ્રામે ઘટે વાથ વટમૂલેઽથવા મુને ॥ ૪૯॥

ભિત્ત્યાં પુત્તલિકાં કૃત્વા પૂજયેદ્વા વિચક્ષણઃ ।
ષષ્ઠાંશાં પ્રકૃતેઃ શુદ્ધાં પ્રતિષ્ઠાપ્ય ચ સુપ્રભામ્ ॥ ૫૦॥

સુપુત્રદાં ચ શુભદા દયારૂપાં જગત્પ્રસૂમ્ ।
શ્વેતચમ્પકવર્ણાભાં રત્નભૂષણભૂષિતામ્ ॥ ૫૧॥

પવિત્રરૂપાં પરમાં દેવસેનાં પરાં ભજે ।
ઇતિ ધ્યાત્વા સ્વશિરસિ પુષ્પં દત્ત્વા વિચક્ષણઃ ॥ ૫૨॥

પુનર્ધ્યાત્વા ચ મૂલેન પૂજયેત્સુવ્રતાં સતીમ્ ।
પાદ્યાર્ઘ્યાચમનીયૈશ્ચ ગન્ધપુષ્પપ્રદીપકૈઃ ॥ ૫૩॥

નૈવેદ્યૈર્વિવિધૈશ્ચાપિ ફલેન શોભનેન ચ ।
ૐ હ્રીં ષષ્ઠીદેવ્યૈ સ્વાહેતિ વિધિપૂર્વકમ્ ॥ ૫૪॥

અષ્ટાક્ષરં મહામન્ત્રં યથાશક્તિ જપેન્નરઃ ।
તતઃ સ્તુત્વા ચ પ્રણમેદ્ભક્તિયુક્તઃ સમાહિતઃ ॥ ૫૫॥

સ્તોત્રં ચ સામવેદોક્તં વરં પુત્રફલપ્રદમ્ ।
અષ્ટાક્ષરં મહામન્ત્રં લક્ષધા યો જપેત્તતઃ ॥ ૫૬॥

સુપુત્રં સ લભેન્નૂનમિત્યાહ કમલોદ્ભવઃ ।
સ્તોત્રં શ‍ૃણુ મુનિશ્રેષ્ઠ સર્વકામશુભાવહમ્ ॥ ૫૭॥

વાઞ્છાપ્રદં ચ સર્વેષાં ગૂઢં વેદેષુ નારદ ।
નમો દેવ્યૈ મહાદેવ્યૈ સિદ્ધ્યૈ શાન્ત્યૈ નમો નમઃ ॥ ૫૮॥

શુભાયૈ દેવસેનાયૈ ષષ્ઠ્યૈ દેવ્યૈ નમો નમઃ ।

વરદાયૈ પુત્રદાયૈ ધનદાયૈ નમો નમઃ ॥ ૫૯॥

સુખદાયૈ મોક્ષદાયૈ ષષ્ઠ્યૈ દેવ્યૈ નમો નમઃ ।
સૃષ્ટ્યૈ ષષ્ઠાંશરૂપાયૈ સિદ્ધાયૈ ચ નમો નમઃ ॥ ૬૦॥

માયાયૈ સિદ્ધયોગિન્યૈ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
સારાયૈ શારદાયૈ ચ પરાદેવ્યૈ નમો નમઃ ॥ ૬૧॥

બાલાધિષ્ઠાતૃદેવ્યૈ ચ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
કલ્યાણદાયૈ કલ્યાણ્યૈ ફલદાયૈ ચ કર્મણામ્ ॥ ૬૨॥

પ્રત્યક્ષાયૈ સ્વભક્તાનાં ષષ્ઠ્યૈ દેવ્યૈ નમો નમઃ ।
પૂજ્યાયૈ સ્કન્દકાન્તાયૈ સર્વેષાં સર્વકર્મસુ ॥ ૬૩॥

દેવરક્ષણકારિણ્યૈ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
શુદ્ધસત્ત્વસ્વરૂપાયૈ વન્દિતાયૈ નૃણાં સદા ॥ ૬૪॥

હિંસાક્રોધવર્જિતાયૈ ષષ્ઠીદેવ્યૈ નમો નમઃ ।
ધનં દેહિ પ્રિયાં દેહિ પુત્રં દેહિ સુરેશ્વરિ ॥ ૬૫॥

માનં દેહિ જયં દેહિ દ્વિષો જહિ મહેશ્વરિ ।
ધર્મં દેહિ યશો દેહિ ષષ્ઠીદેવ્યૈ નમો નમઃ ॥ ૬૬॥

દેહિ ભૂમિં પ્રજાં દેહિ વિદ્યાં દેહિ સુપૂજિતે ।
કલ્યાણં ચ જયં દેહિ ષષ્ઠીદેવ્યૈ નમો નમઃ ॥ ૬૭॥

ઇતિ દેવીં ચ સંસ્તૂય લેભે પુત્રં પ્રિયવ્રતઃ ।
યશસ્વિનં ચ રાજેન્દ્રઃ ષષ્ઠીદેવ્યાઃ પ્રસાદતઃ ॥ ૬૮॥

ષષ્ઠીસ્તોત્રમિદં બ્રહ્મન્ યઃ શ ૃણોતિ તુ વત્સરમ્ ।
અપુત્રો લભતે પુત્રં વરં સુચિરજીવિનમ્ ॥ ૬૯॥

વર્ષમેકં ચ યો ભક્ત્યા સમ્પૂજ્યેદં શ ૃણોતિ ચ ।
સર્વપાપાદ્વિનિર્મુક્તો મહાવન્ધ્યા પ્રસૂયતે ॥ ૭૦॥

વીરં પુત્રં ચ ગુણિનં વિદ્યાવન્તં યશસ્વિનમ્ ।
સુચિરાયુષ્યવન્તં ચ સૂતે દેવીપ્રસાદતઃ ॥ ૭૧॥

કાકવન્ધ્યા ચ યા નારી મૃતવત્સા ચ યા ભવેત્ ।
વર્ષં શ્રુત્વા લભેત્પુત્રં ષષ્ઠીદેવીપ્રસાદતઃ ॥ ૭૨॥

રોગયુક્તે ચ બાલે ચ પિતા માતા શ‍ૃણોતિ ચેત્ ।
માસેન મુચ્યતે બાલઃ ષષ્ઠીદેવીપ્રસાદતઃ ॥ ૭૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
ષષ્ઠ્યુપાખ્યાનવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૬॥

## ૯.૪૭ સપ્તચત્વારિંશોઽધ્યાયઃ । મઙ્ગલચણ્ડીમનસયોરુપાખ્યાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
કથિતં ષષ્ઠ્યુપાખ્યાનં બ્રહ્મપુત્ર યથાઽઽગમમ્ ।
દેવી મઙ્ગલચણ્ડી ચ તદાખ્યાનં નિશામય ॥ ૧॥

તસ્યાઃ પૂજાદિકં સર્વં ધર્મવક્ત્રેણ યચ્છ્રુતમ્ ।
શ્રુતિસમ્મતમેવેષ્ટં સર્વેષાં વિદુષામપિ ॥ ૨॥

દક્ષા યા વર્તતે ચણ્ડી કલ્યાણેષુ ચ મઙ્ગલા ।
મઙ્ગલેષુ ચ યા દક્ષા સા ચ મઙ્ગલચણ્ડિકા ॥ ૩॥

પૂજ્યા યા વર્તતે ચણ્ડી મઙ્ગલોઽપિ મહીસુતઃ ।
મઙ્ગલાભીષ્ટદેવી યા સા વા મઙ્ગલચણ્ડિકા ॥ ૪॥

મઙ્ગલો મનુવંશ્યશ્ચ સપ્તદ્વીપધરાપતિઃ ।
તસ્ય પૂજ્યાભીષ્ટદેવી તેન મઙ્ગલચણ્ડિકા ॥ ૫॥

મૂર્તિભેદેન સા દુર્ગા મૂલપ્રકૃતિરીશ્વરી ।
કૃપારૂપાતિપ્રત્યક્ષા યોષિતામિષ્ટદેવતા ॥ ૬॥

પ્રથમે પૂજિતા સા ચ શઙ્કરેણ પરાત્પરા ।
ત્રિપુરસ્ય વધે ઘોરે વિષ્ણુના પ્રેરિતેન ચ ॥ ૭॥

બ્રહ્મન્ બ્રહ્મોપદેશેન દુર્ગતેન ચ સઙ્કટે ।
આકાશાત્પતિતે યાને દૈત્યેન પાતિતે રુષા ॥ ૮॥

બ્રહ્મવિષ્ણૂપદિષ્ટશ્ચ દુર્ગાં તુષ્ટાવ શઙ્કરઃ ।
સા ચ મઙ્ગલચણ્ડી યા બભૂવ રૂપભેદતઃ ॥ ૯॥

ઉવાચ પુરતઃ શમ્ભોર્ભયં નાસ્તીતિ તે પ્રભો ।
ભગવાન્વૃષરૂપશ્ચ સર્વેશસ્તે ભવિષ્યતિ ॥ ૧૦॥

યુદ્ધશક્તિસ્વરૂપાહં ભવિષ્યામિ ન સંશયઃ ।
માયાત્મના ચ હરિણા સહાયેન વૃષધ્વજ ॥ ૧૧॥

જહિ દૈત્યં સ્વશત્રું ચ સુરાણાં પદઘાતકમ્ ।
ઇત્યુક્ત્વાન્તર્હિતા દેવી શમ્ભોઃ શક્તિર્બભૂવ સા ॥ ૧૨॥

વિષ્ણુદત્તેન શસ્ત્રેણ જઘાન તમુમાપતિઃ ।
મુનીન્દ્ર પતિતે દૈત્યે સર્વે દેવા મહર્ષયઃ ॥ ૧૩॥

તુષ્ટુવુઃ શઙ્કરં દેવં ભક્તિનમ્રાત્મકન્ધરાઃ ।
સદ્યઃ શિરસિ શમ્ભોશ્ચ પુષ્પવૃષ્ટિર્બભૂવ હ ॥ ૧૪॥

બ્રહ્મા વિષ્ણુશ્ચ સન્તુષ્ટો દદૌ તસ્મૈ શુભાશિષમ્ ।
બ્રહ્મવિષ્ણૂપદિષ્ટશ્ચ સુસ્નાતઃ શઙ્કરસ્તથા ॥ ૧૫॥

પૂજયામાસ તાં ભક્ત્યા દેવીં મઙ્ગલચણ્ડિકામ્ ।
પાદ્યાર્ઘ્યાચમનીયૈશ્ચ વસ્ત્રૈશ્ચ વિવિધૈરપિ ॥ ૧૬॥

પુષ્પચન્દનનૈવેદ્યૈર્ભક્ત્યા નાનાવિધૈર્મુને ।
છાગૈર્મેષૈશ્ચ મહિષૈર્ગવયૈઃ પક્ષિભિસ્તથા ॥ ૧૭॥

વસ્ત્રાલઙ્કારમાલ્યૈશ્ચ પાયસૈઃ પિષ્ટકૈરપિ ।
મધુભિશ્ચ સુધાભિશ્ચ ફલૈર્નાનાવિધૈરપિ ॥ ૧૮॥

સઙ્ગીતૈર્નર્તકૈર્વાદ્યૈરુત્સવૈર્નામકીર્તનૈઃ ।
ધ્યાત્વા માધ્યન્દિનોક્તેન ધ્યાનેન ભક્તિપૂર્વકમ્ ॥ ૧૯॥

દદૌ દ્રવ્યાણિ મૂલેન મન્ત્રેણૈવ ચ નારદ ।
ૐ હ્રીં શ્રીં ક્લીં સર્વપૂજ્યે દેવિ મઙ્ગલચણ્ડિકે ॥ ૨૦॥

હૂઁ હૂઁ ફટ્ સ્વાહાપ્યેકવિંશાક્ષરો મનુઃ ।
પૂજ્યઃ કલ્પતરુશ્ચૈવ ભક્તાનાં સર્વકામદઃ ॥ ૨૧॥

દશલક્ષજપેનૈવ મન્ત્રસિદ્ધિર્ભવેદ્ ધ્રુવમ્ ।
ધ્યાનં ચ શ્રૂયતાં બ્રહ્મન્ વેદોક્તં સર્વસમ્મતમ્ ॥ ૨૨॥

દેવીં ષોડશવર્ષીયાં શશ્વત્સુસ્થિરયૌવનામ્ ।
બિમ્બોષ્ઠીં સુદતીં શુદ્ધાં શરત્પદ્મનિભાનનામ્ ॥ ૨૩॥

શ્વેતચમ્પકવર્ણાભાં સુનીલોત્પલલોચનામ્ ।
જગદ્ધાત્રીં ચ દાત્રીં ચ સર્વેભ્યઃ સર્વસમ્પદામ્ ॥ ૨૪॥

સંસારસાગરે ઘોરે જ્યોતીરૂપાં સદા ભજે ।
દેવ્યાશ્ચ ધ્યાનમિત્યેવં સ્તવનં શ્રૂયતાં મુને ॥ ૨૫॥

મહાદેવ ઉવાચ ।
રક્ષ રક્ષ જગન્માતર્દેવિ મઙ્ગલચણ્ડિકે ।
હારિકે વિપદાં રાશેર્હર્ષમઙ્ગલકારિકે ॥ ૨૬॥

હર્ષમઙ્ગલદક્ષે ચ હર્ષમઙ્ગલદાયિકે ।
શુભે મઙ્ગલદક્ષે ચ શુભે મઙ્ગલચણ્ડિકે ॥ ૨૭॥

મઙ્ગલે મઙ્ગલાર્હે ચ સર્વમઙ્ગલમઙ્ગલે ।
સતાં મઙ્ગદે દેવિ સર્વેષાં મઙ્ગલાલયે ॥ ૨૮॥

પૂજ્યે મઙ્ગલવારે ચ મઙ્ગલાભીષ્ટદેવતે ।
પૂજ્યે મઙ્ગલભૂપસ્ય મનુવંશસ્ય સન્તતમ્ ॥ ૨૯॥

મઙ્ગલાધિષ્ઠાતૃદેવિ મઙ્ગલાનાં ચ મઙ્ગલે ।
સંસારમઙ્ગલાધારે મોક્ષમઙ્ગલદાયિનિ ॥ ૩૦॥

સારે ચ મઙ્ગલાધારે પારે ચ સર્વકર્મણામ્ ।
પ્રતિમઙ્ગલવારે ચ પૂજ્યે મઙ્ગસુખપ્રદે ॥ ૩૧॥

સ્તોત્રેણાનેન શમ્ભુશ્ચ સ્તુત્વા મઙ્ગલચણ્ડિકામ્ ।
પ્રતિમઙ્ગલવારે ચ પૂજાં દત્ત્વા ગતઃ શિવઃ ॥ ૩૨॥

પ્રથમે પૂજિતા દેવી શિવેન સર્વમઙ્ગલા ।
દ્વિતીયે પૂજિતા સા ચ મઙ્ગલેન ગ્રહેણ ચ ॥ ૩૩॥

તૃતીતે પૂજિતા ભદ્રા મઙ્ગલેન નૃપેણ ચ ।
ચતુર્થે મઙ્ગલે વારે સુન્દરીભિઃ પ્રપૂજિતા ॥ ૩૪॥

પઞ્ચમે મઙ્ગલાકાઙ્ક્ષિનરૈર્મઙ્ગલચણ્ડિકા ।
પૂજિતા પ્રતિવિશ્વેષુ વિશ્વેશપૂજિતા સદા ॥ ૩૫॥

તતઃ સર્વત્ર સમ્પૂજ્યા બભૂવ પરમેશ્વરી ।
દેવૈશ્ચ મુનિભિશ્ચૈવ માનવૈર્મનુભિર્મુને ॥ ૩૬॥

દેવ્યાશ્ચ મઙ્ગસ્તોત્રં યઃ શ◌ૃણોતિ સમાહિતઃ ।
તન્મઙ્ગલં ભવેત્તસ્ય ન ભવેત્તદમઙ્ગલમ્ ।

વર્ધતે પુત્રપૌત્રૈશ્ચ મઙ્ગલં ચ દિને દિને ॥ ૩૭॥

શ્રીનારાયણ ઉવાચ ।
ઉક્તં દ્વયોરુપાખ્યાનં બ્રહ્મપુત્ર યથાગમમ્ ।
શ્રૂયતાં મનસાऽऽખ્યાનં યચ્છ્રુતં ધર્મવક્ત્રતઃ ॥ ૩૮॥

સા ચ કન્યા ભગવતી કશ્યપસ્ય ચ માનસી ।
તેનૈવ મનસા દેવી મનસા યા ચ દીવ્યતિ ॥ ૩૯॥

મનસા ધ્યાયતે યા ચ પરમાત્માનમીશ્વરમ્ ।
તેન સા મનસા દેવી તેન યોગેન દીવ્યતિ ॥ ૪૦॥

આત્મારામા ચ સા દેવી વૈષ્ણવી સિદ્ધયોગિની ।
ત્રિયુગં ચ તપસ્તપ્ત્વા કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૪૧॥

જરત્કારુશરીરં ચ દૃષ્ટ્વા યત્ક્ષીણમીશ્વરઃ ।
ગોપીપતિર્નામ ચક્રે જરત્કારુરિતિ પ્રભુઃ ॥ ૪૨॥

વાઞ્છિતં ચ દદૌ તસ્યૈ કૃપયા ચ કૃપાનિધિઃ ।
પૂજાં ચ કારયામાસ ચકાર ચ સ્વયં પ્રભુઃ ॥ ૪૩॥

સ્વર્ગે ચ નાગલોકે ચ પૃથિવ્યાં બ્રહ્મલોકતઃ ।
ભૃશં જગત્સુ ગૌરી સા સુન્દરી ચ મનોહરા । ૪૪
જગદ્ગૌરીતિ વિખ્યાતા તેન સા પૂજિતા સતી ।
શિવશિષ્યા ચ સા દેવી તેન શૈવી પ્રકીર્તિતા ॥ ૪૫॥

વિષ્ણુભક્તાતીવ શશ્વદ્વૈષ્ણવી તેન કીર્તિતા ।
નાગાનાં પ્રાણરક્ષિત્રી યજ્ઞે પારીક્ષિતસ્ય ચ ॥ ૪૬॥

નાગેશ્વરીતિ વિખ્યાતા સા નાગભગિનીતિ ચ ।
વિષં સંહર્તુમીશા યા તેન વિષહરી સ્મૃતા ॥ ૪૭॥

સિદ્ધયોગં હરાત્પ્રાપ તેન સા સિદ્ધયોગિની ।
મહાજ્ઞાનં ચ યોગં ચ મૃતસઞ્જીવનીં પરામ્ ॥ ૪૮॥

મહાજ્ઞાનયુતાં તાં ચ પ્રવદન્તિ મનીષિણઃ ।
આસ્તીકસ્ય મુનીન્દ્રસ્ય માતા સાપિ તપસ્વિની ॥ ૪૯॥

આસ્તીકમાતા વિજ્ઞાતા જગત્યાં સુપ્રતિષ્ઠિતા ।
પ્રિયા મુનેર્જરત્કારોર્મુનીન્દ્રસ્ય મહાત્મનઃ ॥ ૫૦॥

યોગિનો વિશ્વપૂજ્યસ્ય જરત્કારુપ્રિયા તતઃ ।
જરત્કારુર્જગદ્ગૌરી મનસા સિદ્ધયોગિની ॥ ૫૧॥

વૈષ્ણવી નાગભગિની શૈવી નાગેશ્વરી તથા ।
જરત્કારુપ્રિયાસ્તીકમાતા વિષહરેતિ ચ ॥ ૫૨॥

મહાજ્ઞાનયુતા ચૈવ સા દેવી વિશ્વપૂજિતા ।
દ્વાદશૈતાનિ નામાનિ પૂજાકાલે તુ યઃ પઠેત્ ॥ ૫૩॥

તસ્ય નાગભયં નાસ્તિ તસ્ય વંશોદ્ભવસ્ય ચ ।
નાગભીતે ચ શયને નાગગ્રસ્તે ચ મન્દિરે ॥ ૫૪॥

નાગશોભે મહાદુર્ગે નાગવેષ્ટિતવિગ્રહે ।
ઇદં સ્તોત્રં પઠિત્વા તુ મુચ્યતે નાત્ર સંશયઃ ॥ ૫૫॥

નિત્યં પઠેદ્યસ્તં દૃષ્ટ્વા નાગવર્ગઃ પલાયતે ।
દશલક્ષજપેનૈવ સ્તોત્રસિદ્ધિર્ભવેન્નૃણામ્ ॥ ૫૬॥

સ્તોત્રસિદ્ધિર્ભવેદ્યસ્ય સ વિષં ભોક્તુમીશ્વરઃ ।
નાગૈશ્ચ ભૂષણં કૃત્વા સ ભવેન્નાગવાહનઃ ॥ ૫૭॥

નાગાસનો નાગતલ્પો મહાસિદ્ધો ભવેન્નરઃ ।
અન્તે ચ વિષ્ણુના સાર્ધં ક્રીડત્યેવ દિવાનિશમ્ ॥ ૫૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે નારાયણનારદસંવાદે
મઙ્ગલચણ્ડીમનસયોરુપાખ્યાનવર્ણનં
નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૭॥

## ૯.૪૮ અષ્ટચત્વારિંશોઽધ્યાયઃ । મનસોપાખ્યાનવર્ણનમ્ ।

શ્રીનારાયણ ઉવાચ ।
મત્તઃ પૂજાવિધાનં ચ શ્રૂયતાં મુનિપુઙ્ગવ ।
ધ્યાનં ચ સામવેદોક્તં પ્રોક્તં દેવીવિધાનકમ્ ॥ ૧॥

શ્વેતચમ્પકવર્ણાભાં રત્નભૂષણભૂષિતામ્ ।
વહ્નિશુદ્ધાંશુકાધાનાં નાગયજ્ઞોપવીતિનીમ્ ॥ ૨॥

મહાજ્ઞાનયુતાં તાં ચ પ્રવરજ્ઞાનિનાં વરામ્ ।

સિદ્ધાધિષ્ઠાતૃદેવીં ચ સિદ્ધાં સિદ્ધિપ્રદાં ભજે ॥ ૩॥

ઇતિ ધ્યાત્વા ચ તાં દેવીં મૂલેનૈવ પ્રપૂજયેત્ ।
નૈવેદ્યૈર્વિવિધૈર્ધૂપૈઃ પુષ્પગન્ધાનુલેપનૈઃ ॥ ૪॥

મૂલમન્ત્રૈશ્ચ વેદોક્તૈર્ભક્તાનાં વાઞ્છિતપ્રદઃ ।
મુને કલ્પતરુર્નામ સુસિદ્ધો દ્વાદશાક્ષરઃ ॥ ૫॥

ૐ હ્રીં શ્રીં ક્લીં ઐં મનસાદેવ્યૈ સ્વાહેતિ કીર્તિતઃ ।
પઞ્ચલક્ષજપેનૈવ મન્ત્રસિદ્ધિર્ભવેન્નૃણામ્ ॥ ૬॥

મન્ત્રસિદ્ધિર્ભવેદ્યસ્ય સ સિદ્ધો જગતીતલે ।
સુધાસમં વિષં તસ્ય ધન્વન્તરિસમો ભવેત્ ॥ ૭॥

બ્રહ્મન્સ્નાત્વા તુ સઙ્ક્રાન્ત્યાં ગૂઢશાલાસુ યત્નતઃ ।
આવાહ્ય દેવીમીશાનાં પૂજયેદ્યોઽતિભક્તિતઃ ॥ ૮॥

પઞ્ચમ્યાં મનસા ધ્યાયન્ દેવ્યૈ દદ્યાચ્ચ યો બલિમ્ ।
ધનવાન્પુત્રવાંશ્ચૈવ કીર્તિમાન્સ ભવેદ્ ધ્રુવમ્ ॥ ૯॥

પૂજાવિધાનં કથિતં તદાખ્યાનં નિશામય ।
કથયામિ મહાભાગ યચ્છ્રુતં ધર્મવક્ત્રતઃ ॥ ૧૦॥

પુરા નાગભયાક્રાન્તા બભૂવુર્માનવા ભુવિ ।
ગતાસ્તે શરણં સર્વે કશ્યપં મુનિપુઙ્ગવમ્ ॥ ૧૧॥

મન્ત્રાંશ્ચ સસૃજે ભીતઃ કશ્યપો બ્રહ્મણાન્વિતઃ ।
વેદબીજાનુસારેણ ચોપદેશેન બ્રહ્મણઃ ॥ ૧૨॥

મન્ત્રાધિષ્ઠાતૃદેવીં તાં મનસા સસૃજે તથા ।
તપસા મનસા તેન બભૂવ મનસા ચ સા ॥ ૧૩॥

કુમારી સા ચ સમ્ભૂતા જગામ શઙ્કરાલયમ્ ।
ભક્ત્યા સમ્પૂજ્ય કૈલાસે તુષ્ટાવ ચન્દ્રશેખરમ્ ॥ ૧૪॥

દિવ્યવર્ષસહસ્રં તં સિષેવે ચ મુનેઃ સુતા ।
આશુતોષો મહેશશ્ચ તાં ચ તુષ્ટો બભૂવ હ ॥ ૧૫॥

મહાજ્ઞાનં દદૌ તસ્યૈ પાઠયામાસ સામ ચ ।
કૃષ્ણમન્ત્રં કલ્પતરું દદાવષ્ટાક્ષરં મુને ॥ ૧૬॥

લક્ષ્મીમાયાકામબીજં ઙેઽન્તં કૃષ્ણપદં તતઃ ।
ત્રૈલોક્યમઙ્ગલં નામ કવચં પૂજનક્રમમ્ ॥ ૧૭॥

પુરશ્ચર્યાક્રમં ચાપિ વેદોક્તં સર્વસમ્મતમ્ ।
પ્રાપ્ય મૃત્યુઞ્જયાન્મન્ત્રં સા સતી ચ મુનેઃ સુતા ॥ ૧૮॥

જગામ તપસે સાધ્વી પુષ્કરં શઙ્કરાજ્ઞયા ।
ત્રિયુગં ચ તપસ્તપ્ત્વા કૃષ્ણસ્ય પરમાત્મનઃ ॥ ૧૯॥

સિદ્ધા બભૂવ સા દેવી દદર્શ પુરતઃ પ્રભુમ્ ।
દૃષ્ટ્વા કૃશાઙ્ગીં બાલાં ચ કૃપયા ચ કૃપાનિધિઃ ॥ ૨૦॥

પૂજાં ચ કારયામાસ ચકાર ચ સ્વયં હરિઃ ।
વરં ચ પ્રદદૌ તસ્યૈ પૂજિતા ત્વં ભવે ભવ ॥ ૨૧॥

વરં દત્ત્વા તુ કલ્યાણ્યૈ તતશ્ચાન્તર્દધે હરિઃ ।
પ્રથમે પૂજિતા સા ચ કૃષ્ણેન પરમાત્મના ॥ ૨૨॥

દ્વિતીયે શઙ્કરેણૈવ કશ્યપેન સુરેણ ચ ।
મુનિના મનુના ચૈવ નાગેન માનવાદિભિઃ ॥ ૨૩॥

બભૂવ પૂજિતા સા ચ ત્રિષુ લોકેષુ સુવ્રતા ।
જરત્કારુમુનીન્દ્રાય કશ્યપસ્તાં દદૌ પુરા ॥ ૨૪॥

અયાચિતો મુનિશ્રેષ્ઠો જગ્રાહ બ્રાહ્મણાજ્ઞયા ।
કૃત્વોદ્વાહં મહાયોગી વિશ્રાન્તસ્તપસા ચિરમ્ ॥ ૨૫॥

સુષ્વાપ દેવ્યા જઘને વટમૂલે ચ પુષ્કરે ।
નિદ્રાં જગામ સ મુનિઃ સ્મૃત્વા નિદ્રેશમીશ્વરમ્ ॥ ૨૬॥

જગામાસ્તં દિનકરઃ સાયઙ્કાલ ઉપસ્થિતે ।
સઞ્ચિન્ત્ય મનસા સાધ્વી મનસા સા પતિવ્રતા ॥ ૨૭॥

ધર્મલોપભયેનૈવ ચકારાલોચનં સતી ।
અકૃત્વા પશ્ચિમાં સન્ધ્યાં નિત્યાં ચૈવ દ્વિજન્મનામ્ ॥ ૨૮॥

બ્રહ્મહત્યાદિકં પાપં લભિષ્યતિ પતિર્મમ ।
નોપતિષ્ઠતિ યઃ પૂર્વાં નોપાસ્તે યસ્તુ પશ્ચિમામ્ ॥ ૨૯॥

સ સર્વત્રાશુચિર્નિત્યં બ્રહ્મહત્યાદિકં લભેત્ ।
વેદોક્તમિતિ સઞ્ચિન્ત્ય બોધયામાસ સુન્દરી ॥ ૩૦॥

સ ચ બુદ્ધો મુનિશ્રેષ્ઠસ્તાં ચુકોપ ભૃશં મુને ।
મુનિરુવાચ ।
કથં મે સુખિનઃ સાધ્વિ નિદ્રાભઙ્ગઃ કૃતસ્ત્વયા ॥ ૩૧॥

વ્યર્થં વ્રતાદિકં તસ્યા યા ભર્તુશ્ચાપકારિણી ।
તપશ્ચાનશનં ચૈવ વ્રતં દાનાદિકં ચ યત્ ॥ ૩૨॥

ભર્તુરપ્રિયકારિણ્યાઃ સર્વં ભવતિ નિષ્ફલમ્ ।
યયા પ્રિયઃ પૂજિતશ્ચ શ્રીકૃષ્ણઃ પૂજિતસ્તયા ॥ ૩૩॥

પતિવ્રતાવ્રતાર્થઞ્ચ પતિરૂપો હરિઃ સ્વયમ્ ।
સર્વદાનં સર્વયજ્ઞઃ સર્વતીર્થનિષેવણમ્ ॥ ૩૪॥

સર્વં વ્રતં તપઃ સર્વમુપવાસાદિકં ચ યત્ ।
સર્વધર્મશ્ચ સત્યં ચ સર્વદેવપ્રપૂજનમ્ ॥ ૩૫॥

તત્સર્વં સ્વામિસેવાયાઃ કલાં નાર્હતિ ષોડશીમ્ ।
પુણ્યે ચ ભારતે વર્ષે પતિસેવા કરોતિ યા ॥ ૩૬॥

વૈકુણ્ઠે સ્વામિના સાર્ધં સા યાતિ બ્રહ્મણઃ પદમ્ ।
વિપ્રિયં કુરુતે ભર્તુર્વિપ્રિયં વદતિ પ્રિયમ્ ॥ ૩૭॥

અસત્કુલે પ્રસૂતા હિ તત્ફલં શ્રૂયતાં સતિ ।
કુમ્ભીપાકં વ્રજેત્સા ચ યાવચ્ચન્દ્રદિવાકરૌ ॥ ૩૮॥

તતો ભવતિ ચાણ્ડાલી પતિપુત્રવિવર્જિતા ।
ઇત્યુક્ત્વા ચ મુનિશ્રેષ્ઠો બભૂવ સ્ફુરિતાધરઃ ॥ ૩૯॥

ચકમ્પે તેન સા સાધ્વી ભયેનોવાચ તં પતિમ્ ।
સાધ્વ્યુવાચ ।
સન્ધ્યાલોપભયેનૈવ નિદ્રાભઙ્ગઃ કૃતસ્તવ ॥ ૪૦॥

કુરુ શાન્તિં મહાભાગ દુષ્ટાયા મમ સુવ્રત ।
શૃઙ્ગારાહારનિદ્રાણાં યશ્ચ ભઙ્ગં કરોતિ વૈ ॥ ૪૧॥

સ વ્રજેત્કાલસૂત્રં વૈ યાવચ્ચન્દ્રદિવાકરૌ ।
ઇત્યુક્ત્વા મનસા દેવી સ્વામિનશ્ચરણામ્બુજે ॥ ૪૨॥

પપાત ભક્ત્યા ભીતા ચ રુરોદ ચ પુનઃ પુનઃ ।

કુપિતં ચ મુનિં દૃષ્ટ્વા શ્રીસૂર્યં શપ્તુમુદ્યતમ્ ॥ ૪૩॥

તત્રાજગામ ભગવાન્સન્ધ્યયા સહ નારદ ।
તત્રાગત્ય મુનિં સમ્યગુવાચ ભાસ્કરઃ સ્વયમ્ ॥ ૪૪॥

વિનયેન ચ ભીતશ્ચ તયા સહ યથોચિતમ્ ।
ભાસ્કર ઉવાચ ।
સૂર્યાસ્તસમયં દૃષ્ટ્વા સાધ્વી ધર્મભયેન ચ ॥ ૪૫॥

બોધયામાસ ત્વાં વિપ્ર શરણં ત્વામહં ગતઃ ।
ક્ષમસ્વ ભગવન્બ્રહ્મન્ માં શપ્તું નોચિતં મુને ॥ ૪૬॥

બ્રાહ્મણાનાં ચ હૃદયં નવનીતસમં સદા ।
તેષાં ક્ષણાર્ધં ક્રોધશ્ચ તતો ભસ્મ ભવેજ્જગત્ ॥ ૪૭॥

પુનઃ સ્રષ્ટું દ્વિજઃ શક્તો ન તેજસ્વી દ્વિજાત્પરઃ ।
બ્રાહ્મણો બ્રહ્મણો વંશઃ પ્રજ્વલન્બ્રહ્મતેજસા ॥ ૪૮॥

શ્રીકૃષ્ણં ભાવયેન્નિત્યં બ્રહ્મજ્યોતિઃ સનાતનમ્ ।
સૂર્યસ્ય વચનં શ્રુત્વા દ્વિજસ્તુષ્ટો બભૂવ હ ॥ ૪૯॥

સૂર્યો જગામ સ્વસ્થાનં ગૃહીત્વા બ્રાહ્મણાશિષમ્ ।
તત્યાજ મનસાં વિપ્રઃ પ્રતિજ્ઞાપાલનાય ચ ॥ ૫૦॥

રુદતીં શોકસંયુક્તાં હૃદયેન વિદૂયતા ।
સા સસ્માર ગુરું શમ્ભુમિષ્ટદેવં વિધિં હરિમ્ ॥ ૫૧॥

કશ્યપં જન્મદાતારં વિપત્તૌ ભયકર્શિતા ।
તત્રાજગામ ગોપીશો ભગવાચ્છમ્ભુરેવ ચ ॥ ૫૨॥

વિધિશ્ચ કશ્યપશ્ચૈવ મનસા પરિચિન્તિતઃ ।
દૃષ્ટ્વા વિપ્રોઽભીષ્ટદેવં નિર્ગુણં પ્રકૃતેઃ પરમ્ ॥ ૫૩॥

તુષ્ટાવ પરયા ભક્ત્યા પ્રણનામ મુહુર્મુહુઃ ।
નમશ્ચકાર શમ્ભું ચ બ્રહ્માણં કશ્યપં તથા ॥ ૫૪॥

કથમાગમનં દેવા ઇતિ પ્રશ્નં ચકાર સઃ ।
બ્રહ્મા તદ્વચનં શ્રુત્વા સહસા સમયોચિતમ્ ॥ ૫૫॥

પ્રત્યુવાચ નમસ્કૃત્ય હૃષીકેશપદામ્બુજમ્ ।
યદિ ત્યક્તા ધર્મપત્ની ધર્મિષ્ઠા મનસા સતી ॥ ૫૬॥

કુરુષ્વાસ્યાં સુતોત્પત્તિં સ્વધર્મપાલનાય વૈ ।
જાયાયાં ચ સુતોત્પત્તિં કૃત્વા પશ્ચાત્ત્યજેન્મુને ॥ ૫૭॥

અકૃત્વા તુ સુતોત્પત્તિં વિરાગી યસ્ત્યજેત્પ્રિયામ્ ।
સ્રવતે તસ્ય પુણ્યં ચ ચાલન્યાં ચ યથા જલમ્ ॥ ૫૮॥

બ્રહ્મણો વચનં શ્રુત્વા જરત્કારુર્મુનીશ્વરઃ ।
ચકાર નાભિસંસ્પર્શં યોગેન મન્ત્રપૂર્વકમ્ ॥ ૫૯॥

મનસાયા મુનિશ્રેષ્ઠ મુનિશ્રેષ્ઠ ઉવાચ તામ્ ।
જરત્કારુરુવાચ ।
ગર્ભેણાનેન મનસે તવ પુત્રો ભવિષ્યતિ ॥ ૬૦॥

જિતેન્દ્રિયાણાં પ્રવરો ધાર્મિકો બ્રાહ્મણાગ્રણીઃ ।
તેજસ્વી ચ તપસ્વી ચ યશસ્વી ચ ગુણાન્વિતઃ ॥ ૬૧॥

વરો વેદવિદાં ચૈવ જ્ઞાનિનાં યોગિનાં તથા ।
સ ચ પુત્રો વિષ્ણુભક્તો ધાર્મિકઃ કુલમુદ્ધરેત્ ॥ ૬૨॥

નૃત્યન્તિ પિતરઃ સર્વે જન્મમાત્રેણ વૈ મુદા ।
પતિવ્રતા સુશીલા યા સા પ્રિયા પ્રિયવાદિની ॥ ૬૩॥

ધર્મિષ્ઠા પુત્રમાતા ચ કુલસ્ત્રી કુલપાલિકા ।
હરિભક્તિપ્રદો બન્ધુર્ન ચાભીષ્ટસુખપ્રદઃ ॥ ૬૪॥

યો બન્ધુશ્ચેત્સ ચ પિતા હરિવર્ત્મપ્રદર્શકઃ ।
સા ગર્ભધારિણી યા ચ ગર્ભાવાસવિમોચની ॥ ૬૫॥

દયારૂપા ચ ભગિની યમભીતિવિમોચની ।
વિષ્ણુમન્ત્રપ્રદાતા ચ સ ગુરુર્વિષ્ણુભક્તિદઃ ॥ ૬૬॥

ગુરુશ્ચ જ્ઞાનદો યો હિ યજ્જ્ઞાનં કૃષ્ણભાવનમ્ ।
આબ્રહ્મસ્તમ્બપર્યન્તં તતો વિશ્વં ચરાચરમ્ ॥ ૬૭॥

આવિર્ભૂતં તિરોભૂતં કિં વા જ્ઞાનં તદન્યતઃ ।
વેદજં યજ્ઞજં યદ્યત્તત્સારં હરિસેવનમ્ ॥ ૬૮॥

તત્ત્વાનાં સારભૂતં ચ હરેરન્યદ્વિડમ્બનમ્ ।
દત્તં જ્ઞાનં મયા તુભ્યં સ સ્વામી જ્ઞાનદો હિ યઃ ॥ ૬૯॥

જ્ઞાનાત્પ્રમુચ્યતે બન્ધાત્સ રિપુર્યો હિ બન્ધદઃ ।
વિષ્ણુભક્તિયુતં જ્ઞાનં નો દદાતિ ચ યો ગુરુઃ ॥ ૭૦॥

સ રિપુઃ શિષ્યઘાતી ચ યતો બન્ધાન્ન મોચયેત્ ।
જનનીં ગર્ભજક્લેશાદ્યમયાતનયા તથા ॥ ૭૧॥

ન મોચયેદ્યઃ સ કથં ગુરુસ્તાતો હિ બાન્ધવઃ ।
પરમાનન્દરૂપં ચ કૃષ્ણમાર્ગમનશ્વરમ્ ॥ ૭૨॥

ન દર્શયેદ્યઃ સતતં કીદૃશો બાન્ધવો નૃણામ્ ।
ભજ સાધ્વિ પરં બ્રહ્માચ્યુતં કૃષ્ણં ચ નિર્ગુણમ્ ॥ ૭૩॥

નિર્મૂલં ચ ભવેત્પુંસાં કર્મ વૈ તસ્ય સેવયા ।
મયા છલેન ત્વં ત્યક્તા ક્ષમસ્વૈતન્મમ પ્રિયે ॥ ૭૪॥

ક્ષમાયુતાનાં સાધ્વીનાં સત્ત્વાત્ક્રોધો ન વિદ્યતે ।
પુષ્કરે તપસે યામિ ગચ્છ દેવિ યથાસુખમ્ ॥ ૭૫॥

શ્રીકૃષ્ણચરણામ્ભોજે નિઃસ્પૃહાણાં મનોરથાઃ ।
જરત્કારુવચઃ શ્રુત્વા મનસા શોકકાતરા ॥ ૭૬॥

સાશ્રુનેત્રા ચ વિનયાદુવાચ પ્રાણવલ્લભમ્ ।
મનસોવાચ ।
દોષો નાસ્ત્યેવ મે ત્યક્તું નિદ્રાભઙ્ગેન તે પ્રભો ॥ ૭૭॥

યત્ર સ્મરામિ ત્વાં નિત્યં તત્ર મામાગમિષ્યસિ ।
બન્ધુભેદઃ ક્લેશતમઃ પુત્રભેદસ્તતઃ પરમ્ ॥ ૭૮॥

પ્રાણેશભેદઃ પ્રાણાનાં વિચ્છેદાત્સર્વતઃ પરઃ ।
પતિઃ પતિવ્રતાનાં તુ શતપુત્રાધિકં પ્રિયઃ ॥ ૭૯॥

સર્વસ્માત્તુ પ્રિયઃ સ્ત્રીણાં પ્રિયસ્તેનોચ્યતે બુધૈઃ ।
પુત્રે યથૈકપુત્રાણાં વૈષ્ણવાનાં યથા હરૌ ॥ ૮૦॥

નેત્રે યથૈકનેત્રાણાં તૃષિતાનાં યથા જલે ।
ક્ષુધિતાનાં યથાન્ને ચ કામુકાનાં ચ મૈથુને ॥ ૮૧॥

યથા પરસ્વે ચૌરાણાં યથા જારે કુયોષિતામ્ ।
વિદુષાં ચ યથા શાસ્ત્રે વાણિજ્યે વણિજાં યથા ॥ ૮૨॥

તથા શશ્વન્મનઃ કાન્તે સાધ્વીનાં યોષિતાં પ્રભો ।

ઇત્યુક્ત્વા મનસા દેવી પપાત સ્વામિનઃ પદે ॥ ૮૩॥

ક્ષણં ચકાર ક્રોડે તાં કૃપયા ચ કૃપાનિધિઃ ।
નેત્રોદકેન મનસાં સ્નાપયામાસ તાં મુનિઃ ॥ ૮૪॥

સાશ્રુ નેત્રા મુનેઃ ક્રોડં સિષેચ ભેદકાતરા ।
તદા જ્ઞાનેન તૌ દ્વૌ ચ વિશોકૌ સમ્બભૂવતુઃ ॥ ૮૫॥

સ્મારં સ્મારં પદામ્ભોજં કૃષ્ણસ્ય પરમાત્મનઃ ।
જગામ તપસે વિપ્રઃ સ્વકાન્તાં સમ્પ્રબોધ્ય ચ ॥ ૮૬॥

જગામ મનસા શમ્ભોઃ કૈલાસં મન્દિરં ગુરોઃ ।
પાર્વતી બોધયામાસ મનસાં શોકકર્શિતામ્ ॥ ૮૭॥

શિવશ્ચાતીવ જ્ઞાનેન શિવેન ચ શિવાલયઃ ।
સુપ્રશસ્તે દિને સાધ્વી સુષુવે મઙ્ગલક્ષણે ॥ ૮૮॥

નારાયણાંશં પુત્રં તં યોગિનાં જ્ઞાનિનાં ગુરુમ્ ।
ગર્ભસ્થિતો મહાજ્ઞાનં શ્રુત્વા શઙ્કરવક્ત્રતઃ ॥ ૮૯॥

સમ્બભૂવ ચ યોગીન્દ્રો યોગિનાં જ્ઞાનિનાં ગુરુઃ ।
જાતકં કારયામાસ વાચયામાસ મઙ્ગલમ્ ॥ ૯૦॥

વેદાંશ્ચ પાઠયામાસ શિવાય ચ શિવઃ શિશોઃ ।
મણિરત્નકિરીટાંશ્ચ બ્રાહ્મણેભ્યો દદૌ શિવઃ ॥ ૯૧॥

પાર્વતી ચ ગવાં લક્ષં રત્નાનિ વિવિધાનિ ચ ।
શમ્ભુશ્ચ ચતુરો વેદાન્વેદાઙ્ગાનિતરાંસ્તથા ॥ ૯૨॥

બાલકં પાઠયામાસ જ્ઞાનં મૃત્યુઞ્જયં પરમ્ ।
ભક્તિરસ્ત્યધિકા કાન્તેઽભીષ્ટદેવે ગુરૌ તથા ॥ ૯૩॥

યસ્યાસ્તેન ચ તત્પુત્રો બભૂવાસ્તીક એવ ચ ।
જગામ તપસે વિષ્ણોઃ પુષ્કરં શઙ્કરાજ્ઞયા ॥ ૯૪॥

સમ્પ્રાપ્ય ચ મહામન્ત્રં તતશ્ચ પરમાત્મનઃ ।
દિવ્યં વર્ષત્રિલક્ષં ચ તપસ્તપ્ત્વા તપોધનઃ ॥ ૯૫॥

આજગામ મહાયોગી નમસ્કર્તું શિવં પ્રભુમ્ ।
શઙ્કરં ચ નમસ્કૃત્ય સ્થિત્વા તત્રૈવ બાલકઃ ॥ ૯૬॥

સા ચાજગામ મનસા કશ્યપસ્યાશ્રમં પિતુઃ ।
તાં સપુત્રાં સુતાં દૃષ્ટ્વા મુદં પ્રાપ પ્રજાપતિઃ ॥ ૯૭॥

શતલક્ષં ચ રત્નાનાં બ્રાહ્મણેભ્યો દદૌ મુને ।
બ્રાહ્મણાન્ભોજયામાસ સોઽસઙ્ખ્યાન્ શ્રેયસે શિશોઃ ॥ ૯૮॥

અદિતિશ્ચ દિતિશ્ચાન્યા મુદં પ્રાપ પરન્તપ ।
સા સપુત્રા ચ સુચિરં તસ્થૌ તાતાલયે સદા ॥ ૯૯॥

તદીયં પુનરાખ્યાનં વક્ષ્યામિ તન્નિશામય ।
અથાભિમન્યુતનયે બ્રહ્મશાપઃ પરીક્ષિતે ॥ ૧૦૦॥

બભૂવ સહસા બ્રહ્મન્ દૈવદોષેણ કર્મણા ।
સપ્તાહે સમતીતે તુ તક્ષકસ્ત્વાં ચ ધક્ષ્યતિ ॥ ૧૦૧॥

શશાપ શ‍ૃઙ્ગી તત્રૈવ કૌશિક્યાશ્ચ જલેન વૈ ।
રાજા શ્રુત્વા તત્પ્રવૃત્તિં નિર્વાતસ્થાનમાગતઃ ॥ ૧૦૨॥

તત્ર તસ્થૌ ચ સપ્તાહં દેહરક્ષણતત્પરઃ ।
સપ્તાહે સમતીતે તુ ગચ્છન્તં તક્ષકં પથિ ॥ ૧૦૩॥

ધન્વન્તરિર્નૃપં ભોક્તું દદર્શ ગામુકઃ પથિ ।
તયોર્બભૂવ સંવાદઃ સુપ્રીતિશ્ચ પરસ્પરમ્ ॥ ૧૦૪॥

ધન્વન્તરિર્મણિં પ્રાપ તક્ષકઃ સ્વેચ્છયા દદૌ ।
સ યયૌ તં ગૃહીત્વા તુ સન્તુષ્ટો હૃષ્ટમાનસઃ ॥ ૧૦૫॥

તક્ષકો ભક્ષયામાસ નૃપં તં મઞ્ચકે સ્થિતમ્ ।
રાજા જગામ તરસા દેહં ત્યક્ત્વા પરત્ર ચ ॥ ૧૦૬॥

સંસ્કારં કારયામાસ પિતુર્વૈ જનમેજયઃ ।
રાજા ચકાર યજ્ઞં ચ સર્પસત્રં તતો મુને ॥ ૧૦૭॥

પ્રાણાંસ્તત્યાજ સર્પાણાં સમૂહો બ્રહ્મતેજસા ।
સ તક્ષકો વૈ ભીતસ્તુ મહેન્દ્રં શરણં યયૌ ॥ ૧૦૮॥

સેન્દ્રં ચ તક્ષકં હન્તું વિપ્રવર્ગઃ સમુદ્યતઃ ।
અથ દેવાશ્ચ સેન્દ્રાશ્ચ સઞ્જગ્મુર્મનસાન્તિકમ્ ॥ ૧૦૯॥

તાં તુષ્ટાવ મહેન્દ્રશ્ચ ભયકાતરવિહ્વલઃ ।
તત આસ્તીક આગત્ય યજ્ઞં ચ માતુરાજ્ઞયા ॥ ૧૧૦॥

મહેન્દ્રતક્ષકપ્રાણાન્યયાચે ભૂમિપં પરમ્ ।
દદૌ વરં નૃપશ્રેષ્ઠઃ કૃપયા બ્રાહ્મણાજ્ઞયા ॥ ૧૧૧॥

યજ્ઞં સમાપ્ય વિપ્રેભ્યો દક્ષિણાં ચ દદૌ મુદા ।
વિપ્રાશ્ચ મુનયો દેવા ગત્વા ચ મનસાન્તિકમ્ ॥ ૧૧૨॥

મનસાં પૂજયામાસુસ્તુષ્ટુવુશ્ચ પૃથક્ પૃથક્ ।
શક્રઃ સમ્ભૃતસમ્ભારો ભક્તિયુક્તઃ સદા શુચિઃ ॥ ૧૧૩॥

મનસાં પૂજયામાસ તુષ્ટાવ પરમાદરાત્ ।
નત્વા ષોડશોપચારં બલિં ચ તત્પ્રિયં તદા ॥ ૧૧૪॥

પ્રદદૌ પરિતુષ્ટશ્ચ બ્રહ્મવિષ્ણુશિવાજ્ઞયા ।
સમ્પૂજ્ય મનસાં દેવીં પ્રયયુઃ સ્વાલયં ચ તે ॥ ૧૧૫॥

ઇત્યેવં કથિતં સર્વં કિં ભૂયઃ શ્રોતુમિચ્છસિ ।
નારદ ઉવાચ ।
કેન સ્તોત્રેણ તુષ્ટાવ મહેન્દ્રો મનસાં સતીમ્ ॥ ૧૧૬॥

પૂજાવિધિક્રમં તસ્યાઃ શ્રોતુમિચ્છામિ તત્ત્વતઃ ।
શ્રીનારાયણ ઉવાચ ।
સુસ્નાતઃ શુચિરાચાન્તો ધૃત્વા ધૌતે ચ વાસસી ॥ ૧૧૭॥

રત્નસિંહાસને દેવીં વાસયામાસ ભક્તિતઃ ।
સ્વર્ગઙ્ગાયા જલેનૈવ રત્નકુમ્ભસ્થિતેન ચ ॥ ૧૧૮॥

સ્નાપયામાસ મનસાં મહેન્દ્રો વેદમન્ત્રતઃ ।
વાસસી વાસયામાસ વહ્નિશુદ્ધે મનોહરે ॥ ૧૧૯॥

સર્વાઙ્ગે ચન્દનં કૃત્વા પાદાર્ઘ્યં ભક્તિસંયુતઃ ।
ગણેશં ચ દિનેશં ચ વહ્નિં વિષ્ણું શિવં શિવામ્ ॥ ૧૨૦॥

સમ્પૂજ્યાદૌ દેવષટ્કં પૂજયામાસ તાં સતીમ્ ।
ૐ હ્રીં શ્રીં મનસાદેવ્યૈ સ્વાહેત્યેવં ચ મન્ત્રતઃ ॥ ૧૨૧॥

દશાક્ષરેણ મૂલેન દદૌ સર્વં યથોચિતમ્ ।
દત્ત્વા ષોડશોપચારાન્દુર્લભાન્દેવનાયકઃ ॥ ૧૨૨॥

પૂજયામાસ ભક્ત્યા ચ વિષ્ણુના પ્રેરિતો મુદા ।

વાદ્યં નાનાપ્રકારં ચ વાદયામાસ તત્ર વૈ ॥ ૧૨૩॥

બભૂવ પુષ્પવૃષ્ટિશ્ચ નભસો મનસોપરિ ।
દેવપ્રિયાજ્ઞયા તત્ર બ્રહ્મવિષ્ણુશિવાજ્ઞયા ॥ ૧૨૪॥

તુષ્ટાવ સાશ્રુનેત્રશ્ચ પુલકાઙ્કિતવિગ્રહઃ ।
પુરન્દર ઉવાચ ।
દેવિ ત્વાં સ્તોતુમિચ્છામિ સાધ્વીનાં પ્રવરાં વરામ્ ॥ ૧૨૫॥

પરાત્પરાં ચ પરમાં ન હિ સ્તોતું ક્ષમોઽધુના ।
સ્તોત્રાણાં લક્ષણં વેદે સ્વભાવાખ્યાનતત્પરમ્ ॥ ૧૨૬॥

ન ક્ષમઃ પ્રકૃતે વક્તું ગુણાનાં ગણનાં તવ ।
શુદ્ધસત્ત્વસ્વરૂપા ત્વં કોપહિંસાદિવર્જિતા ॥ ૧૨૭॥

ન ચ શક્તો મુનિસ્તેન ત્યક્તું યાચ્ઞા કૃતા યતઃ ।
ત્વં મયા પૂજિતા સાધ્વી જનની મે યથાદિતિઃ ॥ ૧૨૮॥

દયારૂપા ચ ભગિની ક્ષમારૂપા યથા પ્રસૂઃ ।
ત્વયા મે રક્ષિતાઃ પ્રાણાઃ પુત્રદારાઃ સુરેશ્વરિ ॥ ૧૨૯॥

અહં કરોમિ ત્વત્પૂજાં પ્રીતિશ્ચ વર્ધતાં સદા ।
નિત્યા યદ્યપિ પૂજ્યા ત્વં સર્વત્ર જગદમ્બિકે ॥ ૧૩૦॥

તથાપિ તવ પૂજાં ચ વર્ધયામિ સુરેશ્વરિ ।
યે ત્વામાષાઢસઙ્ક્રાન્ત્યાં પૂજયિષ્યન્તિ ભક્તિતઃ ॥ ૧૩૧॥

પઞ્ચમ્યાં મનસાખ્યાયાં માસાન્તે વા દિને દિને ।
પુત્રપૌત્રાદયસ્તેષાં વર્ધન્તે ચ ધનાનિ વૈ ॥ ૧૩૨॥

યશસ્વિનઃ કીર્તિમન્તો વિદ્યાવન્તો ગુણાન્વિતાઃ ।
યે ત્વાં ન પૂજયિષ્યન્તિ નિન્દન્ત્યજ્ઞાનતો જનાઃ ॥ ૧૩૩॥

લક્ષ્મીહીના ભવિષ્યન્તિ તેષાં નાગભયં સદા ।
ત્વં સ્વયં સર્વલક્ષ્મીશ્ચ વૈકુણ્ઠે કમલાલયા ॥ ૧૩૪॥

નારાયણાંશો ભગવાઞ્જરત્કારુર્મુનીશ્વરઃ ।
તપસા તેજસા ત્વાં ચ મનસા સસૃજે પિતા ॥ ૧૩૫॥

અસ્માકં રક્ષણાયૈવ તેન ત્વં મનસાભિધા ।
મનસાદેવિ શક્ત્યા ત્વં સ્વાત્મના સિદ્ધયોગિની ॥ ૧૩૬॥

તેન ત્વં મનસાદેવી પૂજિતા વન્દિતા ભવ ।
યે ભક્ત્યા મનસાં દેવાઃ પૂજયન્ત્યનિશં ભૃશમ્ ॥ ૧૩૭॥

તેન ત્વાં મનસાં દેવીં પ્રવદન્તિ મનીષિણઃ ।
સત્યસ્વરૂપા દેવિ ત્વં શશ્વત્સત્યનિષેવણાત્ ॥ ૧૩૮॥

યો હિ ત્વાં ભાવયેન્નિત્યં સ ત્વાં પ્રાપ્નોતિ તત્પરઃ ।
ઇન્દ્રશ્ચ મનસાં સ્તુત્વા ગૃહીત્વા ભગિનીવરમ્ ॥ ૧૩૯॥

પ્રજગામ સ્વભવનં ભૂષયા સપરિચ્છદમ્ ।
પુત્રેણ સાર્ધં સા દેવી ચિરં તસ્થૌ પિતુર્ગૃહે ॥ ૧૪૦॥

ભ્રાતૃભિઃ પૂજિતા શશ્વન્માન્યા વન્દ્યા ચ સર્વતઃ ।
ગોલોકાત્સુરભિર્બ્રહ્મન્ તત્રાગત્ય સુપૂજિતામ્ ॥ ૧૪૧॥

તાં સ્નાપયિત્વા ક્ષીરેણ પૂજયામાસ સાદરમ્ ।
જ્ઞાનં ચ કથયામાસ ગોપ્યં સર્વં સુદુર્લભમ્ ॥ ૧૪૨॥

તયા દેવૈઃ પૂજિતા સા સ્વર્લોકં ચ પુનર્યયૌ ।
ઇન્દ્રસ્તોત્રં પુણ્યબીજં મનસાં પૂજયેત્પઠેત્ ॥ ૧૪૩॥

તસ્ય નાગભયં નાસ્તિ તસ્ય વંશોદ્ભવસ્ય ચ ।
વિષં ભવેત્સુધાતુલ્યં સિદ્ધસ્તોત્રો યદા ભવેત્ ॥ ૧૪૪॥

પઞ્ચલક્ષજપેનૈવ સિદ્ધસ્તોત્રો ભવેન્નરઃ ।
સર્પશાયી ભવેત્સોઽપિ નિશ્ચિતં સર્પવાહનઃ ॥ ૧૪૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે
મનસોપાખ્યાનવર્ણનં નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૮॥

## ૯.૪૯ એકોનપઞ્ચાશત્તમોઽધ્યાયઃ । સુરભ્યુપાખ્યાનવર્ણનમ્ ।

નારદ ઉવાચ ।
કા વા સા સુરભિર્દેવી ગોલોકાદાગતા ચ યા ।
તજ્જન્મચરિતં બ્રહ્મઞ્છ્રોતુમિચ્છામિ યત્નતઃ ॥ ૧॥

શ્રીનારાયણાય ઉવાચ ।

ગવામધિષ્ઠાતૃદેવી ગવામાદ્યા ગવાં પ્રસૂઃ ।
ગવાં પ્રધાના સુરભિર્ગોલોકે સા સમુદ્ભવા ॥ ૨॥

સર્વાદિસૃષ્ટેશ્ચરિતં કથયામિ નિશામય ।
બભૂવ તેન તજ્જન્મ પુરા વૃન્દાવને વને ॥ ૩॥

એકદા રાધિકાનાથો રાધયા સહ કૌતુકી ।
ગોપાઙ્ગનાપરિવૃતઃ પુણ્યં વૃન્દાવનં યયૌ ॥ ૪॥

સહસા તત્ર રહસિ વિજહાર સ કૌતુકાત્ ।
બભૂવ ક્ષીરપાનેચ્છા તસ્ય સ્વેચ્છામયસ્ય ચ ॥ ૫॥

સસૃજે સુરભિં દેવીં લીલયા વામપાર્શ્વતઃ ।
વત્સયુક્તાં દુગ્ધવતીં વત્સો નામ મનોરથઃ ॥ ૬॥

દૃષ્ટ્વા સવત્સાં શ્રીદામા નવભાણ્ડે દુદોહ ચ ।
ક્ષીરં સુધાતિરિક્તં ચ જન્મમૃત્યુજરાહરમ્ ॥ ૭॥

તદુત્થં ચ પયઃ સ્વાદુ પપૌ ગોપીપતિઃ સ્વયમ્ ।
સરો બભૂવ પયસાં ભાણ્ડવિસ્રંસનેન ચ ॥ ૮॥

દીર્ઘં ચ વિસ્તૃતં ચૈવ પરિતઃ શતયોજનમ્ ।
ગોલોકેઽયં પ્રસિદ્ધશ્ચ સોઽપિ ક્ષીરસરોવરઃ ॥ ૯॥

ગોપિકાનાં ચ રાધાયાઃ ક્રીડાવાપી બભૂવ સા ।
રત્નેન્દ્રરચિતા પૂર્ણં ભૂતા ચાપીશ્વરેચ્છયા ॥ ૧૦॥

બભૂવ કામધેનૂનાં સહસા લક્ષકોટયઃ ।
યાવન્તસ્તત્ર ગોપાશ્ચ સુરભ્યા લોમકૂપતઃ ॥ ૧૧॥

તાસાં પુત્રાશ્ચ બહવઃ સમ્બભૂવુરસઙ્ખ્યકાઃ ।
કથિતા ચ ગવાં સૃષ્ટિસ્તયા ચ પૂરિતં જગત્ ॥ ૧૨॥

પૂજાં ચકાર ભગવાન્ સુરભ્યાશ્ચ પુરા મુને ।
તતો બભૂવ તત્પૂજા ત્રિષુ લોકેષુ દુર્લભા ॥ ૧૩॥

દીપાન્વિતાપરદિને શ્રીકૃષ્ણસ્યાજ્ઞયા હરેઃ ।
બભૂવ સુરભિઃ પૂજ્યા ધર્મવક્ત્રાદિદં શ્રુતમ્ ॥ ૧૪॥

ધ્યાનં સ્તોત્રં મૂલમન્ત્રં યદ્યત્પૂજાવિધિક્રમમ્ ।
વેદોક્તં ચ મહાભાગ નિબોધ કથયામિ તે ॥ ૧૫॥

ૐ સુરભ્યૈ નમ ઇતિ મન્ત્રસ્તસ્યાઃ ષડક્ષરઃ ।
સિદ્ધો લક્ષજપેનૈવ ભક્તાનાં કલ્પપાદપઃ ॥ ૧૬॥

ધ્યાનં યજુર્વેદગીતં તસ્યાઃ પૂજા ચ સર્વતઃ ।
ઋદ્ધિદા વૃદ્ધિદા ચૈવ મુક્તિદા સર્વકામદા ॥ ૧૭॥

લક્ષ્મીસ્વરૂપાં પરમાં રાધાસહચરીં પરામ્ ।
ગવામધિષ્ઠાતૃદેવીં ગવામાદ્યાં ગવાં પ્રસૂમ્ ॥ ૧૮॥

પવિત્રરૂપાં પૂતાં ચ ભક્તાનાં સર્વકામદામ્ ।
યયા પૂતં સર્વવિશ્વં તાં દેવીં સુરભિં ભજે ॥ ૧૯॥

ઘટે વા ધેનુશિરસિ બન્ધસ્તમ્ભે ગવામપિ ।
શાલગ્રામે જલાગ્નૌ વા સુરભિં પૂજયેદ્ દ્વિજઃ ॥ ૨૦॥

દીપાન્વિતાપરદિને પૂર્વાહ્ને ભક્તિસંયુતઃ ।
યઃ પૂજયેચ્ચ સુરભિં સ ચ પૂજ્યો ભવેદ્ભુવિ ॥ ૨૧॥

એકદા ત્રિષુ લોકેષુ વારાહે વિષ્ણુમાયયા ।
ક્ષીરં જહાર સુરભિશ્ચિન્તિતાશ્ચ સુરાદયઃ ॥ ૨૨॥

તે ગત્વા બ્રહ્મલોકે ચ બ્રહ્માણં તુષ્ટુવુસ્તદા ।
તદાજ્ઞયા ચ સુરભિં તુષ્ટાવ પાકશાસનઃ ॥ ૨૩॥

પુરન્દર ઉવાચ ।
નમો દેવ્યૈ મહાદેવ્યૈ સુરભ્યૈ ચ નમો નમઃ ।
ગવાં બીજસ્વરૂપાયૈ નમસ્તે જગદમ્બિકે ॥ ૨૪॥

નમો રાધાપ્રિયાયૈ ચ પદ્માંશાયૈ નમો નમઃ ।
નમઃ કૃષ્ણપ્રિયાયૈ ચ ગવાં માત્રે નમો નમઃ ॥ ૨૫॥

કલ્પવૃક્ષસ્વરૂપાયૈ સર્વેષાં સતતં પરે ।
ક્ષીરદાયૈ ધનદાયૈ બુદ્ધિદાયૈ નમો નમઃ ॥ ૨૬॥

શુભાયૈ ચ સુભદ્રાયૈ ગોપ્રદાયૈ નમો નમઃ ।
યશોદાયૈ કીર્તિદાયૈ ધર્મદાયૈ નમો નમઃ ॥ ૨૭॥

સ્તોત્રશ્રવણમાત્રેણ તુષ્ટા હૃષ્ટા જગત્પ્રસૂઃ ।
આવિર્બભૂવ તત્રૈવ બ્રહ્મલોકે સનાતની ॥ ૨૮॥

મહેન્દ્રાય વરં દત્ત્વા વાઞ્છિતં ચાપિ દુર્લભમ્ ।
જગામ સા ચ ગોલોકં યયુર્દેવાદયો ગૃહમ્ ॥ ૨૯॥

બભૂવ વિશ્વં સહસા દુગ્ધપૂર્ણં ચ નારદ ।
દુગ્ધં ઘૃતં તતો યજ્ઞસ્તતઃ પ્રીતિઃ સુરસ્ય ચ ॥ ૩૦॥

ઇદં સ્તોત્રં મહાપુણ્યં ભક્તિયુક્તશ્ચ યઃ પઠેત્ ।
સ ગોમાન્ ધનવાંશ્ચૈવ કીર્તિમાન્પુત્રવાંસ્તથા ॥ ૩૧॥

સ સ્નાતઃ સર્વતીર્થેષુ સર્વયજ્ઞેષુ દીક્ષિતઃ ।
ઇહ લોકે સુખં ભુક્ત્વા યાત્યન્તે કૃષ્ણમન્દિરે ॥ ૩૨॥

સુચિરં નિવસેત્તત્ર કરોતિ કૃષ્ણસેવનમ્ ।
ન પુનર્ભવનં તત્ર બ્રહ્મપુત્રો ભવેત્તતઃ ॥ ૩૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે સુરભ્યુપાખ્યાનવર્ણનં
નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૯.૪૯॥

## ૯.૫૦ પઞ્ચાશત્તમોઽધ્યાયઃ । દેવ્યા આવરણપૂજાવિધિવર્ણનમ્ ।

નારદ ઉવાચ ।
શ્રુતં સર્વમુપાખ્યાનં પ્રકૃતીનાં યથાતથમ્ ।
યચ્છ્રુત્વા મુચ્યતે જન્તુર્જન્મસંસારબન્ધનાત્ ॥ ૧॥

અધુના શ્રોતુમિચ્છામિ રહસ્યં વેદગોપિતમ્ ।
રાધાયાશ્ચૈવ દુર્ગાયા વિધાનં શ્રુતિચોદિતમ્ ॥ ૨॥

મહિમા વર્ણિતોઽતીવ ભવતા પરયોર્દ્વયોઃ ।
શ્રુત્વા તં તદ્ગતં ચેતો ન કસ્ય સ્યાન્મુનીશ્વર ॥ ૩॥

યયોરંશો જગત્સર્વં યન્નિયમ્યં ચરાચરમ્ ।
યયોર્ભક્ત્યા ભવેન્મુક્તિસ્તદ્વિધાનં વદાધુના ॥ ૪॥

શ્રીનારાયણ ઉવાચ ।
શ ृણુ નારદ વક્ષ્યામિ રહસ્યં શ્રુતિચોદિતમ્ ।
યન્ન કસ્યાપિ ચાખ્યાતં સારાત્સારં પરાત્પરમ્ ॥ ૫॥

શ્રુત્વા પરસ્મૈ નો વાચ્યં યતોઽતીવ રહસ્યકમ્ ।

મૂલપ્રકૃતિરૂપિણ્યાઃ સંવિદો જગદુદ્ભવે ॥ ૬॥

પ્રાદુર્ભૂતં શક્તિયુગ્મં પ્રાણબુદ્ધ્યધિદૈવતમ્ ।
જીવાનાં ચૈવ સર્વેષાં નિયન્તૃપ્રેરકં સદા ॥ ૭॥

તદધીનં જગત્સર્વં વિરાડાદિચરાચરમ્ ।
યાવત્તયોઃ પ્રસાદો ન તાવન્મોક્ષો હિ દુર્લભઃ ॥ ૮॥

તતસ્તયોઃ પ્રસાદાર્થં નિત્યં સેવેત તદ્દ્વયમ્ ।
તત્રાદૌ રાધિકામન્ત્રં શૃણુ નારદ ભક્તિતઃ ॥ ૯॥

બ્રહ્મવિષ્ણ્વાદિભિર્નિત્યં સેવિતો યઃ પરાત્પરઃ ।
શ્રીરાધેતિ ચતુર્થ્યન્તં વહ્નેર્જાયા તતઃ પરમ્ ॥ ૧૦॥

ષડક્ષરો મહામન્ત્રો ધર્માદ્યર્થપ્રકાશકઃ ।
માયાબીજાદિકશ્ચાયં વાઞ્છાચિન્તામણિઃ સ્મૃતઃ ॥ ૧૧॥

વક્ત્રકોટિસહસ્રૈસ્તુ જિહ્વાકોટિશતૈરપિ ।
એતન્મન્ત્રસ્ય માહાત્મ્યં વર્ણિતું નૈવ શક્યતે ॥ ૧૨॥

જગ્રાહ પ્રથમં મન્ત્રં શ્રીકૃષ્ણો ભક્તિતત્પરઃ ।
ઉપદેશાન્મૂલદેવ્યા ગોલોકે રાસમણ્ડલે ॥ ૧૩॥

વિષ્ણુસ્તેનોપદિષ્ટસ્તુ તેન બ્રહ્મા વિરાટ્ તથા ।
તેન ધર્મસ્તેન ચાહમિત્યેષા હિ પરમ્પરા ॥ ૧૪॥

અહં જપામિ તં મન્ત્રં તેનાહમૃષિરીડિતઃ ।
બ્રહ્માદ્યાઃ સકલા દેવા નિત્યં ધ્યાયન્તિ તાં મુદા ॥ ૧૫॥

કૃષ્ણાર્ચાયાં નાધિકારો યતો રાધાર્ચનં વિના ।
વૈષ્ણવૈઃ સકલૈસ્તસ્માત્કર્તવ્યં રાધિકાર્ચનમ્ ॥ ૧૬॥

કૃષ્ણપ્રાણાધિદેવી સા તદધીનો વિભુર્યતઃ ।
રાસેશ્વરી તસ્ય નિત્યં તયા હીનો ન તિષ્ઠતિ ॥ ૧૭॥

રાધ્નોતિ સકલાન્કામાંસ્તસ્માદ્રાધેતિ કીર્તિતા ।
અત્રોક્તાનાં મનૂનાં ચ ઋષિરસ્મ્યહમેવ ચ ॥ ૧૮॥

છન્દશ્ચ દેવી ગાયત્રી દેવતાત્ર ચ રાધિકા ।
તારો બીજં શક્તિબીજં શક્તિસ્તુ પરિકીર્તિતા ॥ ૧૯॥

મૂલાવૃત્ત્યા ષડઙ્ગાનિ કર્તવ્યાનીતરત્ર ચ ।
અથ ધ્યાયેન્મહાદેવીં રાધિકાં રાસનાયિકામ્ ॥ ૨૦॥

પૂર્વોક્તરીત્યા તુ મુને સામવેદે વિગીતયા ।
શ્વેતચમ્પકવર્ણાભાં શરદિન્દુસમાનનામ્ ॥ ૨૧॥

કોટિચન્દ્રપ્રતીકાશાં શરદમ્ભોજલોચનામ્ ।
બિમ્બાધરાં પૃથુશ્રોણીં કાઞ્ચીયુતનિતમ્બિનીમ્ ॥ ૨૨॥

કુન્દપઙ્ક્તિસમાનાભદન્તપઙ્ક્તિવિરાજિતામ્ ।
ક્ષૌમામ્બરપરીધાનાં વહ્નિશુદ્ધાંશુકાન્વિતામ્ ॥ ૨૩॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યાં કરિકુમ્ભયુગસ્તનીમ્ ।
સદા દ્વાદશવર્ષીયાં રત્નભૂષણભૂષિતામ્ ॥ ૨૪॥

શ‍ૃઙ્ગારસિન્ધુલહરીં ભક્તાનુગ્રહકાતરામ્ ।
મલ્લિકામાલતીમાલાકેશપાશવિરાજિતામ્ ॥ ૨૫॥

સુકુમારાઙ્ગલતિકાં રાસમણ્ડલમધ્યગામ્ ।
વરાભયકરાં શાન્તાં શશ્વત્સુસ્થિરયૌવનામ્ ॥ ૨૬॥

રત્નસિંહાસનાસીનાં ગોપીમણ્ડલનાયિકામ્ ।
કૃષ્ણપ્રાણાધિકાં વેદબોધિતાં પરમેશ્વરીમ્ ॥ ૨૭॥

એવં ધ્યાત્વા તતો બાહ્યે શાલગ્રામે ઘટેઽથવા ।
યન્ત્રે વાષ્ટદલે દેવીં પૂજયેત્તુ વિધાનતઃ ॥ ૨૮॥

આવાહ્ય દેવીં તત્પશ્ચાદાસનાદિ પ્રદીયતામ્ ।
મૂલમન્ત્રં સમુચ્ચાર્ય ચાસનાદીનિ કલ્પયેત્ ॥ ૨૯॥

પાદ્યં તુ પાદયોર્દદ્યાન્મસ્તકેઽર્ઘ્યં સમીરિતમ્ ।
મુખે ત્વાચમનીયં સ્યાત્રિવારં મૂલવિદ્યયા ॥ ૩૦॥

મધુપર્કં તતો દદ્યાદેકાં ગાં ચ પયસ્વિનીમ્ ।
તતો નયેત્સ્નાનશાલાં તાં ચ તત્રૈવ ભાવયેત્ ॥ ૩૧॥

અભ્યઙ્ગાદિસ્નાનવિધિં કલ્પયિત્વાથ વાસસી ।
તતશ્ચ ચન્દનં દદ્યાન્નાનાલઙ્કારપૂર્વકમ્ ॥ ૩૨॥

પુષ્પમાલા બહુવિધાસ્તુલસીમઞ્જરીયુતાઃ ।
પારિજાતપ્રસૂનાનિ શતપત્રાદિકાનિ ચ ॥ ૩૩॥

તતઃ કુર્યાત્પવિત્રં તત્પરિવારાર્ચનં વિભોઃ ।
અગ્નીશાસુરવાયવ્યમધ્યે દિક્ષ્વઙ્ગપૂજનમ્ ॥ ૩૪॥

કૃત્વા પશ્ચાદષ્ટદલે દક્ષિણાવર્તતોઽગ્રતઃ ।
માલાવતીમગ્રદલે વહ્નિકોણે ચ માધવીમ્ ॥ ૩૫॥

રત્નમાલાં દક્ષિણે ચ નૈરૃત્યે તુ સુશીલકામ્ ।
પશ્ચાદ્દલે શશિકલાં પૂજયેન્મતિમાન્નરઃ ॥ ૩૬॥

મારુતે પારિજાતાં ચાપ્યુત્તરે ચ પરાવતીમ્ ।
ઈશાનકોણે સમ્પૂજ્યા સુન્દરી પ્રિયકારિણી ॥ ૩૭॥

બ્રાહ્મ્યાદયસ્તુ તદ્બાહ્યેઽપ્યાશાપાલાંસ્તુ ભૂપુરે ।
વજ્રાદિકાન્યાયુધાનિ દેવીમિત્થં પ્રપૂજયેત્ ॥ ૩૮॥

તતો દેવીં સાવરણાં ગન્ધાદ્યૈરુપચારકૈઃ ।
રાજોપચારસહિતૈઃ પૂજયેન્મતિમાન્નરઃ ॥ ૩૯॥

તતઃ સ્તુવીત દેવેશીં સ્તોત્રૈર્નામસહસ્રકૈઃ ।
સહસ્રસઙ્ખ્યં ચ જપં નિત્યં કુર્યાત્પ્રયત્નતઃ ॥ ૪૦॥

ય એવં પૂજયેદ્દેવીં રાધાં રાસેશ્વરીં પરામ્ ।
સ ભવેદ્વિષ્ણુતુલ્યસ્તુ ગોલોકં યાતિ સન્તતમ્ ॥ ૪૧॥

યઃ કાર્તિક્યાં પૌર્ણમાસ્યાં રાધાજન્મોત્સવ બુધઃ ।
કુરુતે તસ્ય સાન્નિધ્યં દદ્યાદ્રાસેશ્વરી પરા ॥ ૪૨॥

કેનચિત્કારણેનૈવ રાધા વૃન્દાવને વને ।
વૃષભાનુસુતા જાતા ગોલોકસ્થાયિની સદા ॥ ૪૩॥

અત્રોક્તાનાં તુ મન્ત્રાણાં વર્ણસઙ્ખ્યાવિધાનતઃ ।
પુરશ્ચરણકર્મોક્તં દશાંશં હોમમાચરેત્ ॥ ૪૪॥

તિલૈસ્ત્રિસ્વાદુસંયુક્તૈર્જુહુયાદ્ભક્તિભાવતઃ ।
નારદ ઉવાચ ।
સ્તોત્રં વદ મુને સમ્યગ્યેન દેવી પ્રસીદતિ ॥ ૪૫॥

શ્રીનારાયણ ઉવાચ ।
નમસ્તે પરમેશાનિ રાસમણ્ડલવાસિનિ ।

રાસેશ્વરિ નમસ્તેઽસ્તુ કૃષ્ણપ્રાણાધિકપ્રિયે ॥ ૪૬॥

નમસ્ત્રૈલોક્યજનનિ પ્રસીદ કરુણાર્ણવે ।
બ્રહ્મવિષ્ણ્વાદિભિર્દેવૈર્વન્દ્યમાનપદામ્બુજે ॥ ૪૭॥

નમઃ સરસ્વતીરૂપે નમઃ સાવિત્રિ શઙ્કરિ ।
ગઙ્ગાપદ્માવતીરૂપે ષષ્ઠિ મઙ્ગલચણ્ડિકે ॥ ૪૮॥

નમસ્તે તુલસીરૂપે નમો લક્ષ્મીસ્વરૂપિણિ ।
નમો દુર્ગે ભગવતિ નમસ્તે સર્વરૂપિણિ ॥ ૪૯॥

મૂલપ્રકૃતિરૂપાં ત્વાં ભજામઃ કરુણાર્ણવામ્ ।
સંસારસાગરાદસ્માનુદ્ધરામ્બ દયાં કુરુ ॥ ૫૦॥

ઇદં સ્તોત્રં ત્રિસન્ધ્યં યઃ પઠેદ્રાધાં સ્મરન્નરઃ ।
ન તસ્ય દુર્લભં કિઞ્ચિત્કદાચિચ્ચ ભવિષ્યતિ ॥ ૫૧॥

દેહાન્તે ચ વસેન્નિત્યં ગોલોકે રાસમણ્ડલે ।
ઇદં રહસ્યં પરમં ન ચાખ્યેયં તુ કસ્યચિત્ ॥ ૫૨॥

અધુના શ‍ૃણુ વિપ્રેન્દ્ર દુર્ગાદેવ્યા વિધાનકમ્ ।
યસ્યાઃ સ્મરણમાત્રેણ પલાયન્તે મહાપદઃ ॥ ૫૩॥

એનાં ન ભજતે યો હિ તાદૃઙ્નાસ્ત્યેવ કુત્રચિત્ ।
સર્વોપાસ્યા સર્વમાતા શૈવી શક્તિર્મહાદ્ભુતા ॥ ૫૪॥

સર્વબુદ્ધ્યાધિદેવીયમન્તર્યામિસ્વરૂપિણી ।
દુર્ગસઙ્કટહન્ત્રીતિ દુર્ગેતિ પ્રથિતા ભુવિ ॥ ૫૫॥

વૈષ્ણવાનાં ચ શૈવાનામુપાસ્યેયં ચ નિત્યશઃ ।
મૂલપ્રકૃતિરૂપા સા સૃષ્ટિસ્થિત્યન્તકારિણી ॥ ૫૬॥

તસ્યા નવાક્ષરં મન્ત્રં વક્ષ્યે મન્ત્રોત્તમોત્તમમ્ ।
વાગ્ભવં શમ્ભુવનિતા કામબીજં તતઃ પરમ્ ॥ ૫૭॥

ચામુણ્ડાયૈ પદં પશ્ચાદ્વિચ્ચે ઇત્યક્ષરદ્વયમ્ ।
નવાક્ષરો મનુઃ પ્રોક્તો ભજતાં કલ્પપાદપઃ ॥ ૫૮॥

બ્રહ્મવિષ્ણુમહેશાના ઋષયોઽસ્ય પ્રકીર્તિતાઃ ।
છન્દાંસ્યુક્તાનિ સતતં ગાયત્ર્યુષ્ણિગનુષ્ટુભઃ ॥ ૫૯॥

મહાકાલી મહાલક્ષ્મીઃ સરસ્વત્યપિ દેવતાઃ ।
સ્યાદ્રક્તદન્તિકાબીજં દુર્ગા ચ ભ્રામરી તથા ॥ ૬૦॥

નન્દાશાકમ્ભરીદેવ્યૌ ભીમા ચ શક્તયઃ સ્મૃતાઃ ।
ધર્માર્થકામમોક્ષેષુ વિનિયોગ ઉદાહૃતઃ ॥ ૬૧॥

ઋષિચ્છન્દો દૈવતાનિ મૌલૌ વક્ત્રે હૃદિ ન્યસેત્ ।
સ્તનયોઃ શક્તિબીજાનિ ન્યસેત્સર્વાર્થસિદ્ધયે ॥ ૬૨॥

બીજત્રયૈશ્ચતુર્ભિશ્ચ દ્વાભ્યાં સર્વેણ ચૈવ હિ ।
ષડઙ્ગાનિ મનોઃ કુર્યાજ્જાતિયુક્તાનિ દેશિકઃ ॥ ૬૩॥

શિખાયાં લોચનદ્વન્દ્વે શ્રુતિનાસાનનેષુ ચ ।
ગુદે ન્યસેન્મન્ત્રવર્ણાન્સર્વેણ વ્યાપકં ચરેત્ ॥ ૬૪॥

ખડ્ગચક્રગદાબાણચાપાનિ પરિઘં તથા ।
શૂલં ભુશુણ્ડીં ચ શિરઃ શઙ્ખં સન્દધતીં કરૈઃ ॥ ૬૫॥

મહાકાલીં ત્રિનયનાં નાનાભૂષણભૂષિતામ્ ।
નીલાઞ્જનસમપ્રખ્યાં દશપાદાનનાં ભજે ॥ ૬૬॥

મધુકૈટભનાશાર્થં યાં તુષ્ટાવામ્બુજાસનઃ ।
એવં ધ્યાયેન્મહાકાલીં કામબીજસ્વરૂપિણીમ્ ॥ ૬૭॥

અક્ષમાલાં ચ પરશું ગદેષુકુલિશાનિ ચ ।
પદ્મં ધનુષ્કુણ્ડિકાં ચ દણ્ડં શક્તિમસિં તથા ॥ ૬૮॥

ચર્મામ્બુજં તથા ઘણ્ટાં સુરાપાત્રં ચ શૂલકમ્ ।
પાશં સુદર્શનં ચૈવ દધતીમરુણપ્રભામ્ ॥ ૬૯॥

રક્તામ્બુજાસનગતાં માયાબીજસ્વરૂપિણીમ્ ।
મહાલક્ષ્મીં ભજેદેવં મહિષાસુરમર્દિનીમ્ ॥ ૭૦॥

ઘણ્ટાશૂલે હલં શઙ્ખં મુસલં ચ સુદર્શનમ્ ।
ધનુર્બાણાન્ હસ્તપદ્મૈર્દધાનાં કુન્દસન્નિભામ્ ॥ ૭૧॥

શુમ્ભાદિદૈત્યસંહર્ત્રીં વાણીબીજસ્વરૂપિણીમ્ ।
મહાસરસ્વતીં ધ્યાયેત્સચ્ચિદાનન્દવિગ્રહામ્ ॥ ૭૨॥

યન્ત્રમસ્યાઃ શ‍ૃણુ પ્રાજ્ઞ ત્ર્યસ્રં ષટ્કોણસંયુતમ્ ।
તતોઽષ્ટદલપદ્મં ચ ચતુર્વિંશતિપત્રકમ્ ॥ ૭૩॥

ભૂગૃહેણ સમાયુક્તં યન્ત્રમેવં વિચિન્તયેત્ ।
શાલગ્રામે ઘટે વાપિ યન્ત્રે વા પ્રતિમાસુ વા ॥ ૭૪॥

બાણલિઙ્ગેઽથવા સૂર્યે યજેદ્દેવીમનન્યધીઃ ।
જયાદિશક્તિસંયુક્તે પીઠે દેવીં પ્રપૂજયેત્ ॥ ૭૫॥

પૂર્વકોણે સરસ્વત્યા સહિતં પદ્મજં યજેત્ ।
શ્રિયા સહ હરિં તત્ર નૈરૃતે કોણકે યજેત્ ॥ ૭૬॥

પાર્વત્યા સહિતં શમ્ભું વાયુકોણે સમર્ચયેત્ ।
દેવ્યા ઉત્તરતઃ પૂજ્યઃ સિંહો વામે મહાસુરમ્ ॥ ૭૭॥

મહિષં પૂજયેદન્તે ષટ્કોણેષુ યજેત્ક્રમાત્ ।
નન્દજાં રક્તદન્તાં ચ તથા શાકમ્ભરીં શિવામ્ ॥ ૭૮॥

દુર્ગાં ભીમાં ભ્રામરીં ચ તતો વસુદલેષુ ચ ।
બ્રાહ્મીં માહેશ્વરીં ચૈવ કૌમારીં વૈષ્ણવીં તથા ॥ ૭૯॥

વારાહીં નારસિંહીં ચ ઐન્દ્રીં ચામુણ્ડકાં તથા ।
પૂજયેચ્ચ તતઃ પશ્ચાત્તત્ત્વપત્રેષુ પૂર્વતઃ ॥ ૮૦॥

વિષ્ણુમાયાં ચેતનાં ચ બુદ્ધિં નિદ્રાં ક્ષુધાં તથા ।
છાયાં શક્તિં પરાં તૃષ્ણાં શાન્તિં જાતિં ચ લજ્જયા ॥ ૮૧॥

ક્ષાન્તિં શ્રદ્ધાં કીર્તિલક્ષ્મ્યૌ ધૃતિં વૃત્તિં શ્રુતિં સ્મૃતિમ્ ।
દયાં તુષ્ટિં તતઃ પુષ્ટિં માતૃભ્રાન્તી ઇતિ ક્રમાત્ ॥ ૮૨॥

તતો ભૂપુરકોણેષુ ગણેશં ક્ષેત્રપાલકમ્ ।
વટુકં યોગિનીશ્ચાપિ પૂજયેન્મતિમાન્નરઃ ॥ ૮૩॥

ઇન્દ્રાદ્યાનપિ તદ્બાહ્યે વજ્રાદ્યાયુધસંયુતાન્ ।
પૂજયેદનયા રીત્યા દેવીં સાવરણાં તતઃ ॥ ૮૪॥

રાજોપચારાન્વિવિધાન્દદ્યાદમ્બાપ્રતુષ્ટયે ।
તતો જપેન્નવાર્ણં ચ મન્ત્રં મન્ત્રાર્થપૂર્વકમ્ ॥ ૮૫॥

તતઃ સપ્તશતીસ્તોત્રં દેવ્યા અગ્રે તુ સમ્પઠેત્ ।
નાનેન સદૃશં સ્તોત્રં વિદ્યતે ભુવનત્રયે ॥ ૮૬॥

તતશ્ચાનેન દેવેશીં તોષયેત્ પ્રત્યહં નરઃ ।

ધર્માર્થકામમોક્ષાણામાલયં જાયતે નરઃ ॥ ૮૭॥

ઇતિ તે કથિતં વિપ્ર શ્રીદુર્ગાયા વિધાનકમ્ ।
કૃતાર્થતા યેન ભવેત્તદેતત્કથિતં તવ ॥ ૮૮॥

સર્વે દેવા હરિબ્રહ્મપ્રમુખા મનવસ્તથા ।
મુનયો જ્ઞાનનિષ્ઠાશ્ચ યોગિનશ્ચાશ્રમાસ્તથા ॥ ૮૯॥

લક્ષ્મ્યાદયસ્તથા દેવ્યઃ સર્વે ધ્યાયન્તિ તાં શિવામ્ ।
તદૈવ જન્મસાફલ્યં દુર્ગાસ્મરણમસ્તિ ચેત્ ॥ ૯૦॥

ચતુર્દશાપિ મનવો ધ્યાત્વા ચરણપઙ્કજમ્ ।
મનુત્વં પ્રાપ્તવન્તશ્ચ દેવાઃ સ્વં સ્વં પદં તથા ॥ ૯૧॥

તદેતત્સર્વમાખ્યાતં રહસ્યાતિરહસ્યકમ્ ।
પ્રકૃતીનાં પઞ્ચકસ્ય તદંશાનાં ચ વર્ણનમ્ ॥ ૯૨॥

શ્રુત્વૈતન્મનુજો નિત્યં પુરુષાર્થચતુષ્ટયમ્ ।
લભતે નાત્ર સન્દેહઃ સત્યં સત્યં મયોદિતમ્ ॥ ૯૩॥

અપુત્રો લભતે પુત્રં વિદ્યાર્થી પ્રાપ્નુયાચ્ચ તામ્ ।
યં યં કામં સ્મરેદ્વાપિ તં તં શ્રુત્વા સમાપ્નુયાત્ ॥ ૯૪॥

નવરાત્રે પઠેદેતદ્દેવ્યગ્રે તુ સમાહિતઃ ।
પરિતુષ્ટા જગદ્ધાત્રી ભવત્યેવ હિ નિશ્ચિતમ્ ॥ ૯૫॥

નિત્યમેકૈકમધ્યાયં પઠેદ્યઃ પ્રત્યહં નરઃ ।
તસ્ય વશ્યા ભવેદ્દેવી દેવીપ્રિયકરો હિ સઃ ॥ ૯૬॥

શકુનાંશ્ચ પરીક્ષેત નિત્યમસ્મિન્યથાવિધિ ।
કુમારીદિવ્યહસ્તેન યદ્વા બટુકરામ્બુજાત્ ॥ ૯૭॥

મનોરથં તુ સઙ્કલ્પ્ય પુસ્તકં પૂજયેત્તતઃ ।
દેવીં ચ જગદીશાનીં પ્રણમેચ્ચ પુનઃ પુનઃ ॥ ૯૮॥

સુસ્નાતાં કન્યકાં તત્રાનીયાભ્યર્ચ્ય યથાવિધિ ।
શલાકાં રોપયેન્મધ્યે તથા સ્વર્ણેન નિર્મિતામ્ ॥ ૯૯॥

શુભં વાપ્યશુભં તત્ર યદાયાતિ ચ તદ્ભવેત્ ।
ઉદાસીનેઽપ્યુદાસીનં કાર્યં ભવતિ નિશ્ચિતમ્ ॥ ૧૦૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં નવમસ્કન્ધે દેવ્યા
આવરણપૂજાવિધિવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૯.૫૦॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે નવમસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*9 Shrimaddevibhagavatamahapurane Navamah Skandhah*
pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*